श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाश्चतुर्विंशं पुष्पम्

कर्मकाण्डभास्करः

(पूर्वाङ्ग-संस्कार-वर्षकृत्य-श्राद्धखण्डाख्यभागचतुष्टयात्मकः)

लेखकः

पं. श्रीदधिराममरासिनिः

सम्पादकसन्दोहः

प्रा. डा. श्रीवेणीमाधवढकालः - संयोजकः
सहप्रा. डा. श्रीदुर्गादत्तशर्मोपाध्यायः - सदस्यः
उपप्रा. श्रीमोतीलालशर्मरिजालः - सदस्यः

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
वेलझुण्डी, दाङ्

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
वेलझुण्डी, दाङ्

प्रकाशनम्
२०५४ तमे वैक्रमाब्दे श्रीकृष्णजन्माष्टम्यां प्रथमं प्रकाशितम्

प्रकाशितपुस्तकानि - १००० प्रतिरूपाणि

मूल्यम् - रू. २१५

कम्प्यूटरटङ्कणम्
क्वालिटी लेजर प्रिन्ट, बागबजार,
दूरभाषसङ्ख्या (फोन नं.) २४२६५६

मुद्रकः
नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड
फोन : ४२७४५६, ४१७६७६

पण्डितकुलकमलभास्करः श्रीदधिराममरासिनिः



जन्मतिथिः - वि.सं. १९३९ आषाढकृष्णाष्टमी, शुक्रवासरः ।
स्वर्गारोहणतिथिः - वि.सं. २०२० अधिचैत्रशुक्लतृतीया, सोमवासरः।

सम्मति

प्रातः स्मरणीय महर्षिकल्प सद्गुरु पं. श्रीदधिराममरासिनिज्यूबाट विविध वैदिक कर्मकाण्डपद्धति र विभिन्न शास्त्रहरूको गम्भीर अनुशीलनद्वारा परम्परागतरूपमा प्रचलित कर्मकाण्डका अनेक प्रयोगहरूको शास्त्रानुकूल परिष्कार विवेचना र नेपाली आचारपरम्पराको सुन्दर सामञ्जस्य मिलाएर तयार गरिएको मूल्यवान् सङ्ग्रहग्रन्थ **कर्मकाण्डभास्कर** महेन्द्रसंस्कृत-विश्वविद्यालयद्वारा प्रकाशित हुन लागेकोमा मैले प्रसन्नताको अनुभव गरेको छु ।

ब्रह्मनिष्ठ साधक, सरस्वतीका उपासक, भक्त, तपस्वी, योगी र ज्ञानी पं. दधिराममरासिनि जस्ता आधिकारिक विद्वान्‌को पुण्यसिक्त साधनाद्वारा सपरिष्कार सङ्गृहीत यो ग्रन्थ परम्परागत संस्कृतिप्रेमी सबैका निमित्त अत्यन्त उपयोगी हुनेछ र यसबाट विशुद्ध एवं विधिसम्मतरूपमा कर्मसम्पादन गर्ने दिशामा सघाउ पुग्नेछ भन्ने विषयमा म विश्वस्त छु ।

हाम्रा पूर्वजहरूले उत्तराधिकारको रूपमा हामीलाई सुम्पेको धर्म, अर्थ, काम र मोक्षको प्रतिपादक विश्वकल्याणकारी वैदिक सनातन संस्कृतिलाई निर्मलरूपमा भावी सन्ततिहरूका निमित्त अग्रसारित गर्ने काममा यस्ता कृतिहरूको अनुपम योगदान हुने गर्दछ । त्यस दृष्टिबाट निश्चय नै **कर्मकाण्डभास्कर** सनातन संस्कृतिको संवाहक उत्कृष्ट ग्रन्थको रूपमा समाजमा सम्मानित हुने छ भन्ने मलाई लागेको छ ।

अध्ययन, अध्यापन, अनुसन्धान र प्रकाशन जस्ता गतिविधिहरूलाई

युगसापेक्ष, समाजानुकूल र जनहृदयस्पर्शी बनाउँदै लैजाने महेन्द्रसंस्कृतविश्वविद्यालयको सङ्कल्प अनुसार अहिले सनातनसंस्कृतिका अनुयायी देशवासी र देश बाहिरका जनसमूहको सदाचार, सत्कर्म, सदुपासना र सच्चिन्तनमा सघाउ पुऱ्याउने हेतुले प्रकाश्यमान यस ग्रन्थबाट सम्बद्ध सबै लाभान्वित हुने विषयमा मेरो पूर्ण विश्वास रहेको तथ्य जानकारी गराउन चाहन्छु ।

प्रकाशनार्थ ग्रन्थको पाण्डुलिपि दिएर सहयोग गर्नुहुने, **कर्मकाण्डभास्कर**का रचयिता सद्गुरु श्री दधिराम मरासिनिका सुपुत्र, आदरणीय गुरु श्री धनञ्जय मरासिनिज्यू प्रति हार्दिक कृतज्ञता ज्ञापन गर्दछु ।

कर्मकाण्डभास्करका पाण्डुलिपिको गम्भीर अध्ययन गरी यसलाई सर्वसंवेद्य र आकर्षक बनाई प्रकाशित गर्ने दिशामा महिनौंसम्म बौद्धिक एवं मानसिक प्रयासद्वारा यसको उच्चस्तरीय सम्पादन गर्नुहुने सम्पादक समूहका संयोजक डा. श्रीवेणीमाधव ढकाल, सम्पादक डा. दुर्गादत्त शर्मा पौडेल र सम्पादक श्री मोतीलालशर्मा रिजाल प्रति हृदयतः धन्यवादज्ञापन गर्दछु ।

अन्तमा, यस्ता रचनात्मक क्रियाकलापद्वारा महेन्द्रसंस्कृतविश्वविद्यालयको गौरव, प्रतिष्ठा र समृद्धिको उत्कर्ष बढाउने दिशामा परमेश्वरले हामी सबैलाई शक्ति, जाँगर, कर्मनिष्ठा र विवेक प्रदान गरून् भन्ने हार्दिक सङ्कल्प व्यक्त गर्न चाहन्छु ।

माधवराजगौतम
उपकुलपति
महेन्द्रसंस्कृतविश्वविद्यालय

श्रीकृष्णजन्माष्टमी
२०५४

प्रकाशकीय

संस्कृतविद्याको प्रचार-प्रसार, मातृभाषाको सेवा, संस्कृतसाहित्यको साधना, समाजसेवा, स्वाध्यायनिष्ठा, सत्कर्मपरायणता, ईश्वरोपासना र योगसाधना जस्ता गुणहरूद्वारा अलङ्कृत विद्यावाचस्पति पं. दधिराममरासिनि वास्तवमा उच्चकोटिका महापुरुष हुनुहुन्थ्यो ।

उहाँले अत्यन्त झाङ्गिएको आफ्नो विद्यावंशद्वारा राष्ट्रकालागि रत्नपुरुषहरू दिनुभयो र काव्यवंशद्वारा सरस्वतीको पवित्र भण्डारमा मूल्यवान् रत्नहरू थपिदिनु भयो । **नेपालीभाषाश्लोकसङ्ग्रह** जस्तो भाषाकाव्य रचेर भौंतारिएको समाजलाई मार्गदर्शन गराउने श्रीमरासिनिले **"सत्कर्म र सदाचार विना मानिस न असल उपासक बन्न सक्तछ न त उच्चकोटिको आत्मचिन्तक"** भन्ने दृष्टिकोणबाट समाजलाई सत्कर्म सौन्दर्यको अनुभूति गराउन **कर्मकाण्डभास्कर** जस्तो उच्चस्तरीय कर्मकाण्डग्रन्थको रचना गर्नु भयो । नेपाल आमाका यशस्वी पुत्र श्रीदधिराम मरासिनिको चरितचर्चा जति गरे पनि थोरै नै हुन्छ ।

आज भन्दा ६-७ दशक अघि अनुमानतः वि.सं. १९८५ देखि १९९५ सम्मका विभिन्न समयमा गहन अध्ययन, अनुसन्धान र विश्लेषण पछि लेखिएको **कर्मकाण्डभास्कर** पूर्वाङ्गखण्ड, संस्कारखण्ड, वर्षकृत्यखण्ड र श्राद्धखण्ड गरी ४ खण्डमा विभक्त छ । सबै खण्डमा प्रतिपादित कर्मविधिहरूमा शास्त्र र परम्परालाई समन्वित गराइएको छ। स्पष्ट विधिनिर्देश सहित तत् तत् विधिहरूलाई साङ्गोपाङ्ग बनाउने प्रयास गरिएको छ । यो ग्रन्थ भाषाका दृष्टिले सरल छ भने अर्थका दृष्टिले अत्यन्त गम्भीर छ । प्रत्येक खण्डमा नेपाली परम्परालाई प्रतिबिम्बित

गराइएता पनि शास्त्रीयतालाई जीवन्त तुल्याइएको छ । यसको आधारमा साधारण पाठकले पनि वैदिक सनातन धर्मका अनुयायीहरूद्वारा गरिंदै आएका नित्य, नैमित्तिक र काम्य कर्महरूको सम्पादन गर्न सक्तछ । यस्तो महिमामय सङ्ग्रहणीय उपयोगी एवं उपादेय ग्रन्थरत्नलाई प्रकाशित गर्न पाउँदा हामीलाई निश्चय नै प्राप्तिविशेषजन्य गौरवबोध भएको छ । हुन पनि आजसम्म कुनै अन्य नेपाली विद्वान्द्वारा कर्मकाण्डविधामा यति ठूलो र यत्तिको स्तरीय ग्रन्थ लेखिएको पाइँदैन ।

"श्री दधिराम मरासिनिको व्यक्तित्व र कृतिहरूको समीक्षात्मक अध्ययन" शीर्षकमा म.सं.वि.बाट विद्यावारिधिशोध कार्य सम्पन्न गर्नु हुने विद्वान् सहप्रा. डा. श्री दुर्गादत्तशर्मोपाध्याय पौडेलले आफ्नो अनुसन्धानको क्रममा श्रीगुरु पं. धनञ्जयमरासिनिज्यूका सङ्ग्रहमा रहेका श्री दधिरामप्रणीत विभिन्न कर्मकाण्डप्रयोग सम्बन्धी लेखोटहरूको अध्ययन र अनुसन्धान गर्नु भएको रहेछ । ती ती लेखोटहरूको विषय, स्तरीयता र उपयोगिता बारे उहाँबाट जानकारी पाएपछि तिनको प्रकाशनको प्रसङ्ग चल्यो । श्रीमान् उपकुलपति माधवराज गौतमज्यूको अनुमति र परामर्श अनुसार ती लेखोटहरूको सङ्ग्रहलाई विश्वविद्यालयले **कर्मकाण्डभास्कर** नामाकरण गरी प्रकाशन गर्ने निधो गरे बमोजिम आज यो यस रूपमा प्रकाशित भएको छ ।

यस ग्रन्थबाट कर्मकाण्डमा चासो राख्ने सर्वसाधारणलाई कर्मसम्पादनमा ठूलो सघाउ पुग्ने छ भन्ने विषयमा हामी आश्वस्त र विश्वस्त छौं ।

म. सं. वि. का वर्तमान उपकुलपति श्री गौतमज्यूको कुशल र प्रभावकारी नेतृत्वका कारण द्रुतगतिमा म.सं.वि. भौतिक र प्राज्ञिक उन्नयन एवं विकासको पथमा गतिशील भएको छ । फलस्वरूप अन्य क्षेत्रका साथै अनुसन्धान र प्रकाशनमा धेरै राम्रा कार्य भएका छन् । ती

मध्ये यो ग्रन्थ र यसका साथै कुलचन्द्रकृत **संस्कृत-नेपाली शब्दकोश**, तन्त्रशास्त्रका विद्वान् नवमीसिंह भण्डेलको तन्त्रसम्बन्धी रचना **तन्त्रचिन्तामणि** र अनुसन्धान जर्नल **ऋतम्भरा**को प्रकाशन उल्लेखनीय रहेका छन् ।

यस ग्रन्थकालागि मूल्यवान् सम्मति प्रदान गर्नु भएकोमा श्रीमान् उपकुलपति माधवराज गौतमज्यू प्रति सविनय आभारिता प्रकट गर्दै कृतज्ञता टक्र्याउँछु ।

कर्मकाण्डभास्करको मूल पाण्डुलिपि र पं. श्री दधिराम मरासिनिको चित्र उपलब्ध गराई दिनु हुने गुरुवर श्री धनञ्जय मरासिनिज्यू र गुरुभ्राता श्री वासुदेव मरासिनिज्यू प्रति हार्दिक कृतज्ञता-ज्ञापन गर्न चाहन्छु ।

अन्तमा, महिनौंसम्म बौद्धिक योगदान गरेर यस ग्रन्थको विशुद्ध एवं स्तरीय सम्पादनद्वारा प्रशंसनीय योगदान गर्नुहुने सम्पादकसमूहका संयोजक एवं सम्पादकहरूलाई हार्दिक धन्यवाद दिंदै यसको प्रकाशनमा सघाउ पुऱ्याउनु हुने क्वालिटी लेजर प्रिन्ट, नेपाल प्रिन्टर्स एवं ट्रेडर्स कोअपरेटिभ लिमिटेड र अन्य सबै सहयोगीहरू प्रति साधुवाद व्यक्त गर्न चाहन्छु ।

प्रा. डा. बाबुराम पोख्रेल
शिक्षाध्यक्ष
महेन्द्रसंस्कृतविश्वविद्यलय

श्रीकृष्णजन्माष्टमी
२०५४

प्रस्तावना

कर्मकाण्डको महत्त्व

मङ्गलमय एवं विश्वपावन वैदिक सनातन संस्कृतिमा निहित पवित्र भावना, उदारता, समन्वयवादी दृष्टि र सर्वकल्याणकारी चिन्तनका विषयमा केही भनिरहनु र प्रमाण दिइरहनु पिष्टपेषण नै हुनेछ ।

कर्मकाण्ड, उपासनाकाण्ड र ज्ञानकाण्डमा विभक्त वैदिक-सनातन संस्कृतिका मूल आधार ज्ञानराशि वेद, ब्राह्मणग्रन्थ, स्मृति, मीमांसा र पुराणहरूका आधारमा हामी आज पनि नित्य, नैमित्तिक एवं काम्यकर्महरूको सम्पादन गर्दै आइरहेका छौं ।

वैदिक कर्मकाण्ड-पद्धतिको आधारमा कर्म सम्पादन गर्नाले अन्तःकरण निर्मल भएका साधकहरू उपासकको कोटिमा आरूढ हुन्छन् र उपासनाद्वारा निर्मलात्मा बन्न पुगेका उपासकहरू ज्ञानमार्गका सच्चा अधिकारी बन्दछन्। अतः उपासना र ज्ञानको दरिलो पृष्ठभूमि वेदविहित कर्म नै हो भन्ने कुरा छर्लङ्ग छ ।

वस्तुतः कर्मको प्रयोजक एवं मार्गदर्शक वैदिककर्मकाण्डपद्धतिको अनुपम महत्ता र उपादेयता सर्वसम्मत तथ्यका रूपमा रहेको छ ।

अनेकतामा एकता

सकल वैदिक सनातनधर्मका अनुयायीहरूद्वारा गरिने नित्य, नैमित्तिक एवं काम्यकर्महरूमा मौलिक समानता रहेपनि देश, दिशा, कुल एवं स्थानीय परम्पराका भेदले विधि, प्रयोग एवं हस्तक्रियाहरूमा सामान्य अन्तर देखिनु स्वाभाविक हो । त्यस दृष्टिबाट नियालेर हेर्दा हामी

नेपाली सनातन धर्मालम्बीहरूद्वारा अंगालिएका कर्मकाण्डीय विधि-विधानहरूका आफ्नै मौलिक विशेषता छन् र आफ्नै मौलिक आचारपरम्परा पनि ।

ती विशेषता र आचारपरम्पराहरूले वैदिककर्मकाण्डको मूल प्रवाह विपरीत नगई मूल प्रवाहको सौन्दर्य-संवर्धन गर्दै नेपालीपनमा निहित पवित्र मिठासको अभिव्यञ्जन गर्दछन् । परम्पराभेदले नेपाली माटोमा वैदिककर्मकाण्ड सम्पादनका क्षेत्रमा पौरस्त्य-परम्परा, कूर्माचलीय-परम्परा र मैथिल-परम्परा मुख्य रूपमा रहेका छन् । यिनीहरूमा परस्पर विधि र प्रयोग सम्बन्धी केही मतान्तर रहेपनि यी सबै वेदमूलक र आर्ष-परम्परामा आधारित छन् ।

पूर्वजहरूको योगदान

मेची, काली, तराई र हिमालको माझमा अवस्थित यस पवित्र भूभागमा वसोवास गर्दै आएका हाम्रा आदरणीय पूर्वजहरूले यातायात, सञ्चार र उद्योग नभएको अन्धकारयुगमा खरका गांज समातेर उकाली र ओराली गर्दै, हिंस्रक जनावरहरूसँग मितेरी गाँस्दै र ढुङ्गामाटोसँग संघर्ष गर्दै जीवनयापन गर्ने क्रममा पनि जुन मूल्यवान तत्त्वलाई आत्मसात् गरी प्रचार-प्रसार गरे, जोगाए र जोगाउन लगाए त्यो वैदिक कर्मकाण्ड पद्धति नै हो ।

पूर्वजहरूद्वारा लेखिएका र लेखाइएका विभिन्न कर्मकाण्डपद्धतिहरूका लेखोटहरूका आधारमा विशुद्ध रूपमा वैदिककर्मकाण्ड-परम्परा यस राष्ट्रमा प्रचलित थियो र छँदैछ । नेपालका पहाड, तराई, गाउँ, देहात र शहरहरूका धेरै जसो घरहरूमा आज पनि त्यस्ता लेखोटहरू रहेका छन्। राष्ट्रका कुना-कुनाबाट राष्ट्रिय अभिलेखालय र अन्य पुस्तकालयहरूमा सङ्गृहीत हजारौं कर्मकाण्डका लेखोटहरूले यस तथ्यलाई प्रमाणित गर्दछन्।

पुर्खाहरूद्वारा लेखी जोगाई लेखनक्रमद्वारा नै भावी सन्ततिका लागि अग्रसारित गरिएका ती लेखोटहरूले वैदिकसंस्कृतिको संरक्षण र संवर्धनमा ठूलो योगदान गरेका छन् ।

अतः राष्ट्रका कुना-कुनामा छरिएर रहेका ग. पुस्तकालयहरूमा सङ्गृहीत ती लेखोटहरू हाम्रा अनमोल निधि हुन् ।

लेखोटग्रन्थहरूको वर्गीकरण

१. अशुद्धिबहुल लेखोटहरू -

कालक्रमले विद्याभ्यासमा ह्रास हुँदै जाँदा परम्परागतरूपमा सारिँदै आएका कतिपय कर्मकाण्डका पद्धतिहरू व्याकरणसम्बन्धी दुर्बलताले गर्दा अशुद्ध बनाएर सारिएका र त्यसै रूपमा प्रयोगमा प्रचलित भएका भेटिन्छँन् । जस्तै पाणिग्रहणकर्म (पानी गरन) पानीको करुवा समाउने अर्थमा विकृत भएर प्रयोग भएको पाइन्छ ।

२. शुद्ध लेखोटहरू -

कतिपय लेखोटहरू परम्परागतरूपमा सारिने क्रममा सावधानीपूर्वक जस्ताको तस्तै शुद्धरूपमा सारिएका पनि पाइन्छन् ।

३. परिमार्जित लेखोटहरू -

केही लेखोटहरू सार्ने व्यक्तिहरूको गहन अध्ययन, अनुसन्धान एवं विश्लेषणद्वारा परिष्कृत रूपमा सारिएका पाइन्छन् । यस्ता पुस्तकहरूमा परम्परा र शास्त्रीय निर्देशनको सुन्दर समन्वय भएको पाइन्छ । सम्पन्न गरिएका संस्कारकार्यहरूबाट शुद्ध संस्कारोत्पादन हुन सकोस् भन्ने धारणालाई हृदयङ्गम गरी लेखिएका यस्ता लेखोटहरू मूल्यवान् कृतिका रूपमा रहेका छन् । ती मध्ये पण्डितप्रवर श्रीदधिराम मरासिनिद्वारा लेखिएको **कर्मकाण्डभास्कर**लाई पनि लिन सकिन्छ ।

श्री दधिराममरासिनि

समाज, संस्कृति, मातृभाषा र संस्कृतभाषाको सेवा, सदाचार-प्रसार र विद्याप्रचारमा आजीवन समर्पित रहेर पनि भक्त, दार्शनिक, योगसाधक र तपस्वीका रूपमा विख्यात, हजारौं हजार शिष्य एवं भक्तहरूका आस्थाका केन्द्रबिन्दु, वैदिक संस्कृतिका कट्टर अनुयायी व्यक्तित्वको नाम हो- पं. दधिराममरासिनि ।

योगी शशिधरका माहिला भाई प्रेमनारायणका वंशज परीक्षित र खगेश्वरीका सुपुत्र पं. दधिराम मरासिनि वि.सं. १९३९ को आषाढमासमा अर्घाखाँची जिल्लाको खिदिममा जन्मे । खिदिमकै धुलोमा खेल्दै ककरा बाह्रखरी र चण्डी पढेपछि क्रमशः पोखरा, तुलसीपुर, काठमाण्डौ र काशीमा विद्याध्ययन गरी खिदिम फर्केका दधिरामले शिक्षाविहीन ग्रामीण समाजलाई सत्‌शिक्षा दिने अभिप्रायले आफ्नै आँगनमा पाठशाला चलाए।

पाठशालाको प्रचार हुँदै गयो र छात्रसङ्ख्या पनि बढ्दै गयो । त्यस पाठशालामा गुल्मी, पाल्पा, अर्घाखाँची, स्याङ्जा, पर्वत, वाग्लुङ्ग, प्यूठान र सल्यानका छात्रहरूको बाहुल्य थियो भने देशको अन्य भागका छात्रहरूको पनि उपस्थिति थियो ।

श्रीदधिरामले तत्कालीन ठूला जमीन्दार एवं आफ्ना शिष्य श्रीहरिहर गौतमको सहयोगबाट खिदिममा वि.सं. १९९४ मा भोजन आवास सहितको हरिहरसंस्कृत-पाठशालाको स्थापना गरे । यसबाट राष्ट्रमा शिक्षाको उज्यालो फैलियो ।

खिदिममा पढाइ सकी उच्च शिक्षा अध्ययन गर्न चाहने छात्रहरूका लागि श्रीदधिरामकै प्रेरणाबाट काशीमा हरिहरसंस्कृत-महाविद्यालयको स्थापना भयो । यसरी खिदिम र काशीमा रहेका विद्यालयहरूमा अध्ययन गर्ने हजारौं स्नातकहरू आज राष्ट्रका विभिन्न क्षेत्रमा देश र जनताको सेवा गरिरहेका छन्। फलस्वरूप पं. मरासिनि विद्याप्रचार, समाज सेवा, स्वाध्याय, साहित्यसाधना र योगनिष्ठाका कारणबाट आम जनताका श्रद्धेय

महापुरुष बन्न पुगे ।

यसरी आफ्ना उदात्त एवं शुक्ल कर्म र अनुकरणीय योगदानद्वारा राष्ट्रलाई चहकिलो बनाएर उनी वि.सं. २०२० को चैत्र महिनामा काशी वाहिनी भागिरथीका तटमा श्रीरामनामको उच्चारण गर्दै प्राणत्याग गरी श्रीराममा नै विलीन भए ।

उनले आफ्नो साधनामय जीवनका विभिन्न अवसरमा संस्कृतमा- **श्रीरामचरितामृतम्, श्रीकृष्णचरितामृतम्** खण्डकाव्य एवं **स्तवमाला** स्तवकाव्य र नेपालीमा **नेपालीभाषाश्लोकसंग्रह**को रचना गरे। श्री मरासिनिले वैदिक कर्मकाण्डलाई विशुद्ध रूपमा प्रयोग गरी सबै संस्कार-प्रेमी जनता ऐहिक र पारमार्थिक कल्याणका अधिकारी बनून् भन्ने मनसायले प्रचलित पद्धतिहरूलाई शास्त्रानुसार परिष्कार गरी कर्मकाण्डका विभिन्न प्रयोगहरूको संगालो **कर्मकाण्डभास्कर** बनाए ।

यिनै अनुपम रचनाहरू र अन्य अनुकरणीय एवं प्रशंसनीय योगदानका कारणबाट श्रीदधिराम मरासिनि यस धर्तीमा अमर भएका छन् ।

दधिरामको स्वर्गारोहणको धेरै वर्ष पछि हालै आएर दधिरामको योगदान, प्रेरणा, उपदेश र साधनालाई जनजीवनमा जीवन्त बनाउने उद्देश्यले दधिरामका भक्त, शिष्य र श्रद्धालुहरूद्वारा संगठित दधिराम-स्मृति-प्रतिष्ठानले विभिन्न क्रियाकलापद्वारा दधिरामलाई चिनाउने प्रयास गरिरहेको छ भने महेन्द्रसंस्कृतविश्वविद्यालयले पनि नेपाल आमाका सपूत दधिराम मरासिनिका अमर रचनाहरूलाई प्रकाशित गरेर प्रशंसनीय काम गरेको छ ।

कर्मकाण्डभास्करको स्वरूप-

पूर्वाङ्गखण्ड, संस्कार खण्ड, वर्षकृत्यखण्ड र श्राद्धखण्ड गरी ४

परिच्छेदमा लेखिएको **कर्मकाण्डभास्कर** वैदिक सनातन धर्मानुयायीहरूका लागि उपादेय कर्मकाण्डग्रन्थका रूपमा रहेको छ । आम वैदिक संस्कारानुरागी जनताको भावनालाई हृदयङ्गम गरी महेन्द्रसंस्कृतविश्वविद्यालयद्वारा प्रकाशित गरिंदैछ । यसका प्रत्येक खण्डका विषयवस्तु निम्नानुसार रहेका छन् ।

१. पूर्वाङ्गखण्ड-

यसमा स्वस्तिपाठ, शान्तिपाठ, कर्मपात्रस्थापनविधि, अर्घ्यस्थापनविधि, दीप-कलश-गणेश-पूजाविधि, रक्षाविधान, मातृकापूजन, आभ्युदयिक श्राद्ध, अग्निस्थापना, ग्रहशान्ति, मूलशान्ति र गोमुखप्रसव रहेका छन्।

२. संस्कारखण्ड-

यसमा विवाहविधि, चतुर्थीकर्म, गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, षष्ठीपूजा, नामकरण, निष्क्रमण, अन्नप्राशन, जन्मोत्सवविधि, कर्णवेध, चूडाकर्म, उपनयन, वेदारम्भ र समावर्त्तनसंस्कार रहेका छन् ।

३. वर्षकृत्यखण्ड -

यसमा श्रीरामनवमीव्रत, अनन्तचतुर्थीव्रत, दशहरापूजनविधि, चातुर्मास्यारम्भ, नागपञ्चमीपूजा, ऋषितर्पणीविधि, हरितालिकापूजाविधि, ऋषिपञ्चमीपूजाविधि, नवरात्रपूजनविधि, लक्ष्मीपूजाविधि, गोपूजाविधि, भातृपूजाविधि, चातुर्मास्यव्रतसमाप्ति र महाशिवरात्रीपूजनविधि आदि रहेका छन् ।

४. श्राद्धखण्ड -

यसमा एकोद्दिष्टश्राद्धविधि, पार्वणश्राद्धविधि र अन्त्येष्टिविधि रहेका छन् । साथै श्राद्धपरिशिष्टका रूपमा तर्पणविधि पनि राखिएको छ ।

कर्मकाण्डभास्करको विशेषता -

पं. दधिराममरासिनिले वंशपरम्परागत लेखोटहरू, संस्कारदीपक,

संस्कारादर्श, श्रीरामपद्धति (लेखोट एवं मुम्बईबाट मुद्रित), त्यस बेला वाराणसी आदि ठाउँहरूबाट प्रकाशित विभिन्न कर्मकाण्डपद्धतिहरू, वेद, पारस्करगृह्यसूत्र, विभिन्न स्मृतिहरू, कृत्यसङ्ग्रह, विभिन्न पुराणहरू र नेपाली समाजमा प्रचलित विभिन्न आचारपरम्परा समेतलाई अनुशीलन गरी **कर्मकाण्डभास्कर**को लेखनकार्य सम्पन्न गरेका छन् ।

उनले यस ग्रन्थमा कर्मकाण्डका शास्त्रीय पद्धति विधि र प्रविधिहरूलाई स्पष्ट, सरल र सारगर्भित तुल्याएर प्रस्तुत गरेका छन् । उक्त ग्रन्थका केही विशेष तथ्यहरू निम्नानुसार रहेका छन् ।

१. रक्षाबन्धनमा प्रयोग गरिने पद्यहरूलाई सप्तमान्तको सट्टा द्वितीयान्त बनाई परिमार्जन गरिएको छ । जस्तै **''प्राच्यां रक्षतु गोविन्दः''** को सट्टा **''प्राचीं रक्षतु गोविन्दः''** । इत्यादि ।

२. पुण्याहवाचनमा अरू पद्धतिमा नपाइने निम्न पद्यहरूको प्रयोग गरिएको छ -

''भद्रमस्तु शिवञ्चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।

३. मातृकापूजनमा - गौर्यादि षोडशमातृका, आदित्यादि सप्तदशगोमयमातृका, नन्दादि सप्तद्वारमातृका, गौर्यादि दशतोरणमातृका र ब्राह्मी आदि सप्तमातृकालाई एकत्र सङ्कलन गरी पूजनविधिको उल्लेख गरिएको छ । अन्यत्र यसरी उल्लेख गरिएको पाईंदैन ।

४. आभ्युदयिक श्राद्धमा अरू पद्धतिहरूले विश्वेदेवाको कर्ममा सव्य र पितृकर्ममा अपसव्यको विधान गरेका छन् भने **कर्मकाण्डभास्कर**मा निहित आभ्युदयिक श्राद्धमा विश्वेदेवाको कर्म र पितृकर्म दुवैमा सव्य हुनुपर्ने विधान गरिएको छ ।

५. अग्निस्थापनापद्धतिमा **गोमयेन**को सट्टा **गोमयोदकेन** भनिएको छ । वायव्यसंहिताबाट अग्निका नामहरूको उद्धरण गरिएको तथ्य खुलाइएको छ । साथै "**शुङ्गाकर्मणि शोभनः**" भनेर शोभन अग्निको विशेष विधान गरिएको छ । **अथ विनायकादिपञ्चलोकपालाः, इति विनायकादि पञ्चलोकपालाः, अथ अधिदेवताः, इति अधिदेवताः,** यस शैलीमा प्रत्येक कार्यविशेषको आरम्भ र समाप्तिको संसूचन गरिएको छ ।

६. "**चूडोपनयनवेदारम्भसमावर्त्तनकर्मणां सहप्रयोगो लिख्यते**" भनेर पं. दधिराममरासिनिले नेपाली परम्पराको पनि दिग्दर्शन गराएका छन् ।

७. विवाहदेखि समावर्त्तनसम्मका १६ संस्कारहरूका मूलका साथमा मूलमा नपरेका विषय, नेपाली आचार, विभिन्न पद्धतिका छन्द देवता र ऋषिसम्बन्धी मतमतान्तरहरूलाई स्पष्ट गर्न अनुसन्धानमूलक आवश्यकतानुसार ठूला साना टिप्पणीहरू दिइएका छन् । साथै मूलमा नरहेका संस्कारहरूलाई टिप्पणीमा विधिपूर्वक खुलस्त पारिएको छ ।

८. प्रायः सवै जसो कार्यहरूको तिथि निर्णयका साथै त्यसमा आवश्यक विषयहरूको परिचय दिइएको छ ।

९. प्रत्येक देवदेवीपूजन र यज्ञलाई अन्यत्र दुर्लभ शैलीद्वारा भावगम्भीर बनाइएको छ ।

१०. वर्षकृत्यखण्डका धेरै जसो देवपूजनका सन्दर्भमा "**सुवर्णप्रतिमायाम् शालग्रामशिलादौ वा**" यस्तो उल्लेखद्वारा नेपाली नदी कृष्णा गण्डकीमा मात्र पाइने शालग्रामको महिमा प्रकाशित गरी गुप्तरूपमा नेपालित्वको द्योतन गरिएको छ ।

११. यमदीपदानविधानमा "**यथाकुलाचारम् आधारे दीपमथवा परिवारसङ्ख्यकान् दीपान्**" को उल्लेख गर्नु दधिरामीय कर्मकाण्डभास्करको

विशेषता हो ।

१२. श्रावणीपद्धतिमा ऋषिपूजासामग्रीको उल्लेख र रक्षाबन्धनविधि अन्य श्रावणीपद्धतिहरूमा भन्दा विस्तृत रूपमा गरिएको छ ।

१३. विवाहविधि, चतुर्थीकर्म, उपनयनविधि र यमपूजनविधिमा विशेष रूपमा नेपाली परम्परालाई समन्वित गराइएको छ भने अरू पद्धतिहरूमा सामान्य रूपमा नेपालीपरम्पराको ख्याल गरिएकोछ।

१४. एकोद्दिष्ट श्राद्धविधि एवं पार्वणश्राद्धविधिमा आरम्भमा-

ॐ यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनाशनाय ।।१।।

यस पद्यद्वारा गणेशको र **शुक्लाम्बरधरम्०** पद्यद्वारा विष्णुको स्मरण गरी मङ्गलाचरण गरिएको छ । अन्यत्र यसरी मङ्गलाचरण गरिएको पाइँदैन ।

१५. "**तैलाभ्यङ्गपूर्वकं कुशबटुस्नपनम्**" भनेर कुशबटुलाई स्नान गराई प्राणप्रतिष्ठा गराइनु पनि दधिरामलिखित श्राद्धविधिहरूको विशेषता हो ।

ब्राह्मणनिमन्त्रणमा "**कुशबटो! त्वं मया निमन्त्रितः**" भनेर कुशबटुलाई नै सम्बोधन गरिएको छ । यस्तो सम्बोधन अन्यत्र पाइँदैन ।

१६. अरू श्राद्धपद्धतिहरूमा "**अमुकगोत्रस्य, अमुकगोत्राणाम्**" जस्ता प्रयोग पाइन्छन् तर दधिरामपरिष्कृत श्राद्धविधिहरूमा "**अमुकसगोत्राणाम् र अमुकसगोत्रस्य**" यसरूपमा वाक्यप्रयोग गरी "**सकारः कुतपो ज्ञेयः**" भन्ने स्मृतिकारको वचनलाई अनुसरण गरिएको छ ।

१७. अन्य श्राद्धपद्धतिहरूमा-

गया गयो गयादित्यो गायत्री च गदाधरः ।
गया गयासुरश्चैव षड् गया मुक्तिदायकाः ।।

लेखिएको पाइन्छ भने दधिरामकृत श्राद्धविधिहरूमा निम्नाङ्कित पद्य लेखिएको छ -

गयागजो गयादित्यो गायत्री च गदाधरः ।
गया गयाशिरश्चैव षड् गया मुक्तिदायकाः ।।

पुनश्च अन्य श्राद्धपद्धतिहरूमा "**गयायै नमः, गदाधराय नमः**" लेखिएको पाइन्छ भने दधिरामद्वारा त्यसको सट्टा "**गङ्गायै नमः, गदाधराय नमः**" प्रयोग गरिएको छ ।

१८. नीवीबन्धनमा "**त्वमग्ने द्युभि०**" इत्यादि मन्त्रको प्रयोग पनि दधिरामीय श्राद्धपद्धतिको विशेषता हो ।

१९. **तिला रक्षन्तु वितिजाद् दर्भा रक्षन्तु राक्षसात् ।**
पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ।।

यस पद्यलाई दधिरामकृत श्राद्धपद्धतिमा मात्र देख्न पाइन्छ ।

२०. दधिरामकृत अन्त्यपद्धतिमा पनि दशदान र पञ्चधेनुदानमा विशेषरूपमा ऊह गरिएको छ । सपिण्डीकरणश्राद्धमा सगोत्रायै मात्रेको सट्टा गोत्रायै मात्रे भनिएको छ ।

यी थिए **कर्मकाण्डभास्कर**का केही सामान्य र केही विशेष तथ्यहरू। अध्ययन गर्ने क्रममा सम्बद्ध विशेषज्ञ विद्वान्हरूद्वारा यसको समीक्षा हुने नै छ ।

कर्मकाण्डभास्करको उपादेयता

शास्त्रपरम्परानुरूप गम्भीर एवं रोचक शैलीमा कर्मसम्पादनको दिग्दर्शन, सरल निर्दुष्ट एवं गम्भीर भाषिकप्रयोग र हिन्दू जनजीवनमा प्रचलित प्रायः सबै नित्य नैमित्तिक र काम्यकर्महरूका विधिहरूको एकत्र

समावेश जस्ता कारणहरूले गर्दा यो ग्रन्थ सबै वैदिक संस्कृतिका अनुयायीहरूका लागि उपादेय छ भने नेपालीपरम्परा समेतलाई हृदयङ्गम गरी लेखिएको हुनाले नेपाल या नेपाल बाहिर बसोवास गर्ने सवै नेपालीहरूका लागि अत्यन्त उपादेय र सङ्ग्रहणीय छ ।

यद्यपि विकीर्णरूपमा नेपाली विद्वान्हरूद्वारा विभिन्न समयमा अनेकौं कर्मकाण्डग्रन्थहरूको प्रणयन वा लेखन गरिएको पाइएता पनि पूर्वाङ्ग-संस्कार-वर्षकृत्य र श्राद्ध जस्ता सबै कर्महरूलाई समेटी शास्त्रीय महत्त्वका साथ नेपाली कलमबाट लेखिएको यो पहिलो ग्रन्थ हो भन्नुमा अत्युक्ति हुने छैन ।

सम्पादनको परिप्रेक्ष्यमा सम्पादकसमूहको भनाइ-

कर्मकाण्डधुरन्धर दधिराम मरासिनिद्वारा परम्परा-प्रचलित विविध कर्मकाण्डका ग्रन्थहरूको पर्यालोचन गरी आफ्ना मूल्यवान् विचारहरू दिएर वि.सं. १९८५-१९९५ ताका सपरिष्कार लेखिएका कर्मकाण्डका विधिहरू कुनै पक्की कागजमा पुस्तकाकारमा लेखिएका थिए भने कतिपय विधिहरू साधारण अभ्यास पुस्तिकामा लेखिएका थिए । सबैको क्रम मिलेको थिएन। लेखनमा तमसुके शैलीको उपयोग गरिएको थियो । यत्र तत्र अक्षर बुझ्न गाह्रो पनि थियो । यस स्थितिमा सम्पादन कार्य निश्चय नै कठिन थियो तापनि हामीले महिनौंको प्रयासद्वारा कार्य सम्पन्न गरेका छौं ।

सम्पादनको क्रममा विभिन्न खण्डहरूमा तदनुकूल विषय समावेश गरी सबै पद्धतिहरूलाई व्यवस्थित गरिएको छ । अन्त्येष्टिविधिमा निहित अस्थिसञ्चयन र दशगात्रविधिलाई संस्कारखण्डमा नै राखे हुनेमा आद्यमासिक, आद्याब्दिक र सपिण्डीकरण आदि श्राद्ध नै भएकाले ती सँग सम्बद्ध उक्त विषयहरूलाई श्राद्धप्रकरण मै राखिएको छ । एकोद्दिष्ट र पार्वणश्राद्धमा तर्पणविधि नरहेको हुँदा पार्वण श्राद्धपछि परिशिष्टका रूपमा तर्पणविधि

राखिएको छ ।

साथै यसमा नभएका तर कार्यसम्पादनमा अत्यन्त आवश्यक पञ्चगव्य-निर्माणविधि, अर्घस्थापनविधि र कर्मपात्रसम्पादनविधिलाई थपेका छौं । वैदिकमन्त्रहरूको उच्चारणमा पद नछुट्ट्याइने हुनाले हामीले संहितापाठमा झैं यस ग्रन्थमा पनि वैदिकमन्त्रहरूलाई पद नछुट्ट्याइ राखेका छौं ।

पाठकहरूलाई कर्मसम्पादनमा सजिलो होस् भनेर प्रायः सबै विधिहरूका विभिन्न क्रियाहरूको छुट्टा-छुट्टै शीर्षक विन्यास गरी यस पछि के गर्नु पर्छ भन्ने कुरा बुझ्न सजिलो होस् भन्ने धारणा अनुरूप कार्य गरिएको छ । विषयहरूको स्पष्टताकालागि प्रायः सन्धि गरिएको छैन ।

यद्यपि दधिराम मरासिनि 'म कर्मकाण्डग्रन्थ बनाउँछु' भनेर साभिनिवेश प्रवृत्त भएका होइनन् । उनी आफ्ना वंशज, शिष्य र श्रद्धालुहरू विशुद्ध रूपमा कर्मसम्पादन गर्न सकुन् भन्ने मनसायले फुर्सदका समयमा विना क्रम विभिन्न पद्धतिहरूको परिष्कार र विवेचनमा प्रवृत्त भएका हुन् ।

त्यसकारण उनका लेखोटहरूमा भूमिका, रेखीरचनाविधि, कुण्डमण्डपनिर्माणविधि र पञ्चगव्य-अर्घ्य-कर्मपात्रनिर्माणविधि जस्ता कर्मका प्रारम्भिक विषय वस्तुहरूको क्रमबद्ध लेखन भएको पाइँदैन ।

साथै नेपाली समाजमा बहुप्रचलित लक्ष्यवर्तिपूजाविधि, सत्यनारायण-पूजाविधि, वटपिप्पलविवाहविधि, मण्डपपूजाविधि, ८४ सिद्धपूजाविधि र वास्तुपूजाविधि आदि पनि लेखोटहरूमा समावेश गरिएका छैनन् ।

उक्त केही अभाव हुनु स्वाभाविक नै हो । एउटै ग्रन्थमा सबै कुरा भएको देख्न चाहने मानवीय प्रवृत्तिद्वारा औंल्याइएका केही कमी रहे पनि यस ग्रन्थमा जे जति विषयहरू समाविष्ट छन् ती सबै अर्थपूर्ण र महत्त्वपूर्ण छन् । विषयगत प्रामाणिकता र स्तरीयताले गर्दा यो ग्रन्थ समाजमा समादृत एवं लोकप्रिय कर्मकाण्डग्रन्थका रूपमा प्रचलित हुनेछ भन्ने कुरामा हामी विश्वस्त छौं ।

कृतज्ञताज्ञापन-

दधिरामप्रणीत उक्त ग्रन्थको सम्पादन गर्ने अवसर प्रदान गर्नु भएकोमा उपकुलपति श्री माधवराज गौतम, शिक्षाध्यक्ष डा. श्री बाबुराम पोखेल र कुलसचिव श्री दत्तात्रेय दाहाल प्रति हामी हार्दिक कृतज्ञता-ज्ञापन गर्दछौं ।

वैदिकमन्त्रहरूलाई यथाशक्य वैदिकलेखनशैलीमा मुद्रण गराउने काममा क्वालिटी लेजर प्रिन्ट, बागबजारका व्यवस्थापक र सहयोगीहरूको अथक प्रयासको प्रशंसा जति गरेपनि थोरै नै हुन्छ । यसको कम्प्यूटर मुद्रणमा कत्ति पनि व्यावसायिक दृष्टि नराखी एउटा आदर्श कर्मकाण्डग्रन्थ प्रकाशित गराउने ध्येयले उहाँहरूले ज्यादै ठूलो योगदान दिनुभएको छ। हामी उहाँहरूप्रति सहर्ष हार्दिक धन्यवाद-ज्ञापन गर्दछौं ।

साथै यसको सम्पादनमा प्रत्यक्ष र अप्रत्यक्षरूपमा सहयोग गर्नुहुने सम्बद्ध सबै महानुभावहरूप्रति कृतज्ञता ज्ञापन गर्दछौं ।

क्षमायाचना-

कर्मकाण्डभास्करलाई शुद्ध, प्रामाणिक र आकर्षक ग्रन्थका रूपमा बाहिर ल्याउने सदाशय र निरवच्छिन्न परिश्रमका बाबजूद पनि हामीबाट जानी नजानी भूल-चूक भएका होलान् यसमा गुणज्ञ र दोषज्ञ विद्वान्हरूले अवश्य क्षमा प्रदान गर्नु हुने नै छ । जहाँ जहाँ त्रुटि भएको छ, जहाँ जहाँ परिष्कार अपेक्षित छ र जहाँ जहाँ सङ्गति मिलेको छैन ती ती स्थलहरूको निर्देश सहित दोषदर्शन गराई दिनुहुन सम्बद्ध विद्वान्हरूसँग विनम्र अनुरोध गर्दछौं ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।

श्रीकृष्णजन्माष्टमी, २०५४ **- सम्पादकसमूह**

विषयसूची

१. पूर्वाङ्गखण्डः

विषयाः पृष्ठानि

१. स्वस्तिवाचनम् १

२. शान्तिपाठः २

३. पञ्चगव्यनिर्माणविधिः ३

४. कर्मपात्रसम्पादनम् ४

५. अर्घस्थापनविधिः ५

६. दीपपूजाविधिः ६

७. कलशस्थापनपूजनविधिः ६

८. गणेशपूजाविधिः.. ११

९. रक्षाविधानम् १३

१०. कलशस्कन्धप्रदेशे गणपत्यादिपूजनम्........................ १४

११. पुण्याहवाचनविधिः १५

१२. मातृकापूजाविधिः.. १८

१३. आभ्युदयिकश्राद्धविधिः २८

१४. अग्निस्थापनापद्धतिः ३७

१५. ग्रहशान्तिविधिः... ८७

१६. मूलशान्तिविधिः १४७

१७. गोमुखप्रसवप्रयोगः १५३

२. संस्कारखण्डः

विषयाः **पृष्ठानि**

१. विवाहपद्धतिः १५५
वाग्दानविधिः १५५
वरणविधिः १५६
विवाहविधिः १५९
२. चतुर्थीकर्मविधिः १८८
३. गर्भाधानसंस्कारः १९५
४. पुंसवनम् १९६
५. सीमन्तोन्नयनम् १९७
६. जातकर्मप्रयोगः २०२
७. षष्ठिकापूजा २०८
८. नामकरणम् २२१
९. निष्क्रमणम् २२४
१०. अन्नप्राशनम् २२७
११. जन्मोत्सवविधिः २३१
१२. कर्णवेधः २३६
१३. चूडाकर्मविधिः २३८
१४. उपनयनम् २४८
१५. वेदारम्भः २६२
१६. समावर्तनम् २७०

३. वर्षकृत्यखण्डः

विषयाः **पृष्ठानि**
१. श्रीरामनवमीव्रतपूजाप्रयोगः २८५
२. नृसिंहजयन्तीव्रतपूजाविधिः २९५
३. दशहरापूजाविधिः ३०१
४. निर्जलैकादशीव्रतविधिः ३०३
५. चातुर्मास्यव्रतग्रहणप्रयोगः ३०४
६. कर्कटसंक्रान्तौ प्रदोषे कण्डारकपूजाविधिः ३०५
७. श्रावणशुक्लपञ्चम्यां नागपूजाविधिः ३०७
८. श्रावणीप्रयोगः ३०८
९. जन्माष्टमीव्रतपूजाविधिः ३५५
१०. हरितालिकाव्रतपूजाविधिः ३७४
११. सिद्धिविनायकपूजाविधिः ३८४
१२. ऋषिपञ्चमीव्रतविधिः ३९२
१३. अगस्त्यार्घदानविधिः ४००
१४. शारदनवरात्रमहोत्सवः ४०३
१५. कोजागरव्रतपूजाविधिः ४२०
१६. कार्तिके आकाशदीपदानम् ४२७
१७. गोवत्सपूजाविधिः ४२८
१८. कार्तिककृष्णत्रयोदशीकृत्यम् ४२९
१९. अभ्यङ्गस्नानम् ४३०
२०. लक्ष्मीपूजाविधिः ४३२
२१. गोवर्धनादिपूजाविधिः ४३४

विषयाः **पृष्ठानि**

२२. बलिपूजाविधिः ४३८
२३. यमपूजाविधिः ४४०
२४. कार्तिकशुक्लनवमी युगादिः ४४७
२५. विष्णुत्रिरात्रव्रतम् ४४७
२६. हरिबोधिनीपूजाविधानम् ४४८
२७. भीष्मपञ्चकव्रतम् ४५०
२८. कार्तिकशुक्लद्वादश्यां चातुर्मास्यव्रतसमाप्तिः ४५२
२९. चतुर्मास्यव्रतकार्तिकस्नानव्रतोद्यापन(तुलसीविवाह) विधिः ४५२
३०. धात्रीच्छायायां भोजनम् ४५५
३१. शिवरात्रिव्रतपूजाप्रयोगः ४५६

४. श्राद्धखण्डः

१. एकोद्दिष्टश्राद्धविधिः ४६२
२. पार्वणश्राद्धविधिः ४७६
तर्पणविधिः (श्राद्धपरिशिष्टात्मकः) ५००
३. अन्त्यकर्मपद्धतिः ५१४



पूर्वाङ्गखण्डः



卐 श्रीगणेशाय नमः 卐

१. स्वस्तिवाचनम्

सर्वकर्मादौ करणीयं स्वस्तिवाचनम्- तत्र कर्ता शुभदिने सुस्नातः शुक्लवासाः कुङ्कुमादिना कृततिलकः शुभासने प्राङ्मुख उपविश्याचम्य स्वस्ति वाचयेत् -

ॐ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः। स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ।।१।। ॐ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः । बृहस्पतिꣳसर्वगणꣳस्वस्तयेस्वस्तयआदित्यासोभवन्तुनः ।।२।। ॐ विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये । देवाअवन्त्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वꣳहसः।।३।। ॐ स्वस्तिमित्रावरुणास्वस्तिपथ्येनरेवती । स्वस्तिनइन्द्रश्चाग्निश्चस्वस्तिनोअदितेकृधि।।४।। ॐ स्वस्तिपन्थामनुचरेमसूर्य्याचन्द्रमसाविव । पुनर्ददताऽघ्नताजानतासङ्गमेमहि ।।५।। ॐ स्वस्त्ययनन्तार्क्ष्यमरिष्टनेमिमहद्भूतंवायसंदेवतानाम् । असुरघ्नमिन्द्रसखꣳसमत्सुबृहद्यशोनावमिवारुहेम ।।६।। ॐ अꣳहोमुचमाङ्गिरसंगयञ्चस्वस्त्यात्रेयंमनसाचतार्क्ष्यम् । प्रयतपाणिःशरणंप्रपद्येस्वस्तिसम्बाधेष्वभयन्नोअस्तु ।।७।।

— इति स्वस्तिवाचनम् —

२. शान्तिपाठः

ॐ आनोभद्राःक्क्रतवोयन्तुव्विश्श्वतोऽदब्ब्धासोऽअपरीतासऽउद्भिदः । देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवेदिवे ।।१।। ॐ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम्। देवानाꣳसक्ख्यमुपसेदिमाव्वयन्देवानऽआयुःप्रतिरन्तुजीवसे ।।२।। ॐ तान्पूर्वयानिविदाहूमहेव्वयन्भगम्मित्रमदितिन्दक्षमस्त्रिधम् । अर्य्यमणंव्वरुणꣳसोममश्श्विनासरस्वतीनःसुभगामयस्क्करत् ।।३।। ॐ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीतत्पिताद्यौः । तद्ग्रावाणःसोमसुतोमयोभुवस्त्रदश्श्विनाशृणुतन्धियधष्ण्यायुवम् ।।४।। ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्ब्धःस्वस्तये ।।५।। ॐ स्वस्तिनःऽइन्द्रोव्वृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः। स्वस्त्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्त्तिनोबृहस्प्पतिर्द्दधातु।।६।। ॐ पृषदश्श्वामरुतःपृश्निमातरःशुभंय्यावानोव्विदथेषुजग्ग्मयः । अग्ग्निजिह्वामनवःसूरचक्षसोव्विश्श्वेनोदेवाऽअवसागमन्निह ।।७।। ॐ भद्रङ्कर्ण्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ।।८।। ॐ शतम्मिन्नुशरदोऽअन्तिदेवायत्रानश्श्चक्क्राजरसन्तनूनाम् । पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्ग्गन्तोः ।।९।। ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः । व्विश्श्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ।।१०।।

— इति शान्तिपाठः —

❂

३. पञ्चगव्यनिर्माणविधिः

प्रयोगः[१] - अरोगाणां गवां गोमूत्रगोमयक्षीरदधिसर्पींषि कुशयुतमुदकञ्च पृथक् पृथक् संपादयेत् ।

गोमूत्रम्- ॐ भूर्भुवःस्वः। तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदयात् ।। इति मन्त्रेण वरुणं ध्यायन् ताम्रपात्रे पलाशपत्रपुटे वा गोमूत्रं निक्षिपेत् ।

गोमयम्- ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ।। इति मन्त्रेण अग्निं ध्यायन् गोमयं तत्रैव निक्षिपेत्।

क्षीरम्- ॐ आप्यायस्वसमेतुतेविश्श्वतःसोमवृष्ण्यम् । भवावाजस्यसङ्गथे ।। इति मन्त्रेण सोमं ध्यायन् तत्रैव क्षीरं निक्षिपेत्।

दधि- ॐ दधिक्राब्णोऽअकारिषञ्जिष्णोरश्श्वस्यवाजिनः । सुरभिनोमुखाकरत्त्प्रणऽआयूꣳषितारिषत् ।। इति मन्त्रेण वायुं ध्यायन् तत्रैव दधि निक्षिपेत् ।

घृतम्- ॐ तेजोसिशुक्क्रमस्यमृतमसिधामनामासिप्प्रियन्देवानामनाधृष्टन्देवयजनमसि ।। इति मन्त्रेण घृतं निक्षिपेत् ।

कुशोदकम्- ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ।। इति मन्त्रेण कुशोदकं पवित्रञ्च निक्षिपेत् ।

दूर्वाङ्कुराणि- ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि । एवानोदूर्वेप्रतनुसहस्त्रेणशतेनच ।। इति मन्त्रेण दूर्वाङ्कुराणि निक्षिपेत् ।

ततो गायत्र्या दशवारमभिमन्त्र्य प्रणवेन कुशेन यज्ञियकाष्ठेन वाऽऽलोड्य प्राशनं कुर्यात् । तत्र मन्त्रः-

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनात्पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ।। इति ।

इति पञ्चगव्यनिर्माणविधिः ।

---

[१] पञ्चगव्यनिर्माणकर्मपात्रनिर्माणार्घनिर्माणविधयो ग्रन्थकारेण नैव निर्दिष्टाः । आचारपरम्परायामेषामावश्यकत्वमनुभूयास्माभिरत्र क्रमश उपन्यस्ताः । - सम्पादकाः

४. कर्मपात्रसम्पादनम्

अक्षतपुञ्जोपरि कर्मपात्रस्थापनम्- ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम्। अग्निर्म्मातस्मादेनसोविश्श्वान्मुञ्चत्त्वꣳहसः।।१।। ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमावयम् । वायुर्म्मातस्म्मादेनसोविश्श्वान्मुञ्चत्त्वꣳहसः।।२।। ॐ यदिजाग्ग्रद्यदिस्वप्नऽएनाꣳसिचकृमावयम् । सूर्य्योमातस्म्मादेनसोविश्श्वान्मुञ्चत्त्वꣳहसः ।।३।। इति मन्त्रान् पठित्वा अक्षतपुञ्जोपरि कर्मपात्रं स्थापयेत् ।

ततः **ॐ पवित्त्रेस्त्थोवैष्ण्णव्यौसवितुर्व्वःप्प्रसवऽउत्त्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ।।** इति मन्त्रेण कर्मपात्रे पवित्रं क्षिपेत् । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः।।** इति जलं क्षिपेत् । **ॐ श्रीश्श्चतेलक्ष्मीश्श्चपत्न्यावहोरात्रेपाश्श्र्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम्। इष्ण्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।** इति पुष्पं क्षिपेत् । **ॐ यवोसियवयास्मद्द्वेषोयवयारातीः।।** इति यवान् क्षिपेत्। **ॐ तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः । प्रत्नमद्भिःपृक्तःस्वधयापितॄँल्लोकान्पृणाहिनःस्वाहा ।।** इति तिलान् क्षिपेत् । **ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ।।** इति गन्धं क्षिपेत् । **ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत । अस्त्तोषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी।।** इत्यक्षतान् क्षिपेत्। **ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेनच।।** इति दूर्वां प्रक्षिपेत् ।

आत्मसेचनम्- कुशत्रयसहितं कर्मपात्रोदकमादाय –

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा पूजादेशं द्रव्याण्यात्मानञ्च सिञ्चेत् ।

[illegible]

५. अर्घस्थापनविधिः

अर्घसामग्रीपरिचयः - आपः क्षीरं कुशाग्राणि दधि दूर्वाक्षतास्तथा।
तिलाः पूगफलञ्चैव ह्यष्टाङ्गोऽर्घः प्रकीर्तितः।।

प्रयोगः - स्वाग्रे चन्दनादिना त्रिकोणं विलिख्य तत्र **ॐ [1]दशकलात्मने वह्निमण्डलाय पात्राधाराय नमः** इति चन्दनाक्षतादिना सम्पूज्य शङ्खमुद्रां प्रदर्श्य तत्रार्घपात्रं स्थापयेत् । पात्रे **ॐ सूर्यमण्डलाय [2]द्वादशकलात्मने नमः** इति **अमुकदेवार्घपात्राय नमः** इति संपूज्य तत्र **ॐ आपोऽअस्मानिति** जलं क्षिपेत् । तत्र जले **ॐ [3]षोडशकलात्मने चन्द्रमण्डलाय नमः** इति चन्द्रमण्डलपूजनं कुर्यात् । ततस्तत्र **ॐ पयः पृथिव्यामिति** पयः, **ॐ पवित्रे स्थः** इति पवित्रम् **ॐ दधिक्राब्ण** इति दधि, **ॐ काण्डात्काण्डादिति** दूर्वाम्, **ॐ अक्षन्नमीमदन्त** इत्यक्षतान्, **ॐ तिलोऽसीति** तिलान्, **ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्श्चपुष्पिणीः । बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः ।।** इति पूगीफलं प्रक्षिपेत् ।

ततो **गङ्गे च यमुने चे**ति तीर्थजलं प्रक्षिप्य अङ्कुशमुद्रया सूर्यमण्डलात्तीर्थान्यावाह्य पूजयेत् । ततो मत्स्यमुद्रयाच्छाद्य धेनुमुद्रां प्रदर्श्यामृतीकुर्यात्।

— इत्यर्घपात्रस्थापनविधिः —

◆

---

[1] अग्नेर्दशकलाः - **धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ।**
सुश्रीः सुरूपा कपिला स्वधा स्वाहा कला दश । वह्नेरिमाः समाख्यातास्तन्त्रविद्भिः पुरातनैः ।।
इमा वह्निकलाः पात्राधारे पूजनीयाः ।

[2] सूर्यस्य द्वादशकलाः - **तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।**
सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा । तन्त्रविद्भिरिमाः प्रोक्ताः कला द्वादश भास्वतः ।।
इमाः सूर्यकलाः पात्रे पूजनीयाः ।

[3] चन्द्रमसः षोडशकलाः - **अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः ।**
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गना। पूर्णा पूर्णामृता चैताः कलाः सोमस्य षोडश।
इमाश्चन्द्रकलाः पात्रस्थजले पूजनीयाः ।

गङ्गे च यमुने चैव गोदावरि सरस्वति

नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु

६. दीपपूजाविधिः

दीपप्रज्ज्वलनम् - ॐ स्थिरोभवविड्वङ्गऽआशुर्ब्भववाज्र्यवन् । पृथुर्ब्भवसुखदस्त्वमग्ग्नेःपुरीषवाहणः । इति दीपं प्रज्वलयेत् ।

दीपपूजनम् - ॐ पृष्टोदिविपृष्टोऽअग्ग्निःपृथिव्यांपृष्टोविश्श्वाऽओषधीराविवेश । वैश्श्वानरःसहसापृष्टोऽअग्ग्निःसनोदिवासरिषस्प्पातुनक्तम् ।। इति मन्त्रं पठित्वा षोडशोपचारैर्दीपं पूजयेत् ।

प्रार्थना- ॐ नमोऽस्त्वनन्ताय सहस्त्रमूर्त्तये सहस्त्रपादाक्षिशिरोरुबाहवे।
सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटीयुगधारिणे नमः ।।
दीपज्योतिः परं ब्रह्म दीपज्योतिर्जनादनः ।
दीपो हरतु मे पापं रक्ष दीप नमोऽस्तु ते ।।

इति दीपं प्रार्थयेत् ।

— इति दीपपूजाविधिः —

७. कलशस्थापनपूजनविधिः

भूसँस्कारः- तत्र मण्डपमध्ये (ईशानदिग्भागे) **ॐ भूरसीति** मन्त्रस्य प्रजापतिर्ऋषिः प्रस्तारपङ्क्तिश्छन्दो भूमिर्देवता भूसँस्करणे विनियोगः- **ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्श्वस्यभुवनस्यधर्त्री । पृथिवींयच्छपृथिवींदृंहपृथिवीम्माहिंसीः ।।** इति भूमिं संस्कुर्यात् ।

गोमयाल वालकरणम्- मानस्तोके० इति मन्त्रेण कलशस्थापनार्थं गोमयालवालः कर्तव्यः । **ॐ मानस्तोके०** इति मन्त्रस्य कुत्सऋषिर्जगतीच्छन्दो रुद्रो देवता कलशस्थापनार्थं गोमयालवालकरणे विनियोगः- **ॐ मानस्तो-**

केतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः। मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे ।। इति ।

धान्यस्थापनम्- ॐ धान्यमसिधिनुहिदेवान्प्राणायत्त्वोदानायत्त्वाव्यानायत्त्वा। दीर्ग्घामनुप्रसितिमायुषेधान्देवोवःसविताहिरण्यपाणिःप्रतिगृब्भ्णात्त्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ।। इति मन्त्रेण धान्यं संस्थापयेत् ।

कलशस्थापना- धान्योपरि अधोलिखितमन्त्रेण अब्रणं कलशं स्थापयेत्-
ॐ आजिग्घ्रकलशम्मह्यात्त्वाव्विशन्त्विन्दवः । पुनरूर्ज्जानिवर्त्तस्वसानःसहस्रन्धुक्क्ष्वोरुधाराःपयस्वतीःपुनर्म्माव्विशताद्रयिः ।। इति ।

तीर्थजलप्रक्षेपः- ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ।। इति मन्त्रेण तीर्थादिजलं प्रक्षिपेत् ।

सर्वौषधिप्रक्षेपः- ॐ याऽओषधीःपूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा । मनैनुबब्भ्रूणामहꣳशतन्धामानिसप्तच ।। इति सर्वौषधीः प्रक्षिपेत् ।

पञ्चरत्नप्रक्षेपः- ॐ हिरण्यगर्ब्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ।। इति पञ्चरत्नानि प्रक्षिपेत् ।

फलप्रक्षेपः- ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्श्चपुष्पिणीः । बृहस्पतिप्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः ।। इति फलं क्षिपेत् ।

यवप्रक्षेपः- ॐ ओषधयःसमवदन्तसोमेनसहराज्ञा । यस्म्मैकृणोतिब्ब्राह्मणस्तꣳराजन्पारयामसि ।। इति यवान् प्रक्षिपेत् ।

गन्धप्रक्षेपः- ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ।। इति गन्धं प्रक्षिपेत् ।

दूर्वाप्रक्षेपः- ॐ काण्डात्त्काण्डात्त्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेनच ।। इति दूर्वाः प्रक्षिपेत् ।

सप्तमृत्तिकाप्रक्षेपः- ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।। इति सप्तमृदः प्रक्षिपेत् ।

पञ्चपल्लवप्रक्षेपः- ॐ अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता । गोभाजऽइत्किलासथयत्त्सनवथपूरुषम् ।। इति पञ्चपल्लवैः कलशमुखमाच्छादयेत्।

पञ्चपल्लवाभावे आम्रपल्लवप्रक्षेपः - ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन । ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।। इत्याम्रपल्लवैस्तन्मुखमाच्छादयेत् ।

वस्त्रवेष्टनम्- ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् । उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा ।। इति वस्त्रयुग्मेन कलशं वेष्टयेत्।

दध्यक्षतैर्भूषणम्- ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव। यत्त्कामास्त्तेजुहुमस्तन्नोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् ।। इति दध्यक्षतैः कलशं भूषयेत् ।

वरुणस्यावाहनम्- ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः । अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।। इति मन्त्रेण वरुणमावाह्य पूजयेत् ।

वरुणनमस्कारः- वरुणाय नमस्तेऽस्तु नमः स्फटिकदीप्तये ।
नमस्ते श्वेतहाराय जलेशाय नमोऽस्तु ते ।। इति ।

वरुणप्रार्थना- शङ्खस्फटिकवर्णाभ श्वेतहाराम्बरावृत ।
पाशहस्त महाबाहो दयां कुरु कृपानिधे ।। इति ।

कलशे गङ्गाद्यावाहनम्-

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।।

कलशं स्पृष्ट्वाऽभिमन्त्रणम्-

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ।।
कुक्षौ तु सागराः सप्त सप्त-द्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।

कलशप्रार्थना- ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवःस्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा । इति ।

कलशे धान्यपूर्णशरावस्थापनम्- ॐ धान्न्यमसिधिनुहिदेवान्न्प्राणायत्त्वोदानायत्त्वाव्यानायत्त्वा । दीर्ग्घामनुप्प्रसितिमायुषेधान्देवोवःसविताहिरण्यपाणिःप्प्रतिगृब्भ्णात्त्वच्छिद्द्रेणपाणिनाचक्षुषेत्त्वामहीनाम्पयोसि ।। इति मन्त्रेण धान्यपूर्णशरावं कलशमुखे स्थापयेत् ।

शरावे प्रज्ज्वलितदीपस्थापना- ॐ अग्निज्ज्योतिज्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिज्ज्योतिःसूर्य्यःस्वाहा । अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योव्वर्च्चोज्योतिर्व्वर्च्चःस्वाहा । ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिःस्वाहा ।। इति मन्त्रेण तत्र प्रज्ज्वलितदीपं धारयेत् ।

गणपत्यादिपूजनम्- ततः कलशस्कन्धप्रदेशे गणपतिदुर्गावाय्वाकाशाश्विनीकुमारान् पञ्चदेवानामावाहनपूर्वकं पूजयेत् । तत्रैवं सङ्कल्पः- ॐ अद्येत्यादि-

देशकालौ स्मृत्वा करिष्यमाणामुककर्मनिर्विघ्नपरिसमाप्त्यर्थं गणपतिदुर्गावाय्वाकाशाश्विनीकुमारपूजनमहं करिष्ये इति ।

आवाहनपूजनमन्त्राः- ॐ कारस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दः सर्वकर्मारम्भे विनियोगः । **ॐ गणनान्त्वे**तिमन्त्रस्य प्रजापतिर्ऋषिर्गणपतिर्देवता यजुश्छन्दो गणपतेरावाहनपूजनयोर्विनियोगः । **ॐ भूर्भुवः स्वरि**ति महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि गणपत्याद्यावाहने विनियोगः । **ॐ गणानान्त्वा० ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ** इत्यावाह्य एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि समर्पयामि **ॐ गणपतये नमः।** इदमनुलेपनम् स० **ॐ गणपतये नमः,** इति पुष्पाक्षतैस्त्रिःपूजयेत् । एष धूपः, एष दीपः, इदं नैवेद्यम् स० **ॐ गणपतये नमः** ।

ॐ अम्बेअम्बिके० इति प्रजापतिर्ऋषिरनुष्टुप्छन्दो दुर्गादेवता दुर्गावाहनपूजनयोर्विनियोगः। **ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन। ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।। ॐ भूर्भुवः स्वः दुर्गे इहागच्छ इह तिष्ठ इत्यावाह्य ॐ दुर्गायै नमः**, इति पूजयेत् ।
ॐ वातोवेति बृहस्पतिर्ऋषिरुष्णिक्छन्दो वातो देवता वाय्वावाहनपूजनयोर्विनियोगः । **ॐ व्वातोवामनोवागन्धर्व्वाःसप्तविᳬशतिः । तेऽअग्ग्नेश्वमयुञ्जँस्तेऽअस्म्मिञ्जवमादधुः ।। ॐ भूर्भुवः स्वः वायो इहागच्छ इह तिष्ठ इत्यावाह्य ॐ वायवे नमः**, इति पूजयेत् ।

ॐ ऊर्द्ध्वाऽअस्येति प्रजापतिर्ऋषिरुष्णिग्छन्द आकाशो देवता आकाशावाहनपूजनयोर्विनियोगः । **ॐ ऊर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीᳬष्यग्ग्नेः । द्युमत्तमासुप्प्रतीकस्यसूनोः ।। ॐ भूर्भुवः स्वः आकाश इहागच्छ इह तिष्ठ इत्यावाह्य, ॐ आकाशाय नमः**, इति पूजयेत् ।

ॐ अश्विनोर्भैषज्ज्येनेति त्रयाणां प्रजापतिर्ऋषिः आद्यस्य प्राजापत्या बृहती अन्त्ययोर्ऋग्गायत्री छन्दोऽश्विनौ देवते अश्विनीकुमारावाहनपूजनयो-

र्विनियोगः । **ॐ अश्विनोर्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनवीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि ।। ॐ भूर्भुवः स्वः अश्विनीकुमारौ इहागच्छतम् इह तिष्ठतम् इत्यावाह्य ॐ अश्विनीकुमाराभ्यां नमः**, इति पूजयेत् । ततः कलशस्कन्धप्रदेशे गणपत्यादिपञ्चायतनदेवान्, सूर्यादिनवग्रहान्, ईश्वराद्यधिदेवान्, अग्न्यादिप्रत्यधिदेवान्, इन्द्रादिदशदिक्पालान्, ध्रुवाद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येकादशरुद्रान्, गौर्यादिषोडशमातॄः, आवहादिसप्तमरुतः, विनायकब्रह्मविष्णुरुद्रार्कवनस्पतीन् आवाह्य यथासम्पादितैः पाद्यादिधूपदीपनैवेद्यान्तैरुपचारैः पूजयेत् ।

प्रार्थना- **ॐ सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः**
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिम्
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।
ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ।।

— इति कलशस्थापनपूजनविधिः —

८. गणेशपूजाविधिः

ससङ्कल्पं गणेशावाहनम्- ॐ अद्येहेत्यादि देशकालौ संकीर्त्य अमुककर्मनिर्विघ्नपरिसमाप्त्यर्थममुककर्माङ्गत्वेन यथालब्धोपचारैर्गणेशपूजनमहं करिष्ये इति संकल्प्याधोलिखितमन्त्रैर्गणेशमावाहयेत्- **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्व-**

सोमम । आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ।।

हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।
सिद्धिबुद्धिपते त्र्यक्षलक्षलाभयुतः पितः ।।
नागास्य नागहार त्वं गणराज चतुर्भुज ।
भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ।।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ।।

इत्यावाहयेत् ।

गणेशपूजनम्- ॐ भूर्भुवः स्वः गणपतये सिद्धिबुद्धिसहिताय सायुधाय सवाहनाय सपरिवाराय इदमासनं समर्पयामीति प्रतिप्रयोगं **सहस्रशीर्षे**त्यादिमन्त्रैः षोडशोपचारैः पूजयेत् । तद्यथा आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, यज्ञोपवीतम्, वस्त्रम्, गन्धम्, अक्षतान्, पुष्पाणि, दूर्वाङ्कुरान्, धूपम्, दीपम्, नैवेद्यम्, आचमनीयम्, ताम्बूलम्, अलङ्कारादि, यल्लब्धं दक्षिणाद्रव्यम्, पादवन्दनञ्च समर्प्य नारिकेलादिफलं सवस्त्रं पुरतः पात्रे निधाय स्तुवीत ।

गणेशस्तुतिपूर्वकं फलनिवेदनम् -

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।।
अनेन फलदानेन फलदोऽस्तु सदा मम ।

इति स्तुत्वा फलं निवेदयेत् ।

— इति गणेशपूजाविधिः —

९. रक्षाविधानम्

प्रयोगः- यवकुशदूर्वासिर्षपचन्दनाक्षतगोमयहरिद्रादधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन्नारायणकवचं पठेत्-

प्राचीं रक्षतु गोविन्द आग्नेयीं गरुडध्वजः ।
यामीं रक्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् ।।
वारुणीं केशवो रक्षेद्वायवीं मधुसूदनः ।
उदीचीं श्रीधरो रक्षेदैशानीं तु गदाधरः ।।
ऊर्ध्वं गोवर्धनधरो ह्यधस्ताद्धरणीधरः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ।।
यज्ञाग्रे रक्षताच्छंखः पृष्ठे पद्मं तथोत्तमम् ।
वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ।।
उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ।
अच्युतः पातु ऋग्वेदं यजुर्वेदमधोक्षजः ।।
कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा ।
उपविष्टाश्चये विप्रास्तेऽनिरुद्धेन रक्षिताः ।।
यजमानं सपत्नीकं पुण्डरीकविलोचनः ।
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ।।
वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैश्च सर्षपैः ।
कृत्वा पोटलिकां पूर्वं बध्नीयाद्दक्षिणे करे ।।

रक्षापोटलिकापूजने वेदमन्त्राः- ॐ भूर्भुवः स्वः तत्सवितुर्व०, ॐ गणानान्त्वा०, ॐ जातवेदसेसुनवामसोमम्०, ॐ सप्तऽऋषयः०, ॐ नतत्०, ॐ यदाबघ्नन्०, ॐ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंव्वलगमुक्त्किरामियन्मेनिष्ट्योयममात्त्योनिचखानेदमहन्तंव्वलगमुक्त्किरामि । यम्मेसमानोयमसमानोनिचखानेदमहन्तंव्वलगमुक्त्किरामिय-

म्मेसबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तंव्वलगमुत्त्किरामियम्मेसजातोयमसजातोनिचखानोत्त्कृत्त्याङ्किरामि ।। ॐ स्वराडसिसपत्नहासत्रराडस्यभिमातिहा । जनराडसिरक्षोहासर्व्वराडस्यमित्रहा ।। ॐ रक्षोहणोवोव्वलगहनःप्प्रोक्षामिव्वैष्णवान्रक्षोहणोवोव्वलगहनोऽवनयामिव्वैष्णवान्रक्षोहणोवोव्वलगहनो्वस्तृणामिव्वैष्णवान्रक्षोहणौवांव्वलगहनाऽउपदधामिव्वैष्णवीरक्षोहणौवांव्वलगहनौपर्य्यूहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्त्थ ।। ॐ मानः०, ॐ प्रत्त्युष्टꣳरक्षः० इति एभिर्मन्त्रै रक्षापोटलिकां संपूज्य कर्मान्ते दक्षिणकरे बध्नीयात् ।

बन्धनमन्त्रौ- ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ।।

ॐ त्वंय्यविष्ठदाशुषोनॄंःपाहिशृणुधीगिरः । रक्षातोकमुतत्त्मना।।
रक्षा सुरक्षा भूयात् ।

— इति रक्षाविधानम् —

१०. कलशस्कन्धप्रदेशे गणपत्यादिपूजनम्

प्रयोगः - कलशस्कन्धप्रदेशे गणपतिसूर्यदेवीशिवविष्णून्, विनायकदुर्गावाय्वाकाशाश्विनीकुमारान्, सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेतून्, ईश्वरोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तान्, अग्न्यब्भूमिविष्णिवन्द्रेन्द्राणीप्रजापतिसर्पब्रह्मणः, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तान्, ध्रुवांद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येकादशरुद्रान्, गौर्यादिषोडशमातृः, आवहादिसप्तमरुतः, विनायकब्रह्मविष्णुरुद्रार्कवनस्पतीन् आवाह्य यथामिलितोपचारैः पूजयेत् ।

११. पुण्याहवाचनविधिः

ब्राह्मणवरणम्- त्रींश्चतुरः पञ्च वा ब्राह्मणानुत्तरवृद्ध्या संस्थाप्य कर्मपात्रोदकं सकुशतिलयवं गृहीत्वा- ॐ अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहममुककर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये, तदङ्गत्वेन अमुकसंख्याकानां ब्राह्मणानां वरणम्, पूजनञ्च करिष्ये , इति संकल्प्य अर्घगन्धाक्षतपुष्पताम्बूलपूगीफलद्रव्यवस्त्रादिभिर्ब्राह्मणान् संपूज्य एभिर्गन्धाक्षतपुष्पताम्बूलफलद्रव्यवस्त्रादिभिरमुककर्मणि सर्वाभ्युदयप्राप्तये पुण्याहवाचनार्थं **त्वामहं वृणे, वृतोस्मीति** प्रतिवचनम् । एवं कृत्वाऽन्येषामपि तदैव वरणं कुर्यात् । युष्मानहं वृणे इति एकदैव वा वरणं सर्वेषाम् ।

ब्राह्मणप्रार्थना- अञ्जलिं बध्वा ब्राह्मणान् प्रार्थयेत् । **ॐ ब्रह्मजज्ञानम्०**, **ॐ बृहस्पतेऽअति०** ।

ब्राह्मणाः सन्तु मे शस्ताः पापात् पान्तु समाहिताः ।
वेदानां चैव दातारः पातारः सर्वदेहिनाम् ।।१।।
जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः ।
देवानाञ्च पितृणाञ्च तृप्त्यर्थं पाठकाः कृताः ।।२।।
येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् ।
रक्षन्तु सततं तस्माज्जपयज्ञे व्यवस्थिताः ।।३।।
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
येषां वाक्यामृतेनैव शुद्ध्यन्ति मलिना जनाः ।।४।।
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ।
सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ।।५।।
श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा ।
यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ।।६।।

अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाशिषः ।
यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ।।७।।
यत्कृपालोकनात् सर्वा ऋद्धयो वृद्धिमाप्नुयुः ।
मम यज्ञे सदा पूज्याः सन्तु वै नियमान्विताः ।।८।।
अक्रोधनाः शौचपराः सततं ब्रह्मवादिनः ।
ब्रह्मध्यानरता नित्यं प्रसन्नमनसः सदा ।।९।।
अदुष्टभाषिणः सन्तु मा सन्तु परनिन्दकाः ।
ममापि नियमा ह्येते भवन्तु भवतामपि ।।१०।।

इति ब्राह्मणान् सम्प्रार्थयेत् ।

पुण्याहवाचनम्- ततो हस्ते फलादिकं गृहीत्वा- ॐ अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम गृहेऽमुककर्मणि भो ब्राह्मणा **ॐ पुण्याहं भवन्तो ब्रुवन्तु** इति त्रिःश्रावयेत् । ब्राह्मणाश्च **ॐ पुण्याहम्** इति त्रिरुक्त्वा- **ॐ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः । पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा ।।** इति पठेयुः ।

एवमुत्तरत्र पुनः पूर्ववत् भो ब्राह्मणा मम गृहे **ॐ स्वस्ति भवन्तो ब्रुवन्तु,** इति त्रिःश्रावयेत् । ब्राह्मणाश्च **ॐ स्वस्ति** इति त्रिरुक्त्वा- **ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ।।**

पुनःपूर्ववत् भो ब्राह्मणा मम गृहे **ॐ समृद्धिं भवन्तो ब्रुवन्तु ३,** ब्राह्मणाः **ॐ समृद्ध्यताम् ३ । ॐ सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम । दिवंपृथिव्याऽअद्ध्यारुहामाविदामदेवान्त्स्वज्ज्योतिः ।।**

पुनः पूर्ववत् भो ब्राह्मणा मम गृहे **ॐ वृद्धिं भवन्तो ब्रुवन्तु ३,** ब्राह्मणाश्च **ॐ वृद्ध्यताम् ३ । ॐ ज्यैष्ठ्यञ्चमऽआधिपत्त्यञ्चमेमन्न्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमाचमेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्प्यन्ताम् ।।**

पुनः पूर्ववत् भो ब्राह्मणा मम गृहे **ॐ कल्याणं भवन्तो ब्रुवन्तु ३,**

ब्राह्मणा: **ॐ कल्याणंम्३ । ॐ यथेमांवाचङ्कल्याणीमावदानिजनेब्भ्यः। ब्रह्मराजन्न्याब्भ्याꣳशूद्रायचार्य्यायचस्वायचारणायच । प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामःसमृद्ध्यतामुपमादोनमतु ।।**

पुनपूर्ववत् भो ब्राह्मणा मम गृहे **ॐ शान्तिं भवन्तो ब्रुवन्तु ३,** ब्राह्मणा: **ॐ शान्तिः ३ । ॐ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिःरोषधयःशान्तिः। व्वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ।।**

पुनः पूर्ववत् भो ब्राह्मणा **मम गृहे श्रियं भवन्तो ब्रुवन्तु** ३, **ॐ श्रीः ३ । ॐ मनसःकाममाकूतींव्वाचःसत्यमशीय । पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम् ।।**

ब्राह्मणैराशीःप्रदानम् - ततो ब्राह्मणा: -

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ।।

इत्युक्त्वा- **ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।**
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।

पुण्याहवाचनप्रसादोऽस्तु इति तिलकमाशीर्वादश्च यजमानाय दद्युः।

— इति पुण्याहवाचनप्रयोगः —

१२. मातृकापूजाविधिः

(क) अदित्यादिगोमयमातृकापूजाविधिः

कस्मिन्कुले मङ्गलपञ्चकञ्च कस्मिन्कुले मङ्गलसप्तकं स्यात् ।
त्रिमङ्गलं चापि कुले विशुद्धे नो लङ्घनीयाः कुलदेशधर्माः ।।१।।
मृत्तिकामङ्गलाहे च षोडशस्तम्भमण्डपः ।
करणीयः(रमणीयः) पूर्वमुखः कदलीतोरणान्वितः ।।२।।

प्रयोगः - कर्ता सन्ध्याकाले प्रक्षालितपाणिपादः स्वाचान्तः कृतकुशोपग्रहः प्रथमं द्वारबहिर्देशे स्थापितसप्तदशगोमयपिण्डिकासु- ॐ अद्येहेत्यादिदेशकालौ सङ्कीर्त्य, प्रारीप्सितामुककर्मप्रतिबन्धकदुरितोपशमद्वारा मृत्तिकामङ्गलाङ्गभूतत्वेन विनायकपूजनपूर्वकमदित्यादिसप्तदशगोमयमातृकाणां पूजनमहं करिष्ये , इति संकल्प्य, समावाह्य पूजयेत् ।

ॐ कारस्य ब्रह्माऋषिर्दैवी गायत्रीछन्दः परमात्मा देवता सर्वकर्मारम्भे विनियोगः। **ॐ गणानान्त्वे**ति मन्त्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः गणपतिर्देवता गणपतेरावाहनपूजनयोर्विनियोगः । **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।। ॐ भूर्ब्भुवः स्वः** इति महाव्याहृतीनां प्रजापतिर्ऋषिः अग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि गणपतेरावाहनपूजनयोर्विनियोगः । **ॐ गणानान्त्वा०** ।

आवाहये तं गणराजदेवं रक्तोत्पलाभासमशेषवन्द्यम् ।
विघ्नान्तकं विघ्नहरं गणेशं भजामि रौद्रं सहितं च सिद्ध्या ।।
लम्बोदर महाकाय गजवक्त्र चतुर्भुज ।
आगच्छ गणराज त्वं यज्ञेऽस्मिन् सन्निधौ भव ।।
हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।

सिद्धिबुद्धिपते त्र्यक्षलक्षलाभयुतः पितः ।।
नागस्य नागहारस्त्वं गणराज चतुर्भुज ।
भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ।।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागत्य गृहाण त्वं पूजां यज्ञं च रक्ष मे ।।

ॐ भूर्भुवः स्वर्गणपते इहागच्छेह तिष्ठेत्यावाह्य प्रतिष्ठाप्य सुवर्णाद्यर्घपात्रे गन्धपुष्पाक्षतादीन् नारिकेलाद्यन्यतमं फलं च क्षिप्त्वा अर्घ्यं संपादयेत् ।

पवित्रीकरणम्- ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यःस्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुण्डरीकाक्षः पुनातु इति मन्त्रेण कुशत्रयगृहीतार्घ्यजलेन पूजादेशद्रव्याण्यात्मानं च त्रिः सिञ्चेत्। ततः **ॐ गणानान्त्वा, ॐ भूर्भुवः स्वः गणपतये नमः** आसनं समर्पयामि । एवं पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पुनराचमनीयम्, पञ्चामृतम्, शुद्धोदकस्नानम्, वस्त्रोपवस्त्रे, यज्ञोपवीतम्, गन्धम्, अक्षतान्, पुष्पाणि, दूर्वाङ्कुराणि, सिन्दूरम्, धूपम्, दीपम्, नैवेद्यम्, मोदकान्, ताम्बूलम्, दक्षिणाम् प्रदक्षिणाञ्च समर्प्य, सवस्त्रदक्षिणं फलं पात्रे संस्थाप्य पुरतो निधाय प्रार्थयेत् ।

प्रार्थना- रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।
वरदस्त्वं वरं देहि वञ्छितं वाञ्छितार्थदः ।।
अनेन फलदानेन फलदस्त्वं सदा मम ।

नमस्कारः-

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय ।

नागाननाय श्रुतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ।।
भक्तार्तिनाशनपराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय
भक्तिप्रियाय वरदाय नमो नमस्ते ।।
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ।
नमस्ते रूद्ररूपाय करिरूपाय ते नमः ।।

ततो बद्धाञ्जलिः प्रार्थयेत्-

ॐ त्वां विघ्नशत्रुदलनेति च सुन्दरेति
भक्तप्रियेति सुखदेति फलप्रदेति ।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति
तेभ्यो गणेश वरदो भव नित्यमेव ।।
ॐ वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।

पूजा सम्पूर्णतां यातु गणपते क्षमस्व इति । ततः **ॐ मनोजूति**रिति मन्त्रस्याङ्गिरसबृहस्पतिर्ऋषिर्बृहतीच्छन्दो बृहस्पतिर्देवता प्रतिष्ठापने विनियोगः। **ॐ मनोजूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु । व्विश्वेदेवासऽइहमादयन्तामो३ँम्प्रतिष्ठ ।।** इति मन्त्रेणाक्षतैः प्रतिष्ठाप्य- **ॐ भूर्भुवः स्वः अदित्यादिसप्तदशगोमयमातर इहागच्छतेह तिष्ठत** इत्यावाह्य पूजयेत् ।

ताश्च यथा- **अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती ।**
कीर्तिर्लक्ष्मीधृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।।
बुद्धिर्लज्जा वपुः शान्तिरेता गोमयमातरः ।

ॐ अदितिरसि १, ॐ देवमातासि २, ॐ स्वाहासि ३, ॐ सिद्धिरसि४, ॐ सरस्वत्यसि५, ॐ कीर्तिरसि६, ॐ लक्ष्मीरसि ७, ॐ धृतिरसि ८, ॐ मेधासि ९, ॐ पुष्टिरसि १०, ॐ श्रद्धासि ११, ॐ क्रियासि १२, ॐ मतिरसि १३, ॐ बुद्धिरसि १४, ॐ लज्जासि १५, ॐ वपुरसि १६, ॐ शान्तिरसि १७, इति प्रत्येकं संस्पृशेत्। प्रणवादिनमोन्तैश्चतुर्थ्यन्तनाममन्त्रैः प्रत्येकं षोडशोपचारैः काण्डानुसमयेन पूजयेत्, पदार्थानुसमयेन वा ।

पदार्थानुसमयपूजाविधिः- एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयवस्त्रयज्ञोपवीताभरणानि **ॐ अदित्यादिसप्तदशगोमयमातृभ्यो नमः,** इदमनुलेपनम्, एतेऽक्षता, इमानि पुष्पाणि, इदं सिन्दूरम्, एष धूपः, एष दीपः, इदं नैवेद्यम्, इदं ताम्बूलम्, इदं फलम्, इदं द्रव्यम्, एषाप्रदक्षिणा, इदं नीराजनम्, अयं पुष्पाञ्जलिः, एष नमस्कारः- **ॐ अदित्यादिसप्तदशगोमयमातृभ्यो नमः** इति । **ॐ अदित्यादिसप्तदशगोमयमातरः पूजिताः स्थ क्षमध्वं स्वस्थानं गच्छत ।** इति पदार्थानुसमयपूजाक्रमः । ततः समाचारात्स्त्रीभिर्मृत्तिकामङ्गलविधानं विधेयम् ।

— इति अदित्यादिगोमयमातृकापूजाविधिः —

(ख) तोरणमातृपूजाविधिः

प्रयोगः- अथोत्सवदिने प्रातःकाले कर्ता सुस्नातः शुचिवस्त्रधरः प्रक्षालितपाणिपादः शुक्लगन्धानुलेपनः कृतनित्यक्रियो यजमानः सुवर्णरजतकुशपवित्रान्वितदक्षिणकरो वामहस्ते धृतकुशः तोरणमातृसमीपे गोमयोपलिप्तभूमिन्यस्तश्रीपर्ण्यादिप्रशस्तदारुमयपीठोपरिन्यस्तकुशासनेऽन्तर्जानुहस्तः प्राङ्मुख उपविश्याचम्य प्राणानायम्य तोरणमातृपूजां कुर्यात्।

कुशतिलयवजलान्यादाय- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा कर्तव्या-

मुककर्मनिर्विघ्नपरिसमाप्त्यर्थं गौर्यादिदशतोरणमातृपूजामहं करिष्ये इति संकल्प्य **ॐ मनोजूति०** इति मन्त्रेण **ॐ भूर्भुवः स्वः गौर्यादिदशतोरणमातर इहागच्छत इह तिष्ठत** इत्यावाह्य प्रतिष्ठाप्य च पूजयेत् ।

तोरणमातृनामानि- गौरी च धनदा नन्दा विमला मङ्गला बला ।
गङ्गा च यमुना धात्री विधात्री तोरणाम्बिकाः ।।

ॐ गौर्यसि१, ॐ धनदासि२, ॐ नन्दासि३, ॐ विमलासि४, ॐ मङ्गलासि ५, ॐ बलासि ६, ॐ गङ्गासि ७, ॐ यमुनासि ८, ॐ धात्र्यसि ९, ॐ विधात्र्यसि १० इति प्रत्येकं स्पृशेत् । एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि **ॐ गौर्यादिदशतोरणमातृभ्यो नमः**, इदमनुलेपनम्, एतेऽक्षताः, इमानि पुष्पाणि, इदं वस्त्रम्, इदं यज्ञोपवीतम्, एष धूपः, एष दीपः, इदं नैवेद्यम्, इदं ताम्बूलम्, इदं फलम्, इयं दक्षिणा, इयं प्रदक्षिणा, इदं नीराजनम्, अयं नमस्कारः, अयं पुष्पाञ्जलिः **ॐ गौर्यादिदशतोरणमातृभ्यो नमः ।**

पुष्पाक्षतैः प्रत्येकं त्रिःपूजनम्- ॐ गौर्यै नमः ३, ॐ धनदायै नमः ३, ॐ नन्दायै नमः ३, ॐ विमलायै नमः ३, ॐ मङ्गलायै नमः ३, ॐ बलायै नमः ३, ॐ गङ्गायै नमः ३, ॐ यमुनायै नमः ३, ॐ धात्र्यै नमः ३, ॐ विधात्र्यै नमः ३ इदं सिन्दूरम् **ॐ गौर्यादिदशतोरणमातृभ्यो नमः । ॐ गौर्यादिदशतोरणमातरः पूजिताः स्थ क्षमध्वं स्वस्थानं गच्छत** इति प्रणम्य विसर्जयेत्।

— इति तोरणमातृपूजाविधिः —

(ग) द्वारमातृपूजाविधिः

प्रयोगः- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा करिष्यमाणामुककर्मनिर्विघ्नपरिसमाप्त्यर्थं तदङ्गत्वेन नन्दादिसप्तद्वारमातृपूजामहं करिष्ये इति सङ्कल्प्य **ॐ मनोजूति०** इति मन्त्रेण **ॐ भूर्भुवः स्वः नन्दादिसप्तद्वारमातरः**

इहागच्छत इह तिष्ठत इत्यावाह्य प्रतिष्ठाप्य पूजयेत् ।

द्वारमातृनामानि- नन्दा नन्दिनी वासिष्ठी वसुदेवा च भार्गवी ।
जया च विजया चैव सप्तैता द्वारमातरः ।।

ॐ नन्दासि १, ॐ नन्दिन्यसि २, ॐ वासिष्ठ्यसि ३, ॐ वसुदेवासि ४, ॐ भार्गव्यसि ५, ॐ जयासि ६, ॐ विजयासि ७ इति प्रत्येकं स्पृशेत् ।

द्वारमातृपूजनम्- एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि **ॐ नन्दादिसप्तद्वारमातृभ्यो नमः** पुष्पाक्षतैः प्रत्येकं त्रिःपूजयेत् । **ॐ नन्दायै नमः ३, ॐ नन्दिन्यै नमः ३, ॐ वासिष्ठ्यै नमः ३, ॐ वसुदेवायै नमः ३, ॐ भार्गव्यै नमः ३, ॐ जयायै नमः ३, ॐ विजयायै नमः ३,** इदमनुलेपनम्, एतेऽक्षताः, इमानि पुष्पाणि, इदं सिन्दूरम्, इदं वस्त्रम्, इदं यज्ञोपवीतम्, एष धूपः, एष दीपः, इदं नैवेद्यम्, इदं ताम्बूलम्, इदं फलम्, इयं दक्षिणा, इयं प्रदक्षिणा, अयं नमस्कारः, अयं पुष्पाञ्जलिः **ॐ नन्दादिसप्तद्वारमातृभ्यो नमः । ॐ नन्दादिसप्तद्वारमातरः यथाशक्ति यथाबुद्धि पूजिताः स्थ क्षमध्वं स्वस्थानं गच्छत** इति प्रणम्य विसर्जयेत् ।

— इति द्वारमातृपूजाविधिः —

(घ) गौर्यादिषोडशमातृकापूजाविधिः

प्रयोगः- गृहाभ्यन्तरे गौर्यादिषोडशमातृश्च प्रत्येकं पूजयेत् । कुशतिलयवजलान्यादाय- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा करिष्यमाणामुककर्मनिर्विघ्नपरिसमाप्त्यर्थं तदङ्गतया गणपतिदुर्गापूजनम्, सूर्यादिनवग्रहपूजनम्, गौर्यादिषोडशमातृपूजनञ्चाहं करिष्ये इति सङ्कल्पयेत् ।

गणपतिपूजनम्- ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ इत्यावाह्य ॐ गणानान्त्वा० इति मन्त्रेण एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनी

यानि स० **ॐ गणपतये नमः** इत्यादि पूजयित्वा च बद्धाञ्जलिः प्रार्थयेत्- **ॐ वक्रतुण्डे**त्यादिना ।

दुर्गापूजनम्- ॐ अम्बेऽअम्बिके० इति ॐ भूर्भुवः स्वः दुर्गे इहागच्छ इह तिष्ठ इत्यावाह्य ॐ दुर्गायै नमः एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि स० **ॐ दुर्गायै नमः** इत्यादि पूजयेत् ।

नवग्रहपूजनम्- ॐ सूर्यादिनवग्रहा इहागच्छत इह तिष्ठत इत्यावाह्य एतानि पाद्यार्घ्याचमनीयस्नानीपुनराचमनीयानि स० । **ॐ साधिदैवतप्रत्यधिदैवतसूर्यादिनवग्रहेभ्यो नमः** । ततः पुष्पाक्षतैः प्रत्येकं त्रिःपूजयेत् । **ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।। ॐ सूर्याय नमः । ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्य्यपुत्रममुष्य्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकन्ब्राह्मणानाꣳराजा ।। ॐ चन्द्रमसे नमः। ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्त्पत्तिःपृथिव्याऽअयम् । अपाꣳरेताꣳजिन्न्वति।। ॐ भौमाय नमः । ॐ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टाशपूर्त्तेसꣳसृजेथामयञ्च। अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्वेदेवायजमानश्चसीदत।। ॐ बुधाय नमः । ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्द्विभातिक्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् (उपयामगृहीतोसिबृहस्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा) ।। ॐ बृहस्पतये नमः। ॐ अन्नात्त्परिस्त्रुतोरसन्ब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।। ॐ शुक्राय नमः । ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः ।। ॐ शनैश्चराय नमः । ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयाव्वृता ।। ॐ राहवे नमः। ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ।। ॐ केतवे नमः ।**

अधिदेवताप्रत्यधिदेवतापूजनम्- ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ।। ॐ ईश्वराद्यधिदेवताभ्यो नमः। ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे। देवाँ२।।आसादयादिह।। ॐ अग्न्यादिप्रत्यधिदेवताभ्यो नमः । धूपदीपनैवेद्यानि साधिदैवतप्रत्यधिदैवतसूर्यादिनवग्रहेभ्यो नमः ।

ततः भगवन् विनायक, भगवति दुर्गे, भगवन्तो नवग्रहा युष्मत्प्रसादादिदं मे कर्म निर्विघ्नं परिसमाप्यताम् इत्युक्त्वा क्षमध्वमिति तान् विसर्जयेत् ।

गौर्यादिषोडशमातृपूजनम्- ततः प्रतिमासु भित्तौ पटे वा लिखितासु अक्षत-पुञ्जेषु वा **ॐ मनोजूति**रिति मन्त्रेणाक्षतैः प्रतिष्ठाप्य **ॐ भूर्भुवः स्वः गौर्यादिषोडशमातर इहागच्छत इह तिष्ठत इत्यावाह्य** पूजयेत् ।

गौर्यादिषोडशमातृनामानि-

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।
धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवता ।
गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश ।।

ॐ गौर्यसि १, ॐ पद्मासि २, ॐ शच्यसि ३, ॐ मेधासि४, ॐ सावित्र्यसि ५, ॐ विजयासि ६, ॐ जयासि ७, ॐ देवसेनासि८, ॐ स्वधासि९, ॐ स्वाहासि१०, ॐ मातरःस्थ११, ॐ लोकमातरःस्थ १२, ॐ धृतिरसि १३, ॐ तुष्टिरसि१४, ॐ पुष्टिरसि१५, आत्मनःकुलदेवतासि १६ इति प्रत्येकं स्पृशेत् ।

गौर्यादिषोडशमातृपूजनम्- एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि स० **ॐ गौर्यादिषोडशमातृभ्यो नमः**। इदमनुलेपनम्, एतेऽक्षताः, इमानि पुष्पाणि **ॐ गौर्यादिषोडशमातृभ्यो नमः** । ततः प्रत्येकं त्रिःपूजयेत्पुष्पाक्षतैः- **ॐ गौर्यै नमः ३, ॐ पद्मायै नमः ३, ॐ शच्यै नमः ३, ॐ मेधायै**

नमः ३, ॐ सावित्र्यै नमः ३, ॐ विजयायै नमः ३, ॐ जयायै नमः ३, ॐ देवसेनायै नमः ३, ॐ स्वधायै नमः ३, ॐ स्वाहायै नमः ३, ॐ मातृभ्यो नमः ३, ॐ लोकमातृभ्यो नमः ३, ॐ धृत्यै नमः ३, ॐ तुष्ट्यै नमः ३, ॐ पुष्ट्यै नमः ३, ॐ आत्मनः कुलदेवतायै नमः ३, वस्त्रयज्ञोपवीतधूपदीपनैवेद्यसिन्दूरताम्बूलदक्षिणानीराजनप्रदक्षिणानमस्कारपुष्पाञ्जलीन् स०। **ॐ गौर्यादिषोडशमातृभ्यो नमः** । यथाशक्ति पूजिताःस्थ क्षमध्वमिति प्रणमेत् ।

— इति गौर्यादिषोडशमातृकापूजाविधिः —

(ङ) ब्राह्म्यादिसप्तमातृपूजनम्

प्रयोगः - प्रथमपङ्क्तौ गौर्यादिषोडशमातृपूजनं विधाय द्वितीयपङ्क्तौ **ॐ मनोजूति**रिति मन्त्रेणाक्षतैः प्रतिष्ठाप्य **ॐ ब्राह्म्यादिसप्तमातर इहागच्छत इह तिष्ठत इत्यावाह्य** प्रतिष्ठाप्य च पूजयेत्।

सप्तमातृनामानि- **ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।**
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ।।

ॐ ब्राह्म्यसि १, ॐ माहेश्वर्यसि २, ॐ कौमार्यसि ३, ॐ वैष्णव्यसि ४, ॐ वाराह्यसि ५, ॐ इन्द्राण्यसि ६, ॐ चामुण्डासि७, इति प्रत्येकं स्पृशेत् ।

पूजनम्- एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि **ॐ ब्राह्म्यादिसप्तमातृभ्यो नमः**। इदमनुलेपनम्, एतेऽक्षताः, इमानि पुष्पाणि, इदं वस्त्रम्, इदं यज्ञोपवीतम् । ततः पुष्पाक्षतैः प्रत्येकं त्रिःपूजयेत्- **ॐ ब्राह्म्यै नमः ३, ॐ माहेश्वर्यै नमः ३, ॐ कौमार्यै नमः ३, ॐ वैष्णव्यै नमः ३, ॐ वाराह्यै नमः ३, ॐ इन्द्राण्यै नमः ३, ॐ चामुण्डायै नमः ३** । धूपदीपनैवेद्यताम्बूलफलदक्षिणासिन्दूरप्रदक्षिणानमस्कारनीराजनपुष्पाञ्जलीन् स०।

ॐ ब्राह्म्यादिसप्तमातृभ्यो नमः । ॐ ब्राह्म्यादिसप्तमातरः पूजिताःस्थ क्षमध्वमिति प्रणमेत् ।

वसोर्धाराः - ततः स्वाचारतः यजमानपत्नी पक्वान्नादिकं शिरसि निधाय वसोर्धाराः प्रतीच्छेत् । तत तप्तघृतेन भित्तौ लग्नाः पञ्च सप्त वा धाराः कुर्यादेभिर्मन्त्रैः- **ॐ व्वसोःपवित्रमसिशतधारंव्वसोःपवित्रमसिसहस्रधारम्। देवस्त्वासवितापुनातुव्वसोःपवित्रेणशतधारेणसुप्प्वाकामधुक्षः ।।१।। ॐ ताꣳसवितुर्व्वरेण्यस्यचित्रामाहंव्वृणेसुमतिंव्विश्वजन्न्याम् । यामस्यकण्वोऽअदुहत्त्प्रपीनाꣳसहस्रधाराम्पयसामहीङ्गाम् ।।२।। ॐ कस्त्वोहेनांददर्शसाहास्मैसहस्रधाराःसर्वान्कामान्दुहुहेतथैवैतद्यजमानायसहस्रधाराःसर्वान्कामान्दु-दुहे ।।** इति ।

आयुष्यमन्त्रजपः - ॐ आयुष्ष्यमितित्रयाणां दक्षऋषिः क्रमेणोष्णिक्शक्वरीत्रिष्टुभश्छन्दांसि हिरण्यं देवता जपे विनियोगः। **ॐ आयुष्ष्यंव्वर्च्चस्यꣳरायस्पोषमौद्भिदम्। इदꣳहिरण्यंव्वर्च्चस्वज्जैत्रायाविशतादुमाम् ।।१।। ॐ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजःप्प्रथमजꣳह्येतत् । योविभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्ग्घमायुःसमनुष्ष्येषुकृणुतेदीर्ग्घमायुः ।।२।। ॐ यदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः । तन्मऽआबध्नामिशतशरदायायुष्मान्जरदष्टिर्य्यथासम् ।।३।। ॐ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः। व्वनस्प्पतयःशान्तिर्व्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ।।४।।** इति जपित्वा प्रणमेत् । ततो विप्राय दक्षिणां संकल्प्य दद्यात् ।

क्षमापनम्- ॐ आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमध्वं मातृदेवताः ।। इति ।
ततो विप्रो यजमानाय पुष्पादिप्रसादं दद्यात् ।

— इति मातृकापूजाविधिः —

१३. आभ्युदयिकश्राद्धविधिः

प्रयोगः- तत्र कर्ता प्रातः स्नानसन्ध्यादि कृत्वा प्राङ्मुख उदङ्मुखो वासने उपविश्य दीपं प्रज्ज्वलय्याचम्य **ॐ नमोस्त्वनन्तायै**ति दीपं संपूज्य **ॐ यं ब्रह्म०, अभीप्सितार्थसिद्ध्यर्थम्०** इति गणेशम्, **शुक्लाम्बरधरम्०** इति विष्णुञ्च प्रणम्य आसनेषु उदङ्मुखान् अष्टौ चतुरो वा ब्राह्मणान् तदभावे कुशवटून् संस्थाप्य **मनोजूति**रिति प्रतिष्ठाप्य यवान् गृहीत्वा निमन्त्रयेत् ।

ब्राह्मणनिमन्त्रणम्- ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्रास्मन्मात्रादित्रयामुकगोत्रास्मात्पित्रादित्रयामुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनां सत्यवसुसंज्ञकानां विश्वेषां देवानां कृत्ये **भवन्तो मया निमन्त्रिताः, ॐ निमन्त्रिताः स्म** इति प्रतिवचनम् । पुनर्यवान् गृहीत्वा ॐ अद्येहामुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनामद्यकर्तव्यामुककर्माङ्गभूताभ्युदयिकश्राद्धे **भवन्तो मया निमन्त्रिताः, ॐ निमन्त्रिताः स्म** इति प्रतिवचनम् । पुनर्यवान् गृहीत्वा ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां नान्दीमुखानामद्यकर्तव्यामुककर्माङ्गभूताभ्युदयिकश्राद्धे **भवन्तो मया निमन्त्रिताः, ॐ निमन्त्रिताः स्म** इति प्रतिवचनम् ।

पुनर्यवान् गृहीत्वा ॐ अद्येहामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां नान्दीमुखानामद्यकर्तव्यामुककर्माङ्गभूताभ्युदयिकश्राद्धे **भवन्तो मया निमन्त्रिताः, ॐ निमन्त्रिताः स्म** इति प्रतिवचनम् । इति निमन्त्रयेत् । **अक्रोधनैः शौचपरै**रित्यादि पठेत् । **आगतं वः** इति प्रश्नः, **स्वागतम्** इति प्रतिवचनम् ।

पादार्घः- वैश्वदेविकब्राह्मणपूर्वकं पादप्रक्षालनं कृत्वा पादयोरर्घं दद्यात् । यवकुशगन्धादियुतं पादार्घं संपाद्य- ॐ अद्येह अमुकगोत्रनान्दीमुखास्मन्मात्रादित्रयामुकगोत्रनान्दीमुखास्मत्पित्रादित्रयामुकगोत्रनान्दीमुखास्मन्मातामहादित्रयश्राद्धसम्बन्धिनो वसुसत्यसंज्ञका विश्वेदेवा एष पादार्घो वो नमः। पुनः पूर्ववत्पादार्घं संपाद्य- ॐ अद्येह अमुकगोत्रा अस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकामुकदेव्यो नान्दीमुख्य एष पादार्घो यथानामं वो नमः।

पुनः पूर्ववत्- ॐ अद्येह अमुकगोत्रा अस्मत्पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणो नान्दीमुखा एष पादार्घो यथाभागं वो नमः । पुनः पूर्ववत्- ॐ अद्येह अमुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणो नान्दीमुखाः सपत्नीका एष पादार्घो यथाभागं वो नमः ।

कर्मपात्रनिर्माणम्- एवं पादार्घं दत्त्वाचम्य श्राद्धदेशे ब्राह्मणानुपवेश्य तानाचमय्य स्वदक्षिणभागे कर्मपात्रं स्थापयेत् । भूमौ गन्धादिना शङ्खचक्रे विलिख्य तदुपरि आसनं तत्र पात्रं स्थापयेत् । तत्र - **ॐ पवित्त्रेस्त्थोव्वैष्णव्यौसवितुर्व्वःप्प्रसवऽउत्त्पुनाम्म्यच्छिद्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ।।** इति मन्त्रेण पवित्रं क्षिपेत् । तत्पात्रं जलेन- **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः ।।** इति मन्त्रेण पूरयेत् । तत्र- **ॐ यवोसियवयास्म्मद्द्वेषोयवयारातीः (ॐ यवोसिसोमदैवत्योगोसवोदेवनिर्मितः। प्रत्नमद्भिःपृक्तःपुष्ट्यानान्दीमुखान्पितॄँल्लोकान्पृणाहिनःस्वाहा)।।** इति यवान् क्षिपेत् । **ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपहूयेश्रियम् ।।** इति गन्धं क्षिपेत् । **ॐ श्रीश्श्चतेलक्ष्मीश्श्चपत्न्यावहोरात्रेपाश्श्र्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।** इति पुष्पाणि क्षिपेत्। **ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत । अस्तोषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्न्विन्द्रतेहरी ।।** इत्यक्षतांश्च क्षिपेत् ।

ततः **ॐ यद्देवादेवहेडनन्देवाँसश्चकृमाव्वयम् । अग्ग्निर्म्मातस्म्मादेनसोव्विश्वान्मुञ्चत्त्वꣳहसः ।।१।। ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमाव्वयम् । व्वायुर्म्मातस्म्मादेनसोविश्वान्मुञ्च त्त्वꣳहसः ।।२।। ॐ यदिजाग्ग्रद्यदिस्वप्नऽएनाꣳसिचकृमाव्वयम् । सूर्य्योमातस्म्मादेनसोव्विश्श्वान्मुञ्चत्त्वꣳहसः ।।३।।** इति ऋक्त्रयेण दर्भैरालोडयन् कर्मपात्रस्थजलमभिमन्त्र्य कुशत्रयसहितं कर्मपात्रोदकमादाय-

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत् ।

सङ्कल्पः- कुशादिकमादाय- ॐ तत्सत्३ ॐ विष्णुः३ नमः परमात्मने पुराणपुरुषोत्तमाय अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकाऽमुकदेवीनां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखीनाम् तथामुकगोत्राणामस्मपितृपितामहप्रपितामहानाममुकामुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां तथामुकगोत्राणामस्मन्मातामहप्रमातामह वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां (प्रीतये) सत्यवसुसंज्ञकविश्वदेवपूर्वकम् अमुककर्माङ्गतयाभ्युदयिकश्राद्धं सांकल्पिकेन विधिना एभिर्द्रव्यैरहं करिष्ये **ॐ कुरुष्व** इति प्रतिवचनम् । इति संकल्प्य त्रिर्गायत्रीं जपेत् ।

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

इति त्रिःपठित्वा- **सप्तव्याधादशार्णेषु०** इत्यादि पठेत् । ततो दिग्बन्धनम् कुशानादाय- **ॐ अग्निष्वात्ताःपितृगणाःप्राचींरक्षन्तुमेदिशम्। ॐ अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ।। ॐ तथाबर्हिषदःपान्तुयाभ्यांयेपितरःस्थिताः। ॐ अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ।। ॐ प्रतीचीमाज्यपास्तद्वत् । ॐ अपहताऽअसुरारक्षाꣳसिव्वेदिषदः।। ॐ उदीची-**

मपिसोमपाः । ॐ अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ।। ॐ ऊर्ध्वतस्त्वर्यमारक्षेत्कव्यवाडनलोऽप्यधः । ॐ अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ।।

ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।।

इति मन्त्रैः पूर्वादिषु यवान् विकिरेत् ।

नीबीबन्धनम्- अनेन मन्त्रेण- **ॐ त्वमग्ग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्म्मनस्प्परि । त्वंव्वनेब्भ्यस्त्वमोषधीब्भ्यस्त्वन्नृणान्नृपतेजायसे-शुचिः ।।**

आसनम्- ॐ अद्याभ्युदयिकश्राद्धे नान्दीमुखामुकगोत्रास्मन्मात्रादित्रयसम्बन्धिनाम् तथानान्दीमुखामुकगोत्रास्मत्पित्रादित्रयसम्बन्धिनाम् तथा नान्दीमुखामुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनां सत्यवसुसंज्ञकानां विश्वेषां देवानामिदमासनं वो नमः ।

एवम् ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां वसुरुद्रादित्यस्वरूपाणामिदमासनं त्रिधा विभज्य युष्मभ्यं नमः ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानामिदमासनं त्रेधा विभज्य युष्मभ्यं नमः । ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानामिदमासनं त्रेधा विभज्य युष्मभ्यं नमः इत्यासनानि । आसनानि च ऋज्वमूलकुशाः ।

पूजनम्- ॐ सप्तऽऋषयः०, ॐ सत्यवसुसंज्ञेकेभ्यो विश्वेभ्यो देवेभ्यो नमः । ॐ मातृपितामहीप्रपितामहीभ्यो नमः । ॐ पितृपितामहप्रपितामहेभ्यो नमः । ॐ मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नमः, इति गन्धाक्षतपुष्पताम्बूलवस्त्रयज्ञोपवीतभूषणादिभिः समभ्यर्च्य धूपदीपौ नैवेद्यं

च कारयेत् । यवकुशजलान्यादाय- ॐ अद्येहाभ्युदयिकश्राद्धे नान्दीमुखामुकगोत्रास्मन्मात्रादित्रयसम्बन्धिनः तथा नान्दीमुखामुकगोत्रास्मत्पित्रादित्रयश्राद्धसम्बन्धिनः तथा नान्दीमुखामुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनः सत्यवसुसंज्ञका विश्वेदेवा एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यभूषणवासांसि यथाभागं वो नमः । तथा ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्रा अस्मन्मातृपितामहीप्रपितामह्यः अमुकामुकामुकदेव्यो नान्दीमुख्य एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यभूषणवासांसि त्रेधा विभज्य युष्मभ्यं नमः । तथा ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्रा अस्मत्पितृपितामहप्रपितामहाअमुकामुकामुकशर्माणो नान्दीमुखा एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यभूषणवासांसि त्रेधा विभज्य युष्मभ्यं नमः । तथा ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्राऽअस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः सपत्नीका नान्दीमुखा एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यभूषणवासांसि त्रेधा विभज्य युष्मभ्यं नमः । अर्चनविधौ **सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्** इति प्रतिवचनम् । ततः आचमनं कुर्यात् ।

भूस्वाम्यन्नदानम् - ॐ इदमामान्नं सजलमेतद्भूस्वामिपितृभ्यो नमः, इत्युत्सृजेत् ।

अन्नसङ्कल्पः - प्रथमं विश्वदेवान्नपात्रमालभ्य, **ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा । ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरे ।।** इति पठित्वा **ॐ कृष्णहव्यमिदं रक्ष मदीयम्, ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदꣳहविः** एतान्युपकरणानि इति विप्रदक्षिणाङ्गुष्ठं निवेश्य **ॐ यवोसियवयास्मद्द्वेषोयवयारातीः**, इति श्राद्धदेशे यवान् विकीर्य सयवजलकुशत्रयमादाय- ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्रास्मन्मात्रादित्रयश्राद्धसम्बन्धिभ्यस्तथामुकगोत्रास्मत्पित्रादित्रयश्राद्धसम्बन्धिभ्यः तथामुकगोत्रास्म-

न्मातामहादित्रयश्राद्धसम्बन्धिभ्यः सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमामान्नं सजलं सोपस्करं यथा भागं वो नमः । पूर्ववत्पात्रालम्भनादि सर्वं कृत्वा- ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्राभ्योऽस्मन्मातृपितामहीप्रपितामहीभ्योऽमुकामुकामुकदेवीभ्यो वसुरुद्रादित्यस्वरूपाभ्यो नान्दीमुखीभ्य इदमन्नं सजलं सोपस्करं त्रेधा विभज्य युष्मभ्यं नमः ।

पुनः पात्रालम्भनादिकं पूर्ववद्विधाय- ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्यो नान्दीमुखेभ्य इदमामान्नं सजलं सोपस्करं त्रेधा विभज्य युष्मभ्यं नमः। पुनः पूर्ववत्- ॐ अद्येहाभ्युदयिकश्राद्धे अमुकगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसरूद्रादित्यस्वरूपेभ्यो नान्दीमुखेभ्य इदममान्नं सजलं सोपस्करं त्रेधा विभज्य युष्मभ्यं नमः । **ॐ सप्तऽऋषयः०, ॐ यथेमां वाचम्०** । इति ।

अच्छिद्रवाचनम्- **अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।**
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ।।
नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ।।

ततो गायत्रीं जपित्वा **ॐ मधु मधु मधु** इति, पितृमन्त्रवर्जं पुरुषसूक्तादि च पठेत्। रक्षोघ्नैन्द्रशान्तिमन्त्राञ्छ्रावयेत्। **मधुव्वातेत्या**दिऋचस्थाने **उपास्मैगायतानर** इति पञ्चर्चं सूक्तं पठेत् ।

सूक्तपाठः - उपास्म्मैगायतानरःपवमानायेन्दवे । अभिदेवाँ२।।ऽइयक्षते ।।१।। येत्त्वाहिहत्त्येमघवन्नवर्द्धन्न्येशाम्बरेहरिवोयेगविष्टौ । येत्त्वानूनमनुमदन्तिव्विप्राःपिबेन्द्रसोमक्षसगणोमरुद्द्भिः ।।२।। जनिष्ठाऽउग्रःसहसेतुरायमन्द्रऽओजिष्ठोबहुलाभिमानः । अवर्द्धन्निन्द्रम्मरुतश्चिदत्रमातायद्द्वीरन्दधनद्धनिष्ठाः।।३।। आतूनऽइन्द्रव्वृत्रहन्नस्म्माकमर्द्धमागहि। महान्महीभिरूतिभिः ।।४।। त्वमिन्द्रप्प्रतूर्त्तिष्ष्वभिविश्श्वाऽअसिस्पृधः। अशस्तिहाजनिताव्विश्श्वतूरसित्त्वन्तूर्य्यतरुष्ष्यतः ।।५।। इति, **अक्षन्नमीम-**

दन्तह्यवप्रियाऽअधूषत । अस्तोषतस्वभानबोव्विप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ।। इति च श्रावयेत् ।

विकिरासनम्- आस्तृतप्रागग्रकुशत्रयायां भूमौ कुशयवजलान्यादाय-

ॐ असँस्कृतप्रमीतानां त्यागिनो कुलयोषिताम् ।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ।।

इति मन्त्रेण कुशरूपमासनमास्तृतकुशत्रयोपरि उत्सृजेत् ।

ॐ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ।।

इति मन्त्रेण दत्तासनोपरि तदन्नं विकिरेत् ।

पिण्डदानम्- आचम्य हरिं स्मृत्वा पिण्डदानं कुर्यात् । **ॐ सुप्रोक्षितमस्तु,** ततो विश्वदेवादिब्राह्मणहस्तेषु **ॐ शिवा आपःसन्तु, ॐ सौमनस्यमस्तु, ॐ अक्षतञ्चारिष्टमस्तु** इति जलपुष्पयवान् क्रमेण दद्यात् ।

अक्षय्योदकदानम्- सजलयवकुशत्रयमादाय- ॐ अद्येहामुकगोत्रा अस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकामुकदेव्यो वसुरूद्रादित्यस्वरूपा नान्दीमुख्य आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयन्ताम् । ॐ अद्येहामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणो वसुरूद्रादित्यस्वरूपा नान्दीमुखा आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयन्ताम् । ॐ अद्येहामुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरूद्रादित्यस्वरूपा नान्दीमुखा आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयन्ताम् ।

आशीर्वादप्रार्थना- ततः प्राङ्मुखोऽञ्जलिं बध्वाशिषः प्रार्थयेत्- **ॐ गोत्रं नो वर्द्धताम्, ॐ वर्द्धताम् । ॐ दातारो नोऽभिवर्द्धन्ताम्, ॐ वर्द्धन्ताम् । ॐ वेदा वर्द्धन्ताम्, ॐ वर्द्धन्ताम् । ॐ सन्ततिर्वर्द्धताम्, ॐ वर्द्धताम् । ॐ श्रद्धाच नो माव्यगमत्, ॐ मागात् । ॐ बहुदेयञ्च नोऽस्तु, ॐ अस्तु । ॐ अन्नं च नो बहु भवेत्, ॐ भवतु । ॐ अतिथींश्च**

लभेमहि, ॐ लभध्वम् । ॐ याचितारश्च नः सन्तु, ॐ सन्तु । ॐ मा याचिष्म कञ्चन, ॐ मा याचेथाः । ॐ एता आशिषः सत्याः सन्तु, ॐ सन्तु इत्याशीःप्रार्थना प्रतिवचनञ्च । ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात् ।

दक्षिणादानम्- ॐ अद्येहेत्यादि अमुकगोत्रास्मन्मात्रादित्रयामुकगोत्रास्मत्पित्रादित्रयामुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनां सत्यवसुसंज्ञकानां विश्वेषान्देवानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वामुकदैवतं दक्षिणात्वेन यथानामगोत्राय ब्राह्मणाय दातुमहं समुत्सृजे इत्युत्सृजेत् । पुनः ॐ अद्येहामुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां वसुरूद्रादित्यस्वरूपाणां नान्दीमुखीनां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वामुकदैवतं दक्षिणात्वेन यथानामगोत्राय ब्राह्मणाय दातुमहं समुत्सृजे इति उत्सृजेत् ।

पुनः ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वामुकदैवतं दक्षिणात्वेन यथा नामगोत्रायेत्यादि ।

पुनरपि ॐ अद्येहामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वामुकदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि ।

ततः **ॐ देवताभ्यः०** इति त्रिःपठेत् । दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्याचम्य इति पठेत् । अस्मिन्नाभ्युदयिकश्राद्धे मया यत्कृतं तत्सुकृतमस्तु यन्न कृतं तत् श्रीविष्णोः प्रसादात् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम् इति प्रतिवचनम् । ततः कुशबटुग्रन्थीनुन्मुच्य नीवीं विस्रस्य कर्मपात्रं भ्रमयित्वाचामेत् ।

अच्छिद्रवाचनम्- प्रमादात्कुर्वतां कर्म०, चतुर्भिश्चचतुर्भिश्च०, आयुः प्रजां धनं विद्याम्०, ॐ यस्य स्मृत्या च नामोक्त्या० इति पठित्वा **ॐ अच्युताय नमः** इति त्रिःपठेत् । **ॐ कायेन वाचा०** इति कर्मेश्वरार्पणं कुर्यात् । एतत्सर्वं श्राद्धीयं वस्तु विष्णवे प्रतिपादयामीति प्रतिपाद्य ब्राह्मणाय दद्यात् । अत्र ब्राह्मणस्य शर्मान्तम्, क्षत्रियस्य वर्मान्तम्, वैश्यस्य गुप्तान्तम्, शूद्रस्य दासान्तम्, नामेत्यवधातव्यम् । स्त्रीणां देव्यन्तं नामेति चातुर्वर्ण्यसाधारणम् ।

— इत्याभ्युदयिकश्राद्धप्रयोगः —

◆

१४. अग्निस्थापनापद्धतिः

भूमिशोधनम्- ॐ भूरसिभूमिरस्यदितिरसिविश्श्वधायाविश्श्वस्यभुवनस्यधर्त्री । पृथिवींय्यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः ।।१।। इति मन्त्रेण भूमिं संशोधयेत् ।

मृत्तिकास्थापनम्- ॐ अश्म्माचमेमृत्तिकाचमेगिरयश्श्चमेपर्वताश्श्चमेसिकताश्श्चमेवनस्प्पतयश्श्चमेहिरण्यञ्चमेयश्श्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ताम् ।।२।। इति मन्त्रेण मृत्तिकां स्थापयित्वा वेदीं कुर्यात् ।

दर्भग्रहणम्- ॐ एषवःस्तोमोमरुतऽइयङ्गीर्म्मान्दार्य्यस्यमान्न्यस्यकारोः। एषायासीष्टतन्न्वेवयांविद्यामेषंवृजनञ्जीरदानुम् ।।३।। इति मन्त्रेण दर्भङ्गृह्णीयात् ।

दर्भैः परिसमूहनम्- ॐ यद्देवादेवहेडनन्देवासश्श्चकृमावयम् । अग्निर्म्मातस्म्मादेनसोविश्श्वान्मुञ्चत्त्वꣳहसः ।।४।। इति मन्त्रेण वेदीं दर्भैः समां कुर्यात् ।

गोमयोदकेनोपलेपनम्- ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः । मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवामहे ।।५।। इति मन्त्रेण वेदीं गोमयोदकेन उपलिम्पेत् ।

स्रुवेण वेदीसमुल्लेखनम्- ॐ त्वामिद्धिहवामहेसातौवाजस्यकारवः। त्वांवृत्रेष्ष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ।।६।। इति मन्त्रेण स्रुवेण वेदीमुल्लिखेत् ।

रेखाकरणम्- प्रथमाद्वितीयैरित्यादिभिर्मन्त्रैः दक्षिणोत्तरक्रमेण वेदीमण्डले स्रुवेण प्रागग्रं रेखात्रयं कुर्यात् ।

ॐ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनसत्त्यंय्यज्ञेनयज्ञोयजुर्भिर्य्यजूꣳषिसामभिःसामान्यृग्भिर्ऋचःपुरोनुवाक्याभिःपुरोनुवाक्यायाज्ज्याभिर्य्याज्ज्यावषट्कारैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा ।।७।। ॐ दक्षिणामारोहत्रिष्टुप्त्वावतुबृहत्त्सामपञ्चदशस्तोमोग्ग्रीष्मऽऋतुःक्षत्रन्द्रविणम्प्रतीचीमारोह ।।८।। ॐ प्रतीचीमारोहजगतीत्त्वावतुव्वैरूपꣳसामसप्प्तदशस्तोमोवर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह ।।९।। ॐ उदीचीमारोहानुष्टुप्प्त्वावतुव्वैराजꣳसामैकविꣳशस्त्तोमःशरदृतुःफलन्द्रविणमूर्द्ध्वामारोह ।।१०।।

उद्धरणम्- अधोलिखितेन मन्त्रेण अनामिकाङ्गुष्ठाभ्यां वेद्यां स्रुवेण उद्धृत पांसूनामुद्धरणं कुर्यात् - **ॐ सदस्प्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्म्यम्। सनिम्मेधामयासिषꣳस्वाहा ।।११।।**

उत्क्षेपणम्- अधोलिखितेन मन्त्रेण वेद्यां स्रुवेणोद्धृतपांसूननामिकाङ्गुष्ठाभ्यां त्रिरूर्ध्वं क्षिपेत्- **ॐ व्व्रतंकृणुतव्व्रतङ्कृणुताग्ग्निर्ब्ब्रह्माग्ग्निर्य्यज्ञोव्वनस्प्पतिर्य्यज्ञियः । दैवींधियन्मनामहेसुमृडीकामभिष्टयेव्वर्च्चोधांय्यज्ञवाहसꣳसुतीर्त्थानोऽअसद्वशे । येदेवामनोजातामनोयुजोदक्षक्क्रतवस्तेनोवन्तुतेनःपान्तुतेब्भ्यःस्वाहा ।।१२।।**

अभ्युक्षणम्- अधोलिखितेन मन्त्रेण वेदीं जलेनाभिषिञ्चेत्- **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः ।।१३।।** इत्येवं पञ्च भूसँस्कारा भवन्ति ।

स्वस्तिवाचनम्

ॐ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः। स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ।।१।। ॐ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः । बृहस्पतिꣳसर्वगणꣳस्वस्तये-

स्वस्तयआदित्यासोवदन्तुनः ।।२।। ॐ विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये । देवाअवन्त्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वꣳहसः ।।३।। ॐ स्वस्तिमित्रावरुणास्वस्तिपथ्येनरेवती । स्वस्तिनइन्द्रश्चाग्निश्चस्वस्तिनोअदितेकृधि ।।४।। ॐ स्वस्तिपन्थामनुचरेम सूर्य्याचन्द्रमसाविव । पुनर्दधताऽघ्नताजानतासङ्गमेमहि ।।५।। ॐ स्वस्त्ययनन्तार्क्ष्यमरिष्टनेमिमहद्भूतंवायसंदेवतानाम् । असुरघ्नमिन्द्रसखꣳसमत्सुबृहद्यशोनावमिवारुहेम ।।६।। ॐ अꣳहोमुचमाङ्गिरसंगयञ्चस्वस्त्यात्रेयंमनसाचतार्क्ष्यम् । प्रयतपाणिःशरणंप्रपद्येस्वस्तिसम्बाधेष्वभयन्नोअस्तु ।।७।। ॐ आशुः शिशानः० इत्यादि समग्रं पठेत् ।

वेदीपूजनम्- ततोऽष्टदिक्षु पूर्वादिक्रमेण वेद्याः पूजनं कुर्यात् । तत्र पूर्वे- ॐ पृथिव्याःसधस्त्थादग्निम्पुरीष्यमङ्गिरस्वदाभराग्निम्पुरीष्यमङ्गिरस्वदच्छेमाग्निम्पुरीष्यमङ्गिरस्वद्भरिष्यामः ।।१।। दक्षिणे- ॐ अग्निश्चपृथिवीचसन्नतेतेमेसन्नमतामदोव्वायुश्चान्तरिक्षञ्चसन्नतेतेमेसन्नमतामदऽआदित्त्यश्चद्यौश्चसन्नतेतेमेसन्नमतामदऽआपश्चव्वरुणश्चसन्नतेतेमेसन्नतामदः । सप्प्तसꣳसदोऽअष्टमीभूतसाधनीसकामाँ२ ।।अद्ध्वनस्कुरुसञ्ज्ञानमस्तुमेऽमुना।।२।। पश्चिमे- ॐ व्वायोयेतेसहस्रिणोरथासस्तेभिरागहि । नियुत्त्वान्त्सोमपीतये ।।३।। उत्तरे- ॐ सोमोधेनुꣳसोमोऽअर्व्वन्तमाशुꣳसोमोव्वीरङ्कर्म्मण्यन्ददाति । सादन्न्यंव्विदत्थ्यꣳसभेयम्पितृश्रवणंय्योददासदस्मै ।।४।। आग्नेये- ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे। देवाँ२।।ऽआसादयादिह ।।५।। नैर्ऋत्याम्- ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखाः । कयाशचिष्ठयाव्वृता ।।६।। वायव्ये- ॐ व्वायुरनिलममृतमथेदंभस्मान्तꣳशरीरम् । ॐ३ क्रतोस्मरक्लिवेस्मरकृतꣳस्मर ।।७।। ऐशान्याम्- ॐ ईशाव्वास्यमिदꣳसर्व्वंय्यत्त्किञ्चजगत्त्याञ्जगत्। तेनत्त्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनम् ।।८।। वेदीमध्ये- ॐ सूर्य्यरश्मिर्हरिकेशःपुरस्तात्त्पातुसविताज्ज्योतिरुदयाँ३ ।।ऽअजस्रम् । तस्यपूषाप्प्रसवेयातिव्विद्द्वान्त्सम्पश्यन्व्विश्वाभुवनानिगोपाः ।।९।। ॐ प्रजा-

पतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्त्कामास्त्तेजुहुमस्त्तन्नोऽअस्त्तुव्वयꣳस्यामपतयोरयीणाम् ।।१०।। ॐ सदसस्प्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्म्यम् । सनिम्मेधामयासिषꣳस्वाहा ।।११।। इति त्रिभिर्मन्त्रैर्वेदीमध्ये पूजयेत् ।

इन्धनशोधनम्- कस्त्त्वासत्त्योमदानम्मꣳहिष्ठोमत्त्सदन्धसः । दृढाचिदारुजेव्वसु ।।१२।। इति इन्धनशोधनं कुर्यात् ।

दारुकस्थापनम्- ॐ त्वामिद्धिहवामहेसातौव्वाजस्यकारवः । त्वांव्वृत्त्रेष्ष्विन्द्रसत्पतिन्नरस्त्त्वाङ्काष्ठास्वर्व्वतः ।।१३।। इति मन्त्रेण वेद्यां (२९) समिधः स्थापयेत् ।

अग्निशोधनम् - ॐ अग्ग्नावग्ग्निश्श्चरतिप्प्रविष्टऽऋषीणाम्पुत्रोऽअभिशस्त्तिपावा । सनःस्योनःसुयजायजेहदेवेब्भ्योहव्यꣳसदमप्प्रयुच्छन्त्स्वाहा ।।१४।। इति मन्त्रेण क्रव्यादांशमग्निं नैर्ऋत्यदिशि प्रक्षिपेत् ।

अग्निग्रहणम्- ॐ मयिगृह्णाम्म्यग्ग्रेऽअग्ग्निꣳरायस्प्पोषायसुप्प्रजास्त्त्वायसुवीर्य्याय । मामुदेवताःसचन्ताम् ।।१५।। इति मन्त्रेण अग्निग्रहणं कुर्यात् ।

गर्ब्भाधानम्- ॐ गर्ब्भोऽअस्योषधीनाङ्गर्ब्भोव्वनस्प्पतीनाम् । गर्ब्भोव्विश्श्वस्यभूतस्याग्ग्नेगर्ब्भोऽअपामसि ।।१६।। इति मन्त्रेण अग्नेर्गर्ब्भाधानं कुर्यात् ।(अत्र अग्निमाच्छाद्य पूजनं कुर्वन्ति शिष्टा एवं पुंसवनादिष्वपि)।

पुंसवनम्- ॐ व्विवस्वन्नादित्त्यैषतेसोमपीथस्त्तस्मिन्न्मत्त्स्व । श्रदस्म्मैनरोव्वचसेदधातनयदाशीर्दादम्पतीव्वाममश्श्नुतः । पुमान्न्पुत्रोजायतेव्विन्दतेव्वस्वधाविश्श्वाहारपऽएधतेगृहे ।।१७।। इति मन्त्रेण अग्नेःपुंसवनं कुर्यात्।

सीमन्तोन्नयनम्- ॐ अजीजनोहिपवमानःसूर्य्यंव्विधारेशक्क्मनापयः । गोजीरयारꣳहमाणःपुरन्ध्या ।।१८।। इति मन्त्रेण सीमन्तोन्नयनं कुर्यात्।

जातकर्म- ॐ एजतुदशमास्योगर्ब्भोजरायुणासह । यथायंव्वायुरेजतियथासमुद्द्रऽएजति । एवायन्दशमास्योऽअस्स्रज्जरायुणासह ।।१९।। इति मन्त्रेणाग्नेर्जातकर्म कुर्यात् । (अत्र पिधानं निवार्य अग्निपूजनं कुर्वन्ति

शिष्टाः)।

नामकर्म- ॐ यदापिपेषमातरम्पुत्रःप्प्रमुदितोधयन् । एतत्तदग्ग्नेऽअनृणोभवाम्म्यहतौपितरौमया । सम्पृचस्त्थसम्माभद्द्रेणपृङ्क्त । विपृचस्त्थविमापाप्प्मनापृङ्क्त ।।२०।। इति मन्त्रेणाग्नेनामकर्म कुर्यात् ।

निष्क्रमणम्-ॐ पूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविताषडक्षरेणषडृतूनुदजयत्ताज्जेषम्मरुतःसप्प्ताक्षरेणसप्प्तग्ग्राम्म्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्प्पतिरष्टाक्षरेणगायत्रीमुदजयत्तामुज्जेषम्मित्रोनवाक्षरेण ।।२१।। इति मन्त्रेण अग्नेर्निष्क्रमणकर्म कुर्यात् ।

अन्नप्राशनम्- ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्म्मिणः । प्प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्प्पदे ।।२२।। इति मन्त्रेणाग्नेरन्नप्राशनं कुर्यात् (अत्र घृतमिश्रितान् तण्डुलान् जुह्वति शिष्टाः)।

चूडाकरणम्- ॐ अग्नआयाहिवीतयेगृणानोहव्यदातये । निहोतासत्सिबर्हिषि ।।२३।। इति मन्त्रेणाग्नेश्चूडाकर्म कुर्यात् ।

कर्णवेधः- ॐ भद्रङ्कर्ण्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ।।२४।। इति मन्त्रेणाग्ने कर्णवेधं कुर्यात् ।

उपनयनम्- ॐ अग्ग्निरेकाक्षरेणप्प्राणमुदजयत्तमुज्जेषमश्श्विनौद्व्यक्षरेणद्विपदोमनुष्ष्यानुदजयतान्तानुज्जेषंविष्णुस्त्र्यक्षरेणत्रीँल्लोकानुदजयत्तानुज्जेषꣳसोमश्श्चतुरक्षरेणचतुष्प्पदःपशूनुदजयत्तानुज्जेषम्पूषापञ्चाक्षरेण ।।२५।। अनेन मन्त्रेण अग्नेरुपनयनं कुर्यात्, तत्र व्याहृतिसहितां गायत्रीं श्रावयेत्।

अग्निगायत्री- ॐ भूर्ब्भुवःस्वःवैश्वानरायविद्महेसप्तजिह्वायधीमहि । तन्नअग्निःप्रचोदयात् ।।२६।।

समावर्तनम्- ॐ व्रतङ्कुणुतव्व्रतङ्कृणुताग्ग्निर्ब्ब्रह्माग्ग्निर्य्यज्ञोव्वनस्प्पतिर्य्यज्ञियः । दैवीन्धियम्मनामहेसुमृडीकामभिष्टयेवर्च्चोधांय्यज्ञवाहसꣳसुतीर्त्थानोऽअसद्वशे । येदेवामनोजातामनोयुजोदक्षक्क्रतवस्तेनोवन्तुतेनःपान्तुतेब्भ्यःस्वाहा ।।२७।। इति मन्त्रेण समावर्तनं कुर्यात् ।

गोदानकर्म- ॐ गावऽउपावतावतम्महीयज्ञस्यरप्सुदा । उभाकर्णाहिरण्यया ।।२८।। अनेन मन्त्रेण गोदानकर्म कुर्यात् । (इदं केशान्तकर्म)।

विवाहः - ॐ भगऽएवभगवाँ२।।ऽअस्तुदेवास्तेनवयम्भगवन्तःस्याम। तन्त्वाभगसर्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ।।२९।। अनेन मन्त्रेण विवाहकर्म कुर्यात् ।

अग्निप्रार्थना- ॐ ऋतावानंवैश्वानरमृतस्यज्ज्योतिषस्प्पतिम् । अजस्रङ्घर्म्ममीमहे । उपयामगृहीतोसिवैश्वानरायत्त्वैषतेयोनिर्वैश्वानरायत्त्वा ।।३०।। ॐ वैश्वानरस्यसुमतौस्यामराजाहिकम्भुवनानामभिश्श्रीः । इतोजातोविश्श्वमिदंविचष्टेवैश्वानरोयततेसूर्य्येण । उपयामगृहीतोसिवैश्वानरायत्त्वैषतेयोनिर्वैश्वानरायत्त्वा ।।३१।। ॐ वैश्वानरोनऽऊतयऽआप्प्रयातुपरावतः । अग्निरुक्क्थेनवाहसा । उपयामगृहीतोसिवैश्वानरायत्त्वैषतेयोनिर्वैश्वानरायत्त्वा ।।३२।। इति पठित्वा कुण्डे (स्वाभिमुखं) वह्निं प्रवेशयेत् ।

कुण्डे अग्निस्थापनम्- ॐ अग्निम्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम्। अपाꣳरेताꣳसिजिन्वति ।।३३।। इति मन्त्रेण कुण्डे अग्निं स्थापयेत्।

अग्निप्रज्वालनम्- ॐ स्थिरोभववीड्वङ्गऽआशुर्भववाज्ज्यर्वन् । पृथुर्भवसुखदस्त्वमग्नेःपुरीषवाहणः ।।३४।। इति मन्त्रेण अग्निं प्रज्वालयेत्।

अग्ग्निप्रार्थना- ॐ आवाहये त्वां पुरुषं महान्तं
सुरासुरैर्वन्दितपादपद्मम् ।
ब्रह्मादयो यस्य मुखे वसन्ति
विशस्व कुण्डे सुरलोकनाथ ।।३५।।

इति मन्त्रेणाग्निं प्रार्थयेत् । अग्नेर्दक्षिणतो ब्रह्मासनमास्तीर्य ब्रह्मपवित्रं विदध्यात् ।

ब्रह्मपवित्रकरणम्- ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ।।३६।। इति मन्त्रेण ब्रह्मपवित्रं कुर्यात् ।

ब्रह्मोपवेशनम्- ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुः सप्प्तिः पुरन्धिर्य्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनः पर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽ ओषधयः पच्च्यन्तांय्योगक्षेमोनः कल्प्पताम् ।।३७।। इत्यनेनाग्निं प्रदक्षिणं कारयित्वा अस्मिन् कर्मणि त्वं मे ब्रह्मा भवेत्यभिधायाग्नेर्दक्षिणतो ब्रह्माणमुत्तराभिमुखं स्थापयेत्।

होतुरासनम्- ॐ यस्यकुम्म्भोगृहेहविस्त्तमग्ग्नेव्वर्द्धयात्त्वम् । तस्म्मैदेवाऽअधिब्ब्रुवन्नयञ्चब्ब्रह्मणस्प्पतिः ।।३८।। इति मन्त्रेणाग्नेः पश्चिमतो होतुरासनं स्थापयेत् ।

यजमानासनम्- ॐ अग्ग्नेप्प्रेहिप्प्रथमोदेवयताञ्चक्षुर्द्देवानामुतमर्त्त्यानाम्। इयक्षमाणाभृगुभिः सजोषाः स्वर्यन्तुयजमानाः स्वस्ति ।।३९।। इति मन्त्रेणाग्नेर्दक्षिणतो यजमानासनं स्थापयेत् ।

प्रणीतप्रोक्षण्योरासने- ॐ परीत्त्यभूतानिपरीत्त्यलोकान्न्परीत्त्यसर्व्वाः प्प्रदिशोदिशश्श्च । उपस्त्थायप्प्रथमजामृतस्यात्त्मनात्त्मानमभिसंव्विवेश ।।४०।। इति मन्त्रेणाग्नेरुत्तरत प्रागग्रैः कुशैः प्रणीतासनम्, प्रणीताग्न्योर्मध्ये प्रोक्षण्यासनं स्थापयेत् ।

प्रणीतासँस्कारः- ततो द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं प्रणीतापात्रं वामहस्तेनादाय इन्द्रऽआसान्नेतेति सव्यहस्तकरणम्- **ॐ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायज्ञः पुरऽएतुसोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ।।४१।।**

प्रणीतायां जलपूरणं स्थापनञ्च- उदुत्तममिति दक्षिणहस्तेनोदकं प्रपूर्य ब्रह्मणो मुखमवलोक्य उत्तरत्रासने स्थापयेत्- **ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।४२।।**

कुशैः परिस्तरणम्- ॐ येतेशतंव्वरुणयेसहस्त्रंय्यज्ञियाः पाशाव्वितता महान्तः । तेभिर्न्नोऽअद्यसवितोतविष्णुर्व्विश्श्वेमुञ्चन्तुमरुतः स्वर्क्काः-

स्वाहा ।।४३।। इति मन्त्रेण बर्हिषो मुष्टिमादाय चतुर्धा विभज्यैकैकभागं कुशैराग्नेयादीशानान्तमुत्तराग्रैः ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रैः नैर्ऋत्याद्वायव्यान्तमुत्तराग्रैः अग्नितः प्रणीतापर्यन्तं पूर्वाग्रैः परिस्तरणं कुर्यात् ।

पात्रासादनम्- ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः । अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।।४४।। इति मन्त्रेण अग्निस्थापनाविधावावश्यकवस्तूनि तत्र क्रमशः स्थापयेत् । तत्र-

त्र्यम्बकमिति पवित्रच्छेदनार्थं साग्रमनन्तर्गर्भप्रादेशपरिमितकुशपत्रत्रयम्- **ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् । त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् । उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ।।४५।। पवित्रेस्त्थ** इति पवित्रे कुर्यात्- **ॐ पवित्रेस्त्थोव्वैष्णव्व्यौसवितुर्व्वःप्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्रेणसूर्य्यस्यरश्मिभिः । देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रऽइममद्ययज्ञन्नयताग्ग्रेयज्ञपतिꣳसुधातुय्यज्ञपतिन्देवयुवम् ।।४६।। इमम्मेव्वरुणे**ति प्रोक्षणीं कुर्यात्- तच्च द्वादशाङ्गुलदीर्घं करतलसंमितखातं पद्मपत्राकृति कमलमुकुलाकृति वा प्रोक्षणीपात्रम् - **ॐ इमम्मेव्वरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।।४७।।**

प्रोक्षणीपात्रे पवित्रस्थापनम्- ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । अग्ग्नयेजुष्टङ्गृह्णाम्म्यग्ग्नीषोमाब्भ्याञ्जुष्टङ्गृह्णामि ।।४८।। इति मन्त्रेण प्रोक्षणीपात्रे पवित्रे स्थापयेत् ।

आज्यस्थालीस्थापनम्- ॐ घृतवतीभुवनानामभिश्श्रियोर्व्वीपृत्थ्वीमधुदुघेसुपेशसा । द्यावापृथिवीव्वरुणस्यधर्म्मणाव्विष्कभितेऽअजरेभूरिरेतसा ।।४९।। इति मन्त्रेण तैजसीं मृन्मयीं वा द्वादशाङ्गुलविस्तृतां प्रादेशोच्चामाज्यस्थालीं स्थापयेत् ।

चरुस्थालीस्थापनम्- ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः । प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्द्विपदेचतुष्प्पदे ।।५०।। इति मन्त्रेण

चरुस्थालीं स्थापयेत् ।

संमार्जनकुशस्थापनम्- ॐ शादन्दद्भिरवकान्दन्तमूलैर्मृदम्बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳसरस्वत्याऽअग्रजिह्वञ्जिह्वायाऽउत्सादमवक्रन्देनतालुवाजꣳहनुभ्यामपऽआस्येनवृषणमाण्डाभ्यामादित्याञ्श्मश्रुभिःपन्थानम्भ्रूभ्यान्द्यावापृथिवीवर्त्तोभ्यांविद्युतङ्कनीनकाभ्याꣳशुक्लायस्वाहाकृष्णायस्वाहापार्य्याणिपक्ष्माण्यवार्य्याऽइक्षवोऽवार्य्याणिपक्ष्माणिपार्य्याऽइक्षवः ।।५१।। इत्यनेन मन्त्रेण त्रिप्रभृतीन् कुशान् स्थापयेत् ।

उपयमनकुशस्थापनम्- ॐ उपयामगृहीतोस्यन्तर्य्यच्छमघवन्पाहिसोमम्। उरुष्यरायऽएषोयजस्व ।।५२।। इति मन्त्रेण त्रयोदशोपयमनकुशान्निर्माय तत्र स्थापयेत् ।

पापाशसमित्त्रितयस्थापनम्- ॐ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम्। आस्मिन्हव्याजुहोतन ।।५३।। इति मन्त्रेण समिधस्तिस्रः पालाशीः प्रादेशमात्रीः पृथक् स्थापयेत् ।

स्रुवः खादिरो हस्तमात्रोऽङ्गुष्ठपर्वमात्रखातः परिणाहवर्तुलपुष्करः, गव्यमाज्यम्, चरुश्चेतित्रिःप्रक्षालिता व्रीहितण्डुलाः, पूर्णपात्रम्- षट्पञ्चादधिकशतद्वयमुष्ट्यात्मकतण्डुलरूपम्, बहुभोक्तृपुरुषाहारपरिमिततण्डुलरूपं वा, अन्यान्यपि होमोपयुक्तानि द्रव्याण्यासादनीयानि । इति पात्रासादनम् ।

आज्यचरुस्थापनम् - ॐ घृताच्यसिजुहूर्न्नाम्नासेदम्प्रियेणधाम्नाप्प्रियꣳसदऽआसीद । घृताच्यस्युपभृन्नाम्नासेदम्प्रियेणाधाम्नाप्प्रियꣳसदऽआसीद । घृताच्यसिद्ध्रुवानाम्नासेदम्प्रियेणधाम्नाप्प्रियꣳसदऽआसीद। ध्रुवाऽअसदन्नृतस्ययोनौताविष्णोपाहिपाहियज्ञम्पाहियज्ञपतिम्पाहिमांय्यज्ञन्यम् ।।५४।। इति मन्त्रेण आज्यस्थाल्यामाज्यं चरुस्थाल्यां चरुञ्च स्थापयेत् ।

स्रुवग्रहणम्- ॐ स्रुचश्चमेचमसाश्चमेवायव्यानिचमेद्द्रोणकलशश्चमेग्रावाणश्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्चमेवेदिश्चमेबर्हिश्चमेऽवभृथश्चमेस्वगाकारश्चमेयज्ञेनकल्पन्ताम् ।।५५।। इति मन्त्रेण

स्रुवं गृह्णीयात् ।

स्रुवप्रोक्षणम्- ॐ प्रत्त्युष्टꣳरक्षःप्प्रत्त्युष्टाऽअरातयोनिष्टप्प्तꣳरक्षोनिष्टप्प्ताऽअरातयः । उर्व्वन्तरिक्षमन्न्वेमि ।।५६।। इति मन्त्रेण स्रुवप्रोक्षणं कुर्यात् ।

स्रुवसंमार्जनम्- ॐ अनिशितोसिसपत्त्नक्षिद्द्वाजिनन्त्वाव्वाजेद्ध्यायैसम्माज्र्ज्मि ।।५७।। इति मन्त्रेण दक्षिणहस्तधृतमध्यानां संमार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रतो मूलपर्यन्तं संमृज्य संमार्जनकुशानुत्तरतः क्षिपेत् ।

स्रुवप्रतपनम्- ॐ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः । पुनन्तुव्विश्श्वाभूतानिजातवेदःपुनीहिमा ।।५८।। इति मन्त्रेण स्रुवमग्नौ प्रतपेत् ।

स्रुवाभिषेचनम्- ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः ।।५९।। इति मन्त्रेण स्रुवं प्रणीतोदकेनाभिषिञ्चेत् ।

पुनः स्रुवप्रतपनम्- **ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः । अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।।६०।।** इति मन्त्रेण पुनः स्रुवं प्रतपेत् ।

स्रुवस्थापनम्- ॐ तमुत्त्वादद्ध्यङ्ङृषिःपुत्रऽईधेऽअथर्व्वणः । व्वृत्रहणम्पुरन्दरम् ।।६१।। इति मन्त्रेण स्रुवमुदङ्मुखं दक्षिणतः स्वसमीपे कुशोपरि निदध्यात् ।

आज्यस्याग्निप्रदक्षिणा- ॐ तेजोसिशुक्क्रमस्यमृतमसिधामनामासि। प्प्रियन्देवानामनाधृष्टन्देवयजनमसि ।।६२।। इति मन्त्रेणाज्यमग्नेः प्रदक्षिणं कारयित्वा पुनस्तत्रैव स्थापयेत् ।

चरोरग्निप्रदक्षिणा- ॐ पशुभिःपशूनाप्नोतिपुरोडाशैर्हवीꣳष्या । छन्दोभिःसामिधेनीर्य्याज्ज्याभिर्व्वषट्कारान् ।।६३।। इति मन्त्रेण तथैव चरुमप्यानीयाग्नेः प्रदक्षिणं कारयित्वा पुनस्तत्रैव स्थापयेत् ।

आज्यहविरवेक्षणम्- ॐ आपवस्वहिरण्यवदस्ववत्सोमव्वीरवत् । व्वाजङ्गोमन्तमाभरस्वाहा ।।६४।। इति मन्त्रेण आज्यस्य हविषश्च अवेक्षणं

कुर्यात् ।

आज्यहविषोरुत्पवनम्- ॐ प्रत्त्युष्टꣳरक्षःप्प्रत्त्युष्टाऽअरातयोनिष्टप्प्तꣳरक्षोनिष्टप्प्ताऽअरातयः । उर्व्वन्तरिक्षमन्न्वेमि ।।६५।। इति मन्त्रेण पवित्राभ्यां आजस्य हविषश्च त्रिरुत्पवनं (त्रिरुत्क्षेपणम्) कुर्यात्।

द्रव्यनिरीक्षणम्- ॐ आत्त्वाहाषमन्तरभूर्द्ध्रुवस्त्तिष्ठाविचाचलिः । विशस्त्वासर्व्वाव्वाञ्छन्तुमात्त्वाद्द्राष्ट्रमधिब्भ्रसत् ।।६६।। इति मन्त्रेण आज्यहविषी निरीक्षेत्, सत्यपद्रव्ये तन्निरस्येत् ।

आज्ये चरौ च पवित्रस्थापनम्- ॐ व्विष्णोरराटमसिव्विष्णोःस्नप्प्त्रेस्त्थोव्विष्णोःस्स्यूरसिव्विष्णोर्द्ध्रुवोसि । व्वैष्णवमसिव्विष्णवेत्त्वा ।।६७।। इति मन्त्रेण आज्ये चरौ च द्वे द्वे पवित्रे निदध्यात् ।

वस्तुसेचनम्- ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । अग्ग्नीषोमाब्भ्यान्त्वाजुष्टन्नियुनज्ज्म । अद्भ्यस्त्वौषधीब्भ्योनुत्त्वामातामन्न्यतामनुपितानुब्भ्रातासगर्ब्भ्योनुसखासयूत्थ्यः । अग्ग्नीषोमाब्भ्यान्त्वाजुष्टम्प्रोक्षामि ।।६८।। इति मन्त्रेण प्रोक्षणीपात्रस्थपवित्राभ्यां प्रणीतोदकेन प्रोक्षणीमाज्यं चोत्पूय तेनैवासादितवस्तुसेचनं कुर्यात् ।

ज्वलत्तृणभ्रमणम्- ॐ धृष्टिरस्यपाग्ग्नेऽअग्ग्निमामादञ्जहिनिष्क्क्रव्यादꣳसेधादेवयजंव्वह । ध्रुवमसिपृथिवीन्दृꣳहब्ब्रह्मवनित्त्वाक्षत्रवनिसजातवन्न्युपदधामिब्भ्रातृव्व्यस्यव्वधाय ।।६९।। इति मन्त्रेण ज्वलत्तृणादिचरोराज्यस्याग्रेश्चोपरि प्रदक्षिणक्रमेण भ्रमयित्वाऽग्नौ क्षिपेत् ।

ब्ब्रह्मार्चनम्- ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योर्व्वषतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।७०।। इति मन्त्रेण ब्ब्रह्माणं पूजयेत् ।

विष्ण्वर्चनम्- ॐ इदंविष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।।७१।। इति मन्त्रेण विष्णुं पूजयेत् ।

प्रजापतिपूजनम्- ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् ।।७२।। इति मन्त्रेण प्रजापतिं पूजयेत् ।

अग्नौ हिरण्यस्थापनम्- ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातः-पतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ।।७३।। इति मन्त्रेण अग्नौ हिरण्यं निदध्यात् ।

अग्निपूजनम्- ॐ तदेवाग्ग्निस्तदादित्त्यस्तद्द्वायुस्तदुचन्द्रमाः । तदेवशुक्क्रन्तद्ब्रह्मताऽआपःसप्प्रजापतिः ।।७४।। इति मन्त्रेण अग्निं पूजयेत् ।

अग्नौ समित्प्रक्षेपः- ॐ समिधाग्ग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम् । आस्म्मिन्हव्व्याजुहोतन ।।७५।। इति मन्त्रेण पूर्वस्थापितसमिधस्तिस्रो विहायाग्नावपरसमिदाधानं कुर्यात् ।

ऋग्वेदादिपूजनम्- पूर्वे- **ॐ ऋग्वेदाय नमः**, दक्षिणे- **ॐ यजुर्वेदाय नमः**, पश्चिमे- **ॐ सामवेदाय नमः**, उत्तरे- **ॐ अथर्ववेदाय नमः**, इति ।

ब्रह्मणे चरुसमर्पणम्- ॐ आप्प्यायस्वसमेतुतेव्विश्श्वतःसोमव्वृष्ण्यम् । भवाव्वाजस्यसङ्गथे ।।७६।। इति मन्त्रेण चरुं ब्रह्मणे समर्पयेत् ।

अग्निप्रार्थनम्- ॐ नमो यज्ञपुरुषवैश्वानरपरमात्मा देवता ब्रह्मा ऋषिः कपिलवर्णो विष्णुश्छन्दो रुद्रो देवता यजुर्वेदा ऋषयो होमे (अग्निप्रार्थने) विनियोगः ।

नारद उवाच- **प्राङ्मुखस्तु स्थितो वह्निः प्राङ्मुखा एव ऋत्विजः ।**
प्राङ्मुखा देवताः सर्वाः कथं प्रत्यङ्मुखो भवेत् ।।१।।

ब्रह्मोवाच- **आवाहयेत्ततो वह्निं मन्त्रपूतेन वारिणा ।**
अनलश्च जलं दृष्ट्वा भीत्या प्रत्यङ्मुखो भवेत् ।।२।।

नारद उवाच- **पावकस्य तु किं रूपं को वर्णः किं च लक्षणम् ।**
शिरोबाहूदराङ्गाणां चक्षुः श्रोत्रमुखस्य च ।।३।।

ब्रह्मोवाच- पावको द्विजरूपश्च त्रिनेत्रश्च चतुर्भुजः ।
त्रिशिखः सप्तजिह्वश्च पञ्चलक्षणसंयुतः ॥४॥
त्रिभागं तु मुखं तस्य अधिको वक्त्रमुच्यते ।
उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः ॥५॥
मध्यवक्त्रे तु ईशान एवं ब्रह्मप्रभाषितम् ।
मूर्ध्नि चैव त्त्वहं ब्रह्मा मुखे चैव तु शङ्करः ॥६॥
जिह्वायां संस्थितो विष्णुर्दंष्ट्रायां तु ग्रहाः स्मृताः ।
नासायां देवताः सर्वा चक्षुषीन्द्रदिवाकरौ ॥७॥
ऋग्वेदो हृदयस्थाने बाह्वङ्गुल्योर्यजुस्तथा ।
उदरे कटिगुह्ये च सामवेदः प्रकीर्तितः ॥८॥
अथर्वो जङ्घे पादौ च ग्रीवामोङ्कार एव च ।
पृष्ठे चैव तु गायत्री एवं स्यात्तु षडङ्गकम् ॥९॥

हरकमलपिङ्गललोचनलोहिताक्षसर्वपापप्रणाशनम् । वैश्वानरलक्षणम्-कस्य पुत्रः कस्य कुलोत्पन्नः किं गोत्रं कः पिता का माता ? कात्यायनवचनात्- शृङ्गी गोत्रम्, शण्डिल्यः पिता, अरणी माता, उदानः कुक्षिरूर्ध्वमुखललाटम् ।

काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णी
स्फुलिङ्गिनी विश्वरूपा च चण्डी लोलायमाना इति सप्तजिह्वाः ॥१०॥

त्रिशिखं वै चक्रधरं साक्षसूत्रकमण्डलुम् ।
व्यग्रहस्तं तथा गन्धपुष्पाभरणभूषितम् ॥११॥
अजस्कन्धसमारुढं कृष्णाजिनोत्तरीयकम् ।
ऋग्यजुःसामवेदानामथर्वध्वनिभूषितम् ॥१२॥
होमार्थं प्रार्थयेऽहं त्वां चर्वाज्याभ्यां हुताशन ।
वैश्वानर दिव्यरूप त्वमत्रावाहितो भव ॥
तावत्तिष्ठात्रमे ब्रह्मन्यावत्कर्म समाप्यते ॥१३॥

कर्मविशेषेऽग्नेर्नामानि- (वायव्यसंहितायाम्)

लौकिके पावको ह्यग्निः प्रथमः परिकीर्तितः ।
अग्निश्च मरुतो नाम गर्भाधाने विधीयते ।।१।।
पुंसवने चान्द्रमसः शुङ्गाकर्मणि शोभनः ।
सीमन्ते मङ्गलो नाम प्रगल्भो जातकर्मणि ।।२।।
नाम्नि वै पार्थिवो वह्निः प्राशने शुचयः स्मृताः ।
सभ्यनामाथ चूडायां व्रतदाने समुद्भवः ।।३।
वेदारम्भे हरिर्नाम राजपुत्रः समावृतौ ।
गोदाने सूर्यनामा च केशान्ते ह्यग्निरुच्यते ।।४।।
वैश्वानरो विसर्गे तु विवाहे योजकस्तथा ।
चतुर्थ्यां तु शिखी नाम धृतिरग्निस्तु सामनि ।।५।।
लक्षहोमे वह्निनामा कोटिहोमे हुताशनः ।
प्रायश्चित्ते विधिर्नाम पाकयज्ञे तु साहसः ।।६।।
पूर्णाहुत्यां मृडो नाम शान्तिके दारुणस्तथा ।
पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारके ।।७।।
वश्यार्थे कामदो नाम वनदाहे तु वर्धनः ।
आवसथ्ये भवेदग्निरग्निष्टोमे प्रदायकः ।।८।।
क्रव्यादो मृतभक्षी च समुद्रे वडवानलः ।
युगान्ते सङ्क्षायो नाम संवर्तः प्रलये स्मृतः ।।९।। इति ।

अग्निपूजनम्- ततोऽमुकनाम वैश्वानर आवाहितो भवेत्युक्त्वा गन्धपुष्पादिभिः संपूजयेत् । आग्नेये- **ॐ ब्रह्मणे नमः**, नैर्ऋत्ये- **ॐ पौष्टिकाय नमः**, वायव्ये- **ॐ बलवर्द्धनाय नमः**, ऐशान्ये- **ॐ प्रजापतये नमः**, मध्ये- **ॐ विष्णवे नमः** ।

ब्राह्मणवरणम्- तत्रादौ कुशतिलयवजलयुतगन्धपुष्पाक्षतताम्बूलपूगीफलवस्त्रद्रव्याभरणादीन्यादाय पूर्वाभिमुखो भूत्वा प्रत्यङ्मुखान् ब्राह्मणान् निमन्त्रयेत्- ॐ तत्सत्३ ॐ विष्णुः३ अद्येत्यादिदेशकालादीन्संकीर्त्य अमुकगोत्रोऽमुकशर्माहं ममामुककर्मणो निर्विघ्नपरिसमाप्त्यर्थं गणेशपूजन-

पूर्वकममुककर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुं तथा चामुककर्मणि प्रतिदेवतानां मुखे साज्यभागान्तमाहवनीयद्रव्ययुतहोमकर्म कर्तुं तथा चामुककर्मणि यद्यत् कर्मविहितोपयोग्याचार्यकर्म कर्तुं तथा चामुककर्मणि चतुर्वेदोक्तमन्त्रजपपाठकर्म कर्तुं नानानामगोत्रान्नानानामशर्मणो ब्राह्मणानेभिश्चन्दनपुष्पाक्षतताम्बूलपूगीफलवासोद्रव्याभरणादिभिर्गणपतिब्रह्महोत्राचार्यत्वेन जापकपाठकत्वेन च युष्मानहं वृणे, **ॐ वृताः स्म** इति ब्राह्मणास्ते ब्रूयुः । (अत्र पुण्याहवाचनपर्यन्तं विशेषवाक्यम्)।

ब्रह्मप्रार्थना- ॐ यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः ।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ।।१।।

होतृप्रार्थना- भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर ।
वितते मम यज्ञेऽस्मिन् ऋत्विक् त्वं मे मखे भव ।।२।।

आचार्यप्रार्थना- आचार्यस्तु यथास्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ।।३।।

वेदपाठकानां प्रार्थना- (पूर्वदिशि ऋग्वेदपारायणार्थम्)

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।।४।।

(दक्षिणदिशि यजुर्वेदपारयणार्थम्)

कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदेवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।।५।।

(पश्चिमदिशि सामवेदपारायणार्थम्)

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।।६।।

(उत्तरदिशि अथर्ववेदपारायणार्थम्)

बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः ।
वैशंपायन विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।।७।।

अमुककर्मणि अमुकदेवताया अमुकमन्त्रजपकर्म कर्तुं त्वामहं वृणे। ततो ब्राह्मणान्मधुपर्कादिना संपूज्य प्रार्थयेत् ।

ब्राह्मणप्रार्थना-

ॐ ब्राह्मणाः सन्तु मे शस्ताः पापात् पान्तु समाहिताः ।
वेदानां चैव दातारः पातारः सर्वदेहिनाम् ।।८।।
जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः ।
देवानां च पितॄणां च तृप्त्यर्थं पाठकाः कृताः ।।९।।
येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् ।
रक्षन्तु सततं तस्माज्जपयज्ञे व्यवस्थिताः ।।१०।।
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
येषां वाक्यामृतेनैव शुद्ध्यन्ति मलिना जनाः ।।११।।
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ।
सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ।।१२।।
श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा ।
यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ।।१३।
अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाशिषः ।
यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ।।१४।।
यत्कृपालोचनात् सर्वा ऋद्धयो वृद्धिमाप्नुयुः ।
मम यज्ञे सदा पूज्याः सन्तु वै नियमान्विताः ।।१५।।
अक्रोधनाः शौचपराः सततं ब्रह्मवादिनः ।
ब्रह्मध्यानरता नित्यं प्रसन्नमनसः सदा ।।१६।।
अदुष्टभाषिणः सन्तु मा सन्तु परनिन्दकाः ।
ममापि नियमा ह्येते भवन्तु भवतामपि ।।१७।।

(इति ब्राह्मणप्रार्थनायां विशेषवाक्यानि ।)

पुण्याहवाचनविधिः

ब्राह्मणवरणम्- त्रींश्चतुरः पञ्च वा ब्राह्मणानुत्तरवृद्ध्या संस्थाप्य कर्मपात्रोदकं सकुशतिलयवं गृहीत्वा- ॐ अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहममुककर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये, तदङ्गत्वेन अमुकसंख्याकानां ब्राह्मणानां वरणम्, पूजनञ्च करिष्ये , इति संकल्प्य अर्घगन्धाक्षतपुष्पताम्बूलपूगीफलद्रव्यवस्त्रादिभिर्ब्राह्मणान् संपूज्य एभिर्गन्धाक्षतपुष्पताम्बूलफलद्रव्यवस्त्रादिभिरमुककर्मणि सर्वाभ्युदयप्राप्तये पुण्याहवाचनार्थं **त्वामहं वृणे, वृतोस्मी**ति प्रतिवचनम् । एवं कृत्वाऽन्येषामपि तदैव वरणं कुर्यात् । युष्मानहं वृणे इति एकदैव वा वरणं सर्वेषाम् ।

ब्राह्मणप्रार्थना- अञ्जलिं बध्वा ब्राह्मणान् पूर्ववत् प्रार्थयेत् ।

पुण्याहवाचनम्- ततो हस्ते फलादिकं गृहीत्वा- ॐ अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम गृहेऽमुककर्मणि भो ब्राह्मणा **ॐ पुण्याहं भवन्तो ब्रुवन्तु** इति त्रिःश्रावयेत् । ब्राह्मणाश्च **ॐ पुण्याहम्** इति त्रिरुक्त्वा- **ॐ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः। पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा ।।७७।।** इति पठेयुः ।

एवमुत्तरत्र पुनः पूर्ववत् भो ब्राह्मणा मम गृहे **ॐ स्वस्ति भवन्तो ब्रुवन्तु,** इति त्रिःश्रावयेत् । ब्राह्मणाश्च **ॐ स्वस्ति** इति त्रिरुक्त्वा- **ॐ स्वस्तिनऽइन्द्रोवृद्धश्श्रवाःस्वस्तिनःपूषाव्विश्श्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्द्दधातु ।।७८।।**

पुनःपूर्ववत् भो ब्राह्मणा मम गृहे **ॐ समृद्धिं भवन्तो ब्रुवन्तु ३,** ब्राह्मणाः **ॐ समृद्ध्यताम् ३। ॐ सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम । दिवंपृथिव्याऽअद्ध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ।।७९।।**

पुनः पूर्ववत् भो ब्राह्मणा मम गृहे **ॐ वृद्धिं भवन्तो ब्रुवन्तु ३, ॐ वृद्ध्यताम् ३ । ॐ ज्यैष्ठ्यञ्चमऽआधिपत्त्यञ्चमेमन्युश्श्चमेभामश्श्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेव्वरिमाचमेप्प्रथिमाचमेव्वर्षिमाचमेद्राघिमाचमे-**

वृद्धञ्चमेवृद्धिश्श्चमेयज्ञेनकल्प्यन्ताम् ।।८०।।

पुनः पूर्ववत् भो ब्राह्मणा मम गृहे **ॐ कल्याणं भवन्तो ब्रुवन्तु ३,** ब्राह्मणाः **ॐ कल्याणम् ३ । ॐ यथेमांवाचङ्कल्याणीमावदानिजनेब्भ्यः। ब्रह्मराजन्न्याब्भ्याछंशूद्रायचार्य्यायचस्वायचारणायच । प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामःसमृद्ध्यतामुपमादोनमतु** ।।८१।।

पुनपूर्ववत् भो ब्राह्मणा मम गृहे **ॐ शान्तिं भवन्तो ब्रुवन्तु ३,** ब्राह्मणाः **ॐ शान्तिः ३ । ॐ द्यौःशान्तिरन्तरिक्षछशान्तिःपृथिवीशान्तिःरापःशान्तिःरोषधयःशान्तिः । वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिःसर्व्वछशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि** ।।८२।।

पुनः पूर्ववत् भो ब्राह्मणा **मम गृहे श्रियं भवन्तो ब्रुवन्तु ३, ॐ श्रीः ३ । ॐ मनसःकाममाकूतींवाचःसत्यमशीय । पशूनाछंरूपमन्नस्यरसोयशःश्रीःश्रयताम्** ।।८३।।

ब्राह्मणैराशीःप्रदानम् - ततो ब्राह्मणाः -

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ।।

इत्युक्त्वा- **ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।**
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।

पुण्याहवाचनप्रसादोऽस्तु इति तिलकमाशीर्वादञ्च यजमानाय दद्युः ।

इति पुण्याहवाचनप्रयोगः ।

भूमिसंशोधनम्- वेद्या ईशानदिग्भागे अव्रणं दध्यक्षतादिभूषितं कलशं धान्योपरि स्थापयेत् । तत्प्रकारश्च- **ॐ भूरसिभूमिरस्यदितिरसिव्विश्श्वधायाव्विश्श्वस्यभुवनस्यधर्त्री । पृथिवींय्यच्छपृथिवीन्दृछहपृथिवीम्माहिछसीः** ।।८४।। इति भूमिं संशोधयेत् ।

धान्यस्थापना- ॐ धान्न्यमसिधिनुहिदेवान्प्राणायत्त्वोदानायत्त्वाव्व्यानायत्त्वा । दीर्ग्घामनुप्प्रसितिमायुषेधान्देवोवःसविताहिरण्यपाणिःप्प्रतिगृब्भ्णात्त्वच्छिद्रेणपाणिनाचक्षुषेत्त्वामहीनाम्पयोसि ।।८५।। इति धान्यं

स्थापयेत् ।

कलशस्थापना- ॐ आजिग्घ्रकलशम्मह्यात्त्वाविशन्त्विन्दवः। पुनरूर्ज्जानिवर्त्तस्वसानःसहस्त्रन्धुक्क्ष्वोरुधाराःपयस्वतीःपुनर्म्माविशताद्द्रयिः ।।८६।। इति धान्योपरि कलशं स्थापयेत् ।

तीर्थादिजलप्रक्षेपः- ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतसदन्न्यसि । वरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद ।।८७।। इति मन्त्रेण कलशे तीर्थादिजलं प्रक्षिपेत् ।

पञ्चरत्नप्रक्षेपः - ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ।।८८।। इति पञ्चरत्नानि प्रक्षिपेत् ।

पूगीफलादिप्रक्षेपः - ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्श्चपुष्पिणीः। बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः ।।८९।। इति पूगीफलादीनि प्रक्षिपेत् ।

यवप्रक्षेपः- ॐ ओषधयःसमवदन्तसोमेनसहराज्ञा । यस्म्मैकृणोतिब्ब्राह्मणस्तꣳराजन्पारयामसि ।।९०।। इति यवान् प्रक्षिपेत् ।

सर्वौषधिप्रक्षेपः- ॐ याऽओषधीपूर्वाजातादेवेभ्यस्त्रियुगम्पुरा । मनैनुबब्भ्रूणामहꣳशतन्धामानिसप्तच ।।९१।। इति सर्वौषधीः हरिद्रा वा प्रक्षिपेत् ।

चन्दनप्रक्षेपः- ॐ गन्धद्वारान्दुराधर्षान्नित्त्यपुष्टाङ्करीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ।।९२।। इति गन्धं प्रक्षिपेत् ।

दूर्वाप्रक्षेपः- ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्वेप्प्रतनुसहस्रेणशतेनच ।।९३।। इति दूर्वां प्रक्षिपेत् ।

सप्तमृत्तिकाप्रक्षेपः- ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।९४।। इति सप्तमृदः प्रक्षिपेत् ।

पञ्चपल्लवैः कलशमुखाच्छादनम् - ॐ अश्श्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता । गोभाजऽइत्त्किलासथयत्त्सनवथपूरुषम् ।।९५।। इति

पञ्चपल्लवैस्तन्मुखमाच्छादयेत् ।

पञ्चपल्लवाभावे आम्रपल्लवैः कलशमुखाच्छादनम्- ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन । ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।।१६।। इत्याम्रपल्लवैः कलशमुखमाच्छदयेत् ।

वस्त्रवेष्टनम्- ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्रविणन्धेहिचित्रम् । उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा ।।१७।। इति वस्त्रयुग्मेन कलशमावेष्टयेत् ।

वरुणावाहनम्- ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः । अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।।१८।।
इति कलशे वरुणमावाह्य पूजयेत् ।

कलशे गङ्गादितीर्थावाहनम्-

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।।

कलशं स्पृष्ट्वाभिमन्त्रणम् -

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ।।
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोप्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।

कलशप्रार्थना- ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ।।

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ।

इति कलशस्थापनाविधिः

दीपपूजाविधिः

दीपप्रज्ज्वलनम्- ॐ स्थिरोभवव्विड्वङ्गऽआशुर्ब्भवव्वाज्ज्यर्वन् । पृथुर्ब्भवसुखदस्त्वमग्ग्नेःपुरीषवाहणः ।।९८।। इति दीपं प्रज्वलयेत् ।

दीपपूजनम् - ॐ पृष्टोदिविपृष्टोऽअग्ग्निःपृथिव्यापृष्टोव्विश्श्वाऽओषधीराविवेश । व्वैश्श्वानरःसहसापृष्टोऽअग्ग्निःसनोदिवासरिषस्प्पातुनक्तम्।।९९।। इति मन्त्रं पठित्वा षोडशोपचारैर्दीपं पूजयेत् ।

प्रार्थना- ॐ नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।।
दीपज्योतिः परं ब्रह्म दीपज्योतिर्जनादनः ।
दीपो हरतु मे पापं रक्ष दीप नमोऽस्तु ते।। इति दीपं प्रार्थयेत्।

इति दीपपूजाविधिः ।

अथ गणेशपूजा

ससङ्कल्पं गणेशावाहनम्- ॐ अद्येहेत्यादि देशकालौ संकीर्त्य अमुककर्मनिर्विघ्नपरिसमाप्त्यर्थममुककर्माङ्गत्वेन यथालब्धोपचारैर्गणेशपूजनमहं करिष्ये इति संकल्प्याधोलिखितमन्त्रैर्गणेशमावाहयेत्- **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ।।१००।।**

हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभयुत पितः ।।
नागास्य नागहार त्वं गणराज चतुर्भुज ।
भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ।।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ।।

इत्यावाहयेत् ।

गणेशपूजनम्- ॐ भूर्भुवः स्वः गणपतये सिद्धिबुद्धिसहिताय सायुधाय सवाहनाय सपरिवाराय इदमासनं समर्पयामीति प्रतिप्रयोगं **सहस्रशीर्षे**त्यादि-मन्त्रैः षोडशोपचारैः पूजयेत् । तद्यथा आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, यज्ञोपवीतम्, वस्त्रम्, गन्धम्, अक्षतान्, पुष्पाणि, दूर्वाङ्कुरान्, धूपम्, दीपम्, नैवेद्यम्, आचमनीयम्, ताम्बूलम्, अलङ्कारादि, यल्लब्धं दक्षिणाद्रव्यम्, पादवन्दनञ्च समर्प्य नारिकेलादिफलं सवस्त्रं पुरतः पात्रे निधाय स्तुवीत ।

गणेशस्तुतिपूर्वकं फलनिवेदनम् -

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।।
अनेन फलदानेन फलदोऽस्तु सदा मम ।

इति स्तुत्वा फलं निवेदयेत् ।

रक्षाविधानम्

प्रयोगः- यवकुशदूर्वासर्षपचन्दनाक्षतगोमयहरिद्रादधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन्नारायणकवचं पठेत्-

प्राचीं रक्षतु गोविन्द आग्नेयीं गरुडध्वजः ।
यामीं रक्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् ।।
वारुणीं केशवो रक्षेद्वायवीं मधुसूदनः ।
उदीचीं श्रीधरो रक्षेदैशानीं तु गदाधरः ।।
ऊर्ध्वं गोवर्धनधरो ह्यधस्ताद्धरणीधरः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ।।
यज्ञाग्रे रक्षताच्छंखः पृष्ठे पद्मं तथोत्तमम् ।
वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ।।
उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ।
अच्युतः पातु ऋग्वेदं यजुर्वेदमधोक्षजः ।।
कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा ।
उपविष्टाश्चये विप्रास्तेऽनिरुद्धेन रक्षिताः ।।
यजमानं सपत्नीकं पुण्डरीकविलोचनः ।
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ।।
वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैश्च सर्षपैः ।
कृत्वा पोटलिकां पूर्वं बध्नीयाद्दक्षिणे करे ।।

वेदमन्त्राः- ॐ भूर्भुवःस्वःतत्सवितुर्व० ।।१०१।।, ॐ गणानान्त्वा० ।।१०२।। ॐ जातवेदसेसुनवामसोमम्० ।।१०३।। ॐ सप्तऽऋषयः०।।१०४।।-ॐ नतत्० ।।१०५।।, ॐ यदाबध्नन्० ।।१०६।। ॐ रक्षोहणंवलगहनंवैष्णवीमिदमहन्तंवलगमुत्त्किरामियन्मेनिष्ट्योयममात्त्योनिचखानेदमहन्तंवलगमुत्त्किरामि । यम्मेसमानोयमसमानोनिचखानेदमहन्तंवलगमुत्त्किरामियम्मेसबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तंवलगमुत्त्किरामियम्मेसजातोयमसजातोनिचखानोत्त्कृत्त्याङ्किरामि ।।१०७।। ॐ स्वराडसिसपत्नहासत्रराडस्यभिमातिहा। जनराडसिरक्षोहासर्व्वराडस्यमित्रहा ।।१०८।। ॐ रक्षोहणोवोवलगहनःप्प्रोक्षामिवैष्णवान्त्रक्षोहणोवोवलगहनोऽवनयामिवैष्णवान्त्रक्षोहणो-

वोवलगहनोवस्तृणामिवैष्णवान्रक्षोहणौवांवलगहनाऽउपदधामिवैष्णवीरक्षोहणौवांवलगहनौपर्य्यूहामिवैष्णवीवैष्णवमसिवैष्णवास्त्थ ।।१०९।। ॐ मानः० ।।११०।।, ॐ प्रत्त्युष्टक्षरक्षः० ।।१११।। इति एभिर्मन्त्रै रक्षापोटलिकां संपूज्य कर्मान्ते दक्षिणकरे बध्नीयात् ।

बन्धनमन्त्रौ- ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ।।

ॐ त्वंय्यविष्ठदाशुषोनॄँपाहिशृणुधीगिरः। रक्षातोकमुतत्त्मना ।।११२।। रक्षा सुरक्षा भूयात् ।

इति रक्षाविधानम् ।

कलशस्कन्धप्रदेशे गणपत्यादिपूजनम्- कलशस्कन्धप्रदेशे गणपतिसूर्यदेवीशिवविष्णून्, विनायकदुर्गावाय्वाकाशाश्विनीकुमारान्, सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेतून्, ईश्वरोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तान्, अग्न्यब्भूमिविष्ण्विन्द्रेन्द्राणीप्रजापतिसर्पब्रह्मणः, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तान्, ध्रुवाद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येकादशरुद्रान्, गौर्यादिषोडशमातॄः, आवहादिसप्तमरुतः, विनायकब्रह्मविष्णुरुद्रार्कवनस्पतीन् आवाह्य यथामिलितोपचारैः पूजयेत् ।

पूर्वाङ्गहोमः

होमसंकल्पः- कुशादीन्यादाय- ॐ तत्सद्विष्णुरित्यादिदेशकालादीन्सङ्कीर्त्य अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहम् अमुककर्मणि इदमाज्यादिहवनीयद्रव्यं पूर्वमाघारावाज्यभागौ प्रजापतीन्द्राग्निसोमदेवताभ्यः, भूर्भुवः स्वरग्नीवरुणसवितृविष्णुविश्वदेवमरुत्स्वर्केभ्यः, प्रधानभूतेभ्यो देवेभ्यो गणपत्यादिपञ्चायतनेभ्यः, विनायकादिपञ्चलोकपालेभ्यः, सूर्यादिनवग्रहेभ्यः, ईश्वराद्यधिदेवेभ्यः, अग्न्यादिप्रत्यधिदेवेभ्यः, इन्द्रादिदशदिक्पालेभ्यः, ध्रुवाद्यष्टसुभ्यः,

धात्रादिद्वादशाऽऽदित्येभ्यः, वीरभद्राद्येकादशरुद्रेभ्यः, गौर्यादिषोडशमातृभ्यः, आवहादिसप्तमरुद्भ्यः, विनायकब्रह्मविष्णुरुद्रार्कवनस्पतिभ्यः, तथा चतुःस्वस्तिभ्यः, पयःपञ्चभ्यः, षड्विष्णुभ्यः, द्वादशदेवताभ्यः, द्वादशशान्तिभ्यः, षट्प्रातर्भ्यः, षड्वातेभ्यः, त्र्यनडुद्भ्यः, पञ्चभगेभ्यः, पञ्चेन्द्रियेभ्यः, पञ्चवरुणेभ्यः, गायत्र्यै, सावित्र्यै, सरस्वत्यै, गृहमात्रे, अन्नपूर्णायै, महालक्ष्म्यै, महारिष्टविनाशिन्यै, चण्ड्यै, द्यौराल्यै, वास्तुदेवाय, गैडुदेवाय, क्षेत्रपालाय, स्वर्गेन्द्राय, पातालवासुकिभ्यः, मित्रलोकपालाय, मान्धात्रे, तीर्थराजाय, व्रतराजाय, पुनर्दिक्पालेभ्यः, तिथिभ्यः, नक्षत्रेभ्यः, योगेभ्यः, वारेभ्यः, करणेभ्यः, वातेभ्यः, मेघेभ्यः, समुद्रेभ्यः, नदीभ्यः, इष्टदेवताभ्यः, कुलदेवेभ्यः, स्थापितदेवेभ्यः, भैरवाय, भैरव्यै, विन्ध्यवासिन्यै, स्थानविशेषाधिपतिदेवताभ्यः, पञ्चपाण्डवेभ्यः, पितृभ्यः, वैश्वानराय, उत्तराङ्गभूर्भुवः स्वरग्निवरुणसवितृविष्णुविश्वदेवमरुत्स्वर्कप्रजापतिस्विष्टकृद्देवेभ्यो मया परित्यक्तम् । (यथा दैवतमस्तु इति सर्वदेवतोद्देशेनयुगपद्द्रव्यत्यागं कुर्यात् प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात्) ।

पूर्वस्थापितत्रिसमित्प्रक्षेपः- तत उपयमनकुशान्वामहस्ते कृत्वा उत्तिष्ठन्मनसा प्रजापतिं ध्यात्वाऽधोलिखितमन्त्रेण समिद्धतमेऽग्नौ पूर्वस्थापितास्तिस्रः समिधः प्रक्षिपेत्- **ॐ समिधाग्ग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम् । आस्मिन्न्हव्याजुहोतन ।।११३।।**

अग्नेरभिमन्त्रणम्- तत उपविश्य सपवित्रप्रोक्षण्युदकमादायाभिमन्त्रयेत् पृष्टोदिवीति मन्त्रेण- **ॐ पृष्टोदिविपृष्टोऽअग्ग्निःपृथिव्याम्पृष्टोविश्श्वाऽओषधीराविवेश । वैश्श्वानरःसहसापृष्टोऽअग्ग्निःसनोदिवासरिषस्प्पातुनक्तम् ।।११४।।**

अग्निपर्युक्षणम्- ॐ सुसमिद्धायशोचिषेघृतन्तीव्व्रञ्जुहोतन । अग्ग्नयेजातवेदसे ।।११५।। इति मन्त्रेण तज्जलेन प्रदक्षिणक्रमेणाग्निं पर्युक्षेत् ।

ततः प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धो होता समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति । तत्राघारादारभ्य

द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपं कुर्यात् ।

आघारहोमः- ॐ प्रजापतय इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** प्रोक्षणीपात्रेऽपि प्रक्षेपः इति मनसा । **ॐ इन्द्राये**ति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** प्रोंक्षणीपात्रेऽपि प्रक्षिपेत् । इत्याघारौ ।

आज्यभागहोमः- ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये** प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । **ॐ सोमाये**ति प्रजापतिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदᳬंसोमाय** प्रोक्षणीपात्रेपि प्रक्षिपेत् । इत्याज्यभागौ ।

व्याहृतिहोमः- ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दाᳬंस्यग्न्याधाने विनियोगः । **ॐ भूः स्वाहा, इदमग्नये** प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । **ॐ भुवः स्वाहा, इदं व्वायवे** प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । **ॐ स्वः स्वाहा, इदᳬंसूर्य्याय** प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ।

पञ्चवारुणीहोमः- ॐ त्वन्नोऽअग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः । **ॐ त्वन्नोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोव्वह्नितमःशोशुचानोविश्श्वाद्द्वेषाᳬंसिप्प्रमुमुग्ध्यस्मत् ।।११६।।** स्वाहा इदमग्नीवरुणाभ्याम् प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । **ॐ सत्त्वन्नोऽअग्न** इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ । अवयक्ष्वनोव्वरुणᳬंरराणोव्वीहिमृडीकᳬंसुहवोनऽएधि ।।११७।।** स्वाहा इदमग्नीवरुणाभ्यां प्रोक्षणीपात्रेऽपि प्रक्षिपेत्। **ॐ अयाश्श्चाग्न** इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे

CC-0. Digitized by eGangotri and MIDI - Delhi

विनियोगः । **ॐ अयाश्श्चाग्नेस्यनभिशस्तिपाश्चसत्त्यमित्त्वमयाऽअसि। अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा** ।।११८।। इदमग्नये । **ॐ येतेशतमिति** वामदेवऋषिस्त्रिष्टुप्छन्दो व्वरुणः सविताविष्णुर्विश्वे मरुतः स्वर्क्काश्चदेवताः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ येतेशतंव्वरुणये-सहस्रंय्यज्ञियाःपाशाव्विततामहान्तः । तेभिर्न्नोऽअद्यसवितोत व्विष्णुर्व्विश्श्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा** ।।११९।। इदं व्वरुणाय सवित्रे विष्णवे व्विश्श्वेब्भ्यो देवेब्भ्यो मरुद्भ्यः स्वर्क्केब्भ्यश्श्च प्रोक्षणीपात्रेऽपि प्र०। **ॐ उदुत्तममिति** शुनःशेपऋषिस्त्रिष्टुप्छन्दो व्वरुणो देवता सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमद्ध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम** ।।१२०।। स्वाहा इदं व्वरुणाय प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । एताः प्रायश्चित्तसंज्ञाका आहुतयः ।

इति पञ्चवारुणीहोमः ।

प्रधानदेवताहोमसूत्राणि

गणेशो भास्करो देवी शिवो विष्णुश्च पञ्चमः ।
पञ्चायतननामानः कथिताः पञ्चदेवताः ।।१।।
विनायकस्तथा दुर्गा वायुराकाश एव च ।
नासत्यदस्रौ पञ्चैते लोकपालाः प्रकीर्तिताः ।।२।।
सूर्यः सोमश्च भौमश्च बुधो जीवश्च भार्गवः ।
शनी राहुश्च केतुश्च कथिताश्च नवग्रहाः ।।३।।
ईश्वरश्च उमा स्कन्दो विष्णुर्ब्रह्मा शचीपतिः ।
यमः कालश्चित्रगुप्त इत्येता अधिदेवताः ।।४।।
अग्निरापो धरा विष्णुरिन्द्र ऐन्द्री प्रजापतिः ।
सर्पा ब्रह्मा क्रमात् प्रोक्ता नवप्रत्यधिदेवताः ।।५।।
इन्द्राग्नी यमनिर्ऋती वरुणो मरुतो विधुः ।
ईशो ब्रह्मा तथानन्तो दिक्पालाः परिकीर्तिताः ।।६।।

ध्रुवादयोऽष्टौ वसवो धात्राद्या द्वादश स्मृताः ।
आदित्या वीरभद्राद्या रुद्रा एकादशैव तु ॥७॥
गौर्यादयो हि कथिता मातरः षोडशैव तु ।
सप्तावहाद्या मरुतो विनायको विधिर्हरिः ॥८॥
रुद्रश्चार्कस्तथा प्रोक्तो वनस्पतिः क्रमेण हि ।
चतुःस्वस्ति पयः पञ्च विष्णवः षट् प्रकीर्तिताः ॥९॥
देवताः द्वादश ज्ञेया द्वादशैव तु शान्तयः ।
षट् प्रातः षट् च वै वाता अनड्वाहस्त्रयो मताः ॥१०॥
भगाः पञ्चेन्द्रियाणि स्युः पञ्चैव वरुणा अपि ।
गायत्री चैव सावित्री वाग्देवी गृहमातृका ॥११॥
अन्नपूर्णा महालक्ष्मीर्महारिष्टविनाशिनी ।
चण्डी द्यौराली विज्ञेया वास्तुभूम्यौ तथैव च ॥१२॥
गैडुश्च क्षेत्रपालश्च ग्रामदेवस्ततः परम् ।
स्वर्गेन्द्रो वासुकिश्चैव मित्रलोकस्तथैव च ॥१३॥
मान्धाता तीर्थराजश्च व्रतराजस्ततः परम् ।
पुनर्दिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः ॥१४॥
वाराश्च करणान्येवं वातमेघसमुद्रकाः ।
नदीष्टकुलदेवाश्च स्थापिताः देवताः क्रमात् ॥१५॥
भैरवो भैरवी विन्ध्यवासिनी स्थानदेवताः ।
एषोहसर्वदेवेति शुक्रज्योतिस्तथैव च ॥१६॥
पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ।
पूर्णपात्रं ततो दद्याद्बर्हिहोमस्ततः परम् ॥१७॥
गोभूहिरण्यरत्नानि रौप्यवस्त्राणि चैव हि ।
प्रदद्याद् द्विजमुख्येभ्यो यजमानो विशेषतः ॥१८॥

इति होमसूत्राणि ।

प्रधानदेवताहोमः- **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।।१२१।।** स्वाहा इदं गणपतये । **ॐ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।१२२।।** स्वाहा इदꣳसूर्याय । **ॐ देवीर्द्वारऽइन्द्रꣳसङ्घातेव्वीड्वीर्य्यामन्नवर्द्धयन् । आवत्सेनतरुणेनकुमारेणचमीवतापार्व्वाणꣳरेणुककाटन्नुदन्तांव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज ।।१२३।।** स्वाहा इदं देव्यै । **ॐ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच ।।१२४।।** स्वाहा इदꣳशिवाय । अत्र प्रणीतोदकस्पर्शः । **ॐ व्विष्णोरराटमसिव्विष्णोश्श्नप्त्रेस्त्थोव्विष्णोःस्यूरसिव्विष्णोर्द्ध्रुवोसि । व्वैष्णवमसिव्विष्णवेत्त्वा ।।१२५।।** स्वाहा इदं विष्णवे।

इति पञ्चायतनदेवाः ।

पञ्चलोकपालहोमः- **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।।१२६।।** स्वाहा इदं व्विनायकाय । **ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्श्चन । ससस्त्यश्श्वकःसुभद्द्रिकाङ्काम्पीलवासिनीम् ।।१२७।।** स्वाहा इदं दुर्गायै । **ॐ व्वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि । नियुत्त्वान्त्सोमपीतये ।।१२८।।** स्वाहा इदं व्वायवे । **ॐ ऊर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीꣳष्यग्ग्ने । द्द्युमत्तमासुप्प्रतीकस्यसूनोः ।।१२९।।** स्वाहा इदमाकाशाय । **ॐ अश्श्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि ।।१३०।।** स्वाहा इदमश्श्विनीकुमाराब्भ्याम्।

इति पञ्चलोकपालहोमः ।

नवग्रहहोमः- ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।१३१।। स्वाहा इदꣳसूर्य्याय । **ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजा ।।१३२।।** स्वाहा इदꣳसोमाय । **ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्त्पतिःपृथिव्व्याऽअयम् । अपाꣳरेताꣳसिजिन्न्वति ।।१३३।।** स्वाहा इदं भौमाय । **ॐ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमानश्च्चसीदत ।।१३४।।** स्वाहा इदं बुधाय । **ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् ।। (उपयामगृहीतोबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा) ।।१३५।।** स्वाहा इदं बृहस्प्पतये । **ॐ अन्नात्त्परिस्स्रुतोरसम्ब्रह्मणाव्व्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।।१३६।।** स्वाहा इदꣳशुक्राय० । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः ।।१३७।।** स्वाहा इदꣳशनैश्चराय । **ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता ।।१३८।।** स्वाहा इदꣳराहवे । **ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ।।१३९।।** स्वाहा इदं केतवे ।

इति नवग्रहहोमः ।

अधिदेवताहोमः

ॐ **त्र्यम्बकंय्यजामहेसुगन्धिपुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ।।१४०।। ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् । उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ।।१४१।।** स्वाहा इदमीश्वराय । अत्र प्रणीतोदकस्पर्शः **ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे-**

पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।१४२।। स्वाहा इदमुमायै । ॐ यदक्क्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्व्वन् ।।१४३।। स्वाहा इदꣳस्कन्दाय । ॐ व्विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्त्थोव्विष्णोःस्यूरसिव्विष्णोर्द्ध्रुवोसिव्वैष्णवमसिव्विष्णवेत्त्वा ।।१४४।। स्वाहा इदं व्विष्णवे । ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः । सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।।१४५।। स्वाहा इदं ब्रह्मणे । ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः ।।१४६।। स्वाहा इदमिन्द्राय । ॐ यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे । देवस्त्त्वासवितामद्ध्वानक्तु। पृथिव्व्यासꣳस्पृशस्पाहि । अर्च्चिरसिशोचिरसितपोसि ।।१४७।। स्वाहा इदं यमाय । अत्र प्रणीतोदकस्पर्शः । ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि । समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ।।१४८।। स्वाहा इदं कालाय । अत्र प्रणीतोदकस्पर्शः । ॐ इन्धानास्त्वाशतꣳहिमाद्द्युमन्तꣳसमिधीमहि । व्वयस्वन्तोव्वयस्कृतꣳसहस्वन्तःसहस्कृतम् । अग्ग्नेसपत्त्नदम्भनमदब्धासोऽअदाभ्यम् । चित्रावसोस्वस्तितेपारमशीय ।।१४९।। स्वाहा इदं चित्रगुप्ताय । अत्र प्रणीतोदकस्पर्शः ।

इत्यधिदेवताहोमः

प्रत्यधिदेवताहोमः

ॐ अग्ग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँ२।।ऽआसादयादिह ।।१५०।। स्वाहा इदमग्नये । ॐ अप्स्वग्ग्नेसधिष्टवसौषधीरनुरुद्ध्यसे । गर्ब्भेसञ्जायसेपुनः ।।१५१।। स्वाहा इदमद्भ्यः। ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।१५२।। स्वाहा इदं पृथिव्यै । ॐ इदंव्विष्णुर्व्विचक्क्रमेत्त्रेधानिदधेपदम् । समूढम-

स्यपाꣳसुरेस्वाहा।।१५३।। स्वाहा इदं विष्णवे । **ॐ सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबव्वृत्रहाशूरविद्द्वान् । जहिशत्रूँ१।।रपमृधोनुदस्वाथाभयङ्कृणुहिव्विश्श्वतोनः । उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ।।१५४।।** स्वाहा इदमिन्द्राय । **ॐ अदित्त्यैरास्न्नासीन्द्राण्याऽउष्णीषः । पूषासिघर्म्मायदीष्ष्व ।।१५५।।** स्वाहा इदमिन्द्राण्यै । **ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्त्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ।।१५६।।** स्वाहा इदं प्रजापतये । **ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः ।।१५७।।** स्वाहा इदꣳसर्प्पेभ्यः । **ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्द्विसीमतःसुरुचोव्वेनऽआवः। सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।।१५८।।** स्वाहा इदं ब्रह्मणे ।

इति प्रत्यधिदेवताहोमः

दिक्पालहोमः

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । हुयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्त्तिनोमघवाधात्त्विन्द्रः ।।१५९।। स्वाहा इदमिन्द्राय । **ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवेदेवाँ२।।ऽआसादयादिह ।।१६०।।** स्वाहा इदमग्नये । **ॐ यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे । देवस्त्त्वासवितामद्ध्वानक्त्तुपृथिव्याःसꣳस्पृशस्प्पाहि । अर्च्चिरसिशोचिरसितपोसि ।।१६१।।** स्वाहा इदं यमाय । अत्र प्रणीतोदकस्पर्शः- **ॐ असुन्न्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्न्विहितस्क्करस्य। अन्न्यमस्म्मदिच्छसातऽइत्त्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु ।।१६२।।** स्वाहा इदं निर्ऋतये । अत्र प्रणीतोदकस्पर्शः । **ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ।।१६३।।** स्वाहा इदं वरुणाय । **ॐ व्वायो-**

येतेसहस्रिणोरथासस्तेभिरागहि। नियुत्त्वान्त्सोमपीतये ।।१६४।। स्वाहा इदं वायवे । **ॐ सोमोधेनुꣳसोमोऽअर्व्वन्तमाशुꣳसोमोव्वीरङ्कर्म्मण्यन्ददाति। सादन्न्यंव्विदत्थ्यꣳसभेयम्पितृश्श्रवणंय्योददाशदस्म्मै ।।१६५।।** स्वाहा इदꣳसोमाय । **ॐ तमीशानञ्जगतस्तस्त्थुषस्प्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्ब्धःस्वस्तये ।।१६६।।** स्वाहा इदमीशानाय । अत्र प्रणीतोदकस्पर्शः । **ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः । सबुध्न्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः।।१६७।।** स्वाहा इदं ब्रह्मणे । **ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिꣳसर्व्वतस्पृत्त्वात्यतिष्ठद्दशाङ्गुलम् ।।१६८।।** स्वाहा इदमनन्ताय । इति दिक्पालहोमः ।

अष्टवसुहोमः- ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेदꣳसवनञ्जुषाणाः । भरमाणाव्वहमानाहवीꣳष्यस्म्मेधत्तव्वसवोव्वसूनिस्वाहा।१६९।। इदं ध्रुवाद्यष्टवसुभ्यः । इति अष्टवसुहोमः ।

द्वादशादित्यहोमः- ॐ यज्ञोदेवानाम्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः । आवोर्व्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्श्चिद्याव्वरिवोवित्तरासदादित्त्येब्भ्यस्त्वा ।।१७०।। स्वाहा इदं धात्रादिद्वादशादित्येभ्यः । इति द्वादशादित्यहोमः ।

वीरभद्राद्येकादशरुद्रहोमः - ॐ यऽएतावन्तश्श्चभूयाꣳसश्श्चदिशोरुद्द्राव्वितस्त्थिरे । तेषाꣳसहस्रयोजनेवधन्न्वानितन्म्मसि ।।१७१।। स्वाहा इदं वीरभद्राद्येकादशरुद्रेभ्यः । अत्र प्रणीतोदकस्पर्शः । इति वीरभद्राद्यकादशरुद्रहोमः ।

गौर्यादिषोडशमातृहोमः- ॐ गौरीर्मिमायसलिलानितक्षत्त्येकपदीद्विपदीत्रिपदीसाचतुष्प्पदी । अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्व्योमन् ।।१७२।। स्वाहा इदं गौर्यादिषोडशमातृभ्यः । इति गौर्यादिषोडशमातृहोमः ।

आवहादिसप्तमरुद्धोमः - ॐ मरुत्तोयस्यहिक्षयेपाथादिवोव्विमहसः।

ससुगोपातमोजनः ।।१७३।। स्वाहा इदमावहादिसप्तमरुद्भ्यः । इति आवहादिसप्तमरुद्धोमः ।

विनायकादिषड्होमः- ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्।।१७४।। स्वाहा इदं विनायकाय । **ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्त्ताद्द्विसीमतःसुरुचोव्वेनऽआवः । सबुध्न्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।।१७५।।** स्वाहा इदं ब्रह्मणे। **ॐ व्विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्त्थोःव्विष्णोःस्यूरसिव्विष्णोर्द्ध्रुवोसि । व्वैष्णवमसिव्विष्ण'वेत्त्वा ।।१७६।।** स्वाहा इदं व्विष्णवे । **ॐ मानस्तोकेत्तनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः । मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ।।१७७।।** स्वाहा इदꣳरुद्राय । अत्र प्रणीतोदकस्पर्शः । **ॐ अग्निरस्म्मिजन्म्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन् । अर्क्कस्त्रिधातूरजसोव्विमानोजस्रोधर्म्मोहविरस्म्मिनाम ।।१७८।।** स्वाहा इदमर्काय । **ॐ व्वनस्प्पतेव्वीड्वङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्रतरणःसुवीरः । सन्नद्धोऽअसिव्वीडयस्वास्त्थातातेजयतुजेत्त्वानि ।।१७९।।** स्वाहा इदं वनस्पतये । इति विनायकादिषड्होमः।

अत्र विशेषोद्देश्याभिमतं कर्म कृत्वा तत्पश्चादेतदुत्तरं कर्म कुर्वन्ति।

उत्तराङ्गहोमः

चतुःस्वस्त्यादिहोमः- ॐ स्वस्तिनऽइन्द्रोव्वृद्धश्श्रवाःस्वस्तिनःपूषाव्विश्श्ववेदाः । स्वस्तिनस्त्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प्पतिर्द्दधातु ।।१८०।। स्वाहा इदं चतुःस्वस्तिभ्यः । **ॐ पयःपृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः। पयस्वतीःप्प्रदिशःसन्तमह्यम्।।१८१।।** स्वाहा इदं पयःपञ्चभ्यः । **ॐ व्विष्णोरराटमसिव्विष्णोःश्श्नप्त्रेस्त्थोविष्णोस्यूरसिव्विष्णोर्द्ध्रुवोसि । व्वैष्णवमसिव्विष्णवेत्त्वा ।।१८२।।** स्वाहा इदं षड्विष्णुभ्यः । **ॐ अग्निर्द्देवताव्वात्तोदेवतासूर्य्योदेवताचन्द्रमा-**

देवताव्वसवोदेवतारुद्द्रादेवतादित्त्यादेवतामरुतोदेवताव्विश्श्वेदेवादेवतातिबृहस्प्पतिर्द्देवतेन्द्रोदेवताव्वरुणोदेवता ।।१८३।। स्वाहा इदं द्वादशदेवेभ्य:। ॐ द्यौ:शान्तिरन्तरिक्षꣳशान्ति:पृथिवीशान्तिराप:शान्तिरोषधय:शान्ति:। व्वनस्प्पतय:शान्तिर्व्विश्श्वेदेवा:शान्तिर्ब्ब्रह्मशान्ति:सर्व्वꣳशान्ति:शान्तिरेवशान्ति:सामाशान्तिरेधि ।।१८४।। स्वाहा इदं द्वादशशान्तिभ्य: ।

ॐ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्प्रातर्म्मित्रावरुणाप्प्रातरश्श्विना । प्रातर्ब्भगम्पूषणम्ब्रह्मणस्प्पतिम्प्रात:सोममुतरुद्द्रꣳहुवेम ।।१८५।। स्वाहा इदं षट्प्रातर्भ्य: । ॐ समुद्द्रायत्त्वाव्वातायस्वाहासरिरायत्त्वाव्वातायस्वाहा। अनाधृष्ष्यायत्त्वाव्वातायस्वाहाप्प्रतिधृष्ष्यायत्त्वाव्वातायस्वाहा । अवस्यवेत्त्वाव्वातायस्वाहाऽशिमिदायत्त्वाव्वातायस्वाहा ।।१८६।। इदं षड्वातेभ्य: । ॐ अनड्वान्व्वय:पङ्क्तिश्छन्दोधेनुर्व्वयोजगतीच्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दोदित्त्यवाड्वयोव्विराड्छन्द:पञ्चाविर्व्वयोगायत्रीच्छन्दस्त्रिवत्त्सोव्वयऽउष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम् ।।१८७।। स्वाहा इदं त्र्यनडुद्भ्य: । ॐ भगऽएवभगवाँ२।।अस्तुदेवास्तेनव्वयम्भगवन्त:स्याम । तन्त्वाभगसर्व्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ।।१८८।। स्वाहा इदं पञ्चभगेभ्य: । ॐ प्राणायस्वाहापानायस्वाहाव्यानायस्वाहाचक्षुषेस्वाहाश्श्रोत्रायस्वाहाव्वाचेस्वाहामनसेस्वाहा ।।१८९।। स्वाहा इदं पञ्चेन्द्रियेभ्य: । ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतनमासीद ।।१९०।। स्वाहा इदं पञ्चवरुणेभ्य: ।

ॐ गायत्रीत्रिष्टुब्ज्जगत्त्यनुष्टुप्पङ्क्त्यासह । बृहत्त्युष्णिहाकुप्प्सूचीभि:शम्म्यन्तुत्त्वा ।।१९१।। स्वाहा इदं गायत्र्यै । ॐ उपयामगृहीतोसिसावित्रोसिचनोधाश्श्चनोधाऽअसिचनोमयिधेहि । धियञ्जिन्न्वयज्ञञ्जिन्न्वयज्ञपतिम्भगायत्त्वासवित्रे ।।१९२।। स्वाहा इदꣳसावित्र्यै । ॐ सरस्वतीयोन्न्याङ्गर्ब्भमन्तरश्श्विवब्भ्याम्पत्क्नीसुकृतम्बिभर्त्ति । अपाꣳरसेनव्वरुणेनसाम्म्नेन्द्रꣳश्श्रियैजनयन्नप्प्सुराजा ।।१९३।। स्वाहा इदꣳ

सरस्वत्यै ।

ॐ गृहामाबिभीतमावेपद्ध्वमूर्ज्जम्बिब्भ्रतऽएमसि । ऊर्ज्जम्बिब्भ्रद्वःसुमनाःसुमेधागृहानैमिमनसामोदमानः ।।१९४।। स्वाहा इदं गृहमात्रे। ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः । प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्प्पदे ।।१९५।। स्वाहा इदमन्नपूर्णायै । ॐ श्रीश्श्चतेलक्ष्मीश्श्चपत्न्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।१९६।। स्वाहा इदं महालक्ष्म्यै। ॐ देवीद्द्वारऽइन्द्रꣳसङ्घातेवीड्वीर्य्यामन्नवर्द्धयन् । आवत्त्सेनतरुणेनकुमारेणचमीवतापार्व्वाणꣳरेणुककाटन्नुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज ।।१९७।। स्वाहा इदं महारिष्टविनाशिन्यै ।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्श्चन । ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।।१९८।। स्वाहा इदं चण्ड्यै । ॐ द्यौरासीत्त्पूर्व्वचित्तिरश्श्वऽआसीद्बृहद्वयः । अविरासीत्त्पिलिप्पिलारात्रिरासीत्त्पिशङ्गिला ।।१९९।। स्वाहा इदं द्यौराल्यै । ॐ व्वसोःपवित्रमसिशतधारंव्वसोःपवित्रमसिसहस्रधारम् । देवस्त्वासवितापुनातुव्वसोःपवित्रेणशतधारेणसुप्प्वाकामधुक्षः ।।२००।। स्वाहा इदं व्वास्तुदेवाय । ॐ भूम्म्याऽआखूनालभतेन्तरिक्षायपाङ्क्त्रान्दिवेकशान्दिग्भ्योनकुलान्बब्भ्रुकानवान्तरदिशाब्भ्यः ।।२०१।। स्वाहा इदं भूमिदेवाय । ॐ नमःशम्भवायचमयोभवायनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच ।।२०२।। स्वाहा इदं गैडुदेवाय । ॐ क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि । मात्त्वाहिꣳसीन्मामाहिꣳसीः ।।२०३।। स्वाहा इदं क्षेत्रपालाय। ॐ यद्ग्रामेयदरण्येयत्त्सभायांय्यदिन्द्रिये । यदेनश्श्चकृमाव्वयमिदन्तदवयजामहेस्वाहा ।।२०४।। इदं ग्रामदेवाय ।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्रम्पुरुहुतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः ।।२०५।। स्वाहा इदं स्वर्गेन्द्राय । ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदि-

वितेब्भ्यःसर्प्पेब्भ्योनमः ।।२०६।। स्वाहा इदं पातालवासुकिभ्यः ।

ॐ मित्रोनऽएहिसुमित्रधऽइन्द्रस्योरुमाविशदक्षिणमुशन्नुशन्तꣳस्योनःस्योनम् । स्वानब्भ्राजङ्घारेबम्भारेहस्तसुहस्तकृशानवेतेवःसोमक्क्रयणस्तान्त्रक्षद्ध्वम्मावोदभन् ।।२०७।। स्वाहा इदं मित्रलोकाय। ॐ राजन्तमद्ध्वराणाङ्गोपामृतस्यदीदिविम्। व्वर्द्धमानꣳस्वेदमे।।२०८।। स्वाहा इदं मान्धात्रे ।

ॐ येतीर्त्थानिप्प्रचरन्तिसृकाहस्तानिषङ्गिणः । तेषाꣳसहस्रयोजनेवधन्न्वानितन्मसि ।।२०९।। स्वाहा इदं तीर्थराजाय । ॐ व्व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् । दक्षिणाश्रद्धामाप्नोतिश्श्रद्धयासत्त्यमाप्प्यते ।।२१०।। स्वाहा इदं व्रतराजाय । ॐ प्राच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहादक्षिणायैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहाप्प्रतीच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहोदीच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहोर्द्ध्वायैदिशेस्वाहार्वाच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहा ।।२११।। इदं पुनर्दिक्पालेभ्यः । ॐ अग्नेःपक्षतिर्व्वायोर्न्निपक्षतिरिन्द्रस्यतृतीयासोमस्यचतुर्त्थ्यदित्त्यैपञ्चमीन्द्राण्यैषष्ठीमरुताꣳसप्तमीबृहस्प्पतेरष्टम्म्यर्य्यम्णोनवमीधातुर्द्दशमीन्द्रस्यैकादशीव्वरुणस्यद्वादशीयमस्यत्रयोदशी।।२१२।। स्वाहा इदं तिथिभ्यः। ॐ नक्षत्रेब्भ्यःस्वाहानक्षत्रियेब्भ्यःस्वाहाहोरात्रेब्भ्यःस्वाहार्द्धमासेब्भ्यःस्वाहामासेब्भ्यःस्वाहाऽऋतुब्भ्यःस्वाहार्तवेब्भ्यस्वाहासंव्वत्सरायस्वाहाद्यावापृथिवीब्भ्याꣳस्वाहाचन्द्रायस्वाहासूर्य्यायस्वाहारश्मिब्भ्यःस्वाहाव्वसुब्भ्यःस्वाहारुद्द्रेभ्यःस्वाहादित्त्येब्भ्यःस्वाहामरुद्भ्यःस्वाहाव्विश्वेभ्योदेवब्भ्यःस्वाहामूलेब्भ्यःस्वाहाशाखाब्भ्यःस्वाहाव्वनस्प्पतिब्भ्यःस्वाहापुष्प्पेब्भ्यःस्वाहाफलेब्भ्यःस्वाहौषधीब्भ्यःस्वाहा ।।२१३।। इदं नक्षत्रेभ्यः ।

ॐ योगेयोगेतवस्तरंव्वाजेवाजेहवामहे । सखायऽइन्द्रमूतये ।।२१४।। स्वाहा इदं योगेभ्यः । ॐ आदित्त्यङ्गर्ब्भम्प्पयसासमङ्ग्धिसहस्रस्यप्प्रतिमांव्विश्श्वरूपम् । परिवृङ्ग्धिहरसामाभिमꣳस्थाः-

शतायुषङ्कृणुहिचीयमानः ।।२१५।। स्वाहा इदं वारेभ्यः। **ॐ भद्द्रङ्कर्ण्णेभिःशृणुयामदेवाभद्द्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ।।२१६।।** स्वाहा इदं करणेभ्यः। **ॐ व्वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि । नियुत्त्वान्त्सोमपीतये ।।२१७।।** स्वाहा इदं वातेभ्यः । **ॐ व्वातायस्वाहाधूमायस्वाहाब्भ्रायस्वाहाविद्योतमानायस्वाहास्तनयतेस्वाहावस्फूर्ज्जतेस्वाहाव्वर्षतेस्वाहाववर्षतेस्वाहोग्ग्रंव्वर्षतेस्वाहाशीग्घ्रंव्वर्षतेस्वाहोद्गृह्णतेस्वाहोद्गृहीतायस्वाहाप्प्रुष्णतेस्वाहाशीकायतेस्वाहाप्प्रुष्ष्वाब्भ्यःस्वाहाह्लादिनीब्भ्यःस्वाहानीहारायस्वाहा ।।२१८।।** इदं मेघेभ्यः । **ॐ समुद्द्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहा । देवꣳसवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाच्छन्दाꣳसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वाहाग्निंव्वैश्वानरङ्गच्छस्वाहामनोमेहार्द्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्ज्योतिःपृथिवीम्भस्मनापृणस्वाहा ।।२१९।।** इदं समुद्रेभ्यः । **ॐ नदीब्भ्यःपौञ्जिष्ठमृक्षीकाब्भ्योनैषादम्पुरुषव्याग्घ्रायदुर्म्मदङ्गन्धर्वाप्सरोब्भ्योव्व्रात्त्यम्प्रयुग्भ्यऽउन्मत्तꣳसर्प्पदेवजनेब्भ्यःप्प्रतिपदमयेब्भ्यःकितवमीर्य्यतायाऽअकितवम्पिशाचेब्भ्योव्विदलकारींय्यातुधानेब्भ्यःकण्टकीकारीम् ।।२२०।।** स्वाहा इदं नदीभ्यः ।

ॐ इष्टोयज्ञोभृगुभिराशीर्द्दाव्वसुभिः । तस्यनऽइष्टस्यप्प्रीतस्यद्द्रविणेहागमेः ।।२२१।। स्वाहा इदमिष्टदेवाय । **ॐ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथिव्व्याः । अभित्त्वारुद्द्रावसवोगृणन्त्विमाब्ब्रह्मपीपिहिसौभगायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वा ।।२२२।।** स्वाहा इदं कुलदेवाय । यत्र स्थापितो यो देवस्तत्तन्मन्त्रेण होमयेत् ।

स्थानविशेषाधिष्ठितदेवताहोमः

ॐ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच ।।२२३।। स्वाहा इदं भैरवाय । **ॐ देवीर्द्द्वारऽ-**

इन्द्रश्चसङ्गातेवीडुवीर्य्यामिन्नवर्द्धयन् । आवत्त्सेनतरुणेनकुमारेणचमीवतापार्व्वाणश्चरेणुककाटन्नुदन्तांव्वसुवनेव्वसुधेयस्यव्यन्तुयज ।।२२४।। स्वाहा इदं भैरव्यै । **ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन । ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।।२२५।।** स्वाहा इदं विन्ध्यवासिन्यै। यत्र स्थानविशेषेऽधिष्ठितो यो देवो देवी वा तत्तन्मन्त्रेण होमयेत् ।

सर्वदेवहोमः- ॐ एषोहदेवःप्रदिशोनुसर्व्वाःपूर्व्वाहजातःसऽउगर्ब्भेऽअन्तः। सऽएवसजातःसजनिष्यमाणप्रत्त्यङ्ङ्जनास्तिष्ठतिसर्व्वतोमुखः।।२२६।। स्वाहा इदं सर्व्वेभ्यो देवेभ्यः । इति सर्वदेवहोमः ।

सर्वहोमपूरणार्थको होमः - ॐ शुक्क्रज्ज्योतिश्चचित्रज्ज्योतिश्चसत्त्यज्ज्योतिश्चज्ज्योतिष्माँश्चाशुक्क्रश्चऽऋतपाश्चात्त्यꣳहाः ।।२२७।। स्वाहा इदं सर्वहोमपूरणार्थेभ्यः । इति सर्वहोमपूरणार्थको होमः ।

ॐ राजन्तमद्ध्वराणाङ्गोपामृतस्यदीदिविम् । व्वर्द्धमानꣳस्वेदमे ।।२२८।। स्वाहा इदं पञ्चपाण्डवेभ्यः । **ॐ उग्रश्चभीमश्चद्ध्वान्तश्चधुनिश्च । सासहव्वाँश्चाभियुग्ग्वाचव्विक्षिपः ।।२२९।।** स्वाहा इदं भीमसेनाय । **ॐ पितृब्भ्यःस्वधायिब्भ्यःस्वधानमःपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमःप्रपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमःअक्षन्पितरोमीमदन्तपितरोतीतृप्प्यन्तपितरःपितरःशुन्धद्ध्वम् ।।२३०।।** स्वाहा इदं पितृभ्यः । अत्र प्रणीतोदकस्पर्शः ।

वैश्वानरहोमः - ॐ ऋतावानंव्वैश्वानरमृतस्यज्ज्योतिषस्पतिम् । अजस्त्रङ्घर्म्ममीमहे । उपयामगृहीतोसिव्वैश्वानरायत्त्वैषतेयोनिर्व्वैश्वानरायत्त्वा ।।२३१।। स्वाहा इदं व्वैश्वानराय । **ॐ व्वैश्वानरस्यसुमतौस्यामराजाहिकम्भुवनानामभिश्रीः । इतोजातोव्विश्वमिदंव्विचष्टेव्वैश्वानरोयततेसूर्य्येण । उपयामगृहीतोसिव्वैश्वानरायत्त्वैषतेयोनिर्व्वैश्वानरायत्त्वा ।।२३२।।** स्वाहा इदं व्वैश्वानराय । **ॐ व्वैश्वानरोनऽऊतयऽआप्प्रयातुपरावतः । अग्ग्निरुक्थेनव्वाहसा । उपयामगृहीतोसिव्वैश्वनरायत्त्वैषतेयोनिर्व्वैश्वानरायत्त्वा ।।२३३।।** स्वाहा इदं व्वैश्वनराय । इति

वैश्वानरहोमः ।

तीर्थादिहोमः-

ॐ आकाशे यानि तीर्थानि यानि तीर्थानि भूतले ।
पाताले यानि तीर्थानि सर्वतीर्थ नमोऽस्तु ते स्वाहा ।।
ॐ आकाशे ये च देवाश्च ये देवाः सन्ति भूतले ।
पाताले सन्ति ये देवाः सर्वदेव नमोऽस्तु ते स्वाहा ।।
ॐ आकाशे यानि लिङ्गानि यानि लिङ्गानि भूतले ।
पाताले यानि लिङ्गानि सर्वेलिङ्ग नमोऽस्तु ते स्वाहा ।।

महाव्याहृतिहोमः- अथ महाव्याहृतिहोमादिप्रजापतिहोमान्तमुत्तराङ्गहोमं कुर्यात्। तद्यथा- ॐ महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्न्याधाने विनियोगः । **ॐ भूः स्वाहा,** इदमग्नये। प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । **ॐ भुवः स्वाहा,** इदं वायवे । प्रोक्षणीपात्रेऽपि प्र० । **ॐ स्वः स्वाहा,** इदꣳसूर्याय । प्रोक्षणीपात्रेऽपि प्र० । इति महाव्याहृतिहोमः ।

सर्वप्रायश्चित्तहोमः- ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ त्वन्नोऽअग्नेव्वरुणस्य-व्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोव्वह्नितमःशोशुचानोव्विश्वाद्द्वेषाꣳसिप्रमुमुग्ध्यस्म्मत् ।।२३४।।** स्वाहा इदमग्नीवरुणाभ्याम्। प्रोक्षणीपात्रेऽपि प्र०। **ॐ सत्त्वन्नोऽअग्न** इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ सन्त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि ।।२३५।।** स्वाहा इदमग्नीवरुणाभ्याम् । प्रोक्षणीपात्रेऽपि प्र० । **ॐ अयाश्श्चाग्न** इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ अयाश्श्चाग्नेस्यनभिशस्तिपाश्श्चसत्त्यमित्त्वमयाऽअसि । अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा ।।२३६।।**

इदमग्नये प्रोक्षणीपात्रेऽपि प्र० । **ॐ येतेशतमिति** वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता स्त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ येतेशतंव्वरुणयेसहस्रंय्यज्ञियाःपाशाविततामहान्तः । तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्श्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।।२३७।।** इदं व्वरुणाय सवित्रे व्विष्णवे व्विश्श्वेब्भ्यो देवेब्भ्यो मरुद्भ्यः स्वर्क्केब्भ्यः । **ॐ उदुत्तममिति**शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता सर्वप्रायश्चित्तहोमे (पाशान्मोचने) विनियोगः । **ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।२३८।।** स्वाहा इदं वरुणाय प्रोक्षणीपात्रेऽपि प्र०। इति सर्वप्रायश्चित्तहोमः ।

प्रजापतिहोमः- ॐ प्रजापतय इति प्रजापतिर्ऋषिः त्रिष्टुप् छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये** स्विष्टकृते । ततः संस्रवप्राशनमाचमनञ्चापि ।

पूर्णाहुतिहोमः- होता- ॐ अद्येहेत्यादिकृतस्यामुककर्माङ्गभूतहोमादिकर्मणः परिपूर्णतासिद्ध्यर्थं मृडनामाग्नौ पूर्णाहुतिं होमयिष्ये इति संकल्प्य **मूर्द्धानन्दिव** इति घृतेन पूर्णाहुतिं जुहुयात् । **ॐ मूर्द्धानन्दिवोऽरतिम्पृथिव्व्यावैश्श्वानरऽमृतआजातमग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।२३९।।** स्वाहा इदमग्नये । इति पूर्णाहुतिहोमः।

स्रुवपूजनम्- गन्धपुष्पाक्षतफलवस्त्रादिभिः **स्रुचश्श्म** इति मन्त्रेण स्रुवं संपूजयेत्- **ॐ स्रुचश्श्चमेचमसाश्श्चमेव्वायव्व्यानिचमेद्द्रोणकलशश्श्चमेग्ग्रावाणश्श्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्श्चमेव्वेदिश्श्चमेबर्हिश्श्चमेवभृथश्श्चमेस्वगाकारश्श्चमेयज्ञेनकल्प्पन्ताम् ।।२४०।।**

पूर्णपात्रदानम्- रौप्यं ताम्रं मृन्मयं वा फलवस्त्रद्रव्यसहितषट्पञ्चाशदधिकद्विशतमुष्टिपरिमिततण्डुलपूर्णं पात्रं **पूर्णादर्व्वीति** मन्त्रेण, ब्रह्मजज्ञानमिति मन्त्रेण ब्राह्मणञ्च त्रिःसंपूजयेत् - **ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ।।२४१।।** ॐ अद्येहेत्यादि

अस्मिन्नमुककर्माङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठासिद्ध्यर्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे, **ॐ स्वस्ती**ति प्रतिवचनम् ।

प्रणीताविमोकः - ॐ सुमित्रियानऽआपऽओषधयःसन्तु इति मन्त्रेण पवित्राभ्यां प्रणीतोदकेन कर्तुः शिरः संमृज्य, **ॐ दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चवयंद्विष्म्मः ।।२४२।।** इति मन्त्रेणैशान्यां पात्रं न्युब्जीकुर्यात् । इति प्रणीताविमोकः ।

बर्हिर्होमः- ततस्तरणक्रमेणैव बर्हिरुत्थाप्याज्येनाभिघार्य **देवागात्वि**त्यादि पठित्वा हस्तेनैव जुहुयात् । **ॐ देवागातुविद** इत्यस्य मनसस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः । **ॐ देवागातुविदोगातुंवित्त्वागातुमित । मनसस्प्पतऽइमन्देवयज्ञक्ष्स्वाहाव्वातेधाः ।।२४३।।** स्वाहा इति बर्हिर्होमः ।

क्षेत्रपालबलिदानम्- माषतण्डुलाद्यन्नं कुम्कुमादिगन्धरक्तपुष्पादियुतं सदीपं सवस्त्रं सदक्षिणं सजलं क्षेत्रपालाय दद्यात्। तत्र मन्त्रः:- क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं बलिं समर्पयामि। भो भो क्षेत्रपाल इमं बलिं गृहाण, मम यजमानस्यायुःकर्ता क्षेमकर्ता वरदस्तुष्टिदो भव इति पठित्वा बलिं शूद्रेण ब्राह्मणेन वा चतुष्पथे विसर्जयेत्।

इति क्षेत्रपालबलिदानम् ।

तत आचार्यः प्रक्षालितपाणिपाद आचामेत् ।

मेधाकरणम्- होता ॐ अद्येहेत्यादिकृतस्यामुककर्माङ्गभूतहोमादिकर्मणः परिपूर्णतासिद्ध्यर्थं पूर्णाहुतिहोमं करिष्ये, इति संकल्प्य घृतपूर्णस्त्रुवे नारिकेलपूगीफलादिफलचन्दनपुष्पाणि निधाय घृतधारया सह जुहुयादेभिर्मन्त्रैः:- **ॐ सदसप्प्पतिमद्द्भुतम्प्रियमिन्द्रस्यकाम्म्यम् । सनिम्मेधामयासिषक्षस्वाहा ।।२४४।। ॐ याम्मेधान्देवगणाःपितरश्श्चोपासते । तयामामद्यमेधयाग्ग्नेमेधाविनङ्कुरुस्वाहा ।।२४५।। ॐ मेधाम्मेव्वरुणोददातुमेधामग्ग्निःप्प्रजापतिः। मेधामिन्द्रश्श्चव्वायुश्श्चमेधान्धाताददातुमेस्वाहा।।२४६।।**

ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ।।२४७।। ॐ इदम्मेब्ब्रह्मचक्षत्रञ्चोभेश्श्रियमश्श्नुताम् । मयिदेवाद्दधतुश्श्रियमुत्तमान्तस्यैतेस्वाहा ।।२४८।।

अग्निपूजनम्- यजमानः सपरिवारो बन्धुवर्गैः सह घृताक्तवस्त्रचन्दनपुष्पचर्वादिभिरग्निं संपूजयेदेभिर्मन्त्रैः- **ॐ एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि । समाववर्त्तिपृथिवीसमुषाःसमुसूर्य्यसमुव्विश्श्वमिदञ्जगत्। व्वैश्श्वानरज्ज्योतिर्ब्भूयासंव्विभून्कामान्व्यश्श्नवैभूःस्वाहा ।।२४९।। ॐ अब्भ्यादधामिसमिधमग्ग्नेव्व्रतपतेंत्त्वयि । व्व्रतञ्चश्श्रद्धाञ्चोपैमीन्धेत्त्वादीक्षितोऽअहम् ।।२५०।। ॐ यत्रब्ब्रह्मचक्षत्रञ्चसम्म्यञ्चौचरतःसह। तँल्लोकम्पुण्यंम्प्रज्ञेषंयत्रदेवाःसहाग्ग्निना ।।२५१।। ॐ यत्रेन्द्रश्श्चव्वायुश्श्चसम्म्यञ्चौचरतःसह। तँल्लोकम्पुण्यम्प्रज्ञेषंय्यत्रसेदिर्न्नव्विद्यते ।।२५२।।**
स्वाहा । इत्यग्निपूजनम् ।

ततो यजमानोऽग्नेः पश्चिमभागे प्राङ्मुख उपविश्योदङ्मुखेभ्य आचार्यर्त्विगादिभ्यो दक्षिणां दद्यात् ।

गोदानम्- तत्र गोपूजनमन्त्रः-

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।

ॐ इरावतीधेनुमतीहिभूतꣳसूयवसिनीमनवेदशस्या । यस्क्कब्भ्नारोदसीव्विष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः ।।२५३।। इति मन्त्रद्वयेन गां त्रिःसंपूजयेत् । **ॐ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च। हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।२५४।।** इति मन्त्रेण ब्राह्मणं त्रिःसंपूज्य कुशजलेन गामभ्युक्ष्य गोपुच्छं गृहीत्त्वा स्वशिरस्यभिषिञ्चेदनेन मन्त्रेण- **ॐ मनोमेतर्प्पयतव्वाचम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुर्म्मेतर्प्पयतश्श्रोत्रम्मेतर्प्पयतात्त्मानम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपशून्म्मेतर्प्पयतगणान्म्मेतर्प्पयतगणामेमाव्वितृषन् ।।२५५।।** ततः कुशादिसहितं गोपुच्छमादाय गोदानसङ्कल्पः- ॐ तत्सत्३ विष्णुः३ इत्यादि देशकालौ स्मृत्वा-

ऽमुकगोत्रोऽमुकशर्माहं मया कृतेऽस्मिन्नमुककर्मणि तदङ्गत्त्वेन यथालब्धोपचारैः कृतस्य पूजनहवनकर्मणो यथावत्फलप्राप्तिपूर्वकममुकदेवताप्रीतये इमां गां रुद्रदैवतामित्यादि योजयेत् ।

गोप्रार्थना- ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
सर्वदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।।

दानप्रतिष्ठा- द्रव्यं कुशादिसहितमादाय- ॐ अद्य कृतस्य गोदानस्यैतस्य प्रतिष्ठासिद्ध्यर्थमिदं द्रव्यमित्यादि योजयेत् । ब्राह्मणः स्वस्तीत्युच्चारयन् गृहीत्वाऽधोलिखितं मन्त्रं पठेत्- **ॐ कोदात्त्कस्म्माऽअदात्त्कामोदात्त्कामायादात्त्कामोदाताकामःप्प्रतिग्ग्रहीताकामैतत्ते ।।२५६।।**

भूयसीदक्षिणादानम्-

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

इति देयं सम्पूज्य **ब्रह्मजज्ञान**मिति ब्राह्मणाँश्च त्रिःसंपूज्य कुशादिसहितं दक्षिणाद्रव्यमादाय- ॐ अद्येत्यादिदेशकालादिकमुच्चार्यामुकगोत्रोऽमुकशर्माहं कृतस्यामुककर्मणो न्यूनातिरिक्तत्वपरिपूरणार्थं यथोक्तफलप्राप्त्यर्थं च इदं द्रव्यं सुवर्णं रौप्यं ताम्रं वामुकदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं विभज्य दातुमहमुत्सृजे ।

सिद्धान्नदानम्- तत्र सङ्कल्पः- ॐ अद्येहामुकगोत्रोमुकशर्माहं कृतस्यामुककर्मणो यथावत्फलप्राप्तये नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् यथोपपन्नेनान्नेन भोजयिष्ये आमान्नपक्षे सन्तोषयिष्ये ।

त्र्यायुषकरणम्- स्रुवेण भस्म किञ्चिद्गृहीत्वाऽवशिष्टाज्ये पिष्ट्वा तत्तिलकं संस्पृश्यभिमन्त्रयेत् अनेन मन्त्रेण- **ॐ अग्ग्नयेगायत्रायत्रिवृतेराथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोविश्श्वेब्भ्योदेवेब्भ्योजागतेब्भ्यःसप्प्तदशेब्भ्योवैरूपेब्भ्योद्वादशकपालोमित्रावरुणाब्भ्यामानुष्टुभाब्भ्यामेकविंशाब्भ्यांवैराजाब्भ्याम्पयस्याबृहस्प्पतयेपाङ्क्ताय-**

त्रिणवायशाक्क्करायचरु:सवित्रऽऔष्णिहायत्त्रयस्त्रिꣳशायरैवतायद्वादशक-पाल:प्प्राजापत्त्यश्श्चरुरदित्त्यैविष्णुपत्न्यैचरुरग्ग्नयेवैश्वानरायद्वादशक-पालोऽनुमत्त्याऽअष्टाकपाल: ।।२५७।। ततो ब्राह्मणो यजमानस्य तिलकं कुर्यात्- **ॐ त्र्यायुषं जमदग्ने** इति ललाटे, **ॐ कश्यपस्यत्र्यायुषम्** इति ग्रीवायाम्, **ॐ यद्देवेषुत्र्यायुषम्** इति दक्षिणबाहुमूले, **ॐ तन्नोऽअस्तुत्र्यायुषम्** इति हृदि ।

घृतच्छायानिरीक्षणम्- पात्रं रौप्यं कास्यं ताम्रं वा पुरत: कृत्वा तत्र घृतं दूर्वां द्रव्यं निधाय **तेजोसी**त्यादि पठन् छायां निरीक्षेत । विनियोग:- ॐ तेजोसीतिपरमेष्ठीऋषिराज्यं देवता गायत्रीच्छन्द आज्यावेक्षणे विनियोग:। **ॐ तेजोसिशुक्क्रमायुष्प्याऽआयुर्म्मेपाहि । देवस्यत्त्वासवितु:प्प्रसवे-श्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्यामाददे ।।२५८।। ॐ ध्रुवोसिदृध्रु-वोयंय्यजमानोस्म्मिन्नायतनेप्प्रजयापशुभिर्ब्भूयात् । घृतेनद्यावापृथिवी-पूर्य्येथामिन्द्रस्यच्छदिरसिव्विश्श्वजनस्यच्छाया ।।२५९।।** तत आज्यं स्पृष्ट्वा इति पठेत्-

ॐ अलक्ष्मीर्यच्च दौ:स्थ्यं मे सर्वगात्रेष्ववस्थितम् ।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं कीर्तिं च वर्द्धय ।।
ॐ आज्यं तेज: समुद्दिष्टमाज्यं पापहरं शुभम् ।
आज्यं सुराणामाहार आज्ये लोका: प्रतिष्ठिता: ।।२।।
ॐ भौमान्तरिक्षं दिव्यं वा यन्मे किल्बिषमागतम् ।
सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ।।३।। इति ।

ततो दूर्वां स्पृष्ट्वा इति पठेत्- **ॐ काण्डात्त्काण्डात्त्प्ररोहन्तीपरुष:-परुषस्प्परि । एवानोदूर्व्वेप्प्रतनुसहस्त्रेणशतेनच ।।२६०।।**

ॐ या क्षीरसागरोत्पन्ना दूर्वा पीयूषसंभवा ।
तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशो बलम् ।। इति ।

तत: कुशतिलजलानि तदाज्यपात्रं चादाय- ॐ अद्येहेत्यादि मम दु:स्वप्नदुर्निमित्तादिसर्वारिष्टोपशमनपूर्वकं तेज:प्रज्ञाशौर्ययशोबलायुर्लक्ष्मीपुष्टि-

वर्द्धनार्थमिदमवलोकितमाज्यं मृत्युञ्जयदैवतं रौप्यं कांस्यं वा पात्रं चन्द्रदैवतं ताम्रपात्रं वा सूर्यदैवतममुकगोत्रायेत्यादि पठित्वा घृतच्छायापात्रं ब्राह्मणाय दद्यात् ।

यज्ञमण्डपप्रदक्षिणा- ततः कर्ता स्वबन्धुवर्गैः सह सब्राह्मणं यज्ञमण्डपं पुष्पाक्षतान् प्रक्षिपन् प्रदक्षिणीकुर्याद् यानि कानीति मन्त्रेण-

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिणपदेपदे ।।

देवविसर्जनम्- ततः कर्ता आचार्यो वा ब्रह्मणस्पते इति मन्त्रेण स्थापितान् सर्वान् देवान् पुष्पाक्षतैः संपूज्य विसर्जयेत्- **ॐ उत्तिष्ठब्ब्रह्मणस्प्पतेदेवयन्तस्त्वेमहे। उपप्प्रयन्तुमरुतःसुदानवऽइन्द्रप्प्राशूर्ब्भवासचा ।।२६१।।**

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ।।२।।

इति पठित्वा पुष्पाक्षतैः पीठदेवताश्च विसर्जयेत् ।

मङ्गलाभिषेकः - ततः आचार्यादयो ब्राह्मणा ऐशान्यां स्थापितशान्तिकलशजलेन मङ्गलगीतवाद्यादिपुरःसरं सपरिवारस्य यजमानस्य मङ्गलाभिषेकं कुर्युः ।

तत्र पुराणोक्ता मन्त्राः-

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ।।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।।२।।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ।।३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिः तुष्टिः कान्तिश्च मातरः ।।४।।

एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।।५।।
ग्रहास्त्वामभिषिञ्चन्तु राहुःकेतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।।६।।
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।।७।।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ।।८।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।।९।।

इति पुराणोक्ता मन्त्राः ।

वेदोक्ता मन्त्राः-

ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्।
सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्ग्नेःसाम्म्राज्ज्येनाभिषिञ्चामि ।।२६२।।
ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ।।२६३।।
ॐ देवस्यत्त्वासवितुप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्। अश्श्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामि। सरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि।।२६४।।
ॐ कोसिकतमोसिकस्म्मैत्त्वाकायत्त्वा । सुश्श्लोकसुमङ्गलसत्त्यराजन् ।।२६५।। ॐ शिरोमेश्श्रीर्य्यशोमुखन्त्विषिःकेशाश्श्चश्म्मश्श्रूणि।
राजामेप्प्राणोऽअमृतꣳसम्म्राड्ढ्चक्षुर्व्विराड्ढ्श्रोत्रम् ।।२६६।। ॐ जिह्वामेभद्द्रंव्वाङ्ङ्महोमनोमन्न्युःस्वराड्ढ्भामः । मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ।।२६७।। ॐ बाहूमेबलमिन्द्रियꣳहस्त्तोमेकर्म्मव्वीर्य्यम्।
आत्क्माक्षत्रमुरोमम ।।२६८।। ॐ पृष्ठीर्म्मेराष्ट्रमुदरमꣳसौग्ग्रीवाश्श्च-

श्श्रोणी। ऊरूऽअरत्नीजानुनीव्विशोमेङ्गानिसर्व्वतः ।।२६९।। ॐ नाभिर्म्मेचित्तंव्विज्ञानम्पायुर्म्मेपचितिर्ब्भसत् । आनन्दनन्दावाण्डौमेभगःसौभाग्ग्यम्पसः। जङ्घ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्मिव्विशिराजाप्प्रतिष्ठितः ।।२७०।। ॐ प्रतिक्षत्रेप्प्रतितिष्ठामिराष्ट्रेप्प्रत्त्यश्श्वेषुप्प्रतितिष्ठामिगोषु । प्रत्त्यङ्गेषुप्प्रतितिष्ठाम्म्यात्त्मन्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टेप्प्रतिद्यावापृथिव्व्योःप्प्रतितिष्ठामियज्ञे ।।२७१।। ॐ त्रयादेवाऽएकादशत्रयस्त्रिꣳशाःसुराधसः। बृस्प्पतिपुरोहितादेवस्यसवितुःसवे । देवादेवैरवन्तुमा ।।२७२।। ॐ प्रथमाद्द्वितीयैर्द्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनसत्त्यंय्यज्ञेनयज्ञोयजुर्ब्भिर्य्यजूꣳषिसामभिःसामान्न्यृग्गिभर्ऋचःपुरोनुवाक्क्याभिःपुरोनुवाक्क्यायाज्ज्याभिर्य्याज्ज्याव्वषट्कारैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा ।।२७३।। ॐ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः । व्वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिःर्ब्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ।।२७४।। ॐ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् । पश्श्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्श्चशरदःशतात् ।।२७५।। ॐ स्वस्तिनऽइन्द्रोव्वृद्धश्श्रवाःस्वस्तिनःपूषाव्विश्श्ववेदाःस्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प्पतिर्द्दधातु ।।२७६।। ॐ व्विश्श्वानिदेवसवितर्द्दुरितानिपरासुव । यद्भद्रन्तन्नआसुव ।।२७७।। ॐ यथेमांव्वाचङ्कल्ल्याणीमावदानिजनेब्भ्यः। ब्रह्मराजन्न्याब्भ्याꣳशूद्द्रायाचार्य्यायचस्वायचारणायच। प्प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामःसमृद्ध्यतामुपमादोनमतु ।।२७८।। इति वेदोक्ता अभिषेचनमन्त्राः ।

पुष्पाद्यभिमन्त्रणम्- तत्र वेदोक्ता मन्त्राः- ॐ आब्ब्रह्मन्ब्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानऽड्वानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्स्यव्वीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽओषधयः-

पच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।२७९।। ॐ पुनस्त्वादित्त्यारुद्राव्वसवःसमिन्धताम्पुनर्ब्ब्रह्माणोव्वसूनीथयज्ञैः । घृतेनत्त्वन्तन्न्वव्वर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः ।।२८०।। ॐ दीर्ग्घायुस्तऽओषधेखनितायस्म्मैचत्त्वाखनाम्म्यहम् । अथोत्त्वन्दीर्ग्घायुर्ब्भूत्त्वाशतवल्शाव्विरोहतात् ।।२८१।। ॐ आयुष्ष्यंव्वर्च्चस्यꣳरायस्प्पोषमौद्भिदम् । इदꣳहिरण्यंव्वर्च्चस्वज्जैत्रायाविशतादुमाम् ।।२८२।। ॐ नतद्राक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजःप्प्रथमजꣳह्येतत् । योबिभर्त्तिदाक्षायणहिरण्यꣳसदेवेषुकृणुतेदीर्ग्घमायुःसमनुष्ष्येषुकृणुतेदीर्ग्घमायुः ।।२८३।। ॐ मनसःकाममाकूतिंव्वाचःसत्त्यमशीय । पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम् ।।२८४।।

रक्षाबन्धनम्- ॐ त्वय्यविष्ठदाशुषोनॄँःपाहिशृणुधीगिरः । रक्षातोकमुतत्त्मना ।।२८५।।

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ।।२।।

ततस्त्र्यायुषमितिपूर्वोक्तप्रकारेण तिलकं कुर्यात् । ततो यजमान इदं मण्डपाद्युपकरणमाचार्याय प्रतिपादयामीत्याचार्याय जलेनोत्सर्गं कुर्यात् ।

क्षमापनम्-

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ।।
ॐ यस्य स्मृत्त्या च नामोक्त्या तयोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

ॐ अच्युताय नमः ३ इति श्रीमद्भगवन्तं पुराणयज्ञपुरुषं लक्ष्मीनारायणं प्रभुं हृदि ध्यात्वा तच्चरणारविन्दयुगले तत्कर्मफलं समर्पयेत्-

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।

करोमि यद् यत् सकलं परस्मै
नारायणायेति समर्पयामि ।।

इति ध्यात्वैवोत्सृजेत् । ततोऽञ्जलिं बध्वा ब्राह्मणान्प्रार्थयेत् । मम कर्मणि यन्न्यूनातिरिक्तं तद्भवद्वचनात्सर्वं परिपूर्णमस्तु, **ॐ अस्तु परिपूर्णमिति** ब्राह्मणा ब्रूयुः । ततो ब्राह्मणानां पादान् प्रक्षाल्य पादोदकं गृहीत्वा तान् भोजयित्वाऽऽशिषो गृहीत्वा सुहृद्बन्धुवर्गादिभिः सह सोत्साहो भुञ्जीत ।

— इत्यग्निस्थापनापद्धतिः —

◆

१५. ग्रहशान्तिविधिः

ग्रहस्थापनाप्रकारः -

मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे ।
दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु ।।१।।
उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवम् ।
पश्चिमेन शनिं विद्याद् राहुं पश्चिमदक्षिणे ।।२।।
पश्चिमोत्तरतः केतून् स्थापयेच्छुक्लतण्डुलैः ।

ग्रहस्वरूपनिर्देशः -

वर्तुलं भास्करं विद्यादर्धचन्द्रं निशाकरम् ।।३।।
अङ्गारकं त्रिकोणं च बुधं च धनुराकृतिम् ।
स्पष्ट ×
पद्माकृतिं गुरुं विद्याच्चतुष्कोणञ्च भार्गवम् ।।४।।
पुरुषाकृतिं शनिं विद्याद्राहुं च मकराकृतिम् ।
खड्गाकृतीन् हि केतूँश्च इत्येवं ग्रहमूर्तयः ।।५।।

ग्रहवर्णाः -

भौमार्कौ रक्तवर्णौ च श्वेतौ शुक्रनिशाकरौ ।
बुधजीवौ सुवर्णाभौ कृष्णौ राहुशनैश्चरौ ।।६।।
केतवो बहुवर्णाश्च सर्वे तेजोमया ग्रहाः । इति ।

ग्रहाणां समिधः -

अर्कः पलाशः खदिरो ह्यपामार्गोऽथ पिप्पलः ।
उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥१॥ इति।

देवस्थापनाप्रकारः -

पूर्वे गणपती रक्तो ब्रह्मा पीतश्च दक्षिणे ।
विष्णुः कृष्णः पश्चिमायां शिवः श्वेतस्तथोत्तरे ॥१॥ इति।

ग्रहप्रभावः

स्कन्दपुराणे- **सुखोपविष्टं गार्ग्यं तु कौशिकः परिपृच्छति ।**
निखिलां ग्रहशान्तिं मे भगवन् वक्तुमर्हसि ।।१।।

गार्ग्य उवाच - **देवदानवगन्धर्वा यक्षराक्षसकिन्नराः ।**
पीडिता ग्रहपीडाभिः किं पुनर्भुवि मानवाः ।।२।।
शनैश्चरेण सौदासो नरमांसे नियोजितः ।
राहुणा पीडितो राजा नलो भ्रान्तो महीतले ।।३।।
अङ्गारकविरोधेन रामो राष्ट्राद्विवासितः ।
अष्टमेन शशाङ्केन हिरण्यकशिपुर्हतः ।।४।।
रविणा सप्तमस्थेन हतो राजा सुयोधनः ।
पाण्डवा बुधपीडायां विकर्मणि नियोजिताः ।।५।।
षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ।
एते चान्ये च बहवो ग्रहदोषैः सुपीडिताः ।।६।।

प्रयोगः- कर्ता पूर्वदिने हविष्याशनादिनियमान् कृत्वा प्रथमं गृहादीशानदिग्भागे भूमिं मार्जनादिसंस्कारैः संशोध्य गन्धाद्युपचारान्संपाद्य मण्डपनिर्माणनिर्विघ्नतायै गणेशं संपूज्य भूमिकूर्मानन्तान् पूजयेत् ।

भूमिपूजा

ध्यानम्-

चर्तुभुजां शुक्लवर्णां कूर्मपृष्ठोपरि स्थिताम् ।
पद्मशङ्खचक्रशूलधरां स्मितवराननाम् ।।

इति भूमिं ध्यायेत् ।

आवाहनम् - आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ! ।
पृथिवि ब्रह्मदत्तासि कश्यपेनाभिवन्दिता ।।

पूजनम्- ॐ भूरसि इति वैदिकमन्त्रेण **ॐ भूम्यै नमः** इति नाममन्त्रेण वा गन्धाद्युपचारैर्भूमिमर्चयेत् ।

पूजानिवेदनम्- उपचारानिमाँस्तुभ्यं ददामि परमेश्वरि ।
भक्त्या गृहाण देवेशि त्वामहं शरणं गतः ।।

प्रार्थना- पूजितेपरमाचार्यैर्गन्धमाल्यैरलङ्कृते ।
भवभूतिकरीदेवी गृहेभार्गविरम्यताम् ।। इति ।

एवम् **ॐ कूर्माय नमः** इत्यनेन कूर्मपूजां विधाय **ॐ अनन्ताय नमः** इत्यनेन अनन्तं पूजयेत् । ततो मार्जनादिप्रकारैर्भूमिं संशोध्य **आपोहिष्ठा०** इत्यादिमन्त्रैः पञ्चगव्येनाभ्युक्षेत् । एवं शोधितायां भूमौ मण्डपादिकं कुर्यात्। तत्र मण्डपमध्ये हस्तखातविस्तारं समचतुरस्रं योन्यादियुतं कुण्डं कुर्यात्। तदशक्तौ तावन्मात्रं चतुरङ्गुलोच्छ्रितं स्थण्डिलं निर्माय तदीशानभागे नवग्रहस्थापनाय हस्तविस्तृतां वितस्त्युच्छ्रितां वप्रद्वयावृतां समचतुरस्रामुदक्प्रवणां ग्रहवेदीं कुर्यात् । तस्या प्रथमो वप्रो द्व्यङ्गुलोच्छ्रायो द्वितीयस्त्र्यङ्गुलोच्छ्रायो द्वावपि द्यङ्गुलविस्तारौ कर्तव्यौ । तत्र वेदीमध्येऽष्टदलकमलं निर्माय तत्तद्वर्णचूर्णेन पूरयित्वा कर्णिकायां पत्रेषु च यथोक्तमण्डलेषु प्रतिमासु वा दध्यक्षतपुञ्जेषु वा ग्रहाणामावाहनं कुर्यात्।

तत्र कर्ता कर्मदिवसे प्रातरुत्थाय स्नानसन्ध्यादि नित्यकर्म समाप्य सर्वां नवग्रहपूजासामग्रीं संपाद्य दीपं प्रज्ज्वलय्य प्राङ्मुख उपविश्याचम्य स्वस्तिवाचनं कृत्वा गणेशादिपञ्चायतनदेवान् गुरुञ्च प्रणम्य तेषु पुष्पाञ्जलिं समर्प्य सूर्यायार्घ्यं दत्त्वा भूतोत्सादनं कुर्यात् ।

भूतोत्सादनम्- ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।

इति मन्त्रेण मण्डपं परितः सर्षपाक्षतान् विकिरेत् । ततः कर्मपात्रं निर्मायार्घ्यं संस्थाप्य प्राणायामं कृत्वा प्रधानसङ्कल्पं कुर्यात् ।

सङ्कल्पः- यवतिलकुशजलान्यादाय- ॐ अद्येहेत्यादिदेशकालकीर्तनान्ते अमुकगोत्रोऽमुकप्रवरोऽमुकराशिरमुकशर्माहम् अमुकराशेरमुकशर्मणोऽस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणद्वारा आयुर्वर्चोमेधाभिवृद्धये श्रीपरमेश्वरप्रीतये च अद्य श्वो वा चौलसंस्कारं करिष्ये ।

चौलोपनयनयोः सहकरणपक्षे- तथास्य द्विजत्वसिद्ध्या वेदाध्ययनाद्यधिकारसिद्धये श्रीपरमेश्वरप्रीतये च उपनयनं करिष्ये । इति ।

चौलोपनयनवेदारम्भाणां सहकरणपक्षे- तथास्य श्रोतस्मार्तकर्मानुष्ठानाधिकारसिद्धये श्रीपरमेश्वरप्रीतये च वेदारम्भं करिष्ये । इति ।

तद्दिने वा चतुर्थके इति वचनमाश्रित्य **चौलोपनयनवेदारम्भसमावर्तनानां सहकरणपक्षे-** तथास्य गृहस्थाश्रमार्हतासिद्धिद्वारा श्रीपरमेश्वरप्रीतये समावर्तनाख्यं कर्म करिष्ये । इति ।

कन्याविवाहे- ममास्याः कन्याया बीजगर्भसमुद्भवदुरितनिबर्हणपूर्वकं भर्त्रा सह धर्मप्रजोत्पादनद्रव्यपरिग्रहेष्वधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहसंस्कारं करिष्ये । इति ।

पुत्रविवाहे- ममास्य पुत्रस्य देवर्षिपित्रर्णापाकरणहेतुधर्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहसंस्कारं करिष्ये । इति ।

एतेष्वन्यतमसङ्कल्पं कृत्वा तत्कर्माङ्गत्वेन तत्तत्कर्मनिमित्तककरिष्यमाणग्रहयागकर्मणश्च पूर्वाङ्गत्वेन सकलमङ्गलाभिवृद्धये च गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धञ्च सकृत्करिष्ये । इति संकल्प्य तानि विधाय ग्रहयागसङ्कल्पं कुर्यात् ।

ग्रहयागसङ्कल्पो ब्राह्मणवरणसङ्कल्पश्च- ॐ अद्येहेत्यादि देशकालकीर्तनान्ते अमुकगोत्रोऽमुकप्रवरोऽमुकराशिरमुकशर्माहम् मम तथास्य कुमारस्य दशावि-दशान्तर्दशास्थितादित्यादिग्रहसूचितदुष्टफलोपशान्तिपूर्वकशुभफलप्राप्तये, करिष्यमाणकर्मणि सर्वोपद्रवशान्तिपूर्वकं दीर्घायुरारोग्यहर्षविजय-

प्राप्तये, श्रीपरमेश्वरप्रीत्यर्थं च अमुककर्मनिमित्तकं ग्रहयागं करिष्ये, तत्पूर्वाङ्गत्वेन आचार्यादीनां वरणञ्च करिष्ये। इति संकल्पं कुर्यात्।

ब्राह्मणवरणम्- आचार्यमुदङ्मुखमुपवेश्य चन्दनाक्षतपुष्पामालावस्त्रादिभिः संपूज्य- ॐ अद्येहामुकगोत्रममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे आचार्यत्वेन **त्वामहं वृणे,** इति वरणसामग्रीमाचार्यहस्ते दद्यात्। **ॐ वृतोस्मी**ति प्रतिवचनम्।

एवं होतारमुपवेश्य चन्दनवस्त्रादिभिः संपूज्य- ॐ अद्येहामुकगोत्रममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे होमं कर्तुं होतृत्वेन **त्वामहं वृणे,** इति वरणसामग्रीं होत्रे दद्यात्। एवं ब्रह्माणमुपवेश्य पुष्पचन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुं **ब्रह्मत्वेन त्वामहं वृणे** इति वरणसामग्रीं ब्रह्मणे दद्यात्। **ॐ वृतोस्मीति** प्रतिवचनम्।

एवं सूक्तजपार्थं ब्राह्मणमुपवेश्य चन्दनपुष्पवस्त्रादिभिः संपूज्य- ॐ अद्येहामुकगोत्रममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे सूक्तजपं कर्तुं जापकत्वेन **त्वामहं वृणे** इति वरणसामग्रीं जापकब्राह्मणहस्ते दद्यात्। **ॐ वृतोस्मि** इति प्रतिवचनम्। एवं वेदपाठकमन्त्रजापकद्वारपालादीनां वरणं कुर्यात्- **ॐ यथाविहितं कर्म कुरुत** इति सर्वान् प्रति यजमानो ब्रूयात् **ॐ करवाम** इति प्रतिवचनम्।

अत्रावसरे चत्वार ऋत्विज एको ब्रह्माऽपरो होता इत्येवं स्वगृह्योक्तविधिनाग्निस्थापनं कुर्युः।

परिसमूहनम्- तच्चैवं याजुर्वेदिकेन विधिना- **ॐ यद्देवादेवहेडनन्देवासश्श्चकृमाद्वयम्। अग्गिर्म्मातस्म्मादेनसोव्विश्श्वान्म्मुञ्चत्त्वꣳहसः ॥१॥ ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमाव्वयम्। व्वायुर्म्मातस्म्मादेनसोव्विश्श्वान्म्मुञ्चत्त्वꣳहसः ॥२॥ ॐ यदिजाग्ग्रद्यदिस्वप्प्नऽएनाꣳसिच-**

कृमाव्वयम् । सूर्य्योमातस्म्मादेनसोव्विश्श्वान्मुञ्चत्त्वꣳहसः ।।३।। इति मन्त्रेण कुशैर्वेदीं समां कुर्यात् ।

गोमयोदकेनोपलेपनम्- ॐ मानस्त्तोकेतनयेमानऽआयुषिमानोगोषु- मानोऽअश्श्वेषुरीरिषः । मानोव्वीरान्त्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वा- हवामहे ।।४।। ॐ त्वां व्वृत्रेष्ष्विन्द्रेत्युल्लिख्य, **ॐ व्व्रतङ्कृणुत० व्व्रजङ्गच्छे**त्युद्धृत्य, **ॐ देवस्यत्त्वे**त्यभ्युक्ष्य, **ॐ अग्ग्निर्म्मूर्द्धे**त्यग्निमुप- समाधाय, **ॐ समिधाग्ग्निन्दुवस्यते**ति समिधमादध्यात् ।

ॐ मयिगृह्णामीत्यग्नेरभ्युक्षणं कृत्वा **ॐ हिरण्यगर्ब्भः** इति दक्षिणतो ब्रह्मासनम् **ॐ आपोहिष्ठे**त्युत्तरतःप्रणीता, **ॐ कयानश्चित्र** इति परिस्त- रणम्, **ॐ पवित्रेस्त्थोव्वैष्णव्व्यावि**ति पवित्रे द्वे, **ॐ इषेत्त्वे**त्याज्यनिरूपणम्, **ॐ त्रातारमिन्द्रमि**ति स्रुवं प्रतप्य, **ॐ अनिशितोसी**ति स्रुवसंमार्जनम्, **ॐ प्रत्युष्टꣳरक्षः** इति पुनः प्रतपनम्, **ॐ सवितुर्व्वः प्प्रसवऽउत्त्पुनामी**त्युत्प- वनम्, **ॐ तदेवाग्ग्निरि**त्युद्दीङ्गनम्, **ॐ समिधाग्ग्निमि**तिसमिदाधानम्, **ॐ भूरसी**ति पर्युक्षणम् ।

ततः प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वा- रब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति । आहुत्यनन्तरं स्रुवावस्थितहुत- शेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । **ॐ सोमाय स्वाहा, इदꣳसोमाय । ॐ इन्द्राय स्वाहा, इदमिन्द्राय । ॐ अग्नये स्वाहा, इदमग्नये । ॐ सोमाय स्वाहा, इदꣳसोमाय । ॐ अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय ।**

अग्न्याधानम्- ॐ महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्यु- ष्णिगनुष्टुभश्छन्दांसि अग्न्याधाने विनियोगः । **ॐ भूःस्वाहा, इदमग्नये** प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । **ॐ भुवः स्वाहा, इदं वायवे** प्रो०। **ॐ स्वः स्वाहा, इदꣳसूर्याय** प्रो०। इति मूलहोमाहुतयः । एवं च वैदिकोऽग्निः संस्कृतो भवति ।

ग्रहपूजा

कलशस्थापना- एवमग्नौ प्रणीते ग्रहवेद्या ईशानभागे पूर्वोक्तविधिना कलशं स्थापयेत् ।

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
झाटीचंपकमुस्ताश्च सर्वौषध्यो दश स्मृताः ।।

(मुरा = मयूरशिखा, मांसी = जटामांसी, शैलेयम् = शूल इति प्रसिद्धम् रजनीद्वयम् = हरिद्रा, दारुहरिद्रा = झाटी कचूर इति प्रसिद्धम्, चम्पकः=प्रसिद्धः, मुस्ता = मोथा । एताः कलशजले स्थापनीयाः ।)

पूर्वोक्तप्रकारेण वारुणकलशस्थापनं विधाय गन्धपुष्पाक्षतधूपदीपनैवेद्यवस्त्रादिभिः संपूज्य सूर्यादीनां स्थापनपूर्वकं पूजा कार्या ।

सङ्कल्पः- तत्र गुरुसहितो यजमानो यथोक्ताष्टदलयुतनवग्रहवेद्याः समीपे गत्वा आचम्य प्राणानायम्य कुशादीन्यादाय- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वाऽमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं ग्रहयागकर्मणो यथोक्तफलावाप्तये यथोक्तप्रतिमासु अक्षतपुञ्जेषु वा सूर्यादिनवग्रहाणां दध्यक्षतपुञ्जेषु अधिदेवताप्रत्यधिदेवतादीनां स्थापनं पूजनञ्चाहं करिष्ये इति संकल्प्य सूर्यादीन् स्थापयेत् पूजयेच्च ।

सूर्यपूजा- ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दो व्याहृतीनां क्रमेण विश्वामित्रजमदग्निभरद्वाजा ऋषयः अग्निवायुसूर्या देवता दैवी गायत्रीदैव्युष्णिग्दैवीबृहत्यश्छन्दांसि सूर्याद्यावाहने विनियोगः । केचित्तत्तन्मन्त्रानप्यावाहने आहुः । तत्राष्टदलमध्ये कर्णिकायां वर्तुले द्वादशाङ्गुले रक्तमण्डले किरीटिनं पद्मारूढं हस्तद्वयधृतपद्मद्वयं लोहितवर्णं रक्ताम्बरधरं सप्ताश्वरथस्थं सप्तार्चिषं प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँ२।।ऽआसादयादिह ।। ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र सूर्य इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयेत् ।

पूजनम्- एतानि पाद्यार्घ्याचमनीयपुनराचमीयस्नानीयानि समर्पयामि, **ॐ श्रीसूर्याय नमः । ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च। हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।। ॐ सूर्याय नमः।** इदं रक्तचन्दनम्, एते रक्ताक्षताः, एतानि रक्तपुष्पाणि, **ॐ सूर्याय नमः**, एष धूपः, **ॐ सूर्याय नमः**, एष दीपः, इदं नैवेद्यम्, उपायनम्, **ॐ सूर्याय नमः** रक्तवस्त्रं बृहस्पतिदैवतम् **ॐ सूर्याय नमः** ।

सोमपूजा- तत आग्नेयदले चतुरस्रे चतुरङ्गुले श्वेतमण्डले किरीटिनं द्विभुजं वरगदाहस्तं श्वेतवर्णं श्वेताश्वरथस्थं सोममादित्याभिमुखं श्वेतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ अप्स्वग्नेसधिष्ट्वसौषधीरनुरुद्ध्यसे । गर्ब्भेसञ्जायसेपुनः ।। ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र सोम इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयेत् ।

पूजनम्- पाद्याद्युपचारैः - **ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्य्यपुत्रमममुष्य्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजा ।। ॐ सोमाय नमः**, इति सोमं पूजयेत् ।

भौमपूजा- ततो दक्षिणदले त्रिकोणे त्र्यङ्गुले रक्तमण्डलें किरीटिनं रक्तवर्णं रक्तमाल्याम्बरधरं चतुर्भुजं वरशक्तिशूलगदाधरं मेषस्थमादित्याभिमुखं कुजं रक्तपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।। ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजगोत्र भौम इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयेत् ।

पूजनम्- ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ।। ॐ भौमाय नमः, इति पाद्याद्युपचारैर्भौमं पूजयेत्।

बुधपूजा- तत ईशानदले बाणाकारे चतुरङ्गुले पीतमण्डले किरीटिनं पीतवस्त्रं पीतमाल्यानुलेपनं पीतवर्णं चतुर्भुजं वरखड्गचर्मगदाहस्तं सिंहस्थमादित्याभिमुखं बुधं पीतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳪंसुरेस्वाहा ।। ॐ भुर्ब्भुवः स्वः मगधदेशोद्भव आत्रेयगोत्र बुध इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वामिष्टापूर्त्तेसᳪंसृजेथामयञ्च । अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमानश्श्चसीदत ।। ॐ बुधाय नमः, इति पाद्याद्युपचारैर्बुधं पूजयेत् ।

वृहस्पतिपूजा- तत उत्तरदले दीर्घचतुरस्त्रे षडङ्गुले पीतमण्डले किरीटिनं पीतवर्णं पीतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं बृहस्पतिं पीतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ।। ॐ भूर्ब्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र बृहस्प्पते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ बृहस्प्पतेऽअतियदर्य्यौऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् (उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा) ।। ॐ बृहस्पतये नमः, इति पाद्याद्युपचारैर्बृहस्पतिं पूजयेत् ।

शुक्रपूजा- ततः पूर्वदले पञ्चकोणे नवाङ्गुले श्वेतमण्डले किरीटिनं श्वेतवर्णं श्वेतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं शुक्रं श्वेतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ अदित्त्यैरास्न्नासीन्द्राण्याऽउष्णीषःपूषासिघर्म्मायदीष्ष्व।।

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्र शुक्र इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ अन्नात्त्परिस्त्रुतोरसंब्रह्मणाव्व्यपिवत्क्षत्रम्प्पयःसोमम्प्रजापतिः। ऋतेनसत्त्यमिन्द्रियंविपानक्षशुक्क्रमन्धसऽइन्द्रस्स्येन्द्रियमिदम्प्पयोमृतम्मधु।। ॐ शुक्राय नमः, इति पाद्याद्युपचारैः शुक्रं पूजयेत् ।

शनिपूजा- ततः पश्चिमदले धनुराकारे द्व्यङ्गुले कृष्णमण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं चतुर्भुजं वरत्रिशूलधनुर्बाणधरं गृध्रवाहनमादित्याभिमुखं शनिं कृष्णपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योविश्श्वारूपाणिपरिताबभूव। यत्त्कामास्त्तेजुहुमस्त्तन्नोऽअस्त्तुव्वयꣳस्यामपतयोरयीणाम्।। ॐ भुर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः ।। ॐ शनैश्चराय नमः, इति पाद्याद्युपचारैः शनिं पूजयेत् ।

राहुपूजा- ततो नैर्ऋत्यदले शूर्पाकारे द्वादशाङ्गुले कृष्णमण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं करालवदनं चतुर्भुजं वरखड्गचर्मधनुर्धरं सिंहस्थमादित्याभिमुखं राहुं कृष्णपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ आयङ्गौःपृश्निरक्क्रमीदसदन्मातरम्पुरः । पितरञ्चप्प्रयन्त्स्वः।। ॐ भुर्भुवः स्वः वैराटिनपुरोद्भव पैठिनसिगोत्र राहो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठायावृता ।। ॐ राहवे नमः, इति पाद्याद्युपचारै राहुं पूजयेत् ।

केतुपूजा- ततो वायव्यदले ध्वजाकारे धूम्रमण्डले षडङ्गुले किरीटिनो धूम्रान् द्विभुजान् गदाहस्तान् विकृतमुखान् गृध्रवाहनानादित्याभिमुखान् केतून् धूम्रपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः। सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्श्चयोनिमसतश्श्चविवः ।। ॐ भुर्भुवः स्वः अन्तर्वेदिसमुद्भवा जैमिनिगोत्राः केतवः इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयेत् ।

पूजनम्- ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ।। ॐ केतुभ्यो नमः इति पाद्याद्युपचारैः पूजयेत् ।

अधिदेवपूजा

ईश्वरपूजनम्- सूर्यस्य दक्षिणपार्श्वे (सूर्याधिदेवस्य ईश्वरस्य पूजा) -

आवाहनं पूजनञ्च- ॐ त्र्यम्बकमिति मन्त्रस्य वसिष्ठऋषिः रुद्रो देवता अनुष्टुप्छन्दः ईश्वरस्यावाहनपूजनयोर्विनियोगः । शुक्लपुष्पाक्षतैः- **ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ।। ॐ भूर्भुवः स्वः ईश्वर इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ ईश्वराय नमः** इति पूजयेत् ।

उमापूजनम्- सोमस्य दक्षिणपार्श्वे (सोमाधिदेवताया उमायाः पूजा) - **ॐ श्रीश्श्चतेलक्ष्मीश्श्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।। ॐ भूर्भुवः स्वः उमे इहागच्छ इह तिष्ठ** इति स्थापयित्वा **ॐ उमायै नमः** इति पूजयेत् ।

स्कन्दपूजनम्- भौमस्य दक्षिणपार्श्वे (भौमाधिदेवस्य स्कन्दस्य पूजा) - **ॐ यदक्क्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्त्तुत्त्यम्महिजातन्तेऽअर्व्वन् ।। ॐ भूर्भुवः स्वः स्कन्द इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ स्कन्दाय नमः** इति पूजयेत् ।

विष्णुपूजनम् - बुधस्य दक्षिणपार्श्वे (बुधाधिदेवस्य विष्णोः पूजा) - **ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्द्ध्रुवोसि। वैष्णवमसिविष्णवेत्त्वा ।। ॐ भूर्भुवः स्वः विष्णो इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ विष्णवे नमः** इति पूजयेत् ।

ब्रह्मपूजनम् - गुरोर्दक्षिणपार्श्वे (बृहस्पत्यधिदेवस्य ब्रह्मणः पूजा) - **ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्योतिव्याधीमहारथो जायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाः । सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योवर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्यताम्।। ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ ब्रह्मणे नमः** इति पूजयेत् ।

इन्द्रपूजनम् - शुक्रस्य दक्षिणपार्श्वे (शुक्राधिदेवस्य इन्द्रस्य पूजा) - **ॐ सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्वान् । जहिशत्रूँ१।।रपमृधोनुदस्वाथाभयङ्कृणुहिविश्श्वतोनः ।। ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ इन्द्राय नमः** इति पूजयेत् ।

यमपूजनम् - शनेर्दक्षिणपार्श्वे (शनिरधिदेवस्य यमस्य पूजा) - **ॐ यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे । देवस्त्त्वासवितामद्ध्वानक्त्तुपृथिव्याःसꣳस्पृशस्प्पाहि । अर्च्चिरसिशोचिरसितपोसि ।। ॐ भूर्भुवः स्वः यम इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ यमाय नमः** इति पूजयेत् ।

कालपूजनम्- राहोर्दक्षिणपार्श्वे (राहोरधिदेवस्य कालस्य पूजा) - **ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि । समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ।। ॐ भूर्भुवः स्वः काल इहागच्छ इत्यावाह्य**

इह तिष्ठ इति स्थापयित्वा **ॐ कालाय नमः** इति पूजयेत् ।

चित्रगुप्तपूजनम्- केतूनां दक्षिणपार्श्वे (केत्वधिदेवस्य चित्रगुप्तस्य पूजा)- **ॐ चित्रावसोस्वस्तितेपारमशीय।। ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ चित्रगुप्ताय नमः** इति पूजयेत्।

प्रत्यधिदेवपूजा

ततः शुक्लपुष्पतण्डुलैः सर्वा प्रत्यधिदेवता आवाह्य स्थापयित्वा पूजयेत् ।

अग्निपूजनम्- सूर्यस्य वामपार्श्वे (सूर्यप्रत्यधिदेवस्य अग्नेः पूजा)- **ॐ अग्ग्रिन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे । देवाँ२।।ऽआसादयादिह ।। ॐ भूर्भुवः स्वः अग्ने इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ अग्नये नमः** इति पूजयेत् ।

अपां पूजनम् - सोमस्य वामपार्श्वे (सोमप्रत्यधिदेवतानामपां पूजा) - **ॐ अप्प्स्वन्तरमृतमप्प्सुभेषजमपामुतप्प्रशस्तिष्ष्वश्श्वाभवतव्वाजिनः । देवीरापोयोवऽऊर्म्मिःप्प्रतूर्त्तिःककुन्मान्वाजसास्तेनायंव्वाजक्ष्सेत् ।। ॐ भूर्भुवः स्वः आपः इहागच्छत इत्यावाह्य इह तिष्ठत** इति स्थापयित्वा **ॐ अद्भ्यो नमः** इति पूजयेत् ।

पृथिवीपूजनम्- भौमस्य वामपार्श्वे (भोमप्रत्यधिदेवतायाः पृथिव्याः पूजा)- **ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।। ॐ भूर्भुवः स्वः भूमे इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ भूम्यै नमः** इति पूजयेत् ।

विष्णुपूजनम् - बुधस्य वामपार्श्वे (बुधप्रत्यधिदेवस्य विष्णोः पूजा)- **ॐ इदंविष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।।**

ॐ भूर्ब्भुवः स्वः विष्णो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ विष्णवे नमः** इति पूजयेत् ।

इन्द्रपूजनम्- गुरोर्वामपार्श्वे (गुरुप्रत्यधिदेवस्य इन्द्रस्य पूजा)- **ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः ।। ॐ भूर्ब्भुवः स्वः इन्द्र इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ इन्द्राय नमः** इति पूजयेत् ।

इन्द्राणीपूजनम्- शुक्रस्य वामपार्श्वे (शुक्रप्रत्यधिदेवताया इन्द्राण्याः पूजा)- **ॐ अदित्त्यैरास्नासीन्द्राण्याऽउष्णीषःपूषासिघर्मायवीष्ष्व ।। ॐ भूर्ब्भुवः स्वः इन्द्राणि इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ इन्द्राण्यै नमः** इति पूजयेत् ।

प्रजापतिपूजनम्- शनेर्वामपार्श्वे (शनिप्रत्यधिदेवस्य प्रजापतेः पूजा)- **ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्त्कामास्त्तेजुहुमस्त्तन्नोऽअस्त्तुव्वयꣳस्यामपतयोरयीणाम् ।। ॐ भूर्ब्भुवः स्वः प्रजापते इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ प्रजापतये नमः** इति पूजयेत् ।

सर्पपूजनम्- राहोर्वामपार्श्वे (राहुप्रत्यधिदेवतानां सर्प्पाणां पूजा)- **ॐ नमोस्त्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्त्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः ।। ॐ भूर्भुवः स्वः सर्पा इहागच्छत इत्यावाह्य इह तिष्ठत** इति स्थापयित्वा **ॐ सर्पेभ्यो नमः** इति पूजयेत् ।

ब्रह्मपूजनम् - केतूनां वामपार्श्वे (केतुप्रत्यधिदेवस्य ब्रह्मणः पूजा) - **ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्त्ताद्विसीमतःसुरुचोव्वेनऽआवः । सबुद्ध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।। ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ** इतिं स्थापयित्वा **ॐ ब्रह्मणे नमः** इति पूजयेत् ।

लोकपालपूजा

शुक्लपुष्पतण्डुलैर्विनायकादीन् पञ्चलोकपालानावाह्य स्थापयित्वा पूजयेत् ।

विनायकपूजनम्- राहोरुत्तरभागे- **ॐ गणानान्त्वा०, ॐ भूर्भुवः स्वः विनायक इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ विनायकाय नमः** इति पूजयेत् ।

दुर्गापूजनम्- शनेरुत्तरभागे- **ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्श्चन। ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।। ॐ भूर्भुवः स्वः दुर्गे इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ दुर्गायै नमः** इति पूजयेत् ।

वायुपूजनम्- सूर्यस्योत्तरभागे- **ॐ व्वातोवामनोवागन्धर्व्वाःसप्तविꣳशतिः। तेऽअग्ग्नेऽश्श्वमयुञ्जँस्तेऽअस्म्मिञ्जवमादधुः ।। ॐ भूर्भुवः स्वः वायो इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ वायवे नमः** इति पूजयेत् ।

आकाशपूजनम्- राहोर्दक्षिणभागे- **ॐ ऊर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीꣳष्यग्ग्नेः। द्युमत्तमाःसुप्रतीकस्यसूनोः ।। ॐ भूर्भुवः स्वः आकाश इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ आकाशाय नमः** इति पूजयेत् ।

अश्विनिकुमारपूजनम्- केतूनां दक्षिणभागे- **ॐ यावाङ्कशामधुमत्त्यश्श्विनाःसूनृतावती । तयायज्ञम्मिमिक्षतम् ।। ॐ अश्श्विनौ इहागच्छतम् इत्यावाह्य इह तिष्ठतम्** इति स्थापयित्वा **ॐ अश्विभ्यां नमः** इति पूजयेत् ।

दिक्पालपूजा

ततः पूर्वादिदिक्षु इन्द्रादिदिक्पालानावाह्य स्थापयित्वा पूजयेत् ।

इन्द्रपूजनम्- पूर्वे- **ॐ त्रातारमिन्द्रम्०, ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ इन्द्राय नमः** इति पूजयेत् ।

अग्निपूजनम्- आग्नेये- **ॐ अग्निन्दूतम्०, ॐ भूर्भुवः स्वः अग्ने इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ अग्नये नमः** इति पूजयेत् ।

यमपूजनम्- दक्षिणे- **ॐ असियमोऽअस्यादित्त्योऽअर्वन्नसित्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाविपृक्क्तऽआहुस्त्तेत्रीणिदिविबन्धनानि ।। ॐ भूर्भुवः स्वः यम इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ यमाय नमः** इति पूजयेत् ।

निर्ऋतिपूजनम्- नैर्ऋते- **ॐ एषतेनिर्ऋतेभागस्त्तञ्जुषस्व ।। ॐ भूर्भुवः स्वः निर्ऋते इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ निर्ऋतये नमः** इति पूजयेत् ।

वरुणपूजनम् - पश्चिमे - **ॐ इमम्मेवरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके।। ॐ भूर्भुवः स्वः वरुण इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ वरुणाय नमः** इति पूजयेत् ।

वायुपूजनम् - वायव्याम् - **ॐ व्वातोवा०, ॐ भूर्भुवः स्वः वायो इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ वायवे नमः** इति पूजयेत् ।

कुबेर(सोम) पूजनम् - उत्तरे - **ॐ व्वयꣳसोमव्व्रतेतवमनस्त्तनूषुबिब्भ्रतः। प्रजावन्तःसचेमहि ।। ॐ भूर्भुवः स्वः कुबेर (सोम) इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ कुबेराय (सोमाय) नमः** इति पूजयेत् ।

ईशानपूजनम्- ईशाने- **ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्ब्धःस्वस्तये।। ॐ भूर्भुवः स्वः ईशान इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ ईशानाय नमः** इतीशानं पूजयेत् ।

ब्रह्मपूजनम् - ऊर्ध्वे(पूर्वेशानयोर्मध्ये) - **ॐ ब्रह्मजज्ञानम्०, ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ ब्रह्मणे नमः** इति ब्रह्माणं पूजयेत् ।

अनन्तपूजनम् - अधः (पश्चिमनैर्ऋत्यमध्ये) - **ॐ नमोस्तुसर्प्पेब्भ्यः०, ॐ भूर्भुवः स्वः अनन्त इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ अनन्ताय नमः** इत्यनन्तं पूजयेत् ।

अष्टवस्वादिपूजा

ध्रुवाद्यष्टवसुपूजनम् - इन्द्राग्निमध्ये - **ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेदꣳसवनञ्जुषाणाः । भरमाणाव्वहमानाहवीꣳष्यस्म्मेधत्तव्वसवोव्वसूनिस्वाहा ।। ॐ भूर्भुवः स्वः ध्रुवाद्यष्टवसव इहागच्छत इत्यावाह्य इह तिष्ठत** इति स्थापयेत् ।

ध्रुवोऽध्वरस्तथा सोम आपश्चैवानिलोऽनलः ।
प्रत्युषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।।

इति ध्रुवाद्यष्टवसवः। **ॐ ध्रुवाद्यष्टवसुभ्यो नमः** । इति पूजयेत् ।

द्वादशादित्यपूजा

द्वादशादित्यपरिचयः-

धातार्यमा च मित्रश्च वरुणोंऽशोभगस्तथा ।
इन्द्रो विंवस्वान्पूषा च पर्जन्यो दशमः स्मृतः ।।

ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ।।

द्वादशादित्यपूजनम्- इन्द्रेशानमध्ये- **ॐ यज्ञोदेवानाम्प्रत्त्येतिसुम्नमादित्यासोभवतामृडयन्तः । आवोर्वाचीसुमतिर्ववृत्त्यादꣳहोश्चिद्यावरिवोवित्तरासदादित्त्येभ्यस्त्वा ।। ॐ भूर्भुवः स्वः धात्रादिद्वादशादित्या इहागच्छत इत्यावाह्य इह तिष्ठत** इति स्थापयित्वा **ॐ धात्रादिद्वादशादित्येभ्यो नमः** इति पूजयेत् ।

एकादशरुद्रपूजा

रुद्रपरिचयः- **वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ।**
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।।
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ।
स्थाणुर्भवश्च भगहा रुद्रा एकादश स्मृताः ।।

रुद्रपूजनम्- अग्नियममध्ये- **ॐ यऽएतावन्तश्च्चभूयाꣳसश्च्चदिशोरुद्रावितस्थिरे। तेषाꣳसहस्त्रयोजनेवधन्वानितन्मसि ।। ॐ भूर्भुवः स्वः वीरभद्राद्येकादशरुद्रा इहागच्छत इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ वीरभद्रद्येकादशरुद्रेभ्यो नमः** इति पूजयेत् ।

षोडशमातृपूजा

षोडशमातृपरिचयः-

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।
धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवताः ।

पूजनम्- यमनिर्ऋतिमध्ये- **ॐ गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीत्रिपदीसाचतुष्पदी । अष्टपदीनवपदीबभूवुषिसहस्त्राक्षरापरमेव्योमन्।।**

ॐ भूर्भुवः स्वः गौर्यादिषोडशमातर इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयेत् **ॐ गौर्यादिषोडशमातृभ्यो नमः**, इति पूजयेत् ।

गणेशपूजनम् - निर्ऋतिवरुणमध्ये - **ॐ गणानान्त्वा०, ॐ भूर्भुवः स्वः गणपते इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ गणपतये नमः** इति पूजयेत् ॥५॥

सप्तमरुत्पूजा

सप्तमरुतां परिचयः-

आवहः प्रवहश्चैव उद्वहः संवहस्तथा ।
परावहश्च विवहः तथा परिवहोऽनिलः ॥७॥ इति ।

पूजनम् - वायुसोममध्ये - **ॐ मरुतोयस्यहिक्षयेपाथादिवोविमहसः । ससुगोपातमोजनः ॥ ॐ भूर्भुवः स्वः आवहादिसप्तमरुत इहागच्छत इत्यावाह्य इह तिष्ठत** इति स्थापयित्वा **ॐ आवहादिसप्तमरुद्भ्यो नमः** इति पूजयेत् ।

ब्रह्मविष्णुरुद्रार्कवनस्पतिपूजा

ततो वेद्यामेव यथावकाशं ब्रह्मादीन्पञ्चदेवनावाह्य स्थापयित्वा पूजयेत्।

ब्रह्मपूजनम्- ॐ ब्रह्मजज्ञानम्०, ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ ब्रह्मणे नमः** इति पूजयेत् ।

विष्णुपूजनम्- ॐ इदं विष्णुः०, ॐ भूर्भुवः स्वः विष्णो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ विष्णवे नमः** इति पूजयेत् ।

रुद्रपूजनम्- ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषु-रीरिषः । मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ ॐ भूर्भुवः स्वः रुद्र इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा

ॐ रुद्राय नमः इति पूजयेत् ।

अर्कपूजनम्- ॐ अग्ग्निरस्म्मिजन्न्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन्। अर्क्कस्त्रिधातूरजसोविमानोजस्त्रोघर्म्मोहविरस्म्मिनाम ।। ॐ भूर्भुवः स्वः अर्क इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ अर्काय नमः** इति पूजयेत् ।

वनस्पतिपूजनम् - ॐ वनस्प्पतेवीड्डुवङ्गोहिभूयाऽअस्म्मत्सखाप्प्रतरणः-सुवीरः । गोभिःसन्नद्धोऽअसिवीडयस्वास्त्थातातेजयतुजेत्त्वानि ।। ॐ भूर्भुवः स्वः वनस्पते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ वनस्पतये नमः** इति पूजयेत् । एवं द्व्युत्तरशतं देवताः स्थापयित्वा पूजयेत् ।

ग्रहध्यानम्

सूर्यध्यानम्-

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहनः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ।।१।।

चन्द्रध्यानम्-

श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः ।
चन्द्रोऽमृतात्मा वरदः किरीटी श्रेयांसि मह्यं विदधातु देवः ।।२।।

भौमध्यानम् -

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ।।३।।

बुधध्यानम्-

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ।
चर्मासिभृत् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधोऽस्तु।।४।।

वृहस्पतिध्यानम्-

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दण्डञ्च कमण्डलुञ्च तथाऽक्षसूत्रं वरदोऽस्तु मह्यम् ।।५।।

शुक्रध्यानम्-

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ।
तथाक्षसूत्रञ्च कमण्डलुञ्च दण्डञ्च बिभ्रद् वरदोऽस्तु मह्यम् ।।६।।

शनिध्यानम्-

नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्तः सदाऽस्तु मह्यं वरमन्दगामी ।।७।।

राहुध्यानम्-

नीलाम्बरो नीलवपुः किरीटी करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च राहुः सिंहाधिरूढो वरदोऽस्तु मह्यम् ।।८।।

केतुध्यानम्-

धूम्रो द्विबाहुर्वरदो गदाभृद् गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषिताङ्गः सदाऽस्तु मे केतुगणः प्रशान्तः ।।९।।

इति नवग्रहान् ध्यायेत् । **"अन्ये किरीटिनः कार्या वरदाभयपाणयः"** इति सामान्येनाधिदेवतादींश्च ध्यायेत् ।

इत्थं सूर्यादीनां तत्तद्वर्णपुष्पगन्धाक्षतादिभिः पूजा कार्या । वस्त्राणि च यथासंभवं ग्रहवर्णान्येव समर्पणीयानि । गुग्गुलुर्धूपः, दीपः सर्पिषा तिलतैलेन वा, नैवेद्यं पायसादिकं त्रिवृदन्नं वा, दक्षिणा माणिक्यादिरूपा माणिक्यमेव वा निष्क्रयद्रव्यमेव वा, अपूपादिकमपि नैवेद्यमिति कतिपये।

पुष्पाञ्जलिः

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुःशशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रःशनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ।।
सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः ।
सद्बुद्धिञ्च बुधो गुरुश्च गुरुतां शुक्रः शुभं शं शनिः ।।

राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिम् ।
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।

इति पुष्पाञ्जलिं समर्पयेत् ।

प्रार्थना-

आयुश्च वित्तञ्च तथा सुखञ्च धर्मार्थलाभौ बहुपुत्रताञ्च ।
शत्रुक्षयं राजसुपूजिताञ्च तुष्टा ग्रहाः क्षेमकरा भवन्तु ।। इति ।

बलिसमर्पणम्

ततो वेदीसमीपे पश्चिमभागे भूमौ यथोक्तबलीन् तदभावे पायसबलीन् तदभावे दध्यक्षतबलीन् दद्यात् ।

सूर्यबलिः - ॐ आकृष्णेन० इति मन्त्रेण **ॐ सूर्याय** एष गुडौदनबलिः तदभावे पायसबलिः। तदभावे एष दध्यक्षतबलिर्नमः, **भोः सूर्य इमं बलिं गृहाण, यजमानस्य क्षेमकर्ता भव** इति बल्युपरि जलं दद्यात् । एवं सर्वत्र ।।१।।

सोमबलिः - ॐ इमन्देवाः०, ॐ सोमाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः । **भोः सोम०** ।।२।।

भौमबलिः - ॐ अग्निर्म्मूर्द्धा० ॐ भौमाय मसूरान्नाभावे एष दध्यक्षतबलिर्नमः । **भोः भौम०** ।।३।।

बुधबलिः - ॐ उद्बुद्ध्यस्व० ॐ बुधाय दुग्धौदनाभावे एष दध्यक्षतबलिर्नमः । **भोः बुध०** ।।४।।

बृहस्प्पतिबलिः - ॐ बृहस्प्पतेऽअति० ॐ बृहस्पतये दध्योदनाभावे एष दध्यक्षतबलिर्नमः । **भोः बृहस्पते०** ।।५।।

शुक्रबलिः - ॐ अन्नात्परिस्रुतः० ॐ शुक्राय घृतौदनाभावे एष दध्यक्षतबलिर्नमः । **भोः शुक्र०** ।।६।।

शनिबलिः - ॐ शन्नोदेवीः० ॐ शनैश्चराय कृसरान्नाभावे एष दध्यक्षतबलिर्नमः । **भोः शनैश्चर०** ।।७।।

राहुबलिः - **ॐ कयानः० ॐ राहवे** छागमांसाभावे एष दध्यक्षतबलिर्नमः। **भोः राहो०** ॥८॥

केतुबलिः- **ॐ केतुङ्कृण्वन्० ॐ केतुभ्य**श्चित्रौदनाभावे एष दध्यक्षतबलिर्नमः। **भोः केतुगण०** ॥९॥

अधिदेवतानां बलिसमर्पणम्

ॐ त्र्यम्बकंय्यजामहे० ॐ ईश्वराय घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥१॥ **भोः ईश्वर** इत्यादि सर्वत्र पठेत् ।

ॐ श्रीश्श्चते० ॐ उमायै घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥२॥

ॐ यदक्रन्दः० ॐ स्कन्दाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥३॥

ॐ विष्णोर० ॐ विष्णवे घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥४॥

ॐ आब्रह्मन्० ॐ ब्रह्मणे घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥५॥

ॐ सजोषाऽइन्द्र० ॐ इन्द्राय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥६॥

ॐ असियमः० ॐ यमाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥७॥

ॐ कार्षिरसि० ॐ कालाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥८॥

ॐ चित्रावसो० ॐ चित्रगुप्ताय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥९॥

प्रत्यधिदेवतानां बलिसमर्पणम्

ॐ अग्निन्दूतम्० ॐ अग्नये घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥१॥

ॐ अप्स्वन्तः० ॐ अद्भ्यः घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥२॥

ॐ स्योनापृथिवि० ॐ पृथिव्यै घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥३॥

ॐ इदंविष्णुः० ॐ विष्णवे घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥४॥

ॐ त्रातारमिन्द्रम्० ॐ इन्द्राय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥५॥

ॐ अदित्यैरास्ना० ॐ शच्यै घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।६।।

ॐ प्रजापतेन० ॐ प्रजापतये घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।७।।

ॐ नमोस्तुसर्प्पे० ॐ सर्पेभ्य घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।८।।

ॐ ब्रह्मजज्ञानम्० ॐ ब्रह्मणे घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।९।।

विनायकादिपञ्चलोकपालानां बलिसमर्पणम्

ॐ गणानान्त्वा० ॐ विनायकाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।१।।

ॐ अम्बेऽअम्बिके० ॐ दुर्गायै घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।२।।

ॐ व्वातोवा० ॐ वायवे घृतपायसाभावे एष दध्यक्षतबलिर्नमः ।।३।।

ॐ उद्ध्र्वाऽअ० ॐ आकाशाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।४।।

ॐ यावाङ्कशा० ॐ अश्विभ्यां घृतपायसाभावे एष दध्यक्षतबलिर्नमः।।५।।

दिक्पालेभ्यो बलिसमर्पणम्

इन्द्राय०- ॐ इन्द्रस्तु महसा दीप्तः सर्वदेवाधिपो महान् ।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ।।

ॐ इन्द्राय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।१।।

अग्नये०- ॐ आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः ।
धूमकेतुरजोऽध्यक्षस्तस्मै नित्यं नमो नमः ।।

ॐ अग्नये माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।२।।

यमाय०- ॐ यमश्चोत्पलपत्राभः किरीटी दण्डधृक्सदा ।
धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ।।

ॐ यमाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।३।।

निर्ऋतये०- ॐ निर्ऋतिस्तु पुमान्कृष्णः सर्वरक्षोऽधिपो महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ।।

ॐ निर्ऋतये माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।४।।

वरुणाय० - ॐ वरुणः सर्वलो विष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ।।

ॐ वरुणाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।५।।

वायवे० - वायुस्तु सर्ववर्णोऽयं सर्वगन्धवहः शुचिः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ।।

ॐ वायवे माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।६।।

सोमाय० - ॐ गौरो यस्तु पुमान्सौम्यः सर्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ।।

ॐ सोमाय(कुबेराय) माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।७।।

ईशानाय० - ॐ ईशानःपुरुषः शुक्लः सर्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ।।

ॐ ईशानाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।८।।

ब्रह्मणे० - ॐ पद्मयोनिश्चतुर्मूर्त्तिर्वेदावासः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ।।

ॐ ब्रह्मणे माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।।९।।

अनन्ताय० - योसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः ।।

ॐ अनन्ताय माषभक्ताभावे एष दध्यक्षतबलिर्नम ।।१०।।

अष्टवस्वादिबलिसमर्पणम्

ॐ सुगावो० ॐ ध्रुवाद्यष्टवसुभ्यः माषभक्ताभावे एष दध्यक्षतबलिर्नमः।।१।।

ॐ यज्ञोदेवानाम्० ॐ धात्रादिद्वादशादित्येभ्यः माषभक्ता० एष द०।।२।।

ॐ यऽएतावन्तः० ॐ वीरभद्राद्येकादशरुद्रेभ्यः माषभक्ता० द० ।।३।।

ॐ गौरीमिमाय० ॐ गौर्यादिषोडशमातृभ्यः माषभक्ता० एष द०।।४।।

ॐ गणानान्त्वा० ॐ गणपतये माषभक्ता० एष द० ॥५॥

ॐ मरुतोयस्य० ॐ आवहादिसप्तमरुद्भ्यः माषभक्ता० एष द०॥६॥

ब्रह्मविष्णुरुद्रार्कवनस्पतीनां बलिसमर्पणम्

ॐ ब्रह्मजज्ञानम्० ॐ ब्रह्मणे माषभक्ता० एष द० ॥१॥
ॐ इदंविष्णुः० ॐ विष्णवे माषभक्ता० एष द०॥२॥
ॐ मानस्तोके० ॐ रुद्राय माषभक्ता० एष द० ॥३॥
ॐ अग्निरस्मि० ॐ अर्काय माषभक्ता० एष द० ॥४॥
ॐ वनस्पते वीड्वङ्गः० ॐ वनस्पतये माषभक्ता० एष द० ॥५॥

एवं फलादिभूरिभक्ष्याणि सूर्यादिद्व्युत्तरशतदेवताभ्यो नमः । इति वेद्युपरि हस्तमात्रं फलपुष्पशोभितं वितानकं बृहस्पतिदैवतं **ॐ सूर्यादिद्व्युत्तरशतदेवताभ्यो नमः** इति संकल्प्य समर्पणं कुर्यात् ।

होमसङ्कल्पः- एवं पूजां निर्वर्त्य अग्नेर्दक्षिणत उत्तराभिमुख उपविश्य कुशयवजलान्यादाय- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा ग्रहशान्तिकर्मणि इदमाज्यादिहवनीयद्रव्यं पूर्वमाघारावाज्यभागौ प्रजापतीन्द्राग्निसोमदेवताभ्यः, प्रधानभूतेभ्यः, सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेत्वाख्यग्रहेभ्यः, ईश्वरोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्ताख्याधिदेवताभ्यः, अग्न्यब्भूमिविष्णिवन्द्रेन्द्राणीप्रजापतिसर्पब्रह्माख्यप्रत्यधिदेवताभ्यः, विनायकदुर्गावाय्वाकाशाख्यलोकपालेभ्यः, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्ताख्यदिक्पालेभ्यः, ध्रुवाद्यष्टवसुभ्यः, धात्रादिद्वादशादित्येभ्यः, वीरभद्राद्येकदशरुद्रेभ्यः, गौर्यादिषोडशमातृभ्यः, आवहादिसप्तमरुद्भ्यः, ब्रह्मविष्णुरुद्रार्कवनस्पतिदेवेभ्यः, उत्तराङ्गभूर्भुवः, स्वरग्निवरुणसवितृविष्णुविश्वदेवमरुत्स्वर्कप्रजापतिस्विष्टकृद्देवेभ्यो मया त्यक्तम् यथादैवतमस्तु न मम इति सर्वदेवतोद्देशेन युगपद्द्रव्यत्यागं कुर्यात् । प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात् ।

होमविधिः- होमश्च प्रणवादिस्वाहान्तैस्तत्तद्दैवतमन्त्रैः ऋषिदेवताच्छन्दोनुकीर्तनपूर्वकम्- नवग्रहाधिदेवताप्रत्यधिदेवतापञ्चलोकपालदशदिक्पालाग्र

वसुद्वादशादित्यैकादशरुद्रषोडशमातृसप्तमरुद्ब्रह्मविष्णुरुद्रार्कवनस्पतीनां प्रधानदेवतानां प्रत्येकम् अष्टोत्तरशतम्, अष्टविंशतिः, द्वादश, अष्टौ वा आहुतयः इत्येवं कार्यः । वस्वादित्यरुद्रमातृमरुतां मन्त्रानुरोधेन समुदितानामेव होमः प्रत्येकं मन्त्राभावात् ।

ततः समुदितपक्षे एकपञ्चाशद्देवताः[1] । तत्राष्टोत्तरशताहुतिषु, पञ्चसहस्राणि पञ्चशतान्यष्टौ चाहुतयः ५५०८ । अष्टविंशत्याहुतिषु, चतुर्दशशतान्यष्टाविंशतिश्चाहुतयः १४२८ । द्वादशाहुतिषु, षट्शतानि द्वादशचाहुतयः ६१२ । अष्टाहुतिषु, चतुःशतान्यष्टौ चाहुतयः ४०८ भवन्तीति।

अथ होमः

जापकः सूक्तानि मन्त्राँश्च जपेत् । गुरुः सर्वाध्यक्षस्तिष्ठेत् ।

आज्यहोमः- ततो वरदनामाग्निं प्रतिष्ठाप्य **तदेवाग्निः०, चत्वारिशृङ्गा०** इति ध्यात्वा **वैश्वानरोन०** इत्यावाह्य **अग्नेनय०** इति पूजयेत् । तिस्रो रेखाः सप्तजिह्वाश्च संपूज्याः । ततः समिद्धतमे निर्धूमे हुताशने दक्षिणजानु पातयित्वा होता कुशेन ब्रह्मणान्वारब्धः आज्यपूर्णस्रुवेण प्रथमं मनसा- **ॐ प्रजापतय** इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता नवग्रहमखे आज्यहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा प्राजापत्यमाघारं जुहुयात् । स्रुवावस्थितहुतशेषं प्रोक्षणीपात्रे निदध्यात् ।

ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रोदेवता नवग्रहमखे आज्यहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** प्रोक्षणीपात्रेऽपि, इति द्वितीयमाघारमग्नेर्दक्षिणभागे जुहुयात् ।

ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता नवग्रहमखे आज्य-

---

[1] मातृणां पूजनमेव न होम इति पक्षमाश्रित्य, एकपञ्चाशद्देवतानां होमसंख्या सङ्कलिता भवेत् । तासामपि **होमपक्षस्वीकारे** तु अधिका संख्या भवति देवतानां द्विपञ्चाशत्संख्यत्वादिति बोध्यम् । गणपतेरपि होमो न स्वीकृतः । अन्यथा त्रिपञ्चाशत्संख्या-देवताः स्युः ।

होमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये** प्रोक्षणीपात्रेऽपि, इत्याग्नेयमाज्यभागं जुहुयात् ।

ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता नवग्रहमखे आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** प्रोक्षणीपात्रेऽपि, इति द्वितीयमाज्यभागमग्नेरुत्तरभागे जुहुयात् ।

प्रधानदेवताहोमः- ब्रह्मणानन्वारब्धो जुहुयात् । यथोक्तघृताक्तसमिदादिहोमं मृगीमुद्रया कुर्यात् । यथोक्तसमिदभावे पालाश्य एव ग्राह्याः तदभावे घृताक्तैस्तिलैर्होमं कुर्यात् ।

नवग्रहहोमः

सूर्यहोममन्त्रः- ॐ आकृष्णेनेति हिरण्यस्तूपऋषिः सविता देवता त्रिष्टुप्छन्दः सूर्यप्रीतये कपिलाग्नौ आज्यहोमेऽर्कसमिद्धोमे च विनियोगः । **ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।। स्वाहा इदꣳसूर्याय** इति त्यागो यजमानस्य स्वयं होमकर्तृत्वे, अन्येषां होमकर्तृत्वे तु पूर्वमेव युगपत्त्याग उक्तः ।।१।।

सोमहोममन्त्रः- ॐ इमन्देवा इति वरुणऋषिः सोमो देवता यजुः(अत्यष्टिश्छन्दः) सोमप्रीतये पिङ्गलाग्नौ आज्यहोमे पलाशसमिद्धोमे च विनियोगः। **ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियायइमममुष्य्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजास्वाहा ।। इदꣳसोमाय** ।।२।।

भौमहोममन्त्रः - ॐ अग्निर्मूर्द्धेति विरूपाक्षऋषिरङ्गारको देवता गायत्रीच्छन्दः कुजप्रीतये धूम्रकेत्वग्नौ आज्यहोमे खदिरसमिद्धोमे च विनियोगः। **ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्त्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति** ।। स्वाहा इदं कुजाय ।।३।।

बुधहोममन्त्रः- **ॐ उद्बुध्यस्वे**ति परमेष्ठीऋषिर्बुधो देवता त्रिष्टुप्छन्दो बुधप्रीतये जाठराग्नौ आज्यहोमेऽपामार्गसमिद्धोमे च विनियोगः। **ॐ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमानश्श्चसीदत।।** स्वाहा इदं बुधाय।।४।।

बृहस्पतिहोममन्त्रः- **ॐ बृहस्पतेऽअती**ति गृत्समदऋषिर्बृहस्पतिर्देवता त्रिष्टुप्छन्दो बृहस्पतिप्रीतये शिखिनामाग्नौ आज्यहोमेऽश्वत्थसमिद्धोमे च विनियोगः । **ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणंधेहिचित्रम् ।।** स्वाहा इदं बृहस्पतये ।।५।।

शुक्रहोममन्त्रः- **ॐ अन्नात्परिस्रुत** इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो देवता जगतीच्छन्दः शुक्रप्रीतये हाटकाग्नौ आज्यहोमे उदुम्बरसमिद्धोमे च विनियोगः । **ॐ अन्नात्परिस्त्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।।** स्वाहा इदं शुक्राय ।।६।।

शनिहोममन्त्रः- **ॐ शन्नोदेवीरि**ति दध्यङ्ङाथर्वणऋषिः शनैश्चरो देवता गायत्रीछन्दः शनैश्चरप्रीतये महातेजोऽग्नौ आज्यहोमे शमीसमिद्धोमे च विनियोगः । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शँय्योरभिस्त्रवन्तुनः ।।** स्वाहा इदं शनैश्चराय ।।७।।

राहुहोममन्त्रः- **ॐ कयानश्चित्र** इति वामदेवऋषी राहुर्देवता गायत्रीछन्दो राहुप्रीतये हुताशनाग्नौ आज्यहोमे दूर्वासमिद्धोमे च विनियोगः। **ॐ कयानश्श्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता ।।** स्वाहा इदं राहवे ।।८।।

केतुहोममन्त्रः - **ॐ केतुङ्कृण्वन्नि**ति मधुच्छन्दा ऋषिः केतवो देवता गायत्रीछन्दः केतुप्रीतये रोहिताग्नौ आज्यहोमे कुशसमिद्धोमे च विनियोगः।

ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ।। स्वाहा इदं केतुभ्यः ।।९।।

अधिदेवताहोमः

अधिदेवताहोमे पलाशसमिद्भिस्तदभावे घृताक्तैस्तिलैर्होमः कार्यः ।

ईश्वरस्य होमः- ॐ त्र्यम्बकम्इति वसिष्ठऋषिः रुद्रो देवताऽनुष्टुप्छन्दः ईश्वरप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः। **ॐ त्र्यम्बकँय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्वारुकमिवबन्धनान्मृत्त्योर्मुक्षीयमामृतात् ।।** स्वाहा इदमीश्वराय । अत्रप्रणीतोदकस्पर्शः ।।१।।

उमायाः ० - ॐ श्रीश्चते इत्युत्तरनारायणऋषिरुमादेवता त्रिष्टुप्छन्द उमाप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।** स्वाहा इदमुमायै ।।२।।

स्कन्दस्य० - ॐ यदक्रन्द इति भार्गवजमदग्निदीर्घतमसऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतयेः आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ यदक्क्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्व्वन्।।** स्वाहा इदं स्कन्दाय।।३।।

विष्णोः ० - ॐ विष्णोरराटमिति प्रजापतिर्ऋषिर्विष्णुर्देवता यजुर्विष्णुप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः । **ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्त्थोविष्णोःस्यूरसिविष्णोर्द्ध्रुवोसिवैष्णवमसिविष्णवेत्त्वा ।।** स्वाहा इदं विष्णवे ।।४।।

ब्रह्मणः ० - ॐ आब्रह्मन्निति प्रजापतिर्ऋषिः, उत्कृतिश्छन्दो ब्रह्मा देवता ब्रह्मप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः। **ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्यो-**

वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।। स्वाहा इदं ब्रह्मणे ।।५।।

इन्द्रस्य० - ॐ सजोषाऽइन्द्र इति विश्वामित्रऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता इन्द्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्द्वान् । जहिशत्रूँ१।।रपमृधोनुदस्वाथाभयङ्कृणुहिविश्श्वतोनः ।।** स्वाहा इदमिन्द्राय ।।६।।

यमस्य० - ॐ असियम इति भार्गवजमदग्निदीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दः यमप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ असियमोऽअस्यादित्त्योऽअर्वन्नसित्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाव्विपृक्त्तऽआहुस्त्तेत्रीणिदि्विबन्न्धनानि ।।** स्वाहा इदं यमाय ।।७।। अत्र प्रणीतोदकस्पर्शः ।

कालस्य० - ॐ कार्षिरसि इति प्रजापतिऋषिः (दध्यङ्ङाथर्वणः) कालो देवता अनुष्टुप्छन्दः कालप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ कार्षिरसिसमुद्द्रस्यत्त्वक्षित्त्याऽउन्नयामिसमापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ।** स्वाहा इदं कालाय ।।८।। अत्रप्रणीतोदकस्पर्शः ।

चित्रगुप्तस्य० - ॐ चित्रावसो इति ऋषय ऋषयश्चित्रगुप्तो देवता जगतीछन्दः चित्रगुप्तप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ चित्रावसोस्वस्त्तितेपारमशीय ।।** स्वाहा इदं चित्रगुप्ताय ।।९।। अत्रप्रणीतोदकस्पर्शः ।

प्रत्यधिदेवताहोमः

अग्नेर्होमः- ॐ अग्निन्दूतमिति विरूपाक्षऋषिरग्निर्देवता गायत्रीछन्दः अग्निप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ अग्ग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे। देवाँ२।।ऽआसादयादिह ।।** स्वाहा इदमग्नये।।१।।

अपाम्० - ॐ अप्प्स्वन्तरिति बृहस्पतिर्ऋषिरापो देवता उष्णिक्छन्दः

अपां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्प्रशस्तिष्ष्वश्श्वाभवतव्वाजिनः । देवीरापोयोवऽऊर्म्मिःप्प्रतूर्त्तिःककुन्मान्वाजसास्तेनायंव्वाजꣳसेत्**। स्वाहा इदमद्भ्यः।।२।।

पृथिव्याः- ॐ स्योनापृथिवीति मेधातिथिर्ऋषिः पृथिवी देवता गायत्रीछन्दः पृथिवीप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।** स्वाहा इदं पृथिव्यै ।।३।।

विष्णोः- ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दो विष्णुप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ इदंविष्णुर्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।।** इदं विष्णवे।।४।।

इन्दस्य- ॐ त्रातारमिन्द्रमिति गर्गऋषिरिन्द्रो देवता त्रिष्टुप्छन्दः इन्द्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः ।।** स्वाहा इदमिन्द्राय ।।५।।

शच्याः - ॐ अदित्यैरास्न्नासीति दध्यङ्ङाथर्वणऋषिरिन्द्राणी देवता यजुः शचीप्रीतये आज्यहोमे प० स० हो० चरुहोमे च विनियोगः । **ॐ अदित्त्यैरास्न्नासीन्द्राण्याऽउष्णीषःपूषासिधर्म्मायदीष्ष्व ।।** स्वाहा इदं शच्यै ।।६।।

प्रजापतेः- ॐ प्रजापते इति हिरण्यगर्भऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापतिप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्त्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् ।।** स्वाहा इदं प्रजापतये ।।७।।

सर्पाणाम्- ॐ नमोस्तुसर्पेभ्य इति प्रजापतिर्ऋषिः सर्पा देवताः अनुष्टुप्छन्दः सर्पाणां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः ।

ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः ।। स्वाहा इदं सर्पेभ्यः ॥८॥

ब्रह्मणः- ॐ ब्रह्मजज्ञानमिति प्रजापतिर्ऋषिर्ब्रह्मादेवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ ब्रह्मजज्ञानम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः । सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।।** स्वाहा इदं ब्रह्मणे ॥९॥

विनायकादिपञ्चलोकपालहोमः

विनायकस्य होमः- ॐ गणानान्त्वेति प्रजापतिर्ऋषिर्गणपतिर्देवता यजुर्विनायकप्रीतये आज्यहोमे प० स० हो० चरुहोमे च विनियोगः । **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।।** स्वाहा इदं विनायकाय ॥१॥

दुर्गायाः- ॐ अम्बेऽअम्बिके इति प्रजापतिर्ऋषिर्दुर्गा देवता अनुष्टुप्छन्दो दुर्गाप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ अम्बेऽअम्बिकेम्बा॒लिकेनमानयतिकश्श्चन । ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।।** स्वाहा इदं दुर्गायै ॥२॥

वायोः-ॐ व्वातोवेति बृहस्पतिर्ऋषिर्वातो देवता उष्णिक् छन्दो वायुप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ व्वातोवामनोवागन्धर्व्वाःसप्तविꣳशतिः । तेऽअग्ग्रेऽश्श्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ।।** स्वाहा इदं वायवे ॥३॥

आकाशस्य- ॐ ऊर्द्ध्वाऽअस्येति प्रजापतिर्ऋषिराकाशो देवता उष्णिक्छन्दः आकाशप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ उर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीꣳष्यग्नेः । द्युमत्तमासुप्प्रतीकस्यसूनोः ।।** स्वाहा इदमाकाशाय ॥४॥

अश्विनोः- **ॐ यावाङ्कशे**ति मेधातिथिर्ऋषिरश्विनौ देवते गायत्री छन्दः अश्विनोः प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ यावाङ्कशामधुमत्त्यश्श्विनासूनृतावती । तयायज्ञम्मिमिक्षतम् ।।** स्वाहा इदमश्विभ्याम् ।।५।।

दिक्पालहोमः

इन्द्रस्य होमः- **ॐ त्रातारमिन्द्रमि**ति गर्गऋषिरिन्द्रोदेवता त्रिष्टुप्छन्दः इन्द्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः ।।** स्वाहा इदमिन्द्राय ।।१।।

अग्नेः- **ॐ अग्निन्दूतमि**ति विरुपाक्षऋषिरग्निर्देवता गायत्रीछन्दः अग्निप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ अग्ग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे । देवाँ२।।ऽआसादयादिह ।।** स्वाहा इदमग्नये ।।२।।

यमस्य- **ॐ असियम** इति भार्गवजमदग्निदीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दो यमप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ असियमोऽअस्यादित्त्योऽअर्व्वन्नसित्त्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाव्विपृक्तऽआहुस्त्तेत्रीणिदिविबन्धनानि ।।** स्वाहा इदं यमाय ।।३।। अत्रप्रणीतोदकस्पर्शः ।

निर्ऋतेः- **ॐ एषतेनिर्ऋत** इति वरुणऋषिर्निर्ऋतिर्देवता यजुर्निर्ऋतिप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ एषतेनिर्ऋतेभागस्त्तञ्जुषस्वस्वाहा ।।** इदं निर्ऋतये ।।४।। अत्र प्रणीतोदकस्पर्शः ।

वरुणस्य- **ॐ इमम्मेव्वरुण** इति शुनःशेपऋषिर्वरुणो देवता गायत्रीछन्दो वरुणप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ इमम्मेव्वरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।।** स्वाहा इदं वरुणाय।।५।।

वायो:- ॐ व्वातोवेति बृहस्पतिर्ऋषिर्वातो देवता उष्णिक् छन्दो वायुप्रीतये आज्यहोमे प०सं०हो० चरुहोमे च विनियोग: । **ॐ व्वातोवामनोवागन्धर्व्वा:- सप्तविꣳशति:। तेऽअग्ग्रेऽश्श्वमयुञ्जँस्तेऽअस्म्मिञ्जवमादधु:।।** स्वाहा इदं वायवे ॥६॥

सोमस्य(कुबेरस्य)- ॐ व्वयꣳसोमेति बन्धुर्ऋषि: सोमो देवता (कुबेर:) गायत्रीछन्द: सोम (कुबेर) प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोग: । **ॐ व्वयꣳसोमव्व्रतेतवमनस्त्तनूषुबिब्भ्रत:प्रजावन्त्त:सचेमहि।।** स्वाहा इदं सोमाय (कुबेराय) ॥७॥

ईशानस्य- ॐ तमीशानमिति गौतमऋषिरीशानो देवता जगतीछन्द: ईशानप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोग: । **ॐ तमीशानञ्जगतस्त्तस्त्थुषस्प्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्ब्ध:स्वस्त्तये ।।** स्वाहा इदमीशानाय ॥८॥ अत्र प्रणीतोदकस्पर्श: ।

ब्रह्मण:- ॐ ब्रह्मजज्ञानमिति प्रजापतिर्ऋषिर्ब्रह्मादेवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोग: । **ॐ ब्रह्मजज्ञानम्पुरस्त्ताद्विसीमत:सुरुचोव्वेनऽआव: । सबुध्न्न्याऽउपमाऽअस्यव्विष्ठा:- सतश्श्चयोनिमसतश्श्चव्विव: ।।** स्वाहा इदं ब्रह्मणे ॥१०॥

अनन्तस्य- ॐ नमोस्तु सर्पेभ्य: इति प्रजापतिर्ऋषिरनन्तो देवता अनुष्टुप्छन्द: अनन्तप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोग:। **ॐ नमोस्त्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्त्तरिक्षेयेदिवितेब्भ्य:सर्प्पेब्भ्यो नम: ।।** स्वाहा इदमनन्ताय ॥१०॥

वस्वादिहोम:

वसूनाम्०- सुगावोदेवा इति प्रजापतिर्ऋषि: वसवो देवतास्त्रिष्टुप्छन्दो ध्रुवाद्यष्टवसूनां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोग: ।

ॐ सुगावोदेवासदनाऽअकर्म्मयऽआजग्ग्मेदꣳसवनञ्जुषाणाः। भरमाणाव्वहमानाहवीꣳष्यस्म्मेधत्तव्वसवोव्वसूनि ।। स्वाहा इदं वसुभ्यः ।।१।।

द्वादशादित्यानाम्०- ॐ यज्ञोदेवानामिति कुत्सऋषिरादित्या देवताः त्रिष्टुप्छन्दो धात्रादिद्वादशादित्यानां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ यज्ञोदेवनाम्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः। आवोर्व्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्चिद्यावरिवोवित्तरासदादित्त्येब्भ्यस्त्त्वा।।** स्वाहा इदमादित्येभ्यः ।।२।।

रुद्राणाम्- ॐ यऽतावन्तश्चेति परमेष्ठी ऋषिः (प्रजापतिर्वा देवा वा ऋषयः) बहुरुद्रा देवता अनुष्टुप्छन्दो वीरभद्राद्येकादशरुद्राणां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ यऽएतावन्तश्श्चभूयाꣳसश्श्चदिशोरुद्राव्वितस्त्थिरे । तेषाꣳसहस्त्रयोजनेबधन्न्वानितन्न्मसि ।।** स्वाहा इदं रुद्रेभ्यः ।।३।। अत्र प्रणीतोदकस्पर्शः ।

मरुताम्- ॐ मरुतोयस्येति गौतमऋषिर्मरुतो देवता गायत्रीछन्दो मरुतां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ मरुतोयस्यहिक्षयेपाथादिवोव्विमहसः। ससुगोपातमोजनः।।** स्वाहा इदं मरुद्भ्यः।।४।।

विनायकादिपञ्चकहोमः

ब्रह्मणः- ॐ आब्रह्मन्निति प्रजापतिर्ऋषिः, उत्कृतिश्छन्दो ब्रह्मा देवता ब्रह्मप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः। **ॐ आब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।** स्वाहा इदं ब्रह्मणे ।।५।।

विष्णोः- ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दो

विष्णुप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ इदंविष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम्। समूढमस्यपाꣳसुरेस्वाहा ।।** इदं विष्णवे ॥६॥

रुद्रस्य- ॐ मानस्तोके इत्यस्य परमेष्ठी ऋषिः (प्रजापतिर्वा देवा वा ऋषयः) कुत्सश्च ऋषिः एकरुद्रो देवता जगतीछन्दो रुद्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ मानस्त्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः । मानोव्वीरान्त्रुद्द्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ।।** स्वाहा इदं रुद्राय ॥ अत्र प्रणीतोदकस्पर्शः ॥७॥

अर्कस्य० - ॐ चित्रन्देवानामिति कुत्स आङ्गिरसऋषिः सूर्यो देवता त्रिष्टुप्छन्दोऽर्कप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः । आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्त्माजगतस्त्तस्त्थुषश्श्च ।।** स्वाहा इदमर्काय ॥८॥

वनस्पतेः- ॐ व्वनस्प्पते इति प्रजापतिर्ऋषिर्वनस्पतिर्देवता त्रिष्टुप्छन्दो वनस्पतिप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ व्वनस्प्पतेव्वीड्ड्वङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्रतरणःसुवीरः । गोभिःसन्नद्धोऽअसिव्वीडयस्वास्त्थातातेजयतुजेत्त्वानि ।।** स्वाहा इदं वनस्पतये ॥९॥

इतिं प्रधानदेवताहोममन्त्राः

प्रधानदेवतानां जप्यसूक्तानि

सूर्यसूक्तम्- ॐ विब्भ्राडित्यादिकस्य सप्तदशर्चानुवाकात्मकस्य सूर्यसूक्तस्य आद्याया विभ्राट्, अनन्तराणां तिसृणां प्रस्कण्वऋषिः, पञ्चम्या अवत्सारः काश्यपऋषिः षष्ठ्या वेनऋषिः, सप्तम्याः कुत्सऋषिः, अष्टम्या अगस्त्यऋषिः, नवम्याः श्रुतकक्षसुकक्षावृषी, दशम्याः प्रस्कण्वः, ततो द्वयोः कुत्सः, ततो द्वयोर्जमदग्निः, पञ्चदश्या नृमेधः, षोडश्याः कुत्सः, अन्त्याया हिरण्यस्तूप आङ्गिरसः, इति ऋषयः । सर्वासां सूर्यो देवता । आद्यायाः पञ्चम्याश्च जगती, द्वितीयादितिसृणां नवम्या दशम्याश्च गायत्री,

त्रयोदशीपञ्चदश्योर्बृहती, चतुर्दश्याः सतोबृहती, शिष्टानां सप्तानां त्रिष्टुप् इति छन्दांसि सूर्यप्रीतये विनियोगः ।

ॐ व्विब्भ्राड्बृहत्त्पिबतुसोम्म्यम्मद्ध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ।
व्वातजुतोय्योऽअभिरक्षतित्त्मनाप्प्रजाःपुपोषपुरुधाव्विराजति ।।१।।
ॐ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः । दृशेव्विश्श्वायसूर्य्यम् ।।२।।
ॐ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२।।ऽअनु । त्वंव्वरुणपश्यसि ।।३।।
ॐ दैव्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्यत्त्वचा। मद्ध्वायज्ञꣳसमञ्जाथे।।४।।
ॐ तम्प्रत्क्नथापूर्व्वथाव्विश्श्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् । प्रती-
चीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ।।५।। ॐ अयंव्वेन-
श्श्चोदयत्त्पृश्निगर्ब्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने । इममपाꣳसङ्गमे-
सूर्य्यस्यशिशुन्नव्विप्प्रामतिभीरिहन्ति ।।६।। ॐ चित्रन्देवानामुदगादनीक-
ञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः । आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआ-
त्त्माजगतस्तस्त्थुषश्श्च ।।७।। ॐ आनऽइडाभिर्व्विदथेसुशस्स्तिव्विश्श्वा-
नरःसवितादेवऽएतु । अपियथायुवानोमत्त्सथानोव्विश्श्वञ्जगदभिपित्त्वे-
मनीषा ।।८।। ॐ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य । सर्व्वन्तदिन्द्रते-
व्वशे ।।९।। ॐ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य । व्विश्श्वमा-
भासिरोचनम् ।।१०।। ॐ तत्त्सूर्य्यस्यदेवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तो-
र्व्विततꣳसञ्जभार। यदेदयुक्त्तहरितःसधस्त्थादाद्रात्रीव्वासस्तनुतेसि-
मस्म्मै ।।११।। ॐ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यो-
रुपस्त्थे । अनन्तमन्न्यद्रुशदस्यपाजःकृष्णमन्न्यद्धरितःसम्भरन्ति ।।१२।।
ॐ बण्महाँ२।।ऽअसिसूर्य्यबडादित्त्यमहाँ२।।ऽअसि । महस्त्तेसतोमहि-
मापनस्यतेद्धादेवमहाँ२।।ऽअसि ।।१३।। ॐ बट्सूर्य्यश्श्रवसा-
महाँ२।।ऽअसिसत्रादेवमहाँ२।।ऽअसि । मह्नादेवानामसुर्य्यःपुरोहितोवि-
भुज्ज्योतिरदाब्भ्यम् ।।१४।। ॐ श्रायन्तऽइवसूर्य्यंव्विश्श्वेदिन्द्रस्यभक्षत।
व्वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ।।१५।। ॐ अद्यादे-
वाऽउदितासूर्य्यस्यनिरꣳहसःपिपृतानिरवद्यात् । तन्नोमित्रोवरुणोमामह-

न्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ।।१६।। ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।१७।।

सोमसूक्तम्- ॐ अषाढंयुत्त्सु इत्यादिकस्य ऋक्चतुष्टयात्मकसोमसूक्तस्य गौतमऋषिः सोमो देवतात्रिष्टुप्छन्दः सोमप्रीतये जपे विनियोगः । (यजुः संहिता अ. ३३ मं. ३०-४३) ।

ॐ अषाढंय्युत्त्सुपृतनासुपप्प्रिꣳस्वर्षामप्प्सांव्वृजनस्यगोपाम् । भरेषुजाꣳसुक्षितिꣳसुश्श्रवसञ्जयन्तन्त्वामनुमदेमसोम ।।१।। ॐ सोमोधेनुꣳसोमोऽअर्व्वन्तमाशुꣳसोमोव्वीरङ्कर्म्मण्यन्ददाति । सादन्न्यंव्विदत्थ्यꣳसभेयम्पितृश्श्रावणंय्योददाशदस्म्मै ।।२।। ॐ त्वमिमाऽओषधीःसोमविश्श्वास्त्त्वमपोऽअजनयस्त्त्वङ्गाः । त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषावितमोव्ववर्त्थ ।।३।। ॐ देवेननोमनसादेवसोमरायोभागꣳसहसावन्नभियुद्ध्य । मात्त्वातनदीशिषेव्वीर्य्यस्योभयेब्भ्यःप्प्रचिकित्त्सागविष्टौ ।।४।।
(य.सं.अ.३४-मं. २१-२४) ।

भौमसूक्तम्- ॐ अग्निर्मूर्द्धेति विरूपाक्षऋषिर्भौमो देवता गायत्रीछन्दो भौमप्रीतये जपे विनियोगः । **ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्त्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ।।१।।**

बुधसूक्तम्- ॐ उद्बुद्ध्यस्वेति परमेष्ठी ऋषिर्बुधो देवता त्रिष्टुप्छन्दो बुधप्रीतये जपे विनियोगः । **ॐ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्म्मिन्त्सधस्त्थेऽअध्युत्तरस्म्मिन्विश्श्वेदेवायजमानश्श्चसीदत ।।१।।**

बृहस्पतिसूक्तम्- ॐ बृहस्प्पतेऽअतीति गृत्समदऋषिर्बृहस्पतिर्देवता त्रिष्टुप्छन्दो बृहस्पतिप्रीतये जपे विनियोगः । **ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मा-**

सुद्रविणंधेहिचित्रम् ।।१।।

शुक्रसूक्तम्- ॐ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो देवता जगतीछन्दः शुक्रप्रीतये जपे विनियोगः । **ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंविपानᳬशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।।१।।**

शनिसूक्तम् - ॐ शन्नोदेवीरिति दध्यङ्ङाथर्वणऋषिः शनैश्चरो देवता गायत्रीछन्दः शनैश्चरप्रीतये जपे विनियोगः । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शँय्योरभिस्रवन्तुनः ।।१।।**

राहुसूक्तम्- ॐ कयानइत्यादितृचस्य राहुसूक्तस्य वामदेवऋषी राहुर्देवता गायत्रीछन्दो राहुप्रीतये जपे विनियोगः । **ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता ।।१।। ॐ कस्त्वासत्त्योमदाताम्मᳬहिष्ठोमत्त्सदन्धसः । दृढाचिदारुजेवसु ।।२।। अभीषुणः सखीनामविताजरितॄणाम् । शतम्भवास्यूतये ।।३।।** (य.सं.अ. २७ मं. ३९-४१) ।

केतुसूक्तम् - ॐ केतुङ्कृण्वन्निति मधुच्छन्दा ऋषिः केतवो देवताः गायत्रीछन्दः केतूनां प्रीतये जपे विनियोगः । **ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ।।१।।**

अधिदेवतासूक्तानि

रुद्रसूक्तम्- ॐ नमस्ते इति षट्षष्टिमन्त्रात्मकस्य रुद्रसूक्तस्य परमेष्ठी प्रजापतिर्वा ऋषिराद्यानां षोडशानामेकरुद्रोदेवता **नमस्ते०** इति गायत्री, ततस्तिस्रोऽनुष्टुभः, ततस्तिस्रः पङ्क्तयः, ततः सप्तानुष्टुभः, ततो द्वे जगत्यौ **नमोहिरण्यबाहवे०** इत्यादीनि पञ्चचत्वारिंशद्यजूंषि तेषां बहुरुद्रा देवताः, ततः सप्तानामेकरुद्रो देवता, **द्रापेऽअन्धसस्पते०** इत्युपरिष्टाद्बृहती, **इमारुद्राय०** इति जगती, **यातेरुद्र०** इत्यनुष्टुप्, **परिनोरुद्र० मीढुष्टम०**

इत्येते त्रिष्टुभौ, **विकिरिद्र०** इत्यादि द्वे अनुष्टुभौ, **असंख्यातासहस्राणि०** इत्यादिदशानां बहुरुद्रा देवता दशाप्यनुष्टुभः, **नमोऽस्तु०** इति त्रयाणां बहुरुद्रा देवता त्रीण्यपि यजूंषि सर्वेषां रुद्रप्रीतये जपे विनियोगः । **ॐ नमस्ते०** इत्यादि **जम्भेदध्मः०** इत्यन्तम् ६६ मन्त्राणि जपेत् । **हवामहे०** इत्यन्ताः षोडशैव वा सूक्तमिति रूपनारायणीये ।

उमासूक्तम्- ॐ श्रीश्चते इत्युत्तरनारायणऋषिरुमा देवता त्रिष्टुप्छन्द उमाप्रीतये जपे विनियोगः । **श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ।।**

स्कन्दसूक्तम्- यदक्रन्द० इति भार्गवजमदग्निदीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतये जपे विनियोगः । **ॐ यदक्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्राादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् ।।**

पुरुषसूक्तम्- ॐ सहस्रशीर्षेत्यादिषोडशर्चात्मकविष्णुसूक्तस्य नारायणपुरुषो देवता अन्त्यायास्त्रिष्टुप्छन्दः शिष्टानामनुष्टप्छन्दो विष्णुप्रीतये जपे विनियोगः। **ॐ सहस्रशीर्षापुरुषः०** इत्यादि **सन्तिदेवाः** इत्यन्तम् (१६) पुरुषसूक्तं प्रसिद्धम् ।।

ब्रह्मसूक्तम्- ॐ आब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मा देवता उत्कृतिश्छन्दोब्रह्मप्रीतये जपे विनियोगः । **ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्योवर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्यताम् ।।**

इन्द्रसूक्तम्- ॐ आशुःशिशान इति द्वादशर्चात्मकस्येन्द्रसूक्तस्याप्रतिरथऋषिरिन्द्रो देवता त्रिष्टुप्छन्द इन्द्रप्रीतये जपे विनियोगः । **ॐ आशुः**

शिशानः० इत्यादि **सचन्ताम्** इत्यन्तं द्वादशमन्त्रात्मकमिन्द्रसूक्तम् । (य. सं. अ. १७ मं. ३३-४४)।

यमसूक्तम्- ॐ असियम इति भार्गवजमदग्निर्दीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दो यमप्रीतये जपे विनियोगः । **ॐ असियमोऽअस्यादित्त्योऽअर्वन्नसित्त्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानि ।।** अत्रोदकस्पर्शः ।

कालसूक्तम्- ॐ कार्षिरसीतिप्रजापतिर्ऋषिः (अथवा) कालो देवता अनुष्टुप्छन्दः कालप्रीतये जपे विनियोगः । **ॐ कार्षिरसिसमुद्द्रस्यत्त्वक्षित्त्याऽउन्नयामिसमापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ।।** अत्र उदकस्पर्शः ।

चित्रगुप्तसूक्तम्- ॐ चित्रावसो० इति ऋषय ऋषयश्चित्रगुप्तो देवता जगतीछन्दः चित्रगुप्तप्रीतये जपे विनियोगः । **ॐ चित्रावसोस्वस्त्तितेपारमशीय ।।** अत्र उदकस्पर्शः ।

प्रत्यधिदेवतासूक्तानि

अग्निसूक्तम्- (सूर्यप्रत्यधिदेवताया अग्नेः) **ॐ अस्याजरासः** इत्यादिसप्तदशर्चस्याग्निसूक्तस्याद्याया वत्सप्रीतिर्ऋषिस्त्रिष्टुप्छन्दः, द्वितीयाया विरूपऋषिर्गायत्रीछन्दः, तृतीयाया गौतमऋषिर्गायत्रीछन्दः, चतुर्थ्या विरूपऋषिर्गायत्री छन्दः, पञ्चम्याः कुत्सऋषिस्त्रिष्टुप्छन्दः, षष्ठ्या वामदेव- ऋषिरेकोनाजगतीछन्दः, सप्तम्या विश्वामित्रऋषिस्त्रिष्टुप्छन्दः, अष्टम्या भरद्वाजऋषिस्त्रिष्टुप्छन्दः, नवम्या भरद्वाजऋषिर्गायत्रीछन्दः, दशम्या मेधातिथिर्ऋषिर्गायत्रीछन्दः, एकादश्याः शाक्त्यःपराशर ऋषिस्त्रिष्टुप्छन्दः, द्वादश्या अत्रिदुहिता विश्ववारा ऋषिः स्त्रिष्टुप्छन्दः, त्रयोदश्या भरद्वाजऋषिस्त्रिष्टुप्छन्दः, चतुर्दश्या वसिष्ठऋषिर्बृहतीछन्दः, पञ्चदश्याः प्रस्कण्वऋषिर्बृहतीछन्दः, षोडश्या वामदेवऋषिस्त्रिष्टुप्छन्दः, सप्तदश्या लुशोधानाकऋषिस्त्रिष्टुप्छन्दः, सर्वासामग्निर्देवता अग्निप्रीतये जपे विनियोगः।

ॐ अस्याजरासोदमामरित्राऽअर्च्चद्धूमासोऽअग्ग्नयःपावकाः । श्वितीचयःश्वात्रासोभुरण्यवोव्वनर्षदोव्वायवोनसोमाः ।।१।। ॐ हरयोधूमकेतवोव्वातजूताऽउपद्यवि । यतन्तेव्वृथगग्ग्नयः ।।२।। ॐ यजानोमित्रावरुणायजादेवाँ२।।ऽऋतम्बृहत् । अग्ग्नेयक्षिस्वन्दमम् ।।३।। ॐ युक्क्ष्वाहिदेवहूतमाँ२।।ऽअश्वाँ२।।ऽअग्ग्नेरथिरिव । निहोतापूर्व्यःसदः ।।४।। ॐ द्वेविरूपेचरतःस्वर्त्थेऽअन्न्यान्न्यावत्त्समुपधापयेते। हरिरन्न्यस्याम्भवतिस्वधाञ्छुक्क्रोऽअन्न्यस्यान्ददृशेसुवर्च्चाः।।५।। ॐ अयमिहप्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्ष्वीड्ड्यः । यमप्प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्भ्वंव्विशेविशे ।।६।। ॐ त्रीणिशतात्त्रीसहस्राण्यग्ग्निन्त्रिꣳशच्चदेवानवचासपर्य्यन् । औक्षन्घृतैरस्तृणन्बर्हिरस्म्माऽआदिद्धोतारन्न्यसादयन्त ।।७।। ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्यावैश्श्वानरमृतऽआजातमग्ग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।८।। ॐ अग्ग्निर्व्वृत्राणिजङ्घनद्द्रविणस्युर्व्विपन्न्यया । समिद्धःशुक्क्रऽआहुतः ।।९।। ॐ व्विश्श्वेभिःसोम्म्यम्मद्ध्वग्ग्नऽइन्द्रेणव्वायुना। पिबामित्रस्यधामभिः ।।१०।। ॐ आयदिषेनृपतिन्तेजऽआददशुचरेतोनिषिक्तन्द्यौरभीके । अग्ग्निःशर्द्धमनवद्यंय्युवानꣳस्वाद्ध्यञ्जनत्त्सूदयच्च ।।११।। ॐ अग्ग्नेशर्द्धमहतेसौभगायतवद्द्युम्म्नान्न्युत्तमानिसन्तु। सञ्जास्प्पत्त्यꣳसुयममाकृणुष्ष्वशत्रूयतामभितिष्ठामहाꣳसि ।।१२।। ॐ त्वाꣳहिमन्दूतममर्क्कशोकैर्व्ववृमहेमहिनःश्रोष्ष्यग्ग्नेः । इन्द्रन्नत्त्वाशवसादेवताव्वायुम्पृणन्तिराधसानृतमाः ।।१३।। ॐ त्वेऽअग्ग्नेस्वाहुतप्प्रियासःसन्तुसूरयः । यन्तारोयेमघवानोजनानामूर्व्वान्दयन्तगोनाम् ।।१४।। ॐ श्रुधिश्श्रुत्त्कर्णव्वह्निभिर्द्देवैरग्ग्नेसयावभिः । आसीदन्तुबर्हिषिमित्रोऽअर्य्यमाप्प्रातर्य्यावाणोऽअद्ध्वरम् ।।१५।। ॐ व्विश्श्वेषामदितिर्य्यज्ञियानांव्विश्श्वेषामतिथिर्म्मानुषाणाम् । अग्ग्निर्द्देवानामवऽआवृणानाःसुमृडीकोभवतुजातवेदाः ।।१६।। ॐ महोऽअग्ग्नेःसमिधानस्यशर्म्मण्ण्यनागामित्रेव्वरुणेस्वस्त्तये । श्रेष्ठेस्यामसवितुःसवीमनितद्देवानामवोऽअद्याव्वृणी-

महे ।।१७।। (य.सं.अ. ३३ मं. १-१७)।

अपां सूक्तम्- ॐ आपोहिष्ठेत्यादिंकस्य तृचस्याप्सूक्तस्य सिन्धुद्वीपऋषिरापोदेवता गायत्रीछन्दोऽपां प्रीतये जपे विनियोगः । **ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ।।१।। ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ।।२।। ॐ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ।।३।।** (य.सं.अ. ११ मं. ५०-५२)।

पृथिवीसूक्तम्- ॐ स्योनापृथिवीति मेधातिथिर्ऋषिः पृथिवीदेवता गायत्रीछन्दः पृथिवीप्रीतये जपे विनियोगः । **ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।**

विष्णुसूक्तम्- सहस्त्रशीर्षेत्यादिसूक्तं प्राग्वत् (१६ मन्त्राः) ।

इन्द्रसूक्तम् - ॐ आशुःशिशान इत्यादि द्वादशर्चमैन्द्रं सूक्तं प्राग्वत् (१२ मन्त्राः)।

इन्द्राणीसूक्तम्- ॐ अदित्यैरास्नासीति दध्यङ्ङाथर्वणऋषिरिन्द्राणीदेवता यजुरिन्द्राणीप्रीतये जपे विनियोगः । **ॐ अदित्त्यैरास्नासीन्द्राण्याऽउष्णीषःपूषासिघर्मायवीष्व ।।१।।**

प्रजापतिसूक्तम्- ॐ हिरण्यगर्ब्भ इत्यादिकस्य मन्त्रचतुष्टयात्मकस्य प्रजापतिसूक्तस्य हिरण्यगर्भऋषिः प्रजापतिर्देवता आद्यतृतीये त्रिष्टुभौ, द्वितीयचतुर्थे यजुषी, प्रजापतिप्रीतये जपे विनियोगः । **ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ।।१।। ॐ उपयामगृहीतोसिप्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिःसूर्य्यस्त्तेमहिमा । यस्त्तेहन्त्संवत्त्सरेमहिमासम्बभूवयस्त्तेवायावन्तरिक्षेमहिमासम्बभूवयस्त्तेदिविसूर्य्येमहिमासम्बभूवतस्म्मैतेमहिम्म्नेप्प्रजापतयेस्वाहादेवेब्भ्यः ।।२।। ॐ यःप्प्राणतोनिमिषतो-**

महित्त्वैकऽइद्राजाजगतोबभूव । यऽईशेऽअस्यद्द्विपदश्श्चतुष्प्पदःकस्मैदेवायहविषाविधेम ।।३।। ॐ उपयामगृहीतोसिप्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिश्श्चन्द्रमास्त्तेमहिमायस्त्तेरात्रौसंव्वत्त्सरेमहिमासम्बभूव। यस्त्तेपृथिव्व्यामग्नौमहिमासम्बभूवयस्त्तेनक्षत्रेषुचन्द्रमसिमहिमासम्बभूवतस्मैतेमहिम्न्नेप्प्रजापतयेदेवेब्भ्यःस्वाहा ।।४।। (य. सं. अ. २३ मं. १-४) ॥

सर्पसूक्तम्- ॐ नमोऽस्तु इत्यादितृचसूक्तस्य प्रजापतिर्ऋषिः सर्पा देवताः अनुष्टुप्छन्दः सर्पाणां प्रीतये जपे विनियोगः । **ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु। येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः ।।१।। ॐ याऽइषवोयातुधानानांय्येवाव्वनस्पतीँ१।।रनु । येवावटेषुशेरतेतेब्भ्यःसर्प्पेब्भ्योनमः ।।२।। ॐ येवामीरोचनेदिवोयेवासूर्य्यस्यरश्मिम्मषु । येषामप्प्सुसदस्कृतन्त्तेब्भ्यःसर्प्पेब्भ्योनमः ।।३।।** (य.सं.अ.१३ मं. ६-८)

ब्रह्मसूक्तम्- ॐ ब्रह्मजज्ञानमिति प्रंजापतिर्ऋषिर्ब्रह्मा देवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः । **ॐ ब्रह्मजज्ञानम्पुरस्त्ताद्विसीमतःसुरुचोव्वेनऽआवः। सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्श्चयोनिमसतश्श्चविवः ।।१।।**

विनायकादिपञ्चलोकपालसूक्तानि

गणेशसूक्तम्- ॐ गणानान्त्वेति प्रजापतिर्ऋषिर्गणपतिर्देवता यजुर्विनायकप्रीतये जपे विनियोगः । **ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।।१।।**

दुर्गासूक्तम्- ॐ अम्बेऽअम्बिके इति प्रजापतिर्ऋषिर्दुर्गा देवताऽअनुष्टुप्छन्दो दुर्गाप्रीतये जपे विनियोगः। **ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्श्चन। ससस्त्यश्श्चकःसुभद्द्रिकाङ्काम्पीलवासिनीम् ।।**

वायुसूक्तम्- ॐ नियुत्त्वान्वायो इत्यादिषडृचस्य वायुसूक्तस्याद्याया गृत्समद ऋषि:, द्वितीयाया: पुरुमीढाजमीढौ, ततस्तिसृणां प्रजापति:, षष्ठ्या व्यश्वआङ्गिरस इति ऋषय: । सर्वासां वायुर्देवता । द्वितीयाया अनुष्टुप्छन्द:, पञ्चम्यास्त्रिष्टुप्, शिष्टानां गायत्री इति छन्दांसि, वायुप्रीतये जपे विनियोग:। **ॐ नियुत्त्वान्वायवागह्ययꣳशुक्क्रोऽअयामिते । गन्तासिसुन्न्वतोगृहम् ।।१।। ॐ व्वायोशुक्क्रोऽयामितेमद्धवोऽअग्ग्रन्दिविष्टिषु । आयाहिसोमपीतयेस्प्पार्हेदेवोनियुत्त्वता ।।२।। ॐ व्वायुरग्ग्रेगायज्ञप्प्रीःसाकङ्गन्मनसायज्ञम् । शिवोनियुद्धिःशिवाभिः ।।३।। ॐ व्वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि । नियुत्त्वान्त्सोमपीतये ।।४।। ॐ एकयाचदशभिश्श्चस्वभूतेद्द्वाब्भ्यामिष्ट्येविꣳशतीच । तिसृभिश्श्चवहसेत्रिꣳशताचनियुद्द्भिर्व्वायविहताव्विमुञ्च ।।५।। ॐ तवव्वायवृतस्प्पतेत्त्वष्टुर्ज्जामातरद्द्भुत । अवाꣳस्यावृणीमहे ।।६।।** (य.सं.अ. २७ मं. २९-३४) ।

आकाशसूक्तम्- ॐ ऊर्द्ध्वाऽअस्येति द्वादशर्चस्य प्रजापतिर्ऋषिरग्निर्देवता उष्णिक्छन्द: आकाशप्रीतये जपे विनियोग: । **ॐ ऊर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीꣳष्यग्ग्ने । द्द्युमत्तमासुप्प्रतीकस्यसूनोः ।।१।। ॐ तनूनपादसुरोव्विश्श्ववेदादेवोदेवेषुदेवः । पथोऽअनक्तुमद्ध्वाघृतेन ।।२।। ॐ मद्ध्वायज्ञन्नक्षसेप्प्रीणानोनराशꣳसोऽअग्ग्ने । सुकृद्देवःसविताव्विश्श्ववारः ।।३।। ॐ अच्छायमेतिशवसाघृतेनेडानोव्वह्निर्न्नमसा। अग्ग्निꣳस्त्रुचोऽअद्ध्वरेषुप्प्रयत्त्सु ।।४।। ॐ सयक्षदस्यमहिमानमग्ग्नेःसऽईम्मन्द्रासुप्प्रयसः । व्वसुश्श्चेतिष्ठोव्वसुधातमश्श्च ।।५।। ॐ द्वारोदेवीरन्न्वस्यव्विश्श्वेव्व्रतादन्तेऽअग्ग्नेः । उरुव्व्यचसोधाम्म्नापत्त्यमानाः ।।६।। ॐ तेऽअस्ययोषणेदिव्व्येनयोनाऽउषासानक्क्ता । इमंय्यज्ञमवतामद्ध्वरन्नः ।।७।। ॐ दैव्व्याहोताराऽऊर्द्ध्वमद्ध्वरन्नोग्ग्नेर्ज्जिह्वामभिगृणीतम्। कृणुतन्नःस्विष्टिम् ।।८।। ॐ तिस्त्रोदेवीर्ब्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती। महीगृणाना ।।९।। ॐ तन्नस्तुरीयमद्धुतम्पुरुक्षुत्त्वष्टासुवीर्य्यम्। रायस्प्पोषंव्विष्ष्यतुनाभिमस्म्मे ।।१०।। ॐ व्वनस्प्पतेवसृजाररराणस्त्मना-**

देवेषु । अग्ग्निर्हव्यꣳशमितासूदयाति ।।११।। ॐ अग्ग्रेस्वाहाकृणुहिजातवेदऽइन्द्रायहव्यम् । व्विश्श्वेदेवाहविरिदञ्जुषन्ताम् ।।१२।। (य.सं.अ. २७ मं. ११-२२) ।

अश्विसूक्तम्- ॐ यावाङ्कशेति मेधातिथिर्ऋषिरश्विनौ देवते गायत्री छन्दोऽश्विनोः प्रीतये जपे विनियोगः । **ॐ यावाङ्कशामधुमत्त्यश्श्विनासूनृतावती । तयायज्ञम्मिमिक्षतम् ।।**

दिक्पालसूक्तम्

इन्द्रसूक्तम्- ॐ आशुःशिशान इति द्वादशर्चमैन्द्रं सूक्तं प्राग्वत् । **ॐ अस्याजरास** इति सप्तदशर्चमाग्नेयं सूक्तं प्राग्वत् ।

यमसूक्तम्- ॐ यमायत्त्वेतिदध्यङ्ङाथर्वणऋषिर्यमो देवता यजुर्यमप्रीतये जपे विनियोगः । **ॐ यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा । स्वाहाघर्म्मायस्वाहाघर्मःपित्रे । यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे । देवस्त्त्वासवितामद्ध्वानक्क्तु । पृथिव्याःसꣳस्पृशस्प्पाहि । अर्च्चिरसिशोचिरसितपोसि ।।** उदकस्पर्शः ।

निर्ऋतिसूक्तम्- ॐ असुन्न्वन्तमित्यादिकस्य तृचस्य निर्ऋतिसूक्तस्य प्रजापतिर्ऋषिर्निर्ऋतिर्देवता त्रिष्टुप्छन्दो निर्ऋतिप्रीतये जपे विनियोगः । **ॐ असुन्न्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्न्विहितस्कारस्य । अन्न्यमस्म्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुब्भ्यमस्त्तु ।।१।। ॐ नमःसुतेनिर्ऋतेतिग्ग्मतेजोयस्म्मयंव्विचृताबन्न्धमेतम् । यमेनत्त्वंय्यम्म्यासंव्विदानोत्तमेनाकेऽअधिरोहयैनम् ।।२।। ॐ यस्यास्त्तेघोरऽआसञ्जुहोम्म्येषांवन्धानामबसर्ज्जनाय । यान्त्वाजनोभूमिरितिप्प्रमन्दतेनिर्ऋतिन्त्वाहम्परिवेदव्विश्श्वतः ।।३।।** (य.सं.अ. १२ मं. ६२-६४)। उदकस्पर्शः।

वरुणसूक्तम्- इमंमेव्वरुण० तत्वायामि० इति द्वयोः शुनःशेप ऋषिर्वरुणो देवता गायत्रीत्रिष्टुभौ छन्दसी वरुणप्रीतये जपे विनियोगः । **ॐ इमम्मे-**

वरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।।१।। ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः । अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।।२।। (य.सं.अ. २१ मं. १-२)।

वायुसूक्तम्- ॐ नियुत्त्वानित्यादिषड्ऋचं वायव्यं प्राग्वत् ।

सोम(कुबेर)सूक्तम्- ॐ अषाढंय्युत्त्सु इत्यादि चतुर्ऋचं सौम्यं सूक्तं प्राग्वत् ।

ईशानसूक्तम्- ॐ रुद्राध्यायस्य षट्षष्टिमन्त्रात्मकमैशानं प्राग्वत् ॥ उदकस्पर्शः ।

ब्रह्मसूक्तम्- ॐ ब्रह्मजज्ञानमिति ब्रह्मणः प्राग्वत् ।

अनन्तस्य- ॐ नमोस्तुसर्प्पेब्भ्य इति तृचं सूक्तं प्राग्वत् ।

वस्वादीनाम्

वसुसूक्तम्- ॐ सुगावोदेवा इति प्रजापतिर्ऋषिर्वसवो देवतास्त्रिष्टुप्छन्दो वसूनां प्रीतये जपे विनियोगः । **ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्ग्मेदꣳसवनञ्जुषाणाः । भरमाणाव्वहमानाहवीꣳष्ष्यस्म्मेधत्तव्वसवोव्वसूनि।।** (य.सं.अ. ८ मं. १८)।

आदित्यसूक्तम्- ॐ इमागिर इति गृत्समदऋषिरादित्यो देवता त्रिष्टुप्छन्द आदित्यप्रीतये जपे विनियोगः । **ॐ इमागिरऽआदित्त्येब्भ्योघृतस्नूःसनाद्राजब्भ्योजुव्ह्वाजुहोमि । शृणोतुमित्रोऽअर्य्यमाभगोनस्तुविजातोव्वरुणोदक्षोऽअꣳशः ।।** (य.सं.अ. ३४ मं. ५४)।

रुद्रसूक्तम्- रुद्रास्य रुद्राध्यायः प्राग्वत् ॥

मरुत्सूक्तम्- ॐ शुक्क्रज्ज्योतिश्श्चेत्यादि षड्ऋचस्य मरुत्सूक्तस्य सप्तऋषय ऋषयः मरुतो देवताः आद्यायाश्चतुर्थ्याश्चोष्णिक्छन्दः, द्वितीयायास्तृतीयायाश्च गायत्रीछन्दः, पञ्चम्या जगतीछन्दः, षष्ठ्या गायत्र्युष्णिग्वाछन्दः मरुतां

प्रीतये जपे विनियोगः । **ॐ शुक्रज्ज्योतिश्श्चचित्रज्ज्योतिश्श्चसत्त्यज्ज्योतिश्श्चज्ज्योतिष्म्माँश्च । शुक्रश्चऽऋतपाश्श्चात्त्यंहाः ।।१।। ॐ ईदृङ्ङ्चान्न्यादृङ्ङ्चसदृङ्ङ्चप्प्रतिसदृङ्ङ्च । मितश्श्चसम्मितश्श्चसभराः ।।२।। ॐ ऋतश्श्चसत्त्यश्श्चद्ध्रुवश्श्चधरुणश्श्च । धर्त्ताचव्विधर्त्ताचव्विधारयः ।।३।। ॐ ऋतजिच्चसत्त्यजिच्चसेनजिच्चसुषेणश्श्च । अन्तिमत्रश्श्चदूरेऽअमित्रश्श्चगणः ।।४।। ॐ ईदृक्षासऽएतादृक्षासऽऊषुणःसदृक्षासःप्प्रतिसदृक्षासऽएतन । मितासश्श्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्म्मिन् ।।५।। ॐ स्वतवाँश्चप्प्रघासीचसान्तपनश्श्च। गृहमेधीचक्रीडीचशाकीचोज्जेषी ।।६।।**(य.सं.अ. १७ मं. ८०-८५)।

ब्रह्मसूक्तम्- ब्रह्मणः **ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनःप्पर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।**

विष्णुसूक्तम्- ॐ सहस्रशीर्षादि वैष्णवं प्राग्वत् ।

रुद्रसूक्तम्- रुद्राध्यायो रौद्रः प्राग्वत् ।

वनस्पतिसूक्तम्- ॐ व्वनस्प्पतेव्वीड्वङ्ग इति प्रजापतिर्ऋषिर्वनस्पतिर्देवता त्रिष्टुप्छन्दो वनस्पतिप्रीतये जपे विनियोगः । **ॐ व्वनस्प्पतेव्वीड्वङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्रतरणःसुवीरः । गोभिःसन्नद्धोऽअसिव्वीडयस्वास्त्थाताजयतुजेत्त्वानि ।।** (य.सं.अ. २९ मं. ५२)। इति जप्यसूक्तानि मन्त्राश्च।

उत्तराङ्गव्याहृत्यादिहोमः

व्याहृतिहोमः - तत उत्तराङ्गव्याहृतिहोमादिबर्हिर्होमान्तं पूर्णाहुतिप्राग्भाविकर्म कुर्यात् । तच्चैवम् **ॐ भूर्भुवः स्वः** इति महाव्याहृतीनां प्रजापतिर्ऋषि-

रग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि प्रायश्चित्तहोमे विनियोगः। ब्रह्मणान्वारब्धो जुहोति- **ॐ भूः स्वाहाः, इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे** । **ॐ स्वः स्वाहा, इदं सूर्याय** ।

पञ्चवारुणीहोमः- ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ त्वन्नोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्श्वाद्द्वेषाꣳसिप्रमुमुग्ध्यस्मत् ।।** स्वाहा इदमग्नीवरुणाभ्याम् ।

ॐ सत्त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि ।।** स्वाहा इदमग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्ने इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः(विराट्छन्दः) सर्वप्रायश्चितहोमे विनियोगः । **ॐ अयाश्श्चाग्ग्नेस्यनभिशस्त्तिपाश्श्चसत्त्यमित्त्वमयाऽअसि । अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा ।।** इदमग्नये ।

ॐ येतेशतमिति वामदेवऋषिर्वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्काश्च देवतास्त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ येतेशतंव्वरुणयेसहस्त्रंय्यज्ञियाःपाशावितताममहान्तः । तेभिर्न्नोऽअद्यसवितोतविष्णुर्विश्श्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।।** इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च ।

ॐ उदुत्तममिति शुनःशेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः। **ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳश्रथाय। अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं वरुणाय।

ॐ प्रजापतये इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रायश्चित्तहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा ॥

स्विष्टकृद्धोमःसंस्त्रवप्राशनञ्च- ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये

स्विष्टकृते । ततः संस्रवप्राशनं कृत्वा (द्विः) आचम्य (स्वाहेति अग्नौ पवित्रप्रतिपत्तिं कुर्यात्) ।

पूर्णपात्रदानम्- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा कृतैतन्नवग्रहशान्तिकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणे तुभ्यमहं संप्रददे । इति पूर्णपात्रं ब्रह्मणे दद्यात् ।

प्रणीताविमोकः- सपवित्रप्रणीताजलेन- **ॐ सुमित्रियानऽआपऽओषधयः-सन्तु ।।** इति यजमानस्य शिरोऽभिषिञ्चेत् **ॐ दुर्म्मित्रियास्त्तस्म्मैसन्तुयो-स्म्मान्द्वेष्टियञ्च व्वयन्द्विष्म्मः ।** इति सपवित्रप्रणीतापात्रमैशान्यां न्युब्जीकुर्यात्।

बर्हिर्होमः - ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य - **ॐ देवागातु** इत्यस्य मनसस्पतिर्ऋषिर्विराट् छन्दो वातो देवता बर्हिर्होमे विनियोगः । **ॐ देवागातुविदोगातुंव्वित्त्वागातुमित । मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहा-व्वातेधाः ।।** स्वाहा इति बर्हींषि हस्तेन जुहुयात् ।

क्षेत्रपालमहाबलिः- महाबलिं कुङ्कुमादियुतं सरक्तवस्त्रदीपं सदक्षिणं क्षेत्रपालाय दद्यात् । तत्र वाक्यम्- ॐ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं बलिं समर्पयामि, भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य आयुष्कर्ता क्षेमकर्ता शान्तिदस्तुष्टिदो भव । इति तं बलिं शूद्रेण दुर्ब्राह्मणेन वा चतुष्पथे क्षिपेत् । तत आचार्यः प्रक्षालितपाणिपाद आचामेत् ।

मङ्गलाभिषेकः- आचार्यादयो ब्राह्मणाः प्राङ्मुखा उदङ्मुखा वा ग्रहवेद्या ईशाने स्थापितशान्तिकलशजलेन (यजमानस्य) मङ्गलाभिषेकं कुर्युः । तत्र पौराणिका मन्त्राः -

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।।१।।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।।२।।

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ।।३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ।।४।।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।।५।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।।६।।
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।।७।।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ।।८।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।।९।।

वैदिकमन्त्राः - ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम् । सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्ग्नेःसाम्म्राज्ज्येनाभिषिञ्चामि ।।१।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम्। सरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामि।।२।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम् । अश्श्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि ।।३।। कोसिकतमोसिकस्म्मैत्त्वाकायत्त्वा। सुश्श्लोकसुमङ्गलसत्त्यराजन् ।।४।। शिरोमेश्श्रीर्य्यशोमुखन्त्त्विषिःकेशाश्श्चश्मश्श्रूणि । राजामेप्प्राणोऽअमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रम् ।।५।। जिह्वामेभद्द्रंव्वाङ्ङ्महोमनोमन्न्युःस्वराड्भामः । मोदाःप्प्रमोदाऽअङ्गुलिरङ्गानिमित्त्रम्मेसहः ।।६।। बाहूमेबलमिन्द्रियꣳहस्त्तौमेकर्म्मव्वीर्य्यम् । आत्त्माक्षत्त्रमुरोमम ।।७।। पृष्ठीर्म्मेराष्ट्रमुदरमꣳसौग्ग्रीवाश्श्चश्श्रोणी । ऊरूऽअरत्त्नीजानुनीव्विशो-

मेङ्गानिसर्ब्वतः ।।८।। नाभिर्म्मेचित्तंविज्ञानम्पायुर्म्मेपचितिर्ब्भसत् । आनन्दनन्दावाण्डौमेभगःसौभाग्ग्यम्पसः । जङ्ङ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्मिविशिराजाप्प्रतिष्ठितः ।।९।। प्रतिक्षत्त्रेप्प्रतितिष्ठामिराष्ट्रेप्प्रत्त्यश्श्वेषुप्प्रतितिष्ठामिगोषु । प्रत्यङ्गेषुप्रतितिष्ठाम्म्यात्मन्न्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टेप्प्रतिद्यावापृथिव्व्योःप्रतितिष्ठामियज्ञे ।।१०।। त्रयादेवाऽएकादशत्रयस्त्रिꣳशासुराधसः । बृहस्प्पतिपुरोहितादेवस्यसवितुःसवे । देवादेवैरवन्तुमा ।।११।। प्रथमाद्द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनसत्त्यंय्यज्ञेनयज्ञोयजुर्ब्भिर्य्यजूꣳषिसामभिःसामान्न्यृग्भिर्ऋचःपुरोनुवाक्याभिःपुरोनुवाक्क्यायाज्ज्याभिर्य्याज्ज्यावषट्कारैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा ।।१२।। द्यौः शान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः । वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिःसर्ब्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ।।१३।। तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् । पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्श्चशरदःशतात् ।।१४।। स्वस्तिनऽइन्द्रोवृद्धश्श्रवाःस्वस्तिनःपूषाव्विश्श्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प्पतिर्द्दधातु ।।१५।। व्विश्श्वानिदेवसवितर्दुरितानिपरासुव । यद्भद्रन्तन्नऽआसुव ।।१६।।

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टा स्वनेन नः पाहि चापज्यानिःस्वनेन च ।।१।।
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ।।२।।
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तैरक्षास्माँस्तथा भुवम् ।।३।।
खड्गशूलगदादीनि यानि चास्त्राणि चाम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ।।४।।
ॐ शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु । इति ।

नवग्रहदक्षिणा

एवमाचार्यादिभिरभिषिक्तो यजमानः प्राङ्मुख उपविष्ट उदङ्मुखेभ्य आचार्यर्त्विग्भ्यो दक्षिणां दद्यात् ।

सूर्यदक्षिणा- तत्र प्रथमं सूर्यप्रीतये कपिलां गां दद्यात् । देयब्राह्मणं त्रिःसंपूज्य देयं कुशजलेन प्रोक्ष्य कुशयवतिलजलान्यादाय- ॐ अद्येहेत्यादि-देशकालौ स्मृत्वा कृतैतन्नवग्रहयज्ञप्रतिष्ठार्थमिमां कपिलां (धेनुं) गां रुद्रदैवतां सूर्यप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ।

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।।

इत्युक्त्वा ब्राह्मणहस्ते जलं दद्यात् । ब्राह्मणश्च **ॐ स्वस्ति** इत्युक्त्वा स्वशाखोक्तां कामस्तुतिं पठेत् ।

सोमदक्षिणा- ततः अनेनैव प्रकारेण देवताभिधानपुरःसरं सोमाय समुद्रदैवतं शङ्खं दद्यात् ।

प्रार्थना- **ॐ पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।**
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ।।२।।

भौमदक्षिणा- भौमाय पूर्ववत् सङ्कल्पं कृत्वा रुद्रदैवतं वृषभं दद्यात् ।

प्रार्थना- **ॐ धर्मस्त्वं वृषरूपेण जगदानन्दकारकः ।**
अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ।।३।।

बुधदक्षिणा- पूर्ववत् सङ्कल्पं कृत्वा बुधायाग्निदैवतं हिरण्यं दद्यात् ।

प्रार्थना- **ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।**
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।४।।

बृहस्पतिदक्षिणा- बृहस्पतये बृहस्पतिदैवतं पीतवस्त्रयुग्मं दद्यात् ।

प्रार्थना- **ॐ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ।**
प्रदानात्तस्य मे विष्णुरतः शान्तिं प्रयच्छतु ।।

शुक्रदक्षिणा - शुक्राय यमदैवतं श्वेताश्वन्दद्यात् ।

प्रार्थना- विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ।
चन्द्रार्कवाहनं नित्यमतः शान्ति प्रयच्छ मे ।।६।।

शनिदक्षिणा- शनैश्चराय रुद्रदैवतां कृष्णां गां दद्यात् ।

प्रार्थना- ॐ यस्मात्त्वं पृथिवी सर्वा धेनो केशवसंभवा ।
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ।।७।।

राहुदक्षिणा- राहवे भैरवदैवतं लोहं दद्यात् ।

यस्मादायसकर्माणि त्वदधीनानि सर्वदा ।
लाङ्गलच्छुरिकादीनि अतः शान्तिं प्रयच्छ मे ।।८।।

केतुदक्षिणा- केतुभ्योऽग्निदैवतं छागं दद्यात् ।

प्रार्थना- ॐ यस्मात्त्वं छाग यज्ञानामङ्गत्वेन व्यवस्थितः ।
यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ।।९।।

इति नवग्रहाणां दक्षिणाः ।

दक्षिणाविमर्शः

सर्वाश्च दक्षिणाः सूर्यदक्षिणासमाना ज्ञातव्याः । तेन सोमाय शङ्खं दत्त्वा शङ्खमूल्यन्यूनं कपिलागवीमूल्यं तदानीमेव दद्यात् । एवं न्यूनस्थले सर्वत्र सूर्यदक्षिणासमा दक्षिणा कार्या । यथोक्तदक्षिणाऽलाभे आदित्यादिभ्यः सर्वेभ्यो ग्रहेभ्यः स्वर्णभूषितामेकैकां गां वा समानं सुवर्णमेव वा दक्षिणां दद्यात् । तत्र प्रमाणवचनानि -

सूर्यस्यैव समा कार्या यजमानेन दक्षिणा ।
सर्वेषामेव वा गावो दातव्या हेमभूषिताः ।।१।।
सुवर्णमथवा दद्यादगुरुर्वा येन तुष्यति ।
स्वस्वमन्त्रैः प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः ।।२।। इति।

भूयसी दक्षिणा- ॐ अद्येत्यादि अमुककर्माङ्गभूतग्रहमखकर्मणः प्रतिष्ठार्थमादित्यादिनवग्रहाणां प्रीतये इमां भूयसीं दक्षिणां नानावेदाध्यायिभ्यो नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं विभज्य दातुमहमुत्सृजे इति भूयसीं दक्षिणां दद्यात् ।

ब्राह्मणभोजनम्- ततः पूर्वोक्तहोमसङ्ख्यया यथाशक्ति वा ब्राह्मणभोजनं सङ्कल्पयेत् । तत्र वाक्यम्- अद्येहेत्यादि आदित्यादि नवग्रहाणां प्रीत्यर्थ नानावेदाध्यायिनो नानागोत्रान् नानाशर्मणो ब्राह्मणान् यथोपपन्नेनान्नेन यथाकालं भोजयिष्ये, आमान्नपक्षे यथोपपन्नेनामान्नेन तोषयिष्ये ।। इति ।

पूर्णाहूतिः- होता- ॐ अद्येहेत्यादि कृतस्य नवग्रहशान्तिहोमकर्मणः परिपूर्णतासिद्ध्यर्थं पूर्णाहुतिहोमं करिष्ये, इति संकल्प्य घृतपूर्णस्रुवे नारिकेलादिफलचन्दनपुष्पयुतं वस्त्रं निधाय यजमानान्वारब्धः पूर्णाहुतिं जुहुयात् । तत्र मन्त्राः- **ॐ समुद्द्रादूर्म्मिर्म्मधुमाँ२।।ऽउदारदुपाꣳशुनासममृतत्त्वमानट्। घृतस्यनामगुह्यंय्यदस्त्तिजिह्वादेवानाममृतस्यनाभिः।।१।। ॐ व्वयन्नामप्प्रब्ब्रवामाघृतस्यास्म्मिन्न्यज्ञेधारयामानमोभिः । उपब्ब्रह्माशृणवच्छस्यमानञ्चतुःशृङ्गोवमीद्गौरऽएतत् ।।२।। ॐ चत्त्वारिशृङ्गात्रयोऽअस्यपादाद्द्वेशीर्षेसप्प्तहस्त्तासोऽअस्य । त्रिधाबद्धोव्वृषभोरोरवीतिमहोदेवोमर्त्त्याँ२।।ऽआविवेश ।।३।। ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्याव्वैश्श्वानरमृतऽआजातमग्ग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।४।। ॐ पुनस्त्त्वादित्त्यारुद्द्रावसवःसमिन्न्धताम्पुनर्ब्ब्रह्माणोव्वसुनीथयज्ञैः । घृतेनत्त्वन्तन्न्वंव्वर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः ।।५।। ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ।।६।। ॐ सप्प्ततेऽअग्ग्नेसमिधःसप्प्तजिह्वाःसप्प्तऽऋषयःसप्प्तधामप्प्रियाणि । सप्प्तहोत्राःसप्प्तधात्त्वायजन्त्तिसप्प्तयोनीरापृणस्वघृतेनस्वाहा ।।७।। ॐ धामन्तेव्विश्श्वम्भुवनमधिश्श्रितमन्तःसमुद्द्रेहृद्यन्तरायुषि । अपामनीकेसमिथेयऽआभृतस्त्तमश्यामममधुमन्तन्तऽऊर्म्मिम् ।।८।।** इति सर्वमन्त्रपाठान्ते स्वाहा-

कारेणाग्नौ प्रक्षिपेत् । पूर्णाहुतिमुत्तमां जुहोति इति ब्राह्मणा ब्रूयुः ।

त्र्यायुषकरणम्- होता वह्निं पुष्पचन्दनादिभिः संपूज्य स्रुवेण किञ्चिद्भस्म गृहीत्वा **ॐ त्र्यायुषञ्जमदग्नेः०** इति मन्त्रेण यजमानस्य ललाटे तिलकं कुर्यात् । **ॐ कश्यपस्य त्र्यायुषम्०** इति ग्रीवायाम्, **ॐ यद्देवेषु त्र्यायुषम्०** इति दक्षिणबाहुमूले, **ॐ तत्तेऽअस्तु त्र्यायुषम्०** इति हृदि तिलकं कुर्यात् ।

देवताविसर्जनम्- यजमानः पुनः पुण्याहवाचनं कृत्वा गन्धपुष्पादिभिरुपचारैरावाहितदेवताः प्रत्येकं युगपद्वा पूजयित्वा प्रणमेत्। ततो यजमानो गुरुर्वा- **ॐ उत्तिष्ठब्ब्रह्मणस्प्पतेदेवयन्तस्त्वेमहे । उपप्प्रयन्तुमरुतःसुदानवऽइन्द्रप्प्राशूर्ब्भवासचा ।।**

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिध्यर्थं पुनरागमनाय च ।।

इति च पठित्वा अक्षतप्रक्षेपेण पीठदेवता विसर्जयेत् ।

घृतच्छाया- यजमानो रौप्ये कांस्ये ताम्रे वा पात्रे घृतं दूर्वां द्रव्यञ्च निधाय **तेजोसीत्यादि** पठन् छायां निरीक्षेत् । **ॐ तेजोसिशुक्क्रममृतमायुष्प्पाऽआयुर्म्मेपाहि । देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताभ्यामाददे ।।१।। ॐ ध्रुवासिद्ध्रुवोयंय्यजमानोस्म्मिनायतनेप्प्रजयापशुभिर्ब्भूयात् । घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिरसिव्विश्श्वनजस्यच्छाया ।।२।।** तत आज्यादिस्पर्शपूर्वकं प्रार्थनां कुर्यात् ।

आज्यप्रार्थना- ॐ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिञ्च वर्द्धय ।।१।।
ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् ।
आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ।।२।।
भौमान्तरिक्षं दिव्यं वा यन्मे कल्मषमागतम् ।
सर्वं तदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु ।।३।।

दूर्वाप्रार्थना- ॐ काण्डात्त्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानो-दूर्वेप्प्रतनुसहस्त्रेणशतेन च ।।

ॐ या क्षीरसागरोत्पन्ना दूर्वा पीयूषसंभवा ।
तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशोबलम् ।। इति ।

आज्यपात्रदानम्- ततः कुशादिसहिततदवलोकिताज्यपात्रमादाय- ॐ अद्येत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारिष्टोपशमनपूर्वकं तेजःप्रज्ञाशौर्य-यशोबलायुर्लक्ष्मीपुष्टिवर्द्धनार्थमिदं रौप्यकाँस्यताम्रान्यतमपात्रस्थितमाज्यं मृत्युञ्जयदैवतं मृत्युञ्जयप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहं संप्रददे । इति ब्राह्मणाय दद्यात् ।

प्रार्थना- ॐ कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ।।

ॐ अम्बकंय्यजामहे० इति मन्त्रेणमृत्युञ्जयं प्रार्थयेत् । ब्राह्मणश्च स्वस्तीति गृहीत्वा आशिषं दद्यात् ।

यज्ञोपकरणदानम्- यजमानः कुशादीन्यादाय इदं मण्डलाद्युपकरणमाचार्याय प्रतिपादयामीति प्रतिपत्तिरूपं दानं कुर्यात् (निष्क्रेतव्यानि निष्क्रीणीयात्)।

अच्छिद्रवाचनम्- ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ।।

इत्युक्त्वा **ॐ विष्णुः विष्णुः विष्णुः**, इति त्रिर्विष्णुं स्मृत्वाञ्जलिं बध्वा ब्राह्मणान् प्रार्थयेत् ।

मया यत्कृतं ग्रहशान्तिरूपं कर्मतन्न्यूनातिरिक्तं युष्मद्वचनात् **सर्वं परिपूर्णमस्तु** इति, ते च ब्रूयुः - **अस्तु परिपूर्णम् ।**

यस्य स्मृत्या० चतुर्भिश्च० इत्यादि पठेत् ।

कर्मब्रह्मार्पणम्- कायेन वाचा० इति पठित्वा- अनेन यथाशक्तियथाज्ञान कृतेन नवग्रहमखकर्मणा श्रीपरमेश्वरः प्रीयताम् । **ॐ तत्सद् ब्रह्मार्पणमस्तु**

इति जलेन कर्मब्रह्मार्पणं कुर्यात् । ततो ब्राह्मणा यजमानाय मन्त्राशिषो दद्युः ।

मन्त्राशीर्वादप्रदानम्

ॐ आब्ब्रह्मन्ब्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्यताम् ।।१।। (य.सं.अ. २२-२२)।

ॐ दीर्ग्घायुस्तऽओषधेखनितायस्म्मैचत्त्वाखनाम्म्यहम् । अथोत्त्वन्दीर्ग्घायुर्ब्भूत्त्वाशतवल्शाव्विरोहतात् ।।२।। (य.सं.अ.१२ मं. १००)।

ॐ पुनस्त्त्वादित्त्यारुद्द्रावसवःसमिन्न्धताम्पुनर्ब्ब्रह्माणोव्वसुनीथयज्ञैः । घृतेनत्त्वन्तन्न्वंव्वर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः ।।३।। (य.सं.अ. १२ मं. ४४)।

ॐ मनसःकाममाकूतिंव्वाचःसत्त्यमशीमहि । पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्मयि ।।४।। (य.सं.अ. ३९ मं. ४) ।

ॐ आयुष्यंवर्चस्यꣳरायस्पोषमौद्भिदम् । इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम् ।।५।। (य.सं.अ. ३४ मं. ५०)

ॐ नतद्द्रक्षाꣳसिनपिशाचास्त्तरन्तिदेवानामोजःप्प्रथमजꣳह्येतत्। योबिभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्ग्घमायुःसमनुष्ष्येषुकृणुतेदीर्ग्घमायुः ।।६।। (य.सं.अ. ३४ मं. ५१)।

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीयते । धान्यंधनंपशून्बहुपुत्रलाभंशतंसंवत्सरंदीर्घमायुः ।।७।। (श्रीसूक्ते)

ॐ शतञ्जीवशरदोवर्धमानःशतंहेमन्ताञ्छतमुवसन्तान् । शतमिन्द्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ।।८।।

ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।

इति तिलकमक्षतारोपणञ्च कुर्यात् ।

रक्षाबन्धनम्- ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ।।

ॐ त्वंय्यविष्ठदाशुषोनॄँःपाहिशृणुधीगिरः । रक्षातोकमुतत्वमना।।

इति मन्त्राभ्यां रक्षासूत्रं बध्नीयात् ।

इति ब्राह्मणेभ्यो मन्त्राशिषो गृहीत्वा यजमानस्तान् भोजयित्वा सानुनयं विसृज्य सुहृन्मित्रादियुतः सोत्साहो भुञ्जीत ।

— इति ग्रहशान्तिविधिः —

१६. मूलशान्तिविधिः

मूलजन्मफलविचारः -

तदाद्यपादके पिता विपद्यते जनन्यथो ।
तृतीयके धनक्षयश्चतुर्थकः शुभावहः ।।
मूलाद्यपादजो हन्ति पितरञ्च द्वितीयजः ।
मातरञ्च तृतीयोऽर्थान् सुहृदञ्च तुरीयजः ।।

अश्लेषाजन्मफलम् -

मूर्धास्यनेत्रगलमंसयुगञ्च बाहू
हृज्जानुगुह्यपदमित्यपि देहभाजः ।
बाणाद्रिनेत्रहुतभुक्श्रुतिनागरुद्र-
षणनन्दपञ्चशिरसः क्रमशश्च नाड्यः ।।
राज्यं पितुः क्षयो मातुः कामुकः पितृभक्तिमान् ।
बलाढ्यश्चात्मघाती च त्यागी भोगी धनी क्रमात् ।।

ज्येष्ठाजन्मफलम् -

ज्येष्ठादौ जननीमाता द्वितीये जननीपिता ।
तृतीये जननीभ्राता स्वस्य माता चतुर्थके ।।
आत्मानं पञ्चमे हन्ति षष्ठे गोत्रक्षयो भवेत् ।
सप्तमे चोभयकुलं ज्येष्ठभ्रातरमष्टमे ।।
नवमे श्वशुरं हन्ति सर्वस्वं दशमेंऽशके ।
तस्माच्छान्तिं प्रकुर्वीत प्राणिनां शुभमिच्छताम् ।।

प्रयोगः - जातस्य एकादशाहे द्वादशाहे जन्मर्क्षे वा शुभदिने शान्तिं कुर्यात् । गोमयोपलिप्तायां भूमौ स्वशाखोक्तविधिनाऽग्निं स्थापयेत् ।

सङ्कल्पः - ॐ अद्येत्यादिदेशकालौ स्मृत्वा ममास्य कुमारस्य कुमार्या वा मूलर्क्षप्रथचरणादिजन्मसूचितपित्ररिष्टादिशान्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नवग्रहमखपूर्वकं मूलजननशान्तिं करिष्ये । इति संकल्प्य, गणेशपूजनं पुण्याहवाचनमाचार्यादिब्राह्मणवरणञ्च कृत्वा ब्राहमणान् मधुपर्कवस्त्रालङ्कारादिभिर्यथाविभवमर्चयेत् ।

ततः पञ्चवारुणीयपर्यन्तमग्निकर्म कृत्वा, अग्नीशानदेशे **रक्षोहणमि**-त्यादि मन्त्रेण सर्षपान् विकीर्य, **आपोहिष्ठे**त्यादि तिसृभिः कर्मभूमिं संप्रोक्षेत्। मण्डपपक्षे मण्डपदेवतापूजनमधिकम् ।

कलशस्थापनम् - तत्र संप्रोक्षितायां भूमौ मध्ये पूर्वदक्षिणपश्चिमोत्तरेषु च वर्णकैरष्टदलं विलिख्य तत्र **महीद्यौरि**ति मन्त्रेण भूमिं स्पृष्ट्वा **ओषधयःसम्** इति मन्त्रेण द्रोणपरिमितान् यथाशक्ति वा व्रीहीन् प्रक्षिप्य तदुपरि ताम्रादिमयान् पञ्चकुम्भान्निधाय **इमम्मे** इति मन्त्रेण वारिणा प्रयूर्य गन्धद्वारामिति गन्धम्, **याऽओषधीरि**ति सर्वौषधीः, तदभावे चूतपल्लवान्, **स्योनापृथिवी**ति सप्तमृदः, **याःफलिनीरि**ति पूगीफलम्, **हिरण्यगर्भ** इति पञ्चरत्नानि, **आपोहिष्ठे**ति त्र्यृचेन पञ्चगव्यं क्षिपेत् । ततः -

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरणमयीं लक्ष्मीं जातवेदो ममावह ।।

इति मन्त्रेण सुवर्णं क्षिपेत् । ततो **वृहस्पतेऽअती**ति वस्त्रयुग्मेन कलशं वेष्टयित्वा **पूर्णादर्व्वी**ति तस्योपरि ताम्रादिमयं पूर्णपात्रं निदध्यात्।

मध्यमकलशे रुद्रप्रतिमास्थापनम्- ततो मध्यमकुम्भे कर्षेण तदर्धेन तदर्धेन वा सुवर्णेन निर्मितां रुद्रप्रतिमां पूर्णपात्रोपरि स्थापयित्वा **ॐ त्र्यम्बकमि**ति मन्त्रेण रुद्रमावाह्य षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत् ।

निर्ऋतिप्रतिमास्थापनम्- ततः पूर्वस्थापितपञ्चकुम्भोत्तरदेशस्थापितान्यतमकुम्भे पूर्णपात्रं संस्थाप्य वस्त्रेणाच्छाद्य तस्योपरि पिष्टेन चतुर्विंशतिदलानि लिखित्वा तत्र मध्ये पूर्वोक्तप्रमाणेन सुवर्णेन निर्मितां निर्ऋतिप्रतिमां संस्थाय

ॐ मोषूण इति मन्त्रेण निर्ऋतिमावाह्य पूजयेत् ।

अन्यदेवपूजनम्- तद्दक्षिणे इन्द्रम्, उत्तरे अप आवाह्य पूजयेत्। चतुर्विंशतिदलेषु पूर्वादिक्रमेण विश्वान् देवान्, विष्णुम्, वसून्, वरुणम्, अजैकपादम्, अहिर्बुध्न्यम्, पूषणम्, अश्विनौ, यमम्, अग्निम्, प्रजापतिम्, सोमम्, रुद्रम्, अदितिम्, बृहस्पतिम्, सर्पम्, पितृन्, भगम्, अर्यमणम्, सवितारम्, त्वष्टारम्, वायुम्, इन्द्राग्नी मित्रञ्च संपूजयेत् ।

ततो रक्तचन्दनपुष्पाणि, कृष्णमेषशृङ्गस्य धूपः, आज्यदीपः, सुरामांसपुरस्कृतान्नम्, पोलिकाश्च नैवेद्यम्, सुरास्थाने सैन्धवमिश्रितं क्षीरम्, मांसस्थाने लवणमिश्रितं पायसम्, इत्येतैर्नारिकेलपूगीफलवस्त्रद्रव्यादिना च निर्ऋतिं पूजयेत् । निर्ऋतिकलशोपरि शतच्छिद्रं ताम्रपात्रं धृत्वा अन्येषु **तत्त्वायामी**ति वरुणमावाह्य पूजयेत् ।

ततं आचार्यो मध्यमकलशं स्पृष्ट्वाषडङ्गादिशतरुद्रियं जपेत् । पावमानीयसूक्तञ्च पठेत्। **रक्षोहणमि**ति ऋचं पठेत् । **त्र्यम्बकमि**ति मन्त्रसहस्त्रं शतं वा जपेत् । अन्येषु कुम्भेषु **आशुःशिशानः** इत्यादि, श्रीसूक्तम्, शान्तिपाठञ्च पठेत् । इति पूजां समाप्य अग्निसमीपे गत्वा होमयेत् ।

होमसङ्कल्पः - ॐ अद्येत्यादिदेशकालौ स्मृत्त्वा अमुकगोत्रस्यास्य बालस्य मूलनक्षत्रामुकपादजन्मसूचितसूच्यमानसूचयिष्यमाणारिष्टदोषोपशमनार्थं पित्रादिपीडनदोषविनाशनार्थमायुरारोग्याभिवृद्धये श्रीपरमेश्वरप्रीत्यर्थं प्रत्येकमष्टोत्तरशतसंख्याकाभिराहुतिभिः रुद्रजलनिर्ऋतीन्द्रेभ्यो विश्वेदेवादिदेवताभ्योऽधिदेवताप्रत्यधिदेवताविनायकादिलोकपालादिभ्यः सर्वेभ्योऽमुकसंख्याकाभिराहुतिभिरमुकामुकद्रव्येण ब्राह्मणद्वारा होमयिष्ये। रुद्राय पायसम्, निर्ऋत्यादिभ्यश्चतुर्विंशतिभ्यः (सप्तविंशतिभ्यः) देवेभ्यः कृसरम्, अन्येभ्यो देवेभ्यश्चर्वाज्यं तत्तन्मन्त्रैर्होमयेत् । ततः स्रुवेण महाव्याहृतिभिराज्यं हुत्वा स्विष्टकृदादि प्रायश्चित्तहोमान्तं कुर्यात् ।

बलिदानम् - ततो दिक्पालनवग्रहविनायकादिभ्यो निर्ऋतीन्द्ररुद्रादिभ्यः

क्षेत्रपालाय च सदीपमाषभक्तबलिं **तेभ्यो नमः** इति मन्त्रेण दद्यात् ।

ततो ब्रह्मणे पूर्णपात्रदानं कृत्वा यजमान आचार्यो वा पूर्णाहुतिं जुहुयात् । ततः प्रणीताविमोकादि कर्मशेषं समाप्य चतुर्दिक्षु स्थापितांश्चतुरः कुम्भान् मध्यमकुम्भं दक्षिणकुम्भञ्च स्पृष्ट्वा **त्र्यम्बकमि**ति मन्त्रमष्टोत्तरशतं पठेदाचार्यः । **त्र्यम्बकं०, मोषूण०,** इति मन्त्रद्वयेन रुद्रनिर्ऋती पञ्चोपचारैः पूजयेत् ।

अभिषेकः - एवं पूजां समाप्य सर्वकलशस्थजलं पात्रान्तरे गृहीत्वाऽऽचार्यो यजमानं सर्वौषधिभिरनुलिप्ताङ्गधृतनववस्त्रं तद्वामतो धृतनववस्त्रां सपुत्रां तत्पत्नीमुपवेश्य तेषामुपरि वंशनिर्मितशतच्छिद्रान्वितशूर्पं निधाय तस्योपरि शतच्छिद्राकलितं ताम्रपात्रं संस्थाप्य वक्ष्यमाणमन्त्रैरभिषिञ्चेत् ।

अभिषेकमन्त्राः -

ॐ योऽसौ वज्रधरो देवो महेन्द्रो जलवाहनः ।
मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु ।।१।।
योऽसौ शक्तिधरो देवो हुतभुङ् मेषवाहनः ।
सप्तजिह्वश्च देवोऽग्निर्मूलदोषं व्यपोहतु ।।२।।
योऽसौ दण्डधरो देवो धर्मो महिषवाहनः ।
मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु ।।३।।
योऽसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः ।
प्रशामयतु मूलोत्थदोषं गण्डान्तसंभवम् ।।४।।
योसौ पाशधरो देवो वरुणश्च जलेश्वरः ।
नक्रवाहः प्रचेता नो मूलोत्थाघं व्यपोहतु ।।५।।
योऽसौ देवो जगत्प्राणो मारुतो मृगवाहनः ।
प्रशामयतु मूलोत्थं दोषं बालस्य शान्तिदः ।।६।।
योऽसौ निधिपतिर्देवो गदाभृन्नरवाहनः ।
मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु ।।७।।

योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः ।
आश्लेषमूलगण्डान्तदोषमाशु व्यपोहतु ॥८॥
विघ्नेशः क्षत्रपो दुर्गा लोकपाला नवग्रहाः ।
सर्वदोषप्रशमनं सर्वे कुर्वन्तु शान्तिदाः ॥९॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१०॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥११॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु वः सदा ॥१२॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जावपुः शान्तिः तुष्टिः कान्तिश्च मातरः ॥१३॥
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥१४॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च पूजिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥१५॥
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥१६॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ॥१७॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकार्यार्थसिद्धये ॥१८॥ इति ।

दानादिकम् - स्नानं विधाय धौते वाससी परिधाय तत्स्नानार्द्रवस्त्र सवस्त्रां धेनुञ्चाचार्याय दद्यात् । ब्रह्मणे वृषम्, रुद्रजापिने कृष्णमनड्वाहम्, अन्येभ्यो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां भूयसीञ्च दद्यात् ।

दक्षिणासंकल्पः- ॐ अद्येत्यादिदेशकालौ स्मृत्वा अमुकगोत्रस्य मम

मूलजातस्यास्य बालस्य शुभफलावाप्तये मूलनक्षत्रसूचितारिष्टशान्तिकरणसिद्ध्यर्थम् इमां गां सवत्सां रुद्रदैवताम्, वृषभं रुद्रदैवतम्, सुवर्णमग्निदैवतम्, रौप्यं चन्द्रदैवतम्, ताम्रं सूर्यदैवतममुकगोत्रेभ्योऽमुकशर्मभ्यो ब्राह्मणेभ्यो दक्षिणात्वेन युष्मभ्यमहं संप्रददे इति सङ्कल्प्य गवादीनां दानप्रतिष्ठाञ्च कुर्यात् ।

अर्घ्यदानम् - ततो रुद्रनिर्ऋत्यादिदेवतानाम् **ॐ उत्तिष्ठब्रह्मणस्पते** इति मन्त्रेण उत्तरपूजां विधाय अर्घंदद्यादनेन मन्त्रेण-

मूलाधीश नमस्तुभ्यं निर्ऋतीनां गणाधिप ।
गृहाणार्घं मयादत्तं मूलारिष्टप्रशान्तये ।।

स्थापितदेवतानां विसर्जनम् -

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ।। इति ।

उत्तराङ्गकृत्यम् - ब्राह्मणा वैदिकमन्त्रैरभिषेकं कृत्वा आशीर्मन्त्राँश्च पठेयुः। यजमानोऽपि ब्राह्मणेभ्यस्तिलकादिप्रसादं गृहीत्वा कर्म परमेश्वरार्पणं कुर्यात्। ततो ब्राह्मणभोजनम् ।

(ज्येष्ठाशान्तौ निर्ऋतिस्थाने इन्द्रम्, आश्लेषाशान्तौ निर्ऋतिस्थाने सर्पम्, अन्यान् सर्वान् देवान् मूलशान्तिवदेव संस्थाप्य पूजयेत् ।)

— इति मूलशान्तिः —

✿

१७. गोमुखप्रसवप्रयोगः[१]

सङ्कल्पः - ॐ अद्येत्यादिदेशकालौ स्मृत्वा अमुकगोत्रस्यामुकबालस्य मूलादिनक्षत्रोत्पत्तिसूचितारिष्टादिसकलदोषनिवारणार्थं श्रीसरस्वतीप्रीत्यर्थं गोमुखप्रसवमहं करिष्ये । इति संकल्प्य, दीपं प्रज्वलय्य, कलशं संस्थाप्य, तत्र वरुणमावाह्य संपूज्य, गणेशञ्च संपूज्य इन्द्रादिलोकपालाँश्च पूजयेत्।

आचार्यकृत्यम्- ततो गामादाय गोमयोपलिप्ते भूमौ पिष्टेनाष्टदलं विलिख्य, तस्योपरि यथाशक्ति धान्यं निक्षिप्य, तस्योपरि शूर्पं निधाय, शूर्पे रक्तवस्त्रं प्रसार्य, कृष्णतिलान् विकीर्य, शूर्पं सूत्रेण त्रिवारं वेष्टयित्वा, तस्योपरि प्राङ्मुखं शिशुं निधाय, शिशुसमीपे गोमुखमानीय, प्रसवं भावयित्वाचार्यो बालं स्पृष्ट्वेमं मन्त्रं पठेत् - **ॐ व्विष्णुर्य्योनिङ्कल्प्पयतुत्त्वष्टारूपाणिपिꣳशतु। आसिञ्चतुप्प्रजापतिर्द्धातागर्ब्भन्दधातुते ।।१।। ॐ गर्ब्भन्धेहिसिनीवालिगर्ब्भन्धेहिपृथुष्टके । गर्ब्भन्तेऽअश्विनौदेवावाधत्तांपुष्करस्त्रजौ ।।२।।**

गवाङ्गस्पर्शः - ततः पञ्चगव्येन शिशुं संप्रोक्ष्य आचार्यः शूर्पसहितं बालं हस्तेनादाय गोस्पर्शनं कारयित्वा वक्ष्यमाणमन्त्रेण गोमुखमारभ्यलाङ्गूलपर्यन्तं स्पृशेत् ।

ॐ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ।।

इति शिशुं मात्रे दद्यादाचार्यः । माता च पित्रे दद्यात् । पुनः पिता मात्रे दद्यात् । माता वस्त्रमपसार्य प्रसन्नं मुखमीक्षेत ।

---

[१] मूलाश्लेषादिनक्षत्रजातानां बालानां प्रथमं गोमुखप्रसवं विधाय मूलजननादिशान्तयो विधेयाः।

शिशोरभिषेकः - तत आचार्यः **ॐ आपोहिष्ठे**ति तिसृभिः पञ्चगव्येन शिशुमभिषिञ्चेत् । ततः पिता -

ॐ अङ्गादङ्गात् संभवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ।।

इति मन्त्रेण शिशुं मूर्ध्नि त्रिरवघ्राय मात्रे दद्यात् । आचार्यादिब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात् । धान्यादिकञ्चाचार्याय दत्त्वा भूयसीञ्च दद्यात् ।

— इति गोमुखप्रसवप्रयोगः —

◆

इति श्रीविद्वन्मण्डलमार्तण्डपरःसहस्रशिष्यमण्डलीलालितचरण-
युगलदधिराममरासिनिलिखिते कर्मकाण्डभास्करे
पूर्वाङ्गखण्डः सम्पूर्णः ।

◆

संस्कारखण्ड:

१. विवाहपद्धतिः

वागदानविधिः

कन्यायाचनम्- ज्योतिःशास्त्रोक्ते शुभे काले द्वौ चत्वारोऽष्टौ वा प्रशस्तवेषा वरपित्रादिना सहिता ब्राह्मणाः शकुनदर्शनपूर्वकं कन्यागृहमेत्य कन्यापितरं प्रार्थयेयुः - **अमुकस्य पुत्राय कन्यां प्रयच्छेति** ।

वाग्दानम्- दाता भार्याद्यनुमतिं कृत्वा **दास्यामी**ति चोच्चैस्त्रिर्ब्रूयात् । ततः कन्यादाता प्राङ्मुख उपविश्याचम्य देशकालौ स्मृत्वा करिष्यमाण-विवाहाङ्गभूतं वाग्दानमहं करिष्ये तदङ्गत्वेन श्रीगणेशस्य यथामिलितोपचारैः पूजनं चाहं करिष्ये, इति सङ्कल्प्य गन्धादि दक्षिणान्तोपचारैर्गणेशं पूजयित्वा श्रीगणेशसन्निहितस्थाने वरपितरं प्राङ्मुखमुपवेश्य स्वयं च तत्प्राच्यां प्रत्यङ्मुख उपविश्य तं गन्धताम्बूलादिभिः सम्पूज्य हरिद्राखण्डं पञ्चदृढ-पूगीफलानि च गन्धाक्षतालङ्कृतानि गृहीत्वा अमुकगोत्रोत्पन्नां मम पुत्रीममुक-नाम्नीमिमां कन्यां ज्योतिर्विदादिष्टे मुहूर्त्ते दास्ये इति वाचा संप्रददे, इति चोक्त्वा-

अव्यङ्गेऽपतितेऽक्लीबे दशदोषविवर्जिते ।
इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ ।।

इति पठेत् । ततो मन्त्रान्तरं च पठेत्-

वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया ।
वरावलोकनविधौ निश्चिन्तस्त्वं सुखी भव ।।

इति भ्रात्राद्यर्थं स्वीकर्तरि भ्रात्रर्थं मित्रार्थमित्याद्यूहः कार्यः ।

वरपित्रादिपूजनम्- ततो वरपित्रादीन् गन्धाक्षतशुभवस्त्रयुग्मभूषणताम्बूलपुष्पादिभिः कन्याञ्च यथाचारं पूजयेत् । ततो ब्राह्मणा आशीर्मन्त्रान्पठेयुः।

— इति वाग्दानविधिः —

वरणविधिः

द्वारागतवरपूजनवरणे- कुशादीन्यादाय- ॐ अद्येहेद्यादिदेशकालौ स्मृत्वा अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो ममामुकनाम्न्याः कन्यायाः करिष्यमाणविवाहङ्गत्वेनद्वारदेशागतस्यामुकगोत्रस्यामुकशर्मणो वरस्य कन्याप्रतिग्रहार्थं पूजनपूर्वकं वरणमहं करिष्ये, इति संकल्प्य यज्ञियदारुनिर्मितपीठोपरिपीतवस्त्रमास्तीर्य तदुपरि प्राङ्मुखस्थं वरमभिमुखीभूय हस्तयोरष्टाङ्गमर्घं कृत्वा कन्यापिता संमुखीभूय बद्धाञ्जलिः स्वयमेवैतान्मन्त्रान् पठेत् । वरकन्यादात्रोर्मध्ये वस्त्रं प्रसार्य आचार्यप्रभृतयो वा उच्चैः पठेयुः -

ॐ नमः श्रीपते नाथ नमस्तुभ्यमुमापते ।
गजवक्त्र नमस्तुभ्यं भारति त्वां नमाम्यहम् ।।
ॐ स्वस्ति नवग्रहाः स्वस्ति स्वस्ति नारायणः सदा ।
स्वस्ति सुरेश्वर इन्द्रो द्यौर्भूमिर्वायुः स्वस्तये ।।
ॐ स्वस्ति वैश्वानरः स्वस्तिं विश्वेदेवाश्च स्वस्तये ।
स्वस्ति रुद्रः पिता स्वस्ति स्वस्तिकर्ता महेश्वरः ।।
ॐ स्वस्ति वायुर्धनं स्वस्ति स्वस्तिदाता नृपः स्वयम् ।
स्वस्ति श्रीगणपतिश्चैव स्वस्ति श्रीर्माधवप्रिया ।।

ॐ प्रयतपाणिःशरणंप्रपद्येस्वस्तिसंबाधेष्वभयंन्नोवृद्धिः ।।

ॐ अथवरंवृणीतेऽश्रियःप्रयाणेसुखायकल्याणंधर्मार्थकाममोक्षरतोदेवायदातव्यम् । अविरलसन्तानचिरजीविनंसुखायविन्दानंसुतवरएवकामान्यस्तुवरः । प्रियसावित्रींगुणसंयुक्तांदोषरहितांबहुकुलनिर्मलसंयुक्ताम् । तुष्यन्तिदेवामातृगणोवरोऽभिषिक्तेदीर्घमायुःस्वस्तिव्रताब्रूहि ।।

आवाहयाम्यहं देवं सुन्दरं कामरूपिणम्
मम पापविनाशाय प्रजापतेति च क्रमात्

ॐ प्रजापतेनत्त्वदेतान्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् ।।

हिमाचलो यथा देवं रुद्रमावाहयत्पुरा ।
तथा भवन्तं प्रवरं वरमावाहयाम्यहम् ।।

ॐ नमस्तेरुद्द्रमन्न्यवऽउतोतऽइषवेनमः । बाहुब्भ्यामुततेनमः ।।

त्वं च ब्रह्मा त्वं च विष्णुस्त्वं च देवो महेश्वरः ।
आगच्छन् दिव्यमूर्तिस्त्वं सर्वपापहरो भव ।।

ॐ असङ्ख्यातासहस्स्राणियेरुद्द्राऽअधिभूम्म्याम् । तेषाꣳसहस्स्रयोजनेवधन्न्वानितन्न्मसि ।।

धर्मदं मोक्षदं चैव सर्वपापविनाशनम् ।
नारायणस्वरूपस्य पश्यामि वदनं तव ।।

ॐ अथव्वरंव्वृणीतेबलबद्धवैदेवाऽएतस्यग्रहस्यहोमंप्रेप्सन्तितेऽस्माऽएतंव्वरꣳसमर्द्धयन्तिक्षिप्रेनऽइमङ्ग्रहञ्जुहवदितितस्माद्वरंव्वृणीते।।१।। ॐ अथव्वरंव्वृणीतेयꣳहवैकञ्चसुषुवाणोव्वरंव्वृणीतेसोऽस्मैसर्व्वःसमृद्ध्यतेतस्माद्वरंव्वृणीते ।।२।। ॐ अथव्वाराह्याऽउपानहाऽउपमुञ्चते । अग्नौहवैदेवाघृतकुम्भम्प्रवेशयाञ्चक्रुस्ततोव्वराहःसम्बभूव । ततोव्वराहोमेदुरोघृताद्धिसम्भूतस्तस्माद्वराहेगावःसंजानतेस्वमेवैतद्रसमभिसञ्जानतेतत्पशूनामेवैतद्रसेप्रतितिष्ठतितस्माद्वाराह्याऽउपानहाऽउपमुञ्चते ।।३।। ॐ सऽआजगामगौतमोयत्रप्रवाहणस्यजैवलेरास । तस्माऽआसनमाहार्य्योदकमाहारयाञ्चकाराथहास्माऽअर्घञ्चकार ।।४।। ॐ सहोवाचव्वरंभवतेगौतमायदद्मइति । सहोवाचप्रतिज्ञातोमऽएषव्वरोयान्तुकुमारस्यान्तेव्वाचमभाषथास्तांमेब्रूहीति ।।५।। ॐ सहोवाचदैवेषुवैगौतमतद्वरेषुमानुषाणांब्रूहीति ।।६।। ॐ सहोवाचव्विज्ञायतेहास्तिहिरण्यस्योपात्तंगोऽअश्वानांदासीनांप्रवाराणांपरिधानानांमानोभवान्बहोरनन्तस्यापर्यन्तस्यभ्यवदान्योभू-

दिति। सवैगौतमतीर्थेनिच्छासाऽइति । उपैम्यहंभवन्तमिति । व्राचाहस्मैवपूर्व्वऽउपयन्ति ।।७।। ॐ सहोपायनकीर्त्ताऽउवाच । ॐ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्गलः । येचैनꣳरुद्राऽअभितोदिक्षुश्श्रिताःसहस्त्रशोवैषाꣳहेडऽईमहे ।।१।। इति पठित्वा पीतवस्त्रं निष्कासयेत्-

ॐ साधुभवानास्तामर्चयिष्यामो भवन्तमिति यजमानो ब्रूयात् **ॐ अर्चय** इति वरेणोक्ते **ॐ यानि कानि चे**तिमन्त्रेण त्रिःवारं जलेन वरं प्रदक्षिणीकृत्य तदग्रेऽञ्जलिं बद्ध्वा वरं प्रार्थयेत् ।

वरप्रार्थना- ॐ आगतोऽसि वरश्रेष्ठ सर्वकामार्थसिद्धये ।
प्रतिग्रहसमर्थोऽसि अर्घं गृह्ण नमोऽस्तु ते ।।
सर्वलक्षणसंपन्नं गुणत्रयसमन्वितम् ।
प्रजापतिस्वरूपस्त्वमर्घं प्रतिगृहाण मे ।। इति ।

वरपूजनम्- ततो वरहस्तोपरि विष्टरं स्थापयित्वा पुनश्च गन्धाक्षतविविधकुसुमजातिचंपकाम्राश्वत्थपञ्चरत्नपञ्चपल्लवगङ्गोदकयवकर्पूरपूगीफलताम्बूलदूर्वासर्षपलाजाँश्च वराञ्जलौ संस्थाप्य दधिमधुघृतपुष्पाक्षतगङ्गोदककुशाग्रयवतिलसर्षपसहितं शङ्खं गृहीत्वाष्टाङ्गेषु अर्घं दद्यात् ।

अर्घदानम्- अष्टाङ्गानि तु-
नाभौ हस्ते प्रदातव्यः स्कन्धे शिरसि पादयोः ।
जानुनो रुदरे वक्त्रे अष्टाङ्गोऽर्घः प्रकीर्तितः ।। इत्यष्टाङ्गानि।

अर्घप्रदानमन्त्रः- ॐ आगतोऽसि वरश्रेष्ठ सर्वकामार्थसिद्धये ।
प्रतिग्रहसमर्थोऽसि अर्घं गृह्ण नमोऽस्तु ते ।।
सर्वलक्षणसंपन्नं गुणत्रयसमन्वितम् ।
प्रजापतिस्वरूपस्त्वमर्घं प्रतिगृहाण मे ।।

ॐ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्गलः । येचैनꣳरुद्राऽअभितोदिक्षुश्श्रिताःसहस्त्रशोवैषाꣳहेडऽईमहे ।।१।। इति ततोऽञ्जलिं बद्ध्वा वरं प्रार्थयेत् ।

वरप्रार्थना- ॐ दूरदेशागतो भद्र शान्तिक प्रियदर्शन ।
कालक्षेपो न कर्तव्यो लग्नवेला प्रवर्तते ।।
वंशोद्भव कुले जातां योषितं चामुकाब्दिकीम् ।
तुभ्यं वर प्रदास्यामि प्रीयतां पुरुषोत्तमः ।।

गन्धादिर्भिवरणम्- ॐ नमोस्त्वनन्ताय० ॐ प्रजापतेन० इति मन्त्राभ्यां गन्धाक्षतपुष्पयज्ञोपवीतपुष्पमालादिभिर्वरं संपूज्य वरणसामग्रीं हस्ते गृहीत्वा एभिर्गन्धाक्षतपुष्पपूगीफलद्रव्ययज्ञोपवीतताम्बूलवासोभूषणादिभिः करिष्यमाणकन्यादानप्रतिग्रहार्थम् अमुकगोत्रममुकप्रवरममुकवेदाध्यायिनममुकशाखिनममुकशर्माणं विष्णुस्वरूपिणं वरत्वेन त्वामहं वृणे । इति वरण सामग्रीं वरहस्ते दद्यात्। **ॐ वृतोऽस्मि** इति वरः प्रतिब्रूयात् । ततो वरो यजमानाय तिलकाशीर्वादान्दत्वा कामस्तुतिं पठेत् । ततो यजमानो वरं गृहाभ्यन्तरं नयेत् ।

— इति द्वारागतस्य वरस्य पूजनवरणविधिः —

विवाहविधिः

प्रयोगः- अथ विवाहयोग्यस्थले कन्याहस्तेन षोडशहस्तं मण्डपं विधाय। तद्दक्षिणदिशि पश्चिमां दिशामाश्रित्य मण्डपसंलग्नमुत्तराभिमुखं कौतुकागारं निर्माय मण्डपाद्बहिरैशान्यां जामातृहस्तेन चतुर्हस्तां (चतुरङ्गुलमुच्छ्रितां चतुर्विंश-त्यङ्गुलायतां तावदेवविस्तृतां) सिकतादिपरिष्कृतां तुषकेशशर्करादिशून्यां वेणुनिर्मितां वेदिकाञ्च कारयेत् । विवाहदिने कृतनित्यक्रियेण जामातृपित्रा मातृकापूजाभ्युदयिकश्राद्धकरणपूर्वकं ग्रहशान्तिः कर्तव्या । कन्यापिता च प्रातर्नित्यक्रियां कृत्वा शुक्लाम्बरधरो मातृकापूजामाभ्युदयिकश्राद्धं च कृत्वाऽर्हणवेलायां मण्डपे प्रत्यङ्मुखः प्राङ्मुखो वोर्ध्वजानुर्वरं संबोध्य पूजयेत् ।

वरपूजनम्

सम्बोधनम्- ॐ साधुभवानित्यस्य प्रजापतिर्ऋषिर्ब्रह्मादेवता यर्जुर्वरार्चने विनियोगः । कन्यापिता- **ॐ साधुभवानास्तामर्चयिष्यामोभवन्तम्** इति ब्रूयात् । **ॐ अर्चय** इति वरेणोक्ते वरोपवेशनार्थं शुद्धमासनं दद्यात् ।

विष्टरदानम्- विष्टरमादाय यजमानः **ॐ विष्टरो विष्टरो विष्टरः** इत्यन्येनोक्ते, कन्यापिता- **ॐ विष्टरः प्रतिगृह्यताम्** इति वदेत्, वरः **ॐ विष्टरं प्रतिगृह्णामि** इत्यभिधाय विष्टरं गृहीत्वा विनियोगं कुर्यात्- **ॐ वर्ष्मोस्मी**त्याथर्वणऋषिर्विष्टरोदेवताऽनुष्टुप्छन्द आत्मस्तुतिपूर्वकोपवेशने विनियोगः । **ॐ वर्ष्मोस्मिसमानानामुद्यतामिवसूर्यः । इमंतमभितिष्ठामियोमाकश्चाभिदासति ।।** इत्यनेनासने विष्टरमुत्तराग्रं कृत्वा तदुपरि वर उपविशति ।

पाद्यदानम्- तत उपविश्य यजमानः पाद्यमञ्जलिनादाय- **ॐ पाद्यं पाद्यं पाद्यम्** इत्यन्येनोक्ते, कन्यापिता - **ॐ पाद्यं प्रतिगृह्यताम्** इति वदेत् । **ॐ पाद्यं प्रतिगृह्णामि** इत्यभिधाय यजमानाञ्जलितोऽञ्जलिना पाद्यमादाय वरः विनियोगं कुर्यात् । **ॐ विराजोदोहोसी**ति प्रजापतिर्ऋषिरापो देवता यजुःपादप्रक्षालने विनियोगः । **ॐ विराजोदोहोसिविराजोदोहमशीयमयिपाद्यायैविराजोदोहः ।।** इति दक्षिणपादं प्रक्षालयति । अनेनैव क्रमेणानेनैव मन्त्रेण वामपादं प्रक्षालयति । (अत्र कन्यापक्षीयाः पित्रादयः सर्वेऽपि वरकन्ययोः पादप्रक्षालनं कुर्वन्ति । इति देशाचारः)।

पुनर्विष्टरदानम्- ततः पूर्वद्विष्टरान्तरं गृहीत्वा यजमानः **ॐ विष्टरो विष्टरो विष्टरः** इत्यन्येनोक्ते, कन्यापिता- **ॐ विष्टरः प्रतिगृह्यताम्** इति वदेत् । वरः **ॐ विष्टरं प्रतिगृह्णामि** इत्यभिधाय विष्टरं प्रतिगृह्य **ॐ वर्ष्मोस्मी**तिमन्त्रेण प्रक्षालितयोश्चरणयोरधस्तादुत्तराग्रं निदधाति ।

अर्घदानम्- ततो दूर्वाक्षतफलपुष्पचन्दनदधिजलयुतार्घपात्रं गृहीत्वा यजमानः **ॐ अर्घोऽर्घोऽर्घः** इत्यन्येनोक्ते, **ॐ अर्घः प्रतिगृह्यतामि**ति वदेत् ।

ततो वरः **ॐ अर्घं प्रतिगृह्णामि** इत्यभिधाय यजमानहस्तादर्घमादाय विनियोगं कुर्यात् । **ॐ आपःस्थे**ति प्रजापतिर्ऋषिरापो देवता यजुरर्घग्रहणे विनियोगः। **ॐ आपःस्थयुष्माभिःसर्वान्कामानवाप्नवानि ।।** इति शिरस्यक्षतादिकं किञ्चिद्दत्त्वा पुनर्विनियोगं कुर्यात् । **ॐ समुद्रंवः** इत्याथर्वण ऋषिरापो देवता अनुष्टुप्छन्दः अर्घाभिमन्त्रणे विनियोगः । **ॐ समुद्रंवःप्प्रहिणोमिस्वांय्योनिमभिगच्छत । अरिष्टास्माकंव्वीरामापरासेचिमत्पयः ।।** इति पठित्वा अर्घपात्रमैशान्यां स्थापयेत् ।

आचमनीयदानम्- यजमान आचमनीयमादाय- **ॐ आचमनीयमाचनीयमाचमनीयम्** इत्यन्येनोक्ते, **ॐ आचमनीयं प्रतिगृह्यताम्** इति वदेत् । ततो वरः **ॐ आचमनीयं प्रतिगृह्णामि** इत्यभिधाय यजमानहस्तादाचमनीयमादाय विनियोगं कुर्यात् ।

ॐ आमागन्नितिपरमेष्ठी ऋषिरापो देवता बृहतीछन्दः आचमने विनियोगः । **ॐ आमागन्यशसासꣳसृजव्वर्च्चसा । तम्माकुरुप्प्रियम्प्रजानामधिपतिम्प्पशूनामरिष्टिंतनूनाम् ।।** इत्यनेन मन्त्रेण वर सकृदाचामेत् द्विस्तूष्णीमाचामेत् ।

मधुपर्कदानम्- यजमानः कांस्यपात्रस्थानि दधिमधुघृतानि बृहता कांस्यपात्रेण पिहितान्यादाय- **ॐ मधुपर्को मधुपर्को मधुपर्कः** इत्यन्येनोक्ते, **ॐ मधुपर्कः प्रतिगृह्यताम्** इति वदेत् । ततो वरः **ॐ मधुपर्कं प्रतिगृह्णामि** इत्यभिधाय विनियोगं कुर्यात् । **ॐ मित्रस्यत्वे**ति बृहस्पति (प्रजापति) ऋर्षिर्मधुपर्को देवता यजुः (पङ्क्तिश्छन्दः) मधुपर्कावेक्षणे विनियोगः । **ॐ मित्रस्यत्वाचक्षुषाप्रतीक्षे ।।** इति दातृकरस्थमेवनिरीक्ष्य पुनर्विनियोगं कुर्यात् ।

ॐ देवस्यत्वेतिबृहस्पतिराङ्गिरसऋषिः सविता देवता यजुर्मधुपर्कग्रहणे विनियोगः । **ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्प्रतिगृह्णामि ।।** इत्यनेन मधुपर्क गृहीत्वा वामहस्तेधृत्वा पुनर्विनियोगं कुर्यात् । **ॐ नमः श्यावे**तिप्रजापति ऋर्षिः सविता देवता यजुर्मधुपर्कालोडने विनियोगः ।

ॐ नमःश्यावास्यायान्नशनेयत्तऽआविद्धन्तत्तेनिष्कृन्तामि ।। इत्यनामिकया प्रदक्षिणामालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिन्मधुपर्कं भूमौ निक्षिपेत् । पुनस्तथैवालोडनपूर्वकं द्विर्नि:क्षिप्य प्राशनार्थं विनियोगं कुर्यात् ।

मधुपर्कप्राशनम्- ॐ यन्मधुन इति कुत्सऋषिर्मधुपर्को देवता जगतीछन्दो मधुपर्कप्राशने विनियोग: । **ॐ यन्मधुनोमधव्यम्परमꣳरूपमन्नाद्यन्तेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोऽसानि ।।** इत्यनामिकाङ्गुष्ठाभ्यां वरो वारत्रयं मधुपर्कं प्राश्नाति । प्रतिप्राशनमेतन्मन्त्रपाठ: । ततो मधुपर्कशेषमसञ्चरदेशे धारयेत् ।

अङ्गालम्भनम्- ततो वर आचम्य विनियोगं कुर्यात् । **ॐ वाङ्म** इत्यादीनां परमेष्ठीऋषि: परमात्मा देवता दैवीगायत्रीछन्द: प्राणस्पर्शने विनियोग: । **ॐवाङ्म आस्ये अस्तु** इति करतलेन मुखं स्पृशेत्, हस्तौ प्रक्षाल्य जलं स्पृष्ट्वा अङ्गुष्ठप्रदेशिनीभ्याम् **ॐ नसोर्मेप्राणोऽस्तु** इति नासारन्ध्रद्वयम् स्पृशेत्, अङ्गुष्ठानामिकाभ्याम् **ॐ अक्ष्णोर्मेचक्षुरस्तु** इति युगपत् चक्षुषी स्पृशेत्, **ॐ कर्णयोर्मे श्रोत्रमस्तु** इति मन्त्रावृत्त्या दक्षिणोत्तरौ कर्णौ संहताङ्गुल्यग्रै: स्पृशेत्, **ॐ बाह्वोर्मेबलमस्तु** इति बाहुमूले असंहताङ्गुलिभ्यां पाणिभ्याम् स्पृशेत् ।

ॐ ऊर्वोर्मे ओजोस्तु इति युगपदूरू स्पृशेत्, **ॐ अरिष्टानिमेङ्गानितनूस्तन्वामेसहसन्तु ।।** इति शिर:प्रभृति पादपर्यन्तम् पाणिभ्यामालभेत। ततो द्विराचमनम् कुर्यात् ।

कुशच्छेदनम् - ततो यजमानेन **ॐ गौर्गौर्गौः** इत्युक्ते, वरो विनियोगं कुर्यात् । **ॐ मातारुद्राणामि**ति ब्रह्माऋषिर्गौर्देवता त्रिष्टुप्छन्दो गोरभिमन्त्रणे विनियोग: । **ॐ मातारुद्राणांदुहितावसूनाꣳस्वसादित्यानाममृतस्यनाभिः। प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट ।।**

"**मम चामुष्यामुकशर्मणो यजमानस्य च पाप्माहतः**" इत्युपांशु पठित्वा- **ॐ उत्सृजत तृणान्यत्तु** इत्युच्चैर्ब्रूयात्, कुशतृणं नखाग्रेण छिन्द्यात् । अत्र गोदानम् कुर्वन्ति शिष्टा: ।

अग्निस्थापनम्- ततो वेदिकायां तुषकेशशर्करादिशून्यायां हस्तमात्रचतुरस्रां भूमिं कुशैः परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रागग्रप्रादेशमितमुत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य तूष्णीं कांस्यपात्रस्थवह्निं प्रत्यङ्मुखमुपसमाधाय तद्रक्षार्थं कञ्चिन्नियुज्य कौतुकागाराद्वरः कन्यामानीय मण्डपे स्थापयेत्, स्वयञ्च तया सह तत्रैवोपविशेत् ।

वरकन्ययोर्वस्त्रपरिधापनम्- (यजमानदत्तं स द्रव्यं वस्त्रचतुष्टयं प्रतिगृह्य तेषु वस्त्रेषु वस्त्रद्वयं कन्यायै परिधानार्थं प्रयच्छति, वस्त्रद्वयं स्वयं परिधत्ते तत्र प्रथमं कन्यायाः परिधानं मन्त्रपाठस्तु वरस्यैव) अथ वरो विनियोगं कुर्यात् ।

ॐ जराङ्गच्छेति प्रजापतिर्ऋषिर्वासो देवता त्रिष्टुप्छन्दो वस्त्रपरिधापने विनियोगः । **ॐ जराङ्गच्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावा: । शतञ्चजीवशरदःसुवर्च्चारयिञ्चपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्ववासः ।।** इति पठित्वा परिधानवस्त्रं तस्यै दद्यात् । तत उत्तरीयं गृहीत्वा वरो विनियोगं कुर्यात् । **ॐ याऽअकृन्तन्निति** प्रजापतिर्ऋषिर्वासो देवता जगतीछन्द उत्तरीयपरिधापने विनियोगः। **ॐ याऽअकृन्तन्नवयन्याऽअतन्वत। याश्चदेवीस्तन्तूनभितोततन्थ । तास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदंपरिधत्स्ववासः ।।** इति पठित्वा तस्यै दद्यात् ।

वरः पुनर्विनियोगं कुर्यात् - **ॐ परिधास्या** इत्याथर्वण ऋषिर्लिङ्गोक्ता देवता पङ्क्तिश्छन्दो वस्त्रपरिधापने विनियोगः । **ॐ परिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि । शतञ्चजीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्ये ।।** इति पठित्वा वरः अधोवस्त्रं परिधत्ते । ततः वरः पुनर्विनियोगं कुर्यात् - **ॐ यशसामे**त्याथर्वणऋषिलिङ्गोक्ता देवता पङ्क्तिश्छन्दो वस्त्रपरिधाने विनियोगः । **ॐ यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती। यशोभगश्चमाऽविन्दद्यशोमाप्रतिद्यताम् ।।** इति पठित्वोत्तरीयं परिधत्ते । ततो वरस्य कन्यायाश्च द्विराचमनम् ।

वरकन्ययोः परस्परसम्मुखीकरणम्- ततः कन्याप्रदस्य परस्परं समञ्जेतमिति प्रैषेण वरः परस्परमभिमुखीकरणे विनियोगं कुर्यात् । **ॐ समञ्जन्त्वि**त्याथर्वण ऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दः परस्परसमञ्जने विनियोगः । **ॐ समञ्जन्तु-विश्वेदेवाःसमापोहृदयानिनौ । सम्मातरिश्वासन्धातासमुदेष्ट्रीदधातुनौ ।।** इति वरः सम्मुखीभूतः पश्यन्नेव पठति । ततः कन्याप्रदकर्तृकं ग्रन्थिबन्धनं दध्यक्षतदूर्वापूगहिरण्यरौप्यैः सुलग्नमुहूर्ते ।

कन्यादानम्*१*

(तत्र प्रथममुभयपक्षयोर्लग्नदानविधानम्)

प्रयोगः - उदङ्मुखोपविष्टो दाता प्रत्यङ्मुखोपविष्टायाः कन्यायाः दक्षिण-हस्ताङ्गुष्ठं गृहीत्वा प्राङ्मुखोपविष्टायस्वाचान्ताय वराय दातुं कन्यादानसङ्कल्पं कुर्यात् पत्नीहस्तेन सन्ततजलधारांदापयेत् शङ्खस्थदूर्वाक्षतफलकुशयवतिल-

---

१. **कन्यादानमहासङ्कल्पः-** सँस्कारदीपके इत्थमभिहितः **ॐ विष्णुः ३ ॐ नमः** परमात्मने पुराणपुरुषोत्तमाय ॐ तत्सत् श्रीहंसस्य सचिदानन्दरूपिणोऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात्कालकर्मस्वभावाविर्भूतमहत्तत्त्वोदिताहङ्कारत्रितयोद्भूतवियदादिपञ्चकेन्द्रियदेवता निर्मिताण्डकटाहे चतुर्दशलोकात्मके लोके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतेन सकललोकपितामहेन ब्रह्मणा सृष्टिं कुर्वता तदुद्धरणाय प्रार्थितेन महापुरुषरूपिणा धृतवाराहावतारेण ध्रियमाणायामस्यां भूर्लोकसंज्ञितायां धरित्र्यां सप्तद्वीपमण्डितायां क्षीरोदाद्यब्धिद्विगुणकुशादिद्वीपबलयीकृते लक्षयोजनविस्तीर्णे जम्बूद्वीपे भरतखण्डे स्वर्गस्थितामराद्याशासितावतारे गङ्गादिसरिद्भिः पाविते निखिलजनपावने शौनकादिमुनिकृतवसतिके नैमिषारण्ये आर्यावर्ते पुण्यक्षेत्रे (हिमवत्पर्वतैकदेशे) श्रीभगवन्मार्तण्डकृपापात्रकालत्रितयज्ञगर्गवराहाचार्यादिगणितायां संख्यायां श्रीब्रह्मणो द्वितीयपरार्द्धे द्वितीययामे तृतीयमुहूर्ते श्रीश्वेतवाराहनाम्निप्रथमकल्पे स्वायम्भुवस्वारोचिषोत्तमतामसरैवतचाक्षुषेतिषण्मनूनामतिक्रम्यमाणे संप्रति सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमकलियुगस्य प्रथमचरणे बौद्धावतारे श्रीमन्नृपतिविक्रमार्कसमयात् संवत्सराणां समयेनातिक्रान्तानां षष्ट्यब्दानां मध्ये अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनामदिवसनक्षत्रे अमुकनाममहानक्षत्रे अमुकनामयोगे अमुकनामकरणे अमुकनाममुहूर्ते अमुकस्थे सूर्ये अमुकस्थे चन्द्रे अमुकस्थे भौमे अमुकस्थे बुधे अमुकस्थे

जलान्यादाय जामातृदक्षिणकरोपरि कन्यादक्षिणकरं निधाय ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम् वरोसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः इति पठित्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्राय, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम् अमुकगोत्राममुकप्रवराममुकनाम्नीमिमां कन्यां प्रजापतिदैवतां स्वर्गकामः. पत्नीत्वेन तुभ्यमहं संप्रददे । इति सङ्कल्प्य कन्याप्रदः कन्याहस्तं वरहस्ते समुत्सृज्य वरप्रार्थनां कुर्यात् ।

देवगुरौ अमुकस्थे शुक्रे अमुकस्थे शनौ अमुकस्थे राहौ अमुकस्थे केतौ एवङ्गुणविशेषविशिष्टायाम् अस्यां शुभावस्थायाम् अमुकगोत्रोमुकप्रवरोमुकराशिरमुकराशिरमुकशर्मा सपत्नीकोऽहम् अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः प्रपौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः पुत्राय आयुष्मते विष्णुस्वरूपिणेकन्यार्थिनेऽमुकगोत्रायामुकप्रवरायामुकशर्मणे वराय, अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः प्रपौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः पौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः पुत्रीम् आयुष्मतीं श्रीरूपिणीं वरार्थिनीममुकनाम्नीमिमां कन्यां यथाशक्त्यलङ्कृतां यथाशक्त्युपकल्पितयौतकयुतां प्रजापतिदैवतां मम पुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसमफलप्राप्तिपूर्वकं मम समस्तपितॄणां निरतिशयानन्दब्रह्मलोकावाप्त्यादिफलावाप्तिपूर्वकं वा श्रीलक्ष्मीनारायणप्रीतये तथा अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसन्तत्या द्वादशावरान् द्वादशपरान् पुरुषान् आत्मानं च पवित्रीकर्तुं देवाग्निगुरुब्राह्मणसन्निधौ अग्न्यादिसाक्षिकतया सहधर्मचरणाय तुभ्यमहं संप्रददे, प्रतिगृह्णातु भवान् इति दाता उत्थाय सकुशाक्षतजलकन्यादक्षिणहस्तं वरदक्षिणहस्ते समर्पयेत् ।(कन्यादाने न ममेति न वक्तव्यम् उत्तरकालमपि यथापूर्वं ममेयं कन्येति व्यवहारात् इति केचित् । आवयोरिति संप्रतिपत्तेरसत्त्वेन दानेनासाधारणस्वत्वनिवृत्तौ साधारणस्वत्त्वोत्पत्तेरयोगात्स्वत्वाभावप्रकाशनार्थमन्यत्रेवात्रापि न ममेति वाच्यमेव । **''न ममेति स्वस्वत्वस्य निवृत्तिमपि कीर्तयेत्''** इति हेमाद्र्यादौ वचनात्, ममेयं कन्येति व्यवहारस्तु जन्यजनकभावसंबन्धमूलको न स्वत्वमूलक इत्यन्ये ।

वरप्रार्थना - **ॐ कन्यां कनकसंयुक्तां कनकाभरणैर्युताम् ।**
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ।।

वरः - **ॐ देवस्यत्त्वासवितुष्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ।।** प्रजापतये कन्यां प्रतिगृह्णामि । इति पठित्वा विनियोगं कुर्यात्। **ॐ द्यौस्त्वेति** प्रजापतिर्ऋषिलिङ्गो देवता यजुर्भूमिस्पर्शने विनियोगः । **ॐ द्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णातु ।।** इति मन्त्रेण भूमिं स्पृशन् वरः **ॐ स्वस्ति** इति पठेत् ।

दानप्रतिष्ठा - ततः कन्याप्रदः ॐ अद्यकृतैतत्कन्यादानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतममुकगोत्रायामुकप्रवरायामुकशर्मणे ब्राह्मणाय वराय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् । गोमिथुनं रुद्रदैवतं वा दद्यात् । **ॐ स्वस्ति** इति प्रतिवचनम् ।

वरद्वारा मन्त्रपाठः - **ॐ ब्राह्मणमद्यविदेयपितृमन्तम्पैतृमत्त्यमृषिमार्षेयꣳसुधातुदक्षिणम् । अस्मद्राता देवत्रागच्छतप्प्रदातारमाविशत ।।** (य.सं.अ. ७ मं.४६) **ॐ अग्नयेत्त्वामह्यंवरुणोददातुसोमृतत्त्वमशीयायुर्द्दात्रऽएधिमयोमह्यम्प्रतिग्रहीत्रेरुद्रायत्त्वामह्यंवरुणोददातुसोमृतत्त्वमशीयप्प्राणोदात्रऽएधिवयोमह्यम्प्रतिग्ग्रहीत्रेबृहस्पतयेत्त्वामह्यंवरुणोददातुसोमृतत्त्वमशीयत्त्वग्दात्रऽएधिमयोमह्यम्प्रतिग्ग्रहीत्रेसोमायत्त्वामह्यंवरुणोददातुसोमृतत्त्वमशीयहयोदात्रऽएधिवयोमह्यम्प्रतिग्ग्रहीत्रे।।४७।। ॐ कोदात्त्कस्म्माऽअदात्त्कामायादात् । कामोदाताकामःप्प्रतिग्ग्रहीताकामैतत्ते ।।४८।।** इति मन्त्रान् वरः पठति ।

निष्क्रमणम्- ततस्तां पाणौ गृहीत्वा वरो निष्क्रमणविनियोगं कुर्यात्- **ॐ यदैषीत्या**थर्वणऋषिर्लिङ्गोक्ता देवताऽनुष्टुप्छन्दो निष्क्रमणे विनियोगः। **ॐ यदैषिमनसादूरंदिशोनुपवमानोवा । हिरण्यपर्णोवैकर्णःसत्वामन्म्मनसांकरोतु ।।** इति पठन्, श्रीअमुकदेवि (स्वनिर्मितं नवनाम धारयित्वा) निष्क्रामति ।

ततो वेदीदक्षिणस्यां वारिपूर्णकलशमेकमूर्ध्वं तिष्ठतो मौनिनः पुरुषस्य स्कन्धेऽभिषेकपर्यन्तं धारयेत् ।

परस्परसमीक्षणम्- ततः **परस्परं समीक्षेथाम्** इति कन्याप्रदप्रैषानन्तरम् वरो विनियोगं कुर्यात्- **ॐ अघोरचक्षु**रित्यादिनां चतुर्णां प्रजापतिर्ऋषिः कुमारी देवता आद्यन्तयोस्त्रिष्टुप्छप् द्वितीयतृतीययोरनुष्टुप्छन्दः (परस्पर) समीक्षणे विनियोगः । **ॐ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाः । व्वीरसूर्द्देवकामास्योनाशन्नोभवद्विपदेशञ्चतुष्पदे ।।१।। ॐ सोमःप्रथमोव्विविदेगन्धर्व्वोव्विविदऽउत्तरः । तृतीयोग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः।।२।। ॐ सोमोऽदद्गन्धर्व्वायगन्धर्व्वोऽदददग्नये। रयिंचपुत्राँश्चादादग्निर्मह्यमथोऽइमाम्।।३।। ॐ सानःपूषाशिवतमामैरयसानऊरूउशतीविहर । यस्यामुशन्तःप्रहरामशेपंयस्यामुकामाबहवोनिविष्टयै ।।४।।** इति वरकर्तृकमन्त्रजपान्ते परस्परनिरीक्षणम् ।

विवाहहोमः

ब्राह्मणवरणम्- अग्निं प्रदक्षिणीकृत्य पश्चादग्ने रहतवस्त्रवेष्टिततृणपूलिकायां कटे वा तदुपरि दक्षिणचरणं दत्त्वा वधूं दक्षिणतः कृत्वा उपविश्य गणपतिं पूजयित्वा ब्रह्मादिवरणं कुर्यात् ।

ब्रह्मवरणम्[२]- पुष्पताम्बूलचन्दनवस्त्राण्यादाय- अद्यकर्तव्यविवाहहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन **त्वामहं वृणे,** इति ब्रह्माणं वृणुयात् । ततः **ॐ वृतोस्मि** इति प्रतिवचनम्। **यथाविहितं कर्म कुरु** इति वरेणोक्ते, **करवाणि** इति ब्रह्मा ब्रूयात् । ततो वरोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा

---

[२] अत्र विशेषः संस्कारदीपके ततो वरस्त्रिराचम्य त्रिः प्राणानायम्य बधूं दक्षिणत उपवेश्य अर्घं संस्थाप्य प्रधानसंकल्पं कुर्यात् अद्येहेत्यादि अमुकगोत्रोमुकराशिरमुकशर्माहं धर्मार्थकामसिद्धिद्वारा श्रीपरमेश्वरप्रीतये ब्राह्मविधिनापितृदत्तामिमां (गौरीं) कन्यां विवाहयिष्ये तत्पूर्वाङ्गत्वेन विवाहहोमकर्मणि कृताकृतां वेक्षणादि ब्रह्मकर्मकर्तुं ब्रह्मणःपूजनपूर्वकं वरणं करिष्ये इत्यादि।

तदुपरि प्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीय **अत्र त्वं मे ब्रह्मा भवे**त्यभिधाय कल्पितासने उपवेशयेत् ।

होतृवरणम्- ॐ अद्य विवाहहोमकर्मणि अमुकगोत्रममुकशर्मणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्होमं कर्तुं होतृत्वेन **त्वामहं वृणे** इति होतारं वृणुयात् । ततः प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्रेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम्- बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तम् उदगग्रैः ब्रह्मणोऽग्निपर्यन्तं प्रागग्रैः, नैर्ऋत्याद्वायव्यान्तम् उदगग्रैः, अग्नितः प्रणीतापर्यन्तं प्रागग्रैः कुशैः परिस्तरणं कुर्यात् ।

पात्रासादनम्- ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशत्रयम्, उपयमार्थं कुशत्रयम्, तिस्रः समिधः (पालाश्यः), स्रुवः, आज्यम्, षट्पञ्चाशदुत्तरवरमुष्टिशतद्वयावच्छिन्नं तण्डुलपूर्णपात्रम्, पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् । अथ तस्यामेव दिशि असाधारणवस्तून्युपकल्पनीयानि- तत्र शमीपलाशमिश्रा लाजाः, दृषदुपलम्, कुमारीभ्राता, शूर्पम्, दृढः पुरुषः, अन्यदपि तदुपयुक्तद्रव्यम् ।

होमपृष्ठभूमिसम्पादनम्- ततः पवित्रच्छेदनकुशैः प्रादेशमितपवित्रकरणम्, ततः सपवित्रकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निधाय अनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम्, ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणम्, अनामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम्, प्रणीतोदकेन प्रोक्षणीप्रोक्षणम्।

ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनम्, ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधाय आज्यस्थाल्यामाज्यनिर्वापः, ततोऽधिश्रयणम्, ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण पर्यग्निकरणम्, ततः स्रुवप्रतपनम्, संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवसंमार्जनम्, प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत् त्रिः प्रतप्य स्रुवं दक्षिणतो निदध्यात् । तत आज्यस्याग्नेरवतारणम्, तत आज्ये प्रोक्षणीवदुत्पवनम्, अवेक्ष्य सत्यपद्रव्ये तन्निरसनम्,

पुनः पूर्ववत्प्रोक्षण्युत्पवनम् ।

आघाराज्यहोमाः - तत उपयमनकुशान् वामहस्ते कृत्वा उत्तिष्ठन्प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ समिधः प्रक्षिपेत् । तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निपर्युक्षणं कृत्वा प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणज्याहुतीर्जुहोति । तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः[३]। **ॐ प्रजापतय** इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । **ॐ इन्द्रायेति** प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ । **ॐ अग्नय** इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये।** **ॐ सोमायेति** प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः। **ॐ सोमाय स्वाहा, इदं सोमाय** इत्याज्यभागौ ।

महाव्याहृतिहोमः- ॐ महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुश्छन्दांसि अग्न्याधाने विनियोगः । **ॐ भूः स्वाहा, इदं भूः । ॐ भुवः स्वाहा, इदं भुवः । ॐ स्वः स्वाहा, इदं स्वः ।**

एता महाव्याहृतयः ।

---

[३] अत्राग्निपूजनमुक्तमेतदन्यासु पद्धतिषु तद्यथा **ॐ मनोजूतिः०** **ॐ भूर्भुवः स्वः** योजकनामाग्ने सुप्रतिष्ठो वरदो भव इति । "विवाहे योजकस्तथा" इति योजकनामाग्निं प्रतिष्ठाप्य-

ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलमनन्तं विश्वतोमुखम् ।।
सर्वतः पाणिपादश्च सर्वतोक्षिशिरोमुखः ।
विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु ।।

ॐ चत्वारिशृङ्गा० इति मन्त्रैर्ध्यानावाहनादिनीराजानान्तमग्निं संपूज्य **ॐ ब्रह्मणे नमः** इति प्रथमरेखाम्, **ॐ विष्णवे नमः** इति मध्यरेखाम्, **ॐ रुद्राय नमः** इति उत्तररेखां संपूज्य उदकं स्पृष्ट्वा **ॐ करात्यै नमः, ॐ धूमिन्यै०, ॐ श्वेतायै०, ॐ लोहितायै०, ॐ महालोहितायै०, ॐ सुवर्णायै०, ॐ पद्मरागायै०** इति सप्तजिह्वाश्च पूजयेत् । इति ।

पञ्चवारुणीहोमः- ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ त्वन्नोऽअग्ग्नेर्व्वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्श्वाद्द्वेषाꣳसिप्प्रमुमुग्ग्ध्यस्म्मत्।।** स्वाहा, इदमग्ग्नीवरुणाभ्याम् ।

ॐ सत्त्वन्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्ग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि ।।** स्वाहा, इदमग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्त्यमित्त्वमयाऽअसि। अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा ।।** इदमग्नये।

ॐ येतेशतमिति वामदेवऋषिर्वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्काश्च देवतास्त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ येतेशतंव्वरुणयेसहस्रंयज्ञियाःपाशावितताममहान्तः । तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्वेमुञ्चन्तुमरुतःस्वर्काःस्वाहा ।।** इदं वरुणाय सवित्रे विष्णवे व्विश्श्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ।

ॐ उदुत्तममिति शुनःशेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दः पाशान्मोचने (इति क्वचित्) सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं वरुणाय ।[४]

एताः प्रायश्चित्तसंज्ञकाः ।

---

[४] गणेशशक्रदेवाश्च विष्णू रुद्रस्तथैव च ।
दंपत्योश्च शुभं कुर्युरायुरारोग्यसंपदः ।।
ॐ उत्सर्गे वारुणे चैव वरुणो विष्णुना सह ।
तुष्टिपुष्टिकरो नित्यमनयोः स्त्रीकुमारयोः ।।

इत्याचार्यादयो मन्त्राशिषं वरकन्याभ्यां दद्युरेवमुत्तरत्र ।

राष्ट्रभृद्धोमः - ततोऽन्वारम्भं विना होमं कुर्यात् । **ॐ ऋताषाडिति** प्रजापतिर्ऋषिर्ऋताषाडृतधामाग्निर्गन्धर्वो देवता यजुर्होमे विनियोगः । **ॐ ऋताषाडृतधामाग्ग्निर्ग्गन्धर्व्वःसनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट् ।।** इदमृतासाहे ऋतधाम्ने अग्नये गन्धर्वाय ।

ॐ ऋताषाडिति प्रजापतिर्ऋषिरोषधयोप्सरसो मुदो देवता यजुर्होमे विनियोगः । **ॐ ऋताषाडृतधामाग्ग्निर्ग्गन्धर्व्वस्तस्यौषधयोऽप्प्सरसोमुदोनामताब्भ्यःस्वाहा ।।** इदमोषधिभ्योप्सरोभ्योमुद्भ्यः ।

ॐ सꣳहित इति प्रजापतिर्ऋषि सꣳहितोव्विश्श्वसामा सूर्य्यो गन्धर्व्वो देवता यजुर्होमे विनियोगः । **ॐ सꣳहितोव्विश्श्वसामासूर्य्योगन्धर्व्वःसनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट् ।।** इदꣳसꣳहिताय व्विश्श्वसाम्ने सूर्य्याय गन्धर्व्वाय ।

ॐ सꣳहित इति प्रजापतिर्ऋषिर्मरीचयोप्सरसऽआयुवो देवता यजुर्होमे विनियोगः । **ॐ सꣳहितोव्विश्श्वासामासूर्य्योगन्धर्व्वस्तस्यमरीचयोऽप्प्सरसऽआयुवोनामताब्भ्यःस्वाहा ।।** इदं मरीचिभ्योऽप्सरोभ्यऽआयुभ्यः ।

ॐ सुषुम्म्ण इति प्रजापतिर्ऋषिः सुषुम्म्णः सूर्य्यरश्मिम्मश्श्चन्द्रमा गन्धर्व्वो देवता यजुर्होमे विनियोगः । **ॐ सुषुम्म्णःसूर्य्यरश्मिम्मश्श्चन्द्रमागन्धर्व्वःसनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट् ।।** इदꣳसुषुम्म्णाय सूर्य्यरश्म्मये चन्द्रमसे गन्धर्व्वाय ।

ॐ सुषुम्म्ण इति प्रजापतिर्ऋषिर्नक्षत्राण्यप्प्सरसो भेकुरयो देवता यजुर्होमे विनियोगः । **ॐ सुषुम्म्णसूर्य्यरश्मिम्मश्श्चन्द्रमागन्धर्व्वस्तस्यनक्षत्राण्यप्प्सरसोभेकुरयोनामताब्भ्यःस्वाहा ।।** इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः ।

ॐ इषिर इति प्रजापतिर्ऋषिरिषिरोव्विश्श्वव्यचा व्वातो गन्धर्व्वो देवता यजुर्होमे विनियोगः । **ॐ इषिरोव्विश्श्वव्यचाव्वातोगन्धर्व्वःसनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट् ।।** इदमिषिराय व्विश्श्वव्यचसे व्वाताय गन्धर्व्वाय ।

ॐ इषिर इति प्रजापतिर्ऋषिरापोप्प्सरसऽऊर्ज्जो देवता यजुर्होमे

विनियोगः । **ॐ इषिरोविश्श्वव्यचावातोगन्धर्वस्तस्यापोप्प्सरसऽऊर्जोनामताब्भ्यःस्वाहा** ।। इदमद्भ्योऽप्प्सरोभ्यऽऊर्ग्भ्यः ।

ॐ भुज्युरिति प्रजापतिर्ऋषिर्भुज्युः सुपर्णो यज्ञो गन्धर्वो देवता यजुर्होमे विनियोगः । **ॐ भुज्ज्युःसुपर्णोयज्ञोगन्धर्व्वःसनऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहाव्वाट्** ।। इदं भुज्ज्यवे सुपर्णाय यज्ञाय गन्धर्व्वाय ।

ॐ भुज्ज्युरिति प्रजापतिर्ऋषिर्दक्षिणाऽअप्प्सरस्तावा देवता यजुर्होमे विनियोगः । **ॐ भुज्ज्युःसुपर्णोयज्ञोगन्धर्व्वस्तस्यदक्षिणाऽअप्प्सरसस्तावानामताब्भ्यःस्वाहा** ।। इदं दक्षिणाब्भ्योप्प्सरोब्भ्यस्तावाब्भ्यः ।

ॐ प्रजापतिरिति प्रजापतिर्ऋषिः प्रजापतिर्व्विश्श्वकर्म्मा मनो गन्धर्व्वो देवता यजुर्होमे विनियोगः । **ॐ प्रजापतिर्व्विश्श्वकर्म्मामनोगन्धर्व्वःसनऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहाव्वाट्** ।। इदं प्रजापतये व्विश्श्वकर्म्मणे मनसे गन्धर्व्वाय ।

ॐ प्रजापतिरिति प्रजापतिर्ऋषिर्ऋक्सामान्यप्प्सरसऽएष्टयो देवता यजुर्होमे विनियोगः । **ॐ प्रजापतिर्व्विश्श्वकर्म्मामनोगन्धर्व्वस्तस्यऽऋक्सामान्यप्प्सरसऽएष्टयोनामताब्भ्यःस्वाहा** ।। इदमृक्सामेब्भ्योऽप्प्सरोब्भ्यऽएष्टिब्भ्यः ।।

इति राष्ट्रभृद्धोमः[५] ।

जयहोमः- ॐ चित्तञ्चेति परमेष्ठी ऋषिश्चित्तं देवता यजुर्होमे विनियोगः।
ॐ चित्तञ्च स्वाहा, इदं चित्ताय ।

ॐ चित्तिरिति परमेष्ठी ऋषिश्चित्तं देवता यजुर्होमे विनियोगः ।
ॐ चित्तिश्च स्वाहा, इदं चित्तये ।

ॐ आकूतञ्चेति परमेष्ठी ऋषिराकूतं देवता यजुर्होमे विनियोगः ।
ॐ आकूतञ्च स्वाहा, इदमाकूताय ।

---

५. मन्त्रपाठः-

ॐ गन्धर्वाप्सरसश्चैव प्रयच्छन्तु यशः श्रियम् ।
दीर्घायुर्धनमारोग्यमुभयोः स्त्रीकुमारयोः ।।

ॐ आकूतिश्चेति परमेष्ठी ऋषिराकूतिर्देवता यजुर्होमे विनियोगः । **ॐ आकूतिश्च स्वाहा, इदमाकूत्यै** ।

ॐ विज्ञातञ्चेति परमेष्ठी ऋषिर्विज्ञातं देवता यजुर्होमे विनियोगः । **ॐ विज्ञातञ्च स्वाहा, विज्ञाताय** ।

ॐ विज्ञातिश्चेति परमेष्ठी ऋषिर्विज्ञातिर्देवता यजुर्होमे विनियोगः। **ॐ विज्ञातिश्च स्वाहा, इदं विज्ञात्यै** ।

ॐ मनश्चेति परमेष्ठी ऋषिर्मनो देवता यजुर्होमे विनियोगः । **ॐ मनश्च स्वाहा, इदं मनसे** ।

ॐ शक्करीश्चेति परमेष्ठी ऋषिः शक्करीर्देवता यजुर्होमे विनियोगः। **ॐ शक्करीश्च स्वाहा, इदꣳशक्करीभ्यः** ।

ॐ दर्शश्चेति परमेष्ठी ऋषिदर्शो देवता यजुर्होमे विनियोगः । **ॐ दर्शश्च स्वाहा, इदं दर्शाय** ।

ॐ पौर्णमासञ्चेति परमेष्ठी ऋषिः पौर्णमासं देवता यजुर्होमे विनियोगः **ॐ पौर्णमासं च स्वाहा, इदं पौर्णमासाय** ।

ॐ बृहच्चेति परमेष्ठी ऋषिर्बृहद्देवता यजुर्होमे विनियोगः । **ॐ बृहच्च स्वाहा, इदं बृहते** ।

ॐ रथन्तरञ्चेति परमेष्ठी ऋषी रथन्तरं देवता यजुर्होमे विनियोगः। **ॐ रथन्तरञ्च स्वाहा, इदꣳरथन्तराय** ।

ॐ प्रजापतिरिति मन्त्रस्य परमेष्ठी ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दो जयहोमे विनियोगः । **ॐ प्रजापतिर्ज्जयानिन्द्रायवृष्णेप्रायच्छदुग्ग्रःपृतनाजयेषु । तस्म्मैविशःसनमन्तसर्व्वाःसऽउग्ग्रःसऽइहव्योबभूवस्वाहा** ।। इदं प्रजापतये । अत्र प्रणीतोदकस्पर्शः[६]।

इति जयहोमः ।

---

[६] मन्त्रपाठः- **ॐ चैरञ्जीव्यं महातेजश्चित्ताद्याश्च दिवौकसः ।**
प्रयच्छन्तु करेवाञ्छामुभयोः स्त्रीकुमारयोः ।।१।।
गौरी लक्ष्मीस्तथेन्द्राणी लोपामुद्रा शुभव्रता ।
तादृशी च भवेत् कन्या विप्रवाक्येषु नन्दिनी ।।२।।

अभ्यातानहोमः- ॐ अग्निर्भूतानामिति प्रजापतिर्ऋषिरग्निर्भूतानामधिपतिर्देवता त्रिष्टुप्छन्दः[७] पङ्क्तिच्छन्दो वा होमे विनियोगः । **ॐ अग्निर्ब्भूतानामधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्त्याꣳस्वाहा ।।** इदमग्नये भूतानामधिपतये।

ॐ इन्द्रोज्ज्येष्ठानामिति प्रजापतिर्ऋषिरिन्द्रो ज्ज्येष्ठानामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ इन्द्रोज्ज्येष्ठानामधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा।।** इदमिन्द्राय ज्ज्येष्ठानामधिपतये ।

ॐ यमः पृथिव्या इति प्रजापतिर्ऋषिर्यमः पृथिव्याऽअधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ यमःपृथिव्याऽअधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं यमाय पृथिव्याऽअधिपतये । अत्र प्रणीतोदकस्पर्शः।

ॐ व्वायुरिति प्रजापतिर्ऋषिर्वायुरन्तरिक्षस्याधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ वायुरन्तरिक्षस्याधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा।।** इदं व्वायवेन्तरिक्षस्याधिपतये ।

ॐ सूर्य्यो दिवोधिपतिरिति प्रजापतिर्ऋषिः सूर्यो दिवोधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ सूर्य्योदिवोधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदꣳसूर्य्याय दिवोधिपतये ।

ॐ चन्द्रमानक्षत्राणामिति प्रजापतिर्ऋषिश्चन्द्रमानक्षत्राणामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ चन्द्रमानक्षत्राणामधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं चन्द्रमसे नक्षत्राणामधिपतये ।

---

[७] सर्वेषामभ्यातानमन्त्राणां त्रिष्टुप्छन्द इति श्रीरामपद्धतिपुस्तके प्राचीने हस्तलिखिते मुद्रिते च दृश्यते, सँस्कारदीपकादिषु पङ्क्तिश्छन्द इत्यस्ति, लक्षणं च पङ्क्तिच्छन्दस एव घटते इति सुधियो विभावयन्तु ।

ॐ बृहस्प्पतिरिति प्रजापतिर्ऋषिर्बृहस्प्पतिर्ब्रह्मणोधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ बृहस्प्पतिर्ब्रह्मणोधिपतिःसमावत्त्वस्म्मिन्ब्रह्मण्यस्म्मिन्क्षत्रेऽस्याम्पुरोधायामस्म्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं बृहस्प्पतये ब्रह्मणोऽधिपतये ।

ॐ मित्र इति प्रजापतिर्ऋषिर्मित्रः सत्त्यानामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ मित्रःसत्त्यानामधिपतिःसमावत्त्वस्म्मिन्ब्रह्मण्यस्म्मिन्क्षत्रेऽस्यामाशिष्य्यस्याम्पुरोधायामस्म्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं मित्राय सत्त्यानामधिपतये ।

ॐ व्वरुण इति प्रजापतिर्ऋषिर्व्वरुणोऽपामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ व्वरुणोऽपामधिपतिःसमावत्त्वस्म्मिन्ब्रह्मण्यस्म्मिन्क्षत्रेऽस्यामाशिष्य्यस्याम्पुरोधायामस्म्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा।।** इदं व्वरुणायापामधिपतये ।

ॐ समुद्र इति प्रजापतिर्ऋषिः समुद्रः स्त्रोत्यानामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ समुद्रःस्त्रोत्यानामधिपतिःसमावत्त्वस्म्मिन्ब्रह्मण्यस्म्मिन्क्षत्रेऽस्यामाशिष्य्यस्याम्पुरोधायामस्म्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदꣳसमुद्राय स्त्रोत्यानामधिपतये ।

ॐ अन्नमिति प्रजापतिर्ऋषिरन्नꣳसाम्राज्ज्यानामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ अन्नꣳसाम्राज्ज्यानामधिपतितन्मावत्त्वस्म्मिन्ब्रह्मण्यस्म्मिन्क्षत्रेऽस्यामाशिष्य्यस्याम्पुरोधायामस्म्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदमन्नाय साम्राज्ज्यानामधिपतये ।

ॐ सोम इति प्रजापतिर्ऋषिः सोमऽओषधीनामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ सोमऽओषधीनामधिपतिःसमावत्त्वस्म्मिन्ब्रह्मण्यस्म्मिन्क्षत्रेऽस्यामाशिष्य्यस्याम्पुरोधायामस्म्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदꣳसोमायौषधीनामधिपतये ।

ॐ सवितेति प्रजापतिर्ऋषिः सविता प्रसवानामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ सविताप्रसवानामधिपतिःसमावत्त्वस्म्मिन्ब्रह्मण्य-**

स्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।। इदꣳसवित्रे प्रसवानामधिपतये ।

ॐ रुद्र इति प्रजापतिर्ऋषि रुद्रः पशूनामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ रुद्रःपशूनामधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा।।** इदꣳरुद्राय पशूनामधिपतये । ॐ अत्रप्रणीतोदकस्पर्शः ।

ॐ त्वष्टेति प्रजापतिर्ऋषित्वष्टारूपाणामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ त्वष्टारूपाणामधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा।।** इदं त्वष्ट्रे रूपाणामधिपतये ।

ॐ विष्णुरिति प्रजापतिर्ऋषिर्विष्णुः पर्वतानामधिपतिर्देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ विष्णुःपर्वतानामधिपतिःसमावत्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं विष्णवे पर्वतानामधिपतये ।

ॐ मरुत इति प्रजापतिर्ऋषिर्मरुतो गणानामधिपतयो देवताः पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ मरुतोगणानामधिपतयस्तेमावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं मरुद्भ्यो गणानामधिपतिभ्यः ।

ॐ पितर इति प्रजापतिर्ऋषिः पितरः पितामहाः परेऽवरे ततास्ततामहा देवता पङ्क्तिश्छन्दो होमे विनियोगः । **ॐ पितरःपितामहाःपरेऽवरेततास्ततामहाः । इहमावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्ष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यान्देवहूत्त्याꣳस्वाहा ।।** इदं पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्यस्ततामहेभ्यः । अत्र प्रणीतोदकस्पर्शः ।

इत्यभ्यातानहोमः[८] ।

---

[८] मन्त्रपाठः- **उत्सर्गे च तुरीये च प्रयच्छन्त्वनलादयः ।**
पुत्राँल्लक्ष्मीं तथा कामानुभयोः स्त्रीकुमारयोः ।।

गुप्ताहुतिः- ॐ अग्निरैत्विति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । **ॐ अग्निरैतुप्प्रथमोदेवतानाᳫंसोऽस्यैप्प्रजामुञ्चतुमृत्त्युपाशात्। तदयᳫंराजावरुणोनुमन्यतांय्यथेयᳫंस्त्रीपौत्रमघन्नरोदात्स्वाहा ।।** इदमग्नये।

ॐ इमामग्निरिति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। **ॐ इमामग्निस्त्रायताङ्गार्हपत्त्यःप्प्रजामस्यैनयतुदीर्ग्घमायुः । अशून्योपस्थाजीवतामस्तुमातापौत्रमानन्दमभिविबुद्ध्यतामियᳫंस्वाहा ।।** इदमग्नये गार्हपत्त्याय ।

ॐ स्वस्तिन इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। **ॐ स्वस्तिनोऽअग्नेदिवऽआपृथिव्याविश्श्वानिधेह्ययथायजत्र । यदस्यांमहिदिविजातम्प्रशस्तन्तदस्म्मासुद्द्रविणन्धेहिचित्रᳫंस्वाहा ।।** इदमग्नये।

ॐ सुगन्न्विति प्रजापतिर्ऋषिर्वैवस्वतो देवता त्रिष्टुप्छन्दो होमे विनियोगः। **ॐ सुगन्नुपन्थाम्प्रदिशन्नऽएहिज्ज्योतिष्म्मद्ध्येह्यजरन्नऽआयुः । अपैतुमृत्त्युरमृतन्नऽआगाद्वैवस्वतोनोऽअभयङ्कृणोतुस्वाहा ।।** इदं वैवस्वताय। अत्र प्रणीतोदकस्पर्शः ।

ॐ परंमृत्यो इति संकुसुकऋषिर्मृत्युर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। **ॐ परम्मृत्त्योऽअनुपरेहिपन्थांय्यस्तेऽअन्न्यऽइतरोदेवयानात् । चक्षुष्मतेशृण्वतेतेब्ब्रवीमिमानःप्प्रजाᳫंरीरिषोमोतवीरान् ।।** स्वाहा इदं मृत्यवे। अत्र प्रणीतोदकस्पर्शः ।

इति गुप्ताहुतिः[१] ।

---

[१] मन्त्रपाठः-

गोविन्दो गोकुले तिष्ठन्गोपीभिर्विहरन्सह ।
तुष्टिपुष्टिकरोऽसौ स्यादुभयोः स्त्रीकुमारयोः ।।१।। इति ।

अष्टपर्वतपूजा- सुमेरुङ्काञ्चनमयं चतुःशृङ्गविराजितम् ।
मण्डलस्योत्तरेभागे चन्द्रमा इति पूजयेत् ।।

मण्डलस्योत्तरभागे काञ्चनमयं चतुः शृङ्गविराजितं सुमेरुमावाह्य- **ॐ चन्द्रमामनसोजातश्श्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्द्वायुश्श्चप्प्राणश्श्चमुखादग्निरजायत ।।** इति पूजयेत् ।।१।। ईशान्याम् पाण्डुरं हेमभूषितं शिखिरमावाह्य-**ॐ येतेशतंवरुणयेसहस्रंय्यज्ञियाःपाशाविततामहान्तः । तेभिर्न्नोऽअद्द्यसवितोतविष्णुर्विश्श्वेमुञ्चन्तुमरुतःस्वर्काः ।।** इति मन्त्रेण पूजयेत्।।२।।

लाजहोमः - ततो वधूवरौ दक्षिणतः पश्चिममागत्य वधूमग्रतः कृत्वा प्राङ्मुखौ स्थितौ भवतः । ततो वराञ्जलिपुटोपरि संलग्नवध्वञ्जलिस्थघृताभिघारितवधूभ्रातृदत्तशमीपलाशमिश्रैर्लाजैर्वधूकर्त्रीकमन्त्रपाठपूर्वको होमः । अत्र वधूर्विनियोगं कुर्यात् ।

ॐ अर्यमणन्देवमिति आथर्वणऋषिरर्य्यमा देवताऽनुष्टुप्छन्दो लाजहोमे विनियोगः । **ॐ अर्य्यमणन्देवंकन्याऽअग्निमयक्षत । सनोऽअर्य्यमादेवःप्रेतोमुञ्चतुमापतेःस्वाहा** ।। इदमर्य्यम्णे (इति **ॐ कार**पूर्वकं त्यागं वर एव कुर्यात् नात्र संस्रवधारणं शेषस्य होष्यमाणत्वात् ।) ।

ॐ इयं नारीति आथर्वणर्ऋषिरग्निर्देवता अनुष्टुप्छन्दो लाजहोमे विनियोगः । **ॐ इयन्नार्य्युपब्रूतेलाजानावपन्तिका । आयुष्मानस्तुमेपतिरेधन्ताञ्ज्ञातयोममस्वाहा** ।। इदमग्नये ।

ॐ इमाँल्लाजनावपामीत्याथर्वणऋषिरग्निर्देवता अनुष्टुप्छन्दो लाजहोमे विनियोगः । **ॐ इमाँल्लाजानावपाम्म्यग्नौसमृद्धिकरणंतव । ममतुब्भ्यञ्चसंवननन्तदग्निरनुमन्न्यतामियꣳस्वाहा** ।। इदमग्नये ।

पूर्वे पीतं रक्तश्वेतमुदयाचलमावाह्य- **ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम्। ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः** ।। इति मन्त्रेण पूजयेत् ।।३।। आग्नेय्याम् कृष्णवर्णं मरुत्वन्तमावाह्य- **ॐ मरुत्वाँ२।।ऽइन्द्रवृषभोरणायपिबासोममनुष्ष्वधम्मदाय । आसिञ्चस्वजठरेमद्ध्वऽऊर्म्मिंत्वꣳराजासिप्प्रतिपत्त्सुतानाम् । उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते** ।। इति मन्त्रेण पूजयेत् ।।४।। दक्षिणे रक्तश्वेतवर्णं विन्ध्याचलमावाह्य- **ॐ धामच्छदग्निरिन्द्रोब्ब्रह्मादेवोबृहस्पतिः । सचेतसोव्विश्श्वेदेवायज्ञम्प्रावन्तुनःशुभे** ।। इति मन्त्रेण पूजयेत् ।।५।। नैर्ऋत्याम् हिममयं हेमभूषितं हिमाचलमावाह्य- **ॐ हिरयणगर्ब्भःसमवर्त्ततग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम** ।। इति मन्त्रेण पूजयेत् ।।६।। पश्चिमे पाण्डवैर्गुप्तचर्यार्थमाश्रित्य स्थितं वैराटाचलमावाह्य- **ॐ धन्न्वनागाधन्न्वनाजिञ्जयेमधन्न्वनातीव्व्राःसमदोजयेम। धनुःशंत्रोरपकामङ्कृणोतिधन्न्वनासर्व्वाःप्प्रदिशोजयेम** ।। इति मन्त्रेण पूजयेत्।।७।। शुभ्रवर्णाढ्यं ज्ञानदं करुणायुतं शारदाचलमावाह्य वायव्यांदिशि-**ॐ वायव्व्यैर्व्वायव्व्यानाप्नोतिसतेनद्द्रोणकलशम्। कुम्भीब्भ्याम्म्भृणौसुतेस्त्थालीभिस्त्थालीराप्नोति।।** इति मन्त्रेण पूजयेत्।।८।। इत्यष्टपर्वतपूजा नेपालीयानामाचारपरम्पराप्राप्ता ।

पाणिग्रहणम्- ततः पाणिग्रहणार्थं वरो विनियोगं कुर्यात् । **ॐ गृभ्णामीत्या**दीनां चतुर्णां मन्त्राणां याज्ञवल्क्यभरद्वाजाथर्वण सहस्तोमाऋषयो[10] भगवत्त्योदेवता:[11] त्रिष्टुबुष्णिगनुष्टुब्यजूंषि छन्दांसि वधू-पाणिग्रहणे विनियोग: । (ततो वधूहस्तं[12] साङ्गुष्ठं गृह्णन्मन्त्रं पठति वर: ।) **ॐ गृभ्णामितेसौभगत्त्वायहस्त्तंमयापत्त्याजरदष्टिर्य्यथाऽऽसः । भगोऽअर्य्यमासवितापुरन्धिर्म्मह्यन्त्वाऽदुर्ग्गार्हपत्त्यायदेवाः ।।१।। ॐ अमोहमस्म्मिसात्त्वꣳसामस्यमोऽअहम् । सामाहमस्म्मिऽऋक्त्वन्द्यौरहम्पृथिवीत्त्वम् ।।२।। ॐ तावेवव्विवहावहैसहरेतोदधावहै । प्रजाम्प्रजनयावहैपुत्त्रान्विन्दावहैबहून् ।।३।। ॐ तेसन्तुजरदष्टयःसम्प्रियौरोचिष्णूसुमनस्यमानौपश्येमशरदःशतञ्जीवेमःशरदःशतꣳश‍ृणुयामशरदःशतम् ।।४।।** इति मन्त्रैः ।

अश्मारोहणम्- वधूमग्नेरुत्तरतः प्राङ्मुखीं पूर्वोपकल्पितदृषदुपरि दक्षिणपादेनारोहयति वर: । तत्र विनियोग: - **ॐ आरोहेममित्याथर्वण**ऋषिर्वधूर्देवता अष्टुप्छन्दोऽश्मारोहणे विनियोग: । **ॐ आरोहेममश्म्मानमश्म्मेवत्त्वꣳस्थिराभव । अभितिष्ठपृतन्न्यतोऽवबाधस्वपृतनायतः।।** इति मन्त्रेण तामश्मानमारोपयेत् ।

गाथागानम्- आरूढायामेव तस्यां वरो गाथां गायति[13] । तत्र विनियोग:- **ॐ सरस्वतिप्रेदमिति** विश्वावसुऋषि: सरस्वती देवता अनुष्टुप्छन्दो गाथागाने विनियोग: । **ॐ सरस्वतिप्प्रेदमवसुभगेव्वाजिनीवति । यान्त्वाव्विश्श्वस्यभूतस्यप्प्रजायामस्याग्ग्रतः ।।१।। ॐ यस्याम्भूतꣳसमभवद्यस्यांव्विश्श्वमिदञ्जगत् । तामद्यगाथाङ्गास्यामियास्त्रीणामुत्तमंय्यशः ।।२।।** इति ।

---

[10] प्रजापतयऋषय इति संस्कारदीपके ।

[11] भगार्यमसवितृपुरन्धयो देवता इति संस्कारदीपके ।

[12] दक्षिणमुत्तानम् ।

[13] तस्या; शिरसि हस्तं नीत्वा ।

अग्निप्रदक्षिणम्- ततोऽग्रे वधूः पश्चाद्वरः[१४] प्रणीताब्रह्मसहितमग्निं प्रदक्षिणीकुरुतः । तत्र विनियोगः - **ॐ तुब्भ्यमग्ग्ने** इत्याथर्वणऋषिरग्निर्देवताऽनुष्टुप्छन्दः परिक्रमणे विनियोगः । **ॐ तुब्भ्यमग्ग्नेपर्य्यवहन्त्सूर्य्यांवहतुनासह । पुनःपतिब्भ्योजायांदाऽग्ग्नेप्प्रजयासह ।।** इति वरः पठति।

ततः पश्चादग्नेः पूर्ववत्स्थित्वा लाजहोमसाङ्गुष्ठहस्त ग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणानि पूर्ववत् । पुनरपि तथैव । एतेन नव लाजाहुतयः, साङ्गुष्ठहस्तग्रहणत्रयम्, अश्मारोहणत्रयम्, गाथागानत्रयम्, अग्निप्रदक्षिणत्रयञ्च संपद्यते ।

अवशिष्टलाजहोमः- ततोऽवशिष्टलाजैः कन्याभ्रातृदत्तैरञ्जलिस्थशूर्पकोणेन वधूर्जुहोति । तत्र विनियोगः - **ॐ भगाय** इति प्रजापतिर्ऋषिर्भगो देवता त्रिष्टुप्छन्दो[१५] लाजहोमे विनियोगः । **ॐ भगाय स्वाहा, इदं भगाय**[१६]। ततस्तूष्णीं परिक्रमणम्[१७] ।

सप्तपदी - ततो वर उपविश्य ब्रह्मणान्वारब्ध आज्येन जुहुयात् । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । अत्र प्रोक्षणीपात्रे हुतशेषस्याज्यस्य प्रक्षेपः ।

ततः सिन्दूरेणालेपनेन वोत्तरोत्तरकृतसप्तमण्डलेषु सप्तपदाक्रमणं वरो वधूं कारयति वक्ष्यमाणमन्त्रैः। तत्र विनियोगः- **ॐ एकमिषे** इत्यादीनां सप्तानां मन्त्राणां प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता यजूꣳषि सप्तपदाक्रमणे विनियोगः ।

तत्र प्रथमे- **ॐ एकमिषेव्विष्णुस्त्वानयतु ।।** द्वितीये- **ॐ द्वेऽऊर्ज्जेव्विष्णुस्त्वानयतु ।।** तृतीये- **ॐ त्रीणिरायस्पोषायव्विष्णुस्त्वानयतु ।।**

---

[१४] अत्र समन्त्रकप्रदक्षिणत्रये ब्रह्मणो बहिर्भावः सम्मतः संस्कारदीपककृताम् ।

[१५] यजुश्छन्द इति संस्कारदीपके ।

[१६] अत्र त्यागं वरः करोति ।

[१७] आचारप्राप्ते चतुर्थेऽमन्त्रकपरिक्रमणे ब्रह्मणोप्यन्तः करणम्, इति संस्कारदीपके ।

चतुर्थे- **ॐ चत्त्वारिमायोभवायव्विष्णुस्त्वानयतु ।।** पञ्चमे- **ॐ पञ्चपशुब्भ्योव्विष्णुस्त्वानयतु ।।** षष्ठे- **ॐ षड्ृतुब्भ्योव्विष्णुस्त्वानयतु ।।** सप्तमे- **ॐ सखेसप्तपदाभवसामामनुव्व्रताभवव्विष्णुस्त्वानयतु ।।** इति।

अभिषेचनम्- ततोऽग्नेः पश्चादुपविश्य पुरुषस्कन्धस्थितकुम्भादाम्रपल्लवेन जलमानीय तेन जलेन वरो वधूमभिषिञ्चति । तत्र विनियोगः - **ॐ आप** इति प्रजापतिर्ऋषिर्लिङ्गोक्ता[१८] देवता सुप्रतिष्ठं छन्दो मूर्धाभिषेके विनियोगः। **ॐ आपःशिवाःशिवतमाःशान्ताःशान्ततमास्तास्तेकृण्वन्तुभेषजम् ।।**

ॐ आपोहिष्ठेति त्र्यृचस्य सिन्धुद्वीपऋषिरापो देवता गायत्री छन्दो मूर्धाभिषेचने विनियोगः । **ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणायचक्षसे ।।१।। ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ।।२।। ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः ।।३।।** इति तिसृभिः ।

सूर्योदीक्षणम्- ततः सूर्यमुदीक्ष्वस्वेति वधूं संबोध्य वर आह । तत्र वरो विनियोगं कुर्यात् । **ॐ तच्चक्षु**रिति दध्यङ्ङाथर्वणऋषिः सूर्य्यो देवता ब्राह्मी त्रिष्टुप् (पुर उष्णिक्) छन्दः सूर्य्यप्रेक्षणे विनियोगः । **ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् । पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्श्चशरदःशतात् ।।** इति पठित्वा वधूः सूर्य्यं पश्यति ।

ध्रुवोदीक्षणम् - अस्तमिते सूर्ये ध्रुवमुदीक्षस्वेति प्रैषानन्तरं वधूर्ध्रुवं पश्यति। तत्र वरपठनीयो मन्त्रः । तत्र विनियोगः - **ॐ ध्रुवमसी**ति प्रजापतिर्ऋषिर्ध्रुवो देवता पङ्क्तिश्छन्दो ध्रुवोदीक्षणे विनियोगः । **ॐ ध्रुवमसिद्ध्रुवंत्वापश्यामिद्ध्रुवैधिपोष्ष्यमयि । मह्यन्त्वाऽदाद्बृहस्प्पतिर्म्मयापत्त्याप्प्रजावतीसञ्जीवशरदःशतम् ।।** इति । पृष्टा सा यदि न पश्यति तथापि पश्यामीत्येव ब्रूयात् ।

---

[१८] आपो देवता यजुश्छन्द इति संस्कारदीपके ।

हृदयालम्भनम्- वरो वधूदक्षिणांसस्योपरि हस्तं नीत्वा तस्या हृदयमालभते। तत्र विनियोगः - **ॐ मम व्रते** इति मन्त्रस्य प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दो हृदयालम्भने विनियोगः । **ॐ ममव्रतेतेहृदयन्दधामिममचित्तमनुचित्तन्तेऽअस्तु । ममवाचमेकमनाजुषस्वप्प्रजापतिष्ट्वानियुनक्तुमह्यम्।।** इति मन्त्रेण ।

सिन्दूरार्पणम् (वध्वभिमन्त्रणं वा)- अथ वधूमभिमन्त्रयते वरः । तत्र विनियोगः - **ॐ सुमङ्गलीरि**ति प्रजापतिर्ऋषिर्लिङ्गोक्ता देवताऽनुष्टुप्छन्दो वध्वभिमन्त्रणे विनियोगः । **ॐ सुमङ्गलीरियंव्वधूरिमाꣳसमेतपश्यत । सौभाग्यमस्यैदत्त्वायाथास्तंव्विपरेतन ।।** इति मन्त्रेण । (अत्र वधूसीमन्ते वरेण सिन्दूरदानम्, सम्बन्धिमेलनम्, खड्गोत्थापनञ्च देशाचारः । तथा देशाचाराद्वधूं वरस्य वामभागे उपवेशयन्ति) ।

वरस्य वामभागे वध्वाः स्थापनम् - वधूं बलवान्कश्चिद्ब्राह्मण उत्थाप्य प्रागुदग्वानुगुप्तागारे उत्तरलोम्नि प्राग्ग्रीवे लोहिते आनडुहे चर्मणि उपरिलोमास्तीर्णे तामुपवेशयति वरो वा । तत्र वरेण विनियोगः - **ॐ इहगाव** इति प्रजापतिर्ऋषिर्लिङ्गोक्ता देवताऽनुष्टुप्छन्दो वधूपवेशने विनियोगः । **ॐ इहगावोनिषीदन्त्विहाश्श्वाऽइहपूरुषाः । इहोसहस्रदक्षिणोयज्ञऽइहपूषानिषीदतु ।।** इति मन्त्रेण[१९] ।

---

[१९] अत्र वधूवरौ परस्परं स्वस्वाभिमुखं स्थित्वा पणविन्यासपूर्वकमक्षैर्दिव्येताम् । तदा वधूवरयोरुपरि वस्त्रं विस्तार्य तत्र लाजान् प्रक्षिप्य परिचारिका च चामरयुगलं वीजयति यावत् मन्त्रपाठसमाप्तिर्भवति तावत्कालपर्यन्तम् । आचार्यश्च मन्त्रान् पठति ।

अथादित्यदुहिता शैलाराजदुहिता च

अथदित्यदुहिता - ॐ तपसा तेजसा प्रभाविता जटाभारवल्कलाजिनसंछन्ना तपतीतिकुमारिकाऽऽदित्यदुहिता बहूनि वर्षाणि तपस्तताप । तेजसा तपन्ती च सा धृतातपत्रो नृप संवरणः समुपसृत्याऽवोचत्प्रेक्ष्य तां सुभ्रुवं नीलकेशीं यौवनवतीं पृथुश्रोणीं ताम् । हे त्वं कस्यासि किनाम्नी दुहितेति । सा होवाच यस्यैकचक्रं भुजगनियमितं सप्ताश्वमचरणेनारुणेन प्रणुद्यमानं स्यन्दनं य एष भ्राजमानः प्रातरुदेति तस्याऽहं दुहिताऽऽशीर्नामेति । देवरूपी कुण्डलाभरणो महाबाहुः कस्त्वं भोः कया कामनया मामेत्यादरेण पृच्छसीति । स होवाच

स्विष्टकृद्धोमः- अत्र वरो विनियोगं कुर्यात् । ॐ अग्नये स्विष्टकृत इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दः स्विष्टकृद्धोमे विनियोगः । **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते** । स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । अयञ्च होमो ब्राह्मणान्वारब्धकर्तृकः । तत आचम्य संस्रवप्राशनम् (मधुपर्कप्राशनञ्च देशाचारात्) पुनराचम्य पूर्णपात्रदानम् ।

तस्या अमृतोपमां वाचं निशम्य नृपवरः सुन्दरि ! नृपः संवरणोऽहं भार्या मे भव रूपिणीति श्रुत्वा सा होवाच य एष मामजीजनत् तं गत्वा तेजोराशिमुद्यन्तं भास्करं वृणीष्वेति । स निशितैः कामशरैस्तुद्यमानः स्वपुरोहितं भगवन्तं वसिष्ठमुपातिष्ठत मदर्थे तां ब्रध्नं वृणीष्वेति। स होवाच ब्रध्नस्तेन गत्वा ऋग्भिर्यजुर्भिः सामभिः स्तूयमानो वसिष्ठा ३ यङ्कामं कामयसे तन्ते दास्यामीति । स होवाच एष कामो याज्यो मे नृपः संवरण तस्यार्थे दुहितरं वृणोमीति । दत्तेति स होवाच प्रतिगृहाणेति ।

अथ वसिष्ठस्तां वाचमनुश्रुत्य तुष्टः प्रतीचीं दिशमागतस्तत्सर्वं तस्मै निवेदयामास । अथ तेन निवेदिते सुदिने सुमुहूर्ते सुनक्षत्रे सुयोगे पुण्याहे पाणिं जग्राह संवरणः पाणिनाऽऽदौ पित्रानुमङ्गलप्रत्तम् । उभावध्वर्युरन्वारेभे कुशैर्लाजैः शमीपलाशै समिद्भिः समन्त्रं हव्यवाहे हूयमाने देवानामृषीणां गन्धर्वाणामप्सरसां सतां पश्यतां मङ्गलध्वनिभिऋग्भिर्यजुर्भिः सामथर्वाङ्गिरसेतिहासपुराणमन्त्रध्वनिमिलितैःसनृत्यवादित्रगीतैर्विवाहः संवृत्तः। अथ हैतद्भानुर्धनं ददौ गोऽश्वानां दासीनां महिषाणामजाविकानां कुञ्जराणां शतं सहस्रं वस्त्राणामपरिमितं रजतं काञ्चनम्।

तद्गृहीत्वा स्वपुरं रथेन वाजिभिर्युक्तेन गच्छन्तौ सम्मोदमानौ दम्पती जगाद तौ भानुः- भो संवरण धरणीपते ! तपती नाम सेयं भार्या ते संवृत्ता शृणुतं मद्वाक्यम् - ब्राह्मणवत्सलो भव, एषा ते दारिका अविधवा अष्टपुत्रा जीववत्सा अनुत्तरवादिनी प्रैषकारिणी सत्यवादिनी ब्राह्मणस्तवा दैवतस्तवा मातरं सन्त्यज्य पितरं सन्त्यज्य भर्तारमर्चितं सुपूजितं चानुयाति त्वाम् ।

यथेन्द्रस्येन्द्राणी, यथा दशरथस्य कौशल्या, यथा रामस्य सीता, यथा रावणस्य मन्दोदरी, यथा बालिनश्च तारा, यथा वायोश्चाञ्जनी, यथा नलस्य दमयन्ती, यथा पुरुरवस ऊर्वशी, यथा पाण्डोः कुन्ती, यथा पाण्डवानां द्रौपदी, यथा भीमसेनस्य हिडिम्बा, यथार्जुनस्य सुभद्रा, यथा दुर्योधनस्य भानुमती, यथादित्यस्य मम च्छाया, यथा चन्द्रस्य रोहिणी, यथा गणेशस्य सिद्धिबुद्धी, यथाऽगस्त्यस्य लोपामुद्रा, यथा याज्ञवल्क्यस्य मैत्रेयी, यथा वसिष्ठस्यारुन्धती, यथात्रेरनसूया, यथा ब्रह्मणः सावित्री, यथा कृष्णस्य रुक्मिणी, यथा पशुपतेरुमा, यथा गौतमस्याहल्या, यथा हिमालयस्य मेनका, यथैवमन्येषामन्या तथा तवेयमनुगामिनीति ।

इत्यादित्यदुहिता ।

पूर्णपात्रदानम्- ॐ अद्यकृतैतद्विवाहहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं दक्षिणारूपं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणात्वेन तुभ्यमहं संप्रददे । इति ब्रह्मणे दक्षिणारूपं पूर्णपात्रं दद्यात् । **ॐ स्वस्ति** इति प्रतिवचनम् ।

अथ शैलराजदुहिता - अथ शैलराजगृहे मेनकायां कन्या प्रजाता । कपर्दिने भवाय प्रत्ताञ्च तां दुहितरं सा होवाच पत्यौ शृण्वति अविधवा सुभगा कल्याणवती पुत्रवती यशोवती भवेति भवश्चोवाच- **श्रीश्चतेलक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे** .... इत्यादि ।

अथ भवः प्रत्युवाच सुप्रीता वरदा भव । अथात इयं सर्वमङ्गला भूयात् ।

माहेन्द्रीव वारुणीवोत्तमानि लप्सीष्ट शोभनानि नाहमेनां जह्याम् ।

त्रैलोक्ये सन्ति ये पूज्या ब्रह्मविष्ण्वादयः सुराः ।
एते त्वत्साक्षिणस्त्वं मे भव प्रीताङ्गना सती ।।
त्यज्येते पितरौ काले त्यज्यन्ते भ्रातरोऽपि वा ।
त्यज्यन्ते बान्धवाः सर्वे नाङ्गना सहगामिनी ।।
न रोचयेऽश्वं न गजं हिरण्यं कौशेयं वासो विविधञ्च रत्नम् ।
शुद्धाकन्या करगा शैलभर्तस्तव प्रसादान्मम शङ्करस्य ।।१।।
लोके कीर्तिः कुले वृद्धिर्लक्ष्मीश्च गृहमागता ।
स्त्रीरत्नञ्च मया प्राप्तं त्वत्प्रसादाद्धिमालय ।।२।।
यद्यत्कल्याणकृल्लोके सा च भक्तिरधोक्षजे ।
आवयोर्दत्तचित्तानां सर्वं भवतु सर्वदा ।।३।।

इति शैलराजदुहिता ।

अथ ग्रहतिलकम्

प्रयोगः - आचार्यः प्रतिमन्त्रं पूर्वं वरस्य पश्चाद्वध्वा ललाटे प्रतिमन्त्रं मन्त्रपाठान्ते तिलकं कुर्यात् ।

मन्त्राः - **गजाननः पाशसनाथपाणी रक्ताम्बरो ह्युन्दुरुवाहनश्च ।**
लड्डुकहस्तो हि गणाधिनाथो वरस्य वध्वा वितनोतु भूतिम् ।।१।।
हंसाधिरूढः स चतुर्मुखः सकमण्डलुर्यज्ञपवित्रदेहः ।
इन्द्रादिदेवैरभिपूजितश्च वरस्य वध्वा वितनोतु भूतिम् ।।२।।
शङ्खं गदां चक्रसरोरुहञ्च करैर्दधानो गरुडाधिरूढः ।
जगत्पतिर्दिक्पतिपूजितश्च वरस्य वध्वा वितनोतु भूतिम् ।।३।।

प्रणीताविमोकः- **ॐ सुमित्रियानऽआपऽओषधयः सन्तु** ॥ इति पवित्रं गृहीत्वा प्रणीताजलेन शिरः संमृज्य, **ॐ दुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वे-**

गङ्गाधरो भस्मजटाधरश्च ललाटचन्द्रो वृषवाहनश्च ।
त्रिशूलखट्वाङ्गधरो महेशो वरस्य वध्वा वितनोतु भूतिम् ।।४।।
त्रिदेवमूर्तिर्जगदेकचक्षुर्विरिञ्चिनारायणशङ्करात्मा ।
प्रभाकरश्चाखिललोकहेतुर्वरस्य वध्वा वितनोतु भूतिम् ।।५।।
कलानिधिः कैरववर्गबन्धुः कम्बुद्युतिः पुण्यविवृद्धिहेतुः ।
महौषधीशो रजनीपतिश्च वरस्य वध्वा वितनोतु भूतिम् ।।६।।
महीतनूजो महिमातिधीरः सदा बलीयान् सततं पुराणः ।
हिरण्यवर्णः कनकाभिधानो वरस्य वध्वा वितनोतु भूतिम् ।।७।।
शशाङ्कसूनुर्गुणपूर्णनामा सुखादिहेतुर्व्यसनापहारी ।
बुधश्च विज्ञानविचक्षणोऽसौ वरस्य वध्वा वितनोतु भूतिम् ।।८।।
समस्तविज्ञानगुरुर्मनीषी सुरेन्द्रपूज्यः सुजनैकगम्यः ।
बृहस्पतिर्मङ्गलनामधेयो वरस्य वध्वा वितनोतु भूतिम् ।।९।।
तेजोऽधिकश्चाखिलखेचराणां शुक्रः सुदीप्तः सुरशत्रुपूज्यः ।
यशोधरोऽसौ मृतजीवनश्च वरस्य वध्वा वितनोतु भूतिम् ।।१०।।
समस्तखेटोपरिमार्गगामी शनैश्चरः सन्ततमादरेण ।
अस्मिन् सुलग्ने समुपागतः सन् वरस्य वध्वा वितनोतु भूतिम् ।।११।।
यो धावतेऽद्यापि सुधाशनः सँस्तमोमयश्चन्द्रमसञ्च सूर्यम् ।
स्वयंबली लब्धवरः स राहुर्वरस्य वध्वा वितनोतु भूतिम् ।।१२।।
समस्तसंपत्समवाप्तिहेतुः केतुः प्रपन्नार्तिहरो विलग्ने ।
भूत्वार्धमूर्तिः क्षितिसौख्यकर्ता वरस्य वध्वा वितनोतु भूतिम् ।।१३।।
सुधूम्रवर्णश्चलसप्तजिह्वः शाण्डिल्यपुत्रः स धनञ्जयश्च ।
शृङ्ग्याख्यगोत्रो ह्यरणिप्रसूश्च वरस्य वध्वा वितनोतु भूतिम् ।।१४।।
सिंहाधिरूढा वरचापखड्गत्रिशूलखेटायुधयुक्तबाहुः ।
त्रैलोक्यमाता सुचिराय दुर्गा वरस्य वध्वा वितनोतु भूतिम् ।।१५।।
सुराश्च सर्वे ग्रहदेवताश्च सप्तर्षयो दिक्पतयो नगाश्च ।
सयोगवारास्तिथयोऽखिलाश्च वरस्य वध्वा वितनोतु भूतिम् ।।१६।।
ये यन्निदेशादिह कर्तुमीशा ये यन्निदेशादिह हर्तुमीशाः ।
ते तन्निदेशादनयोः शुभानि प्रत्यर्प्य गच्छन्तु यथावकाशम् ।।१७।।

इति ग्रहतिलकम् ।

ष्टियञ्ञवयंद्विष्मः ।। इति मन्त्रेणैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ।

बर्हिर्होमः - ततः स्तरणक्रमेण बर्हींष्युत्थाप्याज्येनाभिघार्य हस्तेनैव जुहुयात्। तत्र मन्त्रः - **ॐ देवागातुविदोगातुंवित्त्वागातुमितमनसस्पतऽइमन्देवयज्ञंꣳस्वाहावातेधाः ।।** स्वाहा इति । तत उत्थाय वध्वा दक्षिणहस्तेन स्रुवे स्पृष्टे घृतपुष्पफलैः पूर्णाहुतिं जुहुयात्[२०] ।

पूर्णाहुतिः - तत्र मन्त्रः - **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।** स्वाहा ।

त्र्यायुषकरणम्- ततः स्रुवेण भस्मानीय दक्षिणकरानामिकागृहीतेन तेन भस्मना त्र्यायुषं (तिलकं) कुर्यात् । **ॐ त्र्यायुषञ्जमदग्नेः** इति ललाटे, **ॐ कश्यपस्यत्र्यायुषम्** इति ग्रीवायाम्, **ॐ यद्देवेषुत्र्यायुषम्** इति दक्षिणांसे, **ॐ तन्नोऽअस्तुत्र्यायुषम्** इति हृदि, त्र्यायुषं कुर्यात् । अनेनैव क्रमेण वध्वा अपि तत्र **तन्नो** इत्यस्य स्थाने **तत्ते** इति विशेषः । (आचार्याय वरं (दक्षिणां) दद्यात्। गौर्ब्राह्मणस्य वरः, ग्रामो राजन्यस्य वरः, अश्वो वैश्यस्य वरः, इति । तत्तद्वराभावे विभवानुसारेण सुवर्णादिद्रव्यं दद्यात् ।

दक्षिणा- ततो भूयसीं दक्षिणाञ्च संकल्प्य ब्राह्मणेभ्यो यथायोग्यभागं विभज्य दद्यात् । अभिषेकतिलककरणरक्षाबन्धनमन्त्रपाठादिकं कारयेत् । तत आचारात् शणशङ्खसुवर्णप्रेरितसिन्दूरकरणं वरकर्तृकम्, अन्यैरपिप्रतिष्ठितस्त्रीपुंसैः सिन्दूरकरणम्, ग्राम्यवचनं च वरः कुर्यात् । ग्राम्याः

---

[२०] अत्र पूर्णाहुतिस्तु न भवति ।

विवाहे व्रतबन्धे च शालायां चौलकर्मणि ।
गर्भाधानादिसंस्कारे पूर्णाहुतिं न कारयेत् ।।

इति गोभिलगृह्यभाष्ये गर्भाधानप्रकरणे वचनात्, इति संस्कारदीपके ।

स्त्रियो मात्रादयः । अथ वेदितो मण्डपमागत्य दूर्वाक्षतादिग्रहणम् । ततस्त्रिरात्रमक्षारलवणाशिनौ निवृत्तमैथुनौ च भवतः ।

— इति विवाहपद्धतिः[२१] —

* * *

---

[२१] ततः पञ्चघोषपुरः सरं विवाहमण्डपादभ्यन्तरं गत्वा जीवमातृपूजनं कुर्यात् । स्वासन उपविश्याचम्य अर्घं संस्थाप्य प्राणानायम्य- ॐ अद्येहेत्यादि सं. अमुकशर्मा सवधूकोऽहं विवाहकर्मण उत्तराङ्गत्वेन सर्वाभ्युदयप्राप्तये पट्टलिखितानां कल्याण्यादिजीवमातृणां पूजनं करिष्ये इति संकल्प्य- **ॐ मनोजूतिः० ॐ भूर्भुवः स्वः कल्याण्यादि जीवमातरः इहागच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु** इति प्रतिष्ठाप्य ध्यानं कुर्यात्-

कल्याणी मङ्गला भद्रा पुण्या पुण्यमुखी तथा ।
जया च विजया चैव सप्तैता जीवमातरः ।।

इति ध्यात्वा नाममन्त्रैः पूजयेत्- **ॐ कल्याण्यै नमः, ॐ मङ्गलायै नमः, ॐ भद्रायै नमः, ॐ पुण्यायै नमः, ॐ पुण्यमुख्यै नमः, ॐ जयायै नमः, ॐ विजयायै नमः ।** इति नाममन्त्रैः पाद्यादि नैवेद्यान्तं संपूज्य नाममन्त्रेण जपं विधाय **ॐ वसोः** पवित्रमसीतिवसोर्धाराः पातयित्वा नीराजनं विधाय पुष्पाञ्जलिं दद्यात् ।

पुष्पाञ्जलिः -

ॐ ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा ।
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ।। इति ।

दक्षिणा- अद्येत्यादि अमुकशर्मा सवधूकोऽहं विवाहकर्मण उत्तराङ्गत्वेन कृतस्य जीवमातृपूजनकर्मणः साद्गुण्यार्थमिमां दक्षिणां ब्राह्मणाय दास्ये, ॐ तत्सत् दक्षिणां दत्त्वा समख्ये इति मन्त्रपाठः । ततोऽन्यस्मिन्दिवसे सवधूको वरो जनतया सह स्वगृहं गच्छेत् । अथ कन्यापिता स्थापितदेवता विसृज्य तिलपात्रदानं कृत्वा अच्छिद्रविधानं कुर्यात् । कर्मेश्वरार्पणं कृत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा स्वयमपि भुञ्जीत । ततो वरो निजगृहमागत्य द्वारोपान्ते पूर्णकलशयोः पूजनं विधाय सवधूको गृहं प्रविशेत् ।

इति विवाहपद्धतिः ।

२. चतुर्थीकर्मविधिः

प्रयोगः- चतुर्थ्यामपररात्रे चतुर्थीकर्म तच्च गृहाभ्यन्तर एव कर्तव्यम् । तैलोद्वर्तनादि कृत्वा युगकाष्ठ उपविश्य स्नात्वा शुचिवस्त्रं परिधाय गृहं प्रविश्य प्राङ्मुखौ वधूवरौ उपविशतः ।

कुशकण्डिकारम्भः - कुशैर्हस्तमात्रभूमिं परिसमुह्य कुशानैशान्यां निक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरोत्तरतस्त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य वारिणा तं देशमभिषिच्य कांस्यपात्रेणाग्निमादाय तत्र प्रत्यङ्मुखं निदध्यात् ।

ब्राह्मणवरणम्- अस्यां रात्रौ कर्तव्यचतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति वृणुयात् । **ॐ वृतोस्मी**ति प्रतिवचनम् । **यथाविहितं कर्म कुरु** इति वरेणोक्ते, **ॐ करवाणि** इति ब्रह्मवचनानन्तरमग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानास्तीर्याग्निप्रदक्षिणं कारयित्वाऽस्मिन्कर्मणि **त्वं मे ब्रह्माभवे**त्यभिधाय, **ॐ भवानि** इति तेनोक्ते, तत्र ब्रह्माणमुदङ्मुखमुपवेशयेत् । ततः पृथूदपात्रमग्नेरुत्तरतः प्रतिष्ठाप्य प्रणीतापात्रं पुरतः कृत्वा वारिणाऽऽपूर्वकुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम् - बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तम् (उत्तराग्रैः), अपरचतुर्थभागमादाय ब्रह्मणोऽग्निपर्यन्तम् (पूर्वाग्रैः), अपरेण नैर्ऋत्याद् वायव्यान्तम् (उत्तराग्रैः), अवशिष्टेन अग्ग्रतः प्रणीतापर्यन्तम् (पूर्वाग्रैः), ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशपत्रद्वयमनन्तर्गर्भं साग्रम्,

प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्रः, स्रुवः, आज्यम्, तण्डुलाः, पूर्णपात्रम्, एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिक्क्रमेणासादनीयानि ।

होमपृष्ठभूमिसम्पादनम् - पवित्रच्छेदनकुशैर्वरप्रादेशमितपवित्रे क्षिप्त्वा प्रणीतोदकं त्रिः सपवित्रकरेण प्रोक्षणीषु निधाय कराभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् । ततः प्रोक्षणीपात्रं वामहस्तेकृत्वाऽनामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम् । ततः प्रणीतोदकेन प्रोक्षणम् । ततः प्रोक्षणीजलेनासादितवस्तुसेचनम् । ततोऽग्नेरुत्तरतः प्रणीतादक्षिणदिशि प्रोक्षणीपात्रं निदध्यात् । आज्यस्थाल्यामाज्यनिर्वापः । प्रणीताजलं किञ्चिच्चरौ दत्त्वा प्रणीताजलेन तण्डुलान्प्रक्षाल्य चरौ प्रक्षिपेत् । स्वयं चरुं गृहीत्वा ब्रह्मणा चाज्यं वह्नेरुत्तरतश्चरुं दक्षिणत आज्यं निदध्यात् । ततो ज्वलत्तृणमादाय हविर्द्वयोपरि प्रदक्षिणं भ्रमयित्वा वह्नौ तत्प्रक्षेपः । सृते चरौ वारत्रयं स्रुवप्रतपनम् । संमार्जन्कुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवसंमार्जनम् । प्रणीतोदकेनाभ्युक्ष्य पुनस्तथैव प्रतप्य चरुं दक्षिणतो निदध्यात् । तत आज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा पश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात् । ततो वारत्रयं प्रोक्षणीवदाज्यस्योत्पवनम् । अवेक्ष्य सत्यपद्रव्ये तन्निरसनम् । पुनः पूर्ववत्प्रोक्षण्युत्पवनम् । तत उपयमनकुशान्वामहस्ते कृत्वा मनसा प्रजापतिं ध्यात्वा उत्तिष्ठन्समिधस्तूष्णीमग्नौ क्षिपेत्[१]।

होमः

चतुर्थीहोमः - तत उपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणं पर्युक्ष्य पवित्रे प्रणीतापात्रे निधाय ब्रह्मणान्वारब्धः सुसमिद्धतमेऽग्नौ पातितदक्षिण-

---

[१] **ॐ मनोजूति**रिति मन्त्रेण (चतुर्थ्यां तुं शिखिनामेति वचनात्) । **ॐ भूर्भुवः स्वः शिखिनामाग्ने इहागच्छ इह तिष्ठ सुप्रतिष्ठो वरदो भवेति** शिखिनामानमग्निं प्रतिष्ठाप्य **ॐ सर्वतः पाणिपाद** इति, **ॐ चत्वारिशृङ्गा** इति, **ॐ शिखिनामाग्नये नमः**, इति नाममन्त्रेण च ध्यानादि नीराजनान्तं संपूज्य रेखापूजनं जिह्वापूजनञ्च कृत्वा होमं कुर्यात् ।

जानुराज्याहुतीर्जुहुयात् ।

तत्राघारादारभ्याहुतिचतुष्टये तत्तदाहुत्यनन्तरं प्रोक्षणीपात्रे संस्रव प्रक्षेपः। **ॐ प्रजापतय** इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । **ॐ इन्द्रायेति** प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ । **ॐ अग्नय** इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः । **ॐ अग्नये स्वाहा इदमग्नये**।

ॐ सोमायेति प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** । इत्याज्यभागौ तत आज्याहुतिपञ्चतये स्थालीपाकाहुतौ च पूर्वोपकल्पितपृथूदपात्रे तत्तदाहुत्यनन्तरहुतशेषप्रक्षेपः । आज्याहुतिपञ्चकेनान्वारम्भः ।

प्रायश्चित्तहोमः - तत्र विनियोगः - **ॐ अग्नेप्रायश्चित्ते** इत्यादीनां पञ्चानां मन्त्राणां परमेष्ठी (प्रजापति) ऋषिरग्निवायुसूर्यचन्द्रगन्धर्वा देवतास्त्रिष्टुप्छन्दः[२] चतुर्थीहोमे विनियोगः । **ॐ अग्नेप्रायश्चित्तेत्वन्देवतानांप्रायश्चित्तिरसिब्ब्राह्मणस्त्वानाथकामऽउपधावामि । यास्यैपतिग्घ्नीतनूस्तामस्यैनाशय ।। स्वाहा इदमग्नये** ।।१।। **ॐ व्वायोप्प्रायश्चित्तेत्त्वन्देवानांप्रायश्चित्तिरसिब्ब्राह्मणस्त्वानाथकामऽउपधावामि । यास्यैप्प्रजाग्घ्नीस्तनूस्तामस्यैनाशय ।।** स्वाहा इदं व्वायवे ।।२।। **ॐ सूर्य्यप्प्रायश्चित्तेत्त्वन्देवानाम्प्रायश्चित्तिरसिब्ब्राह्मणस्त्वानाथकामऽउपधावामि । यास्यैपशुग्घ्नीतनूस्त्वामस्यैनाशय ।।** स्वाहा इदꣳसूर्य्याय ।।३।। **ॐ चन्द्रप्प्रायश्चित्तेत्त्वन्देवानाम्प्रायश्चित्तिरसिब्ब्राह्मणस्त्वानाथकामऽउपधावामि । यास्यैगृहग्घ्नीस्त्तामस्यैनाशय ।।** स्वाहा इदं चन्द्राय ।।४।। **ॐ गन्धर्व्वप्प्रायश्चित्तेत्वन्देवानाम्प्रायश्चित्तिरसिब्ब्राह्मणस्त्वानाथकामऽउपधावामि। यास्यैयशोग्घ्नीतनू-**

---

[२] अनुष्टुप्छन्द इति श्रीरामपद्धतिपुस्तके प्राचीने हस्तलिखिते मुद्रिते च दृश्यते । संस्कारदीपकादिपुस्तकेषु त्रिष्टुप्छन्द इत्येवास्ति लक्षणं च त्रिष्टुभ एव घटते इति तदेव लिखितमत्रेति कृतधियो विचारयन्तु ।

स्तामस्यैनाशय ।। स्वाहा इदं गन्धर्वाय ।।५।।

स्विष्टकृद्धोमः[3] - **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । अग्निमाहुतिदशतये तत्तदाहुत्यनन्तरं हुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः । तत्र प्रथमं ब्रह्मणान्वारब्धक आज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः । तत्र विनियोगः- **ॐ३ अग्नये स्विष्टकृत** इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दः स्विष्टकृद्धोमे विनियोगः । **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते** ।

व्याहृतिहोमः - ततो ब्रह्मणान्वारब्ध एवाज्येन जुहोति । तत्र विनियोगः- **ॐ व्याहृतीनां** प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दासिं चतुर्थी (प्रायश्चित्त) होमे विनियेगः । **ॐ भूःस्वाहा, इदं भूः १, ॐ भुवः स्वाहा, इदं भुवः २, ॐस्वः स्वाहा, इदꣳस्वः ।३।**

एता महाव्याहृतयः ।

पञ्चवारुणीहोमः - ॐ त्वन्नोऽअग्ग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चर्तुथी (प्रायश्चित्त) होमे विनियोगः। **ॐ त्वन्नोऽअग्ग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳ-सिप्प्रमुमुग्ध्यस्म्मत्** ।। स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ सत्वन्न इति वामदेवऋषिरग्ग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चर्तुथी (प्रायश्चित्त) होमे विनियोगः । **ॐ सत्त्वन्नोऽअग्ग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि** ।। स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्ग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दश्चर्तुथी-(प्रायश्चित्त) होमे विनियोगः । **ॐ अयाश्चाग्ग्नेस्यनभिशस्त्तिपाश्चसत्त्यमित्त्वमयाऽअसि। अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा** ।। इदमग्ग्नये।

---

[3] स्थालीपाकमाज्येनाभिघार्य स्रुवेणादाय जुहोतीति विशेषोऽन्यत्र । "प्राङ्महाव्याहृतिभिः स्विष्टकृदन्यच्चेदाज्याद्धविः" इति वचनादत्राज्यान्यस्य स्थालीपाकरूपस्य हविषः सत्त्वान्महाव्याहृतिहोमात्पूर्वं स्विष्टकृद्धोमः, इति बोध्यम् । संस्कारदीपके ।

ॐ येतेशतमिति वामदेवऋषिर्व्वरुणः सविता व्विष्णुर्व्विश्वे(देवाः) मरुतः स्वर्क्का देवतास्त्रिष्टुप्छन्दश्चर्तुथी (प्रायश्चित्त) होमे विनियोगः। **ॐ येतेशतंव्वरुणयेसहस्त्रंय्यज्ञियाःपाशाव्विततामहान्तः । तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।।** इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो(देवेभ्यो) मरुद्भ्यः स्वर्क्केभ्यः ।

ॐ उदुत्तममिति शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः । **ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमद्ध्यमꣳश्रथाय। अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं व्वरुणाय। इति सर्वप्रायश्चित्तम् ।

प्राजापत्यहोमः - ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा । इदं प्राजापत्यम् । ततः संस्रवप्राशनम् । तत आचमनं कुर्यात् ।

दक्षिणारूपं पूर्णपात्रम्- ॐ अस्यां रात्रौ कृतैतच्चतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठासिद्ध्यर्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणारूपं पूर्णपात्रं तुभ्यमहं संप्रददे, इति दद्यात् । **ॐ स्वस्ति** इति प्रतिवचनम् ।

प्रणीताविमोकः- ॐ सुमित्रियादुर्म्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवता प्रणीताविमोके विनियोगः । **ॐ सुमित्रियानऽआपऽओषधयःसन्तु।।** इति पवित्राभ्यां शिरः सम्मार्जयेत् ।

ॐ दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मः ।।
इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ।

बर्हिर्होमः- ततस्तरणक्रमेण बर्हिरानीय घृतेनाभिघार्य हस्तेनैव जुहुयात् । तत्र विनियोगः- **ॐ देवागातुविद** इति मन्त्रस्य मनसस्पतिर्ऋषिर्व्वातो देवता व्विराट्छन्दो बर्हिर्होमे विनियोगः । **ॐ देवागातुविदोगातुंव्वित्त्वागातुमितः। मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः ।।** स्वाहा इति मन्त्रेण ।

वरेण वध्वा अभिषेकः- ततः पृथूदपात्रस्थमुदकमाम्रपल्लवेनानीय वरो वधूमभिषिञ्चति [४]**ॐ याते** इति प्रजापतिर्ऋषिर्वधूर्देवता त्रिष्टुप्छन्दोऽभिषेचने विनियोगः । **ॐ यातेपतिग्घ्नीप्प्रजाग्घ्नीपशुग्घ्नीगृहग्घ्नीयशोग्घ्नीनिन्दितातनूः । जारग्घ्नीन्ततऽएनाङ्करोमि । साजीर्य्यत्त्वंमयासह ।।** [५]**श्री अमुकदेवि** इति मन्त्रेण ।

स्थालीपाकप्राशनम्- ततो वधूं स्थालीपाकं प्राशयति वरः । [६]**ॐ प्राणैस्त** इति प्रजापतिर्ऋषिर्वधूर्देवता यजुर्वध्वाः स्थालीपाकप्राशने विनियोगः । **ॐ प्राणैस्तेप्प्राणान्सदधामि ।। ॐ अस्त्थिभिस्त्तेऽअस्त्थीनिसन्दधामि।। ॐ माᳬसैस्तेमाᳬसानिसन्दधामि ।। ॐ त्वचातेत्त्वचᳬसन्दधामि ।।** इति मन्त्रचतुष्टयेन प्रतिमन्त्रान्ते प्राशनम् ।

हृदयालम्भनम् - ततो वरो वधूहृदयं स्पृष्ट्वा पठति । [७]**ॐ यत्त** इति प्रजापतिर्ऋषिर्हृदयं देवता त्रिष्टुप्छन्दो हृदयालम्भने विनियोगः । **ॐ यत्तेसुसीमेहृदयन्दिविचन्द्रमसिश्श्रितम् । वेदाहतन्मांतद्विद्यात्त्पश्श्येमशरदः-शतञ्जीवेमशरदःशतᳬशृणुयामशरदःशतम् ।।** अथ कङ्कणमोक्षणद्यूत-ग्रन्थिमोकादीन्याचारपरिप्राप्तानि ।

पूर्णाहुतिः - तत उत्थाय वरो वधूहस्तस्पृष्टस्रुवेण घृतपुष्पफलपूर्णेन पूर्णाहुतिं कुर्यात् अनेन मन्त्रेण- **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानरमृतऽ-आजातमग्ग्निम्। कविᳬसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः।। स्वाहा** इति ।

त्र्यायुषकरणम्- ततो वरः स्रुवेण भस्मानीय दक्षिणकरानामिकागृहीतभस्मना त्र्यायुषं कुर्यात्- **ॐ त्र्यायुषञ्जमदग्ग्नेः ।।** इति ललाटे, **ॐ कश्यपस्य-**

---

[४] इदं विनियोगवाक्यं रामपद्धतिपुस्तके न दृश्यते ।

[५] अत्र स्वनामाद्यवर्णसम्बद्धं देव्यादिपदान्तं वध्वा नाम वरः करोतीति समाचारः ।

[६] इदं विनियोगवाक्यं मुद्रिते रामपद्धतिपुस्तके दृश्यते, लिखिते तु न दृश्यते ।

[७] इदं तु द्वयोरेव न दृश्यते ।

त्र्यायुषम् ।। इति ग्रीवायाम्, **ॐ यद्देवेषुत्र्यायुषम्** ।। इति दक्षिणबाहुमूले, **ॐ तन्नोऽअस्तुत्र्यायुषम्** ।। इति हृदि । अनेनैव क्रमेण वध्वा अपि तत्र तन्न इति स्थाने तत्ते इति विशेषः ।

चतुर्थी होममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा संयुज्यते नारी तद्गोत्रा तेन सा भवेत् ।।

— इति चतुर्थीकर्मविधिः —

* * *

३. गर्भाधानसंस्कारः

प्रयोगः- तत्र चतुर्थदिने ऋतुस्नाता वधूः प्रातस्तूष्णीमादित्यमुपतिष्ठेत। ततस्तद्दिने मातृपूजापूर्वकमाभ्युदयिकं कृत्वा षोडशवासरादर्वाक् शुभरात्रौ गर्भाधानसंस्कारकर्मणि सहभागिनी भवेत्।

उपस्थपर्शः- तत्र दक्षिणकरेण पतिर्वध्वा उपस्त्थमभिस्पृशति अनेन मन्त्रेण- **ॐ पूषाभगꣳसवितादधातुरुद्द्रस्त्त्वष्टारूपाणितेजोव्वैश्श्वानरोदधातु** ॥ इति।

वध्वा अभिमन्त्रणम्- ततः प्राङ्मुख उपविष्ट उदङ्मुखो वा वर एनामभिमन्त्रयेत् अनेन मन्त्रेण - **ॐ गब्भर्न्धेहिसिनीवालिगब्भर्न्धेहिपृथुष्टुके। गब्भर्न्तेऽअश्श्विनौदेवावाधत्ताम्पुष्क्करस्त्रजौ** ॥ इति।

रेतः स्त्रावणम्- ततो वरो वधूकर्णसमीपे मुखं कृत्वा रेतः स्त्रावणं कुर्यात् अनेन मन्त्रेण- **ॐ रेतोमूत्त्रंव्विजहातियोनिम्प्रविशदिन्द्रियम्। गब्भोर्जरायुणावृतऽउल्ल्बञ्जहातिजन्मना** ॥ इति।

हृदयालम्भनम्- अथ वरस्तस्या हृदयमालभेत्। अत्र विनियोगः - **ॐ यत्तेसुसीमे** इति मन्त्रस्य प्रजापतिर्ऋषिर्हृदयं देवता त्रिष्टुप्छन्दो हृदयालम्भने विनियोगः। **ॐ यत्तेसुसीमेहृदयन्दिविचन्द्रमसिश्श्रितम्। व्वेदाहन्तन्मांव्विद्यात्त्पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्** ॥ इति मन्त्रेण।

वरवध्वोः सम्भोगः - ततः स्वस्थो हृष्टमना वरो हृद्ये प्रदेशे प्रसन्नामनातुरां कामयमानाम् अभग्नशय्यायां प्रदोषादूर्ध्वं स्त्रियमभिगच्छेत्।

गर्भधारणाभावे नस्यदानम् - सा यदि गर्भाधानसंस्कारे कृतेन सम्भोगेन गर्भं न दधाति, तदा पतिः कृतोपवासः पुष्यनक्षत्रे श्वेतपुष्पकण्टकारिकाया मूलमुत्पाट्योदकेन पिष्ट्वा वधूदक्षिणानासापुटे नस्यं दद्यात्। तत्र विनियोगः- **ॐ इयमोषधी**ति मन्त्रस्य प्रजापतिर्ऋषिर्बृहतीछन्द ओषधी देवता आसेके विनियोगः। **ॐ इयमोषधीत्रायमाणासहमानासरस्वती। अस्याऽअहंबृहत्त्याःपुत्त्रःपितुरिवनामजग्ग्रभम्** ॥

— इति गर्भाधानम् —

४. पुंसवनम्[१]

प्रयोगः- तच्च गर्भमासापेक्षया द्वितीयतृतीययोरन्यतरस्मिन् मासे करणीयम्। पुष्यपुनर्वसुमृगशिरोहस्तमूलश्रवणान्यतमनक्षत्रयुतोभयचन्द्रतारानुकूलं दिवसमवगत्य तत्पूर्वदिने वधूमुपवासं कारयित्वाऽग्रिमदिने तस्याःस्नाताया अहतवासोयुगपरिधानानन्तरं शुचिःस्नातःकृताचमनो मातृपूजापूर्वकमाभ्युदयिकं कृत्वा वटावरोहान्वटशुङ्गाग्राँश्च आचारात्कुशकण्टकमपि शिशिरेणोदकेन पिष्टवा वधूदक्षिणनासापुटे नस्यं दद्यात् ।

नस्यदानम्- तत्र वरानुष्ठेयो विनियोगः - **ॐ हिरण्यगर्ब्भ** इति मन्त्रस्य प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः, **ॐ अद्भ्यःसम्भृत** इत्यस्य उत्तरनारायणऋषिः पुरुषो देवता त्रिष्टुप्छन्दो नासिकायां रसासेके विनियोगः। **ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदवायहविषाव्विधेम ।। ॐ अद्ध्यःसम्भृतःपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्ग्रे । तस्यत्त्वष्टाविदधद्रूपमेतितन्मर्त्त्यस्यदेवत्त्वमाजानमग्ग्रे ।।** इति मन्त्राभ्यां वध्वा नासिकायां वरो नस्यं दद्यात् ।[२]

— इति पुंसवनम् —

---

[१] तत्र प्रथमं स्वस्तिवाचनं कृत्वा प्राणानायम्य देवेभ्यः पुष्पाञ्जलिं समर्प्य प्रधानसङ्कल्पं कुर्यात्- अमुकोऽहं ममास्यां भार्यायामुत्पत्स्यमानापत्यगर्भस्य बीजगर्भसमुद्भवैनोनिबर्हणपुंरूपताज्ञानोदयप्रतिरोधिकर्मनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनाख्यं कर्म करिष्ये । तत्पूर्वाङ्गत्वेन गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धञ्च करिष्ये इति सङ्कल्पं कुर्यात् । यथाक्रमं तानि विधाय अस्तमये वटवृक्षावरोहानधोभागे जायमानानङ्कुरान् शुङ्गानग्रपल्लवान् मुकुलाकाराँश्च उदकं यथास्यात्तथा पिष्ट्वा सूक्ष्मवस्त्रेण निष्पीड्य गर्भिण्या दक्षिणनासिकायामासिञ्चति उदरप्रवेशपर्याप्तम् इति विशेषो द्रष्टव्यः ।

[२] स यदि वीर्यवान् पुत्रः स्यादिति कामयेत तदा उदकपूर्णशरावं भार्याया अङ्के धृत्वा गर्भाभिमन्त्रणं कुर्यात्। अनामि-काग्रेणगर्भाशयंस्पृशन् विनियोगं कुर्यात् । यथा- **ॐ सुपर्णोसीति**

५. सीमन्तोन्नयनम्

प्रयोगः- गर्भमासापेक्षयाषष्टेऽष्टमे वा पुन्नामनक्षत्रयुक्ते चन्द्रतारानुकूलविहितदिने मातृपूजाभ्युदयिकादि कुर्यात् ।[१]

कुशकण्डिका- ततो यजमानो बहिःशालायां कुशकण्डिकां कुर्यात्। तत्र क्रमः- कुशत्रयेण हस्तपरिमितचतुरस्रभूमिं परिसमुह्य कुशानैशान्यां प्रक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेन स्फ्येन वा उत्तरोत्तरतस्त्रिरुंल्लिख्योल्लेखनक्रमेणोद्धृत्य वारिणा तं देशमभ्युक्ष्य कांस्यपात्रेणाग्निमानीय तत्र प्रत्यङ्मुखं निदध्यात् ।

ब्राह्मणवरणम्- ततो ब्राह्मणवरणं कुर्यात् । तत्र क्रमः- ॐ अद्यकर्तव्यसीमन्तोन्नयनहोमकर्मणि कृताकृतावेक्षणरूपं ब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन **त्वामहं वृणे** ।

प्रजापतिर्ऋषिर्गरुत्मान्देवता कृतिश्छन्दो गर्भाभिमन्त्रणे विनियोगः । **ॐ सुपर्णोसिगरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ । स्तोमऽआत्माच्छन्दाᳬंस्यङ्गानियजूᳬंषिनाम। सामतेतनूर्व्वामदेव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याःशफाःसुपर्णोसिगरुत्मान्दिवङ्गच्छस्वःपत ।।** इति मन्त्रं जपति । **दक्षिणासङ्कल्पः -** अद्येहामुकोऽहं कृतस्यास्य पुंसवनकर्मणः साद्गुण्यार्थमिमां दक्षिणां ब्राह्मणेभ्यो दास्ये, ॐ तत्सत्, तथा दश यथाशक्ति वा ब्राह्मणान् भोजयिष्ये। ततोऽभिषेकमन्त्रपाठादि कारयेत् । इदं स्वकालेऽकृतश्चेत् सीमन्तेन सहैव कार्यम्।

१. तत्र प्रथमं प्रधानसङ्कल्पं कुर्यात् । अद्येहामुकोऽहम् अस्यां मम भार्यायां गर्भाभिवृद्धिपरिपन्थिपिशितप्रियाऽलक्ष्मीभूतराक्षसगणनिरसनक्षमसकलसौभाग्यनिदानमहालक्ष्मीसमावेशनद्वारा प्रतिगर्भं बीजगर्भसमुद्भवैनोनिबर्हणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं स्त्रीसँस्कार- रूपं सीमन्तोन्नयनाख्यं कर्म करिष्ये, इति तत्पूर्वाङ्गत्वेन गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धञ्च करिष्ये। इति सङ्कल्प्य क्रमेण यथाविधि तानि कृत्वा बहिःशालायां स्थण्डिले पञ्चभूसँस्कारपूर्वकमग्निं संस्थाप्य तदीशाने कलशं संस्थाप्य तत्र वरुणादीन् संपूज्य रक्षासूत्रमभिमन्त्र्य कलशे संस्थाप्य अग्नेः पश्चादागत्योपविश्य स्वदक्षिणतो गर्भिणीस्त्रियमुपवेश्याचार्यादीनां वरणं कुर्यादिति बोध्यम्।

इति वृणुयात्। **ॐ वृतोस्मी**ति प्रतिवचनम् । **यथाविहितं कर्म कुरु** इति यजमानेनाभिहिते, **करवाणी**ति प्रत्यभिधानान्तरं दक्षिणतो ब्रह्मासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अस्मिन्सीमन्तोन्नयनकर्मणि **त्वं मे ब्रह्माभवे**त्यभिधाय, **भवानी**ति तेनोक्ते, अग्निं प्रदक्षिणं कारयित्वा ब्रह्माणं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम्- बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तमुदगग्रैः, ब्रह्मणोऽग्निपर्यन्तं प्रागग्रैः, नेर्ऋत्याद्वायव्यान्तमुदगग्रैः, अग्नितः प्रणीतापर्यन्तं प्रागग्रैः परिस्तीर्यात् । ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, समार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्त्रः, स्रुवः, आज्यम्, षट्पञ्चाशदुत्तरशतद्वययजमानमुष्टिपरिमितामतण्डुलपूर्णपात्रम्, तिलमुद्गमिश्रास्तण्डुलाः, एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि। पीतसूत्रपूर्णकर्कुः, दर्भपिञ्जुलिकात्रयम्, औदुम्बरफलयुग्मान्वितशाखा, त्रिश्वेतशल्लकीकण्टकम्, अश्वत्थसाग्रशङ्कुः, सुवर्णघटितकर्कर्यादि, सूत्रदोरकपुष्पबिल्वफलयुतवराष्टतयादि, अन्यदपि स्वाचारपरिप्राप्तद्रव्यमासादनीयम्।

होमपृष्ठभूमिसम्पादनम्- ततः पवित्रच्छेदनकुशैः प्रादेशमितपवित्रे छित्त्वा सपवित्रपाणिना प्रणीतोदकेन त्रिः प्रोक्षणीषु निधायानामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् । ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणम् । अनामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम् । प्रणीतोदकेन प्रोक्षणम् । ततः प्रोक्षणीजलेनासादितवस्तुसेचनम् । ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीनिधानम् । तत आज्यस्थाल्यामाज्यनिर्वापः । चरौ तु तिलमुद्गमिश्रतण्डुलानां प्रणीतोदकेन प्रक्षाल्य तज्जलं किञ्चिद्दत्त्वा प्रक्षेपः । ततः स्वयं चरुं गृहीत्वा ब्रह्मणा चाज्यं वह्नेरुत्तरतश्चरुं दक्षिणत आज्यं निदध्यात् । ततः सिद्धे चरौ ज्वलत्तृणं प्रदक्षिणमुभयोपरि भ्रामयित्वा वह्नौ तत्प्रक्षेपः । ततः

स्रुवप्रतपनम् । ततः संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणतो निदध्यात् । तत आज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा आज्यपश्चिमेन चरुमानीयाज्योत्तरतो निदध्यात् । तत आज्ये प्रोक्षणीवदुत्पवनम् । अवेक्ष्य सत्यपद्रव्ये तन्निरसनम् । पुनः पूर्ववत्प्रोक्षण्युत्पवनम् । तत उपमनकुशानादाय प्रजापतिं मनसा ध्यात्वा उत्थाय तूष्णीमग्नौ समिधः प्रक्षिपेत् । अथोपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणक्रमेणाभ्युक्ष्य प्रणीतापात्रे पवित्रे निदध्यात् ।[२] ततो ब्रह्मणान्वारब्धः पातितदक्षिणजानुर्जुहुयात् । तत्राहुतिचतुष्के प्रत्याहुत्यनन्तरं हुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ।

आज्यहोमः - ततः समिद्धतमेऽग्नौ आज्यहोमं कुर्यात् । तत्र विनियोगः- **ॐ प्रजापतय** इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुच्छन्द आज्यहोमे विनयोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा ।

ॐ इन्द्रायेति प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ ।

ॐ अग्नय इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये** ।

ॐ सोमायेति प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** इत्याज्यभागौ ।

स्विष्टकृद्धोमः - ततोऽनन्वारब्धः स्थालीपाकेन जुहोति **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । ततोऽन्वारब्धो जुहुयात् । तत्तदाहुत्यनन्तरं स्रुवा त्रस्थितहुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः । तत्र प्रथममाज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः । **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते ।**

---

[२] ततो **ॐ मनोजूतिः** इति मन्त्रेण मङ्गलनामाग्ने सुप्रतिष्ठितो वरदो भवेति मङ्गलनामानमग्निं प्रतिष्ठाप्य **ॐ चत्वारी**ति ध्यात्वा, **ॐ अग्नेनय ॐ मङ्गलनामाग्नये नमः** इति च पाद्यादिभिः संपूज्य जिह्वा रेखाश्च पूजयेदिति ।

महाव्याहृतिहोमः- तत्र विनियोगः- ॐ भूर्भुवस्वरितिमहाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेणऽग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टभश्छन्दांसि सीमन्तोन्नयनहोमे विनियोगः । **ॐ भूः स्वाहा, इदं भूः । ॐ भुवः स्वाहा, इदं भुवः । ॐ स्वाहा, इदं स्वः** । एता महाव्याहृतयः ।

सर्वप्रायश्चित्तहोमः- त्वन्नोअग्ने० इत्यादिनामृषिदेवताच्छन्दांसि पूर्ववत्। **त्वन्नोऽअग्ने० ॐसत्त्वन्नोऽअग्ने० ॐ अयाश्चाग्ने० ॐ येतेशतम्० ॐ उदुत्तमम्०** इतीदं सर्वप्रायश्चित्तम् ।

प्राजपत्यहोमः- ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनमा । इदं प्राजापत्यम् । अथ संस्तवप्राशनं कृत्वा आचमनं कुर्यात् ।

पूर्णपात्रदानम्- ॐ एतस्मिन् सीमन्तोन्नयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायत्यादि दद्यात् ।

ततः प्रणीताविमोकं बर्हिर्होमञ्च कुर्यात् । ततः पश्चादग्नेर्वधूमहते वाससी परिधाप्य मृद्वासने उपवेशंयेत् ।

सीमन्तोन्नयनम्- ततस्त्रिश्वेतशल्लकीकण्टकाश्वत्थसाग्रशङ्कुपीततन्तुपरिपूर्णाकर्कुदर्भपिञ्जुलीत्रितयौदुम्बरयुग्मफलान्वितप्रादेशमितशाखाभिर्वर्तुलीकृत्य सीमन्तमूर्द्ध्वं विनयति । तत्र विनियोगः - **ॐ भूर्भुवस्वरि**तिमहाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेणाग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि विनयने विनियोगः । **ॐ भूर्भुवःस्वर्विनयामी**ति मन्त्रेण सकृत्, **ॐ भूर्विनयामि, ॐ भुवर्विनयामि, ॐ स्वर्विनयामि,** इति मन्त्रत्रयेण वा प्रत्येकम् ।

वेणीबन्धनम्- औदुम्बरफलयुगलान्वितशल्लकीकण्टकादिपञ्चकं वधूसीमन्तदक्षिणतो वेणीं कृत्वा पतिर्बध्नाति । तत्र विनियोगः - **ॐ अयमूर्ज्जावत** इत्यस्य प्रजापतिर्ऋषिः फलिनी देवता यजुर्वेणीबन्धने विनियोगः।

ॐ अयमूर्ज्जावतोवृक्षऽऊर्ज्जीवफलिनीभव।। इति मन्त्रेण वेणीं बध्नीयात्।

वधूकण्ठे दोरकसूत्रदानम्- तत औदुम्बरफलयुग्मान्वितसूत्रदोरकं वधूग्रीवायामाचारतोऽनेनैव मन्त्रेण बध्नीयात् ।

स्नपनम्- ततो विल्वफलसमन्वितधाराष्टतयेन स्नपनम् । तच्च फलपुष्पादिकं नूतनवस्त्रेण वद्ध्वा प्रतीक्ष्य धर्त्तव्यम् । प्रतिस्नपने स्वामिपठनीयो मन्त्रः - **ॐ अयमूर्ज्जावतोवृक्षऽऊर्ज्जीवफलिनीभव ।।** इति पूर्वोक्त एव ।

गाथागानम्- ततो राजानं गायतामिति प्रैषानन्तरं विनियोगं कुर्यात् । तत्र विनियोगः- **ॐ सोममि**ति प्रजापतिर्ऋषिःसोमो देवता गायत्रीछन्दो गाथागाने विनियोगः । **ॐ सोमऽएवनोराजेमामानुषीःप्प्रजाः । अविमुक्तचक्क्राऽआसीरँस्तीरेतुभ्यम् ।। गङ्गे०** इति गाथां वीणागायिनौ गायतः। अन्यो वाऽऽचारतः ।

पूर्णाहुतिः- ततो या ग्रामसन्निहिता नदी तस्या नाम गृह्णाति तत उत्थाय वध्वा दक्षिणकरेण स्रुवे स्पृष्टे फलपुष्पसमन्वितेन घृतेन पूर्णाहुतिं कुर्यात्- **ॐ मूर्द्धानमि**त्यादिना । पूर्णाहुतिं हुत्वोपविश्य त्र्यायुषं दक्षिणादानं ब्राह्मणभोजनञ्च कुर्यात् ।

— इति सीमन्तोन्नयनम् —

◆

६. जातकर्मप्रयोगः

अभ्युक्षणम्- तत्र प्रथमं प्रसवशूलवतीमद्भिः पतिरभिषिञ्चति । तत्र विनियोगः- **ॐ एजतुदशमास्ये**ति प्रजापतिर्ऋषिर्गर्भो देवता महापङ्क्तिश्छन्द अभ्युक्षणे विनियोगः । **ॐ एजतुदशमास्योगर्ब्भोजरायुणासह । यथायंव्वायुरेजति- यथासमुद्रऽएजति। एवायन्दशमास्योऽअस्त्रज्जरायुणासह ।।** इति मन्त्रेण।

वधूसमीपे पत्युर्जापः- वधूसमीपे पतिर्जपति। तत्र विनियोगः- **ॐ अवैतु- पृश्नी**''स्यस्य प्रजापतिर्ऋषिरग्निर्देवता बृहतीच्छन्दोऽवपाते विनियोगः । **ॐ अवैतुपृश्निशेवलक्ष्शुनेजराय्वत्तवे । नैवमाꣳसेनपीवरि । नकस्मिँश्चनायतमवजरायुपद्यताम् ।।** इति ।

मधुघृतप्राशनम्- ततः पुत्रे जाते[१] नाभेर्वर्धनात्प्राक् कुमारं दक्षिणाकरस्यानामिकया सुवर्णान्तर्हितया मधुघृते एकीकृत्य घृतमेव वा पिता प्राशयति।

---

[१] पिता पुत्रस्य मुखमवलोक्य नद्यादौ स्वर्णयुक्तेनोद्धृतशीतजलेन वा शीघ्रं सचैलं स्नायात्। अद्येहामुकोऽहं पुत्रजननिमित्तकं सचैलं स्नानं करिष्ये इति संकल्प्य स्नात्वा शुभे नवधौते वाससी परिधाय प्राङ्मुख उपविश्याचम्य दीपं प्रज्वलय्य स्वस्तिवाचनं कृत्वा इष्टदेवेभ्यः पुष्पाञ्जलिं दत्त्वा नालच्छेदनात् पूर्वं प्रधानसङ्कल्पं कुर्यात् । ॐ अद्येहेत्यादि सङ्कीर्त्य अमुकोऽहमस्य कुमारस्य गर्भाम्बुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माख्यसंस्कारं करिष्ये इति, तथाऽमुकोऽहं पुत्रजननिमित्तकं मातृकापूजनमाभ्युदयिकश्राद्धञ्च करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण गणेशपूजनं कृत्वा मातृणां पूजनानन्तरं वसोर्धाराः पातयित्वा आभ्युदयिकश्राद्धं हेम्ना विदध्यात् ।

पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् ।
न पक्वेन न चामेन कल्याणान्यभिकामयन् ।।

इति रुद्रकल्पद्रुमे संवर्त्तवचनात् ।

आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान् ।
धान्याच्चतुर्गुणेनैव हिरण्येन सुरोचिषा ।।

इति मरीचिवचनाद् । आमश्राद्धे देयाऽऽमान्नस्य चतुर्गुणमामान्नं यावल्लभ्यते तावद्धेम देयम्।

तत्र विनियोगः - **ॐ भूर्भुवःस्व**रित्यादीनां महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि मधुघृतप्राशने विनियोगः ।

ॐ भूस्त्वयिदधामि, ॐ भुवस्त्वयिदधामि, ॐ स्वस्त्वयिदधामि, ॐ भूर्भुवःस्वःसर्वंत्वयिदधामि, इति मन्त्रेण । एतच्च मेधाजननम् ।

आयुष्यकरणम् - ततः कुमारस्य दक्षिणे कर्णे नाभ्यां वा मुखं दत्त्वा विनियोगं कुर्यात् । **ॐ अग्निरायुष्मा**नित्यादीनां प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता गायत्रीच्छन्द आयुष्यकरणे विनियोगः । **ॐ अग्निरायुष्मान्त्सवनस्पतिभिरायुष्माँस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।१।। ॐ सोमऽआयुष्मान्त्सौषधीभिराषुष्माँस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।२।। ॐ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।३।। ॐ देवाऽआयुष्मन्तस्त्तेसुधाभिरायुष्मन्तस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।४।। ॐ ऋषयऽआयुष्मन्तस्त्तेव्व्रतैरायुष्मन्तस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।५।। ॐ पितरऽआयुष्मन्तस्त्तेस्वधाभिरायुष्मन्तस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।६।। ॐ यज्ञऽआयुष्मान्त्सदक्षिणाभिरायुष्माँस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।७।। ॐ समुद्रऽआयुष्मान्त्सस्त्रवन्तीभिरायुष्माँस्तेनत्त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ।।८।।** इति त्रिर्जपेत्।

ॐ त्र्यायुषमिति नारायणऋषिः शिवो देवता उष्णिक्छन्द आयुष्यकरणे विनियोगः । **ॐ त्र्यायुषञ्जमदग्ग्नेःकश्यपस्यत्र्यायुषम् । यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ।।** इति त्रिर्जपति । इत्यायुष्यकरणम् ।

अनुवाकपाठः - अथ तस्य दीर्घमायुः कामयमानः पिता पुत्रमभिस्पृशन्ननुवाकं प्रजपति । तत्र विनियोगः - **ॐ दिवस्परी**त्येकादशर्चस्यवत्सप्रीतिर्भालन्दनऋषिरग्निर्देवता त्रिष्टुप्छन्दोऽभिमर्शने विनियोगः । **ॐ दिवस्प्परिप्प्रथमञ्जज्ञेऽअग्गिनरस्म्मद्द्वितीयम्परिजातवेदाः । तृतीयमप्प्सुनृमणाऽअजस्त्रमिन्धानऽएनञ्जरतेस्वाधीः ।।१।। ॐ व्विद्मातेऽअग्ग्नेत्रेधात्त्रयाणिव्विद्द्मातेव्विभृतापुरुत्त्रा । व्विद्द्मातेनामपरमङ्गुहायद्द्विद्द्मातमुत्त्संय्यतऽआज-**

गन्थ ।।२।। ॐ समुद्रेत्त्वानृमणाऽअप्स्वन्तर्नृचक्षाऽईधेदिवोऽअग्ग्रऽऊधन्। तृतीयेत्त्वारजसितस्त्थिवाꣳसमपामुपस्त्थेमहिषाऽअवर्द्धन् ।।३।। ॐ अक्क्रन्ददग्ग्निस्तनयन्निवद्यौःक्षमारेरिहद्द्वीरुधःसमञ्जन् । सद्योजज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्त्यन्तः ।।४।। ॐ श्रीणामुदारोधरुणोरयीणाम्मनीषाणाम्प्रार्प्पणःसोमगोपाः । व्वसुःसूनुःसहसोऽअप्सुराजाव्विभात्त्यग्ग्रऽउषसामिधानः ।।५।। ॐ व्विश्श्वस्यकेतुर्ब्भुवनस्यगर्ब्भऽआरोदसीऽअपृणाज्जायमानः । व्वीडुञ्चिदद्द्रिमभिनत्त्परायञ्जनायदग्ग्निमयजन्तपञ्च ।।६।। ॐ उशिक्क्पापकोऽअरतिःसुमेधामर्त्त्येष्ष्वग्ग्निरमृतोनिधायि । इयर्त्तिधूममरुषम्भरिब्भ्रदुच्छुक्क्रेणशोचिषाद्यामिनक्षन् ।।७।। ॐ दृशानोरुक्क्मऽउर्व्याव्यद्यौद्दुर्म्मर्षमायुःश्श्रियेरुचानः । अग्ग्निरमृतोऽअभवद्द्वयोभिर्य्यदेनन्द्यौरजनयन्त्सुरेताः।।८।। ॐ यस्तेऽअद्यकृणवद्द्भद्द्रशोचेपूपन्देवघृतवन्तमग्ग्ने । प्रतन्नयप्प्रतरंव्वस्योऽअच्छाभिसुम्म्नन्देवभक्त्तंय्यविष्ठ ।।९।। ॐ आतम्भजसौश्श्रवसेष्ष्वग्ग्रऽउक्क्थऽउक्क्थऽआभजशस्यमाने । प्प्रियःसूर्य्येप्प्रियोऽअग्ग्नाभवात्त्युज्जातेनभिनदुदज्जनित्त्वैः ।।१०।। ॐ त्वामग्ग्नेयजमानाऽअनुद्यून्विश्श्वावसुदधिरेव्वार्य्याणि । त्वयासहद्द्रविणमिच्छमानाव्व्रजङ्गोमन्तमुशिजोव्विवव्व्रुः[2] ।।११।।

अनुप्राणनम्- ततः कुमारस्य प्रतिदिशमेकैकं ब्राह्मणं मध्ये पञ्चममूर्ध्वमवेक्षमाणमवस्थाप्य तानुद्दिश्य **इममनुप्राणित** इति पिता ब्रूयात् । ततस्तेषु मध्ये **प्राण** इति पूर्वः, **व्यान** इति दक्षिणः, **अपान** इत्यपरः, **उदान** इत्युत्तरः, उपरिष्ठादवेक्षमाणः **समान** इति पञ्चमो ब्रूयात् । एषामसम्भवे स्वयमेव तत्र तत्रोपसंगम्य तथैव ब्रूयात्[3] ।

---

[2] इत्येकादशऋचः पठित्वा **अस्ताव्यग्निरिति** द्वादशीमृचमनुवाकान्तर्गतामपि न पठेत् । **दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टीति** पारस्करगृह्यात् ।

[3] अस्मिन्पक्षे प्रैषो न भवति ।

कुमारजन्मभूमेरभिमन्त्रणम् - अथ कुमारजन्मभूमिमनामिकया स्पृशन् मन्त्रयेत् । तत्र विनियोगः - **ॐ व्वेदतेभूमिहृदयमि**त्यस्य प्रजापतिर्ऋषिर्भूमिर्देवताऽनुष्टुप्छन्दो भूम्या अभिमन्त्रणे विनियोगः । **ॐ व्वेदतेभूमिहृदयन्दिविचन्द्रमसिश्रितम् । व्वेदाहन्तन्मान्तद्विद्यात्पश्येमशरदः-शतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम् ।।** इत्यनेन ।

कुमाराभिमर्शनम् - अथ पिता कुमारमभिमृशति । तत्र विनियोगः - **ॐ अश्माभवे**त्यस्य प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दोऽभिमन्त्रणे विनियोगः । **ॐ अश्माभवपरशुर्भवहिरण्यमस्तृतम्भव । आत्मावैपुत्रनामासिसजीवशरदःशतम् ।।** इत्यनेन[४] ।

कुमारमातुरभिमन्त्रणम्- ततः पतिः कुमारमातरमभिमन्त्रयेत्। तत्र विनियोगः- **ॐ इडासी**त्यस्य प्रजापतिर्ऋषिरिडा देवता अनुष्टुप्छन्दोऽभिमन्त्रणे विनियोगः। **ॐ इडासिमैत्रावरुणीव्वीरेव्वीरमजीजनथाः । सात्त्वांव्वीरवतीभवयास्म्मान्व्वीरवतोकरत् ।।**

कुमाराय दक्षिणस्तनदानम्- ततः कुमारस्य नाभिवर्धने कृतेऽस्या मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमाराय प्रयच्छति । तत्र विनियोगः - **ॐ इमꣳस्तनमि**त्यस्य प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दः स्तनदाने विनियोगः । **ॐ इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ग्रेसरिरस्यमद्ध्ये । उत्तसञ्जुषस्वमधुमन्तमर्व्वन्त्समुद्रियꣳसदनमाविशस्व ।।** इति मन्त्रेण ।

ततो वामं स्तनं प्रक्षाल्य प्रयच्छति पूर्ववत्, **ॐ इमꣳस्तनमि**त्यादि मन्त्रेण । पुनर्विनियोगः - **ॐ यस्तेस्तन** इत्यस्य दीर्घतमाऋषिर्वाग्देवता त्रिष्टुप्छन्दः स्तनदाने विनियोगः । **ॐ यस्तेस्तनःशशयोयोमयोभूर्य्योरत्न-**

---

४. जातकर्म स्वकालेऽकृतञ्चेत् आयुष्यकरणादि **अश्माभवे**त्येतन्मन्त्राभिमर्शनान्तं कालान्तरेऽपि भवति ।

अनुप्राणनवत्सप्ताभिमर्शनानुमन्त्रणे ।
कालान्तरेऽपि कुर्वीत आयुष्यकरणं तथा ।।

इति वृद्धोक्तेः । संस्काररूपत्वाच्च मेधाजननं तु न भवति इति संस्कारदीपके ।

धावसुविद्यःसुदत्रः । येनविश्श्वापुष्ष्यसिवार्य्याणिसरस्वतितमिहधातवेऽकः ।। इति मन्त्रेण च ।

प्रसवित्रीशयनीयोपरिभागे पात्रस्थापनम् - ततः प्रसवित्रीशयनीयमस्तकोपरिभूमौ वारिपूर्णं पात्रं निदधाति । तत्र विनियोगः - **ॐ आपोदेवेष्वित्यस्य** प्रजापतिर्ऋषिरापो देवता अनुष्टुप्छन्दः सूतिकायाः शिरःप्रदेशे रक्षार्थोदककुम्भस्थापने विनियोगः[५] । **ॐ आपोदेवेषुजाग्ग्रथ । यथादेवेषुजाग्ग्रथ । एवमस्याꣳसूतिकायाꣳसपुत्रिकायाञ्जाग्ग्रथ** ।। इति मन्त्रेण । तच्च सूतिकोत्थानदिवसपर्यन्तं तत्रैव धर्तव्यम् ।

होमः - ततः सूतिकाद्वारदेशे पञ्चभूसँस्कारान् कृत्वा अग्नेरुपसमाधानम्। सचाग्निरुत्थानपर्यन्तं धार्यः । तत्र चाग्नौ सन्ध्ययोः कणसर्षपान् दशदिनानि पिताऽन्यो वा ब्राह्मण ऋजुहस्तेन जुहोति[६] ।

प्रथमाहुतिः - तत्र विनियोगः- **ॐ शण्डामर्क्का** इति प्रजापतिर्ऋषिः शण्डामर्क्कादयो देवता अनुष्टुप्छन्दः सूतिकाद्वाराग्नौ फलीकरणमिश्रसर्षपहोमे विनियोगः **ॐ शण्डामर्क्काऽउपवीरःशौण्डिकेयऽउलूखलः । मलिम्लुचोद्रोणासश्च्यवनोनश्यतादितःस्वाहा ।। इदꣳशण्डामर्क्काभ्यामुपवीरायशौण्डिकेयायोलूखलायमलिम्लुचायद्रोणासायच्यवनाय ।**

द्वितीयाहुतिः - तत्र विनियोगः - **ॐ आलिखन्निति** प्रजापतिर्ऋषिरालिखदादयो देवता अनुष्टुप्छन्दः सूतिकाद्वाराग्नौ फलीकरणमिश्रसर्षपहोमे विनियोगः। **ॐ आलिखन्ननिमिषःकिंवदन्तऽउपश्श्रुतिः । हर्य्यक्षःकुम्भीशत्रुःपात्रपाणिर्नृमणिः । हन्त्रीमुखःसर्षपारुणश्च्यवनोनश्यतादितःस्वाहा** ।। इदमालिखतेऽनिमिषाय किंवदन्तायोपश्श्रुतये हर्य्यक्षाय कुम्भीशत्रवे पात्रपाणये नृमणये हन्त्रीमुखाय सर्षपारुणाय च्यवनाय[७] ।

---

[५] इदं विनियोगवाक्यं रामपद्धतौ न दृश्यते ।

[६] स्थापितमग्निम् **ॐ मनोजूतिः०** प्रगल्भो जातकर्मणीति वचनात् । **ॐ भूर्भुवः स्वः** इति प्रगल्भत्वेनावाह्य **ॐ प्रगल्भनामाग्नये नमः** इति पाद्यादिभिः संपूज्य होमं कुर्यात् ।

[७] अत्रोभयत्राग्निर्देवतेति, इदमग्नये इति त्यागश्च संस्कारदीपके । रामपद्धतौ त्विदमेव ।

कुमारग्रहनिवारणम्- अथ यदि दशाहाभ्यन्तरे कुमारग्रहो बालमाविशेत् तेनाविष्टो न नामयति न रोदिति न हृष्यति न तुष्यति च तदैवं नैमित्तिकं कर्तव्यम् । तदा तं बालं जालेन प्रच्छाद्योत्तरीयेण वाससा च पिताङ्कमाधाय जपति। तत्र विनियोगः - **ॐ कूर्कुरः सुकूर्कुर** इत्यादीनां त्रयाणां मन्त्राणां प्रजापतिर्ऋषिः शुनको देवताऽनुष्टुप्छन्दो जपे विनियोगः । **ॐ कूर्कुरःसुकूर्कुरःकूर्कुरोबालबन्धनः । चेच्चेच्छुनकसृजनमस्तेऽअस्तुसीसरोलपेतापह्वर ।।१।। ॐ तत्त्सत्त्यंय्यत्रेदेवावरमददुःकुमारमेववाऽवृणीथाः। चेच्चेच्छुनकसृजनमस्त्तेऽअस्त्तुसीसरोलपेतापह्वर ।।२।। ॐ तत्त्सत्त्यंय्यत्तेसरमामातासीसरःपिताश्यामशबलौभ्भ्रातरौ । चेच्चेच्छुनकसृजनमस्त्तेऽअस्त्तुसीसरोलपेतापह्वर ।।३।।** इति ।

कुमाराभिमर्शनम्- तत्र विनियोगः - **ॐ ननामयती**त्यस्य प्रजापतिर्ऋषिर्वायुर्देवताऽनुष्टुप्छन्दोऽभिमर्शने विनियोगः । **ॐ ननामयतिनरुदतिनहृष्यतिनग्लायति । यत्रवयंवदामोयत्रचाभिमृशामसि ।।** इत्यभिमृशति[८] ।

— इति जातकर्मप्रयोगः —

* * *

---

[८] ततो दक्षिणासंकल्पं कुर्यात्- अद्येहामुकोऽहं जातस्य पुत्रस्य कृतैतज्जातकर्माख्यसंस्कारकर्मणः साङ्गतासिद्ध्यै साद्गुण्यार्थञ्च इमां दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सन्नमम । ततो भूयसीं संकल्प्य ब्राह्मणेभ्यो दद्यात् । दश यथाशक्ति वा ब्राह्मणान् भोजयिष्ये इति संकल्प्य सूतकान्ते भोजयेत् । ''**पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयम्**'' इति व्यासोक्ते, रात्रावपि स्नानदानादिकं भवत्येव । ''**प्रथमे च तथा षष्ठे दाता नाप्नोति सूतकम्**'' इति वचमात् । दानप्रतिग्रहौ न दोषाय ततोऽभिषेकमन्त्रपाठादि कारयेदिति ।

७. षष्ठिकापूजा

प्रयोगः - कर्ता स्नानादिकं विधाय प्रदोषसमये ब्राह्मणवरणं कुर्यात् । ॐ अद्येत्यादि० अमुकगोत्रस्यामुकशर्मणो ममाभिनवजातबालकस्यायुर्वृद्धिपूर्वकोत्तरोत्तरहर्षविजयप्राप्त्यर्थमेतत्षष्ठीमहोत्सवकर्मणि नानानामगोत्रान्नानानामशर्मणो ब्राह्मणानेभिश्चन्दनपूगीफलपुष्पाक्षतवासोभिर्युष्मानहं वृणे ।

रक्षापोटलिकालम्बनम्- ततः प्रथमतो दूर्वाङ्कुरसर्षपहरिद्राक्षतादिना पीतवस्त्रे पोटलिकां कृत्वा सूतिकोपरि रक्षार्थं लम्बयेत् । ततो हे सूतिके इहागच्छ इह तिष्ठ यथाकालपर्यन्तं सुस्थिरा भव इत्यावाह्य सर्वकर्मान्ते तां पोटलिकां काण्डेन भिन्द्यात् ।

क्षेत्रपालबलिदानम्- ततो बहिर्बलिदानम् । तत्र प्रार्थना -

क्षेत्रपाल नमस्तुभ्यं सर्वशान्तिफलप्रद ।
बालस्य विघ्नशान्त्यर्थं मम गृह्णात्विमं बलिम् ।।१।।
भूतदैत्यपिशाचाद्या गन्धर्वा रक्षसां गणाः ।
शुभं कुर्वन्तु ते सर्वे मम गृह्णन्त्विमं बलिम् ।।२।।
योगिनी डाकिनी चैव मातरो निवसन्ति याः ।
शान्तिं कुर्वन्तु ताः सर्वा मम गृह्णन्त्विमं बलिम् ।।३।।

सूतिकाद्वारे गणपत्यादि पूजनम्- ततः सूतिकाद्वारे देहलीमध्ये वा गणपतिं पूजयेत् । तत्र प्रार्थना -

सर्वविघ्नहरोऽसि त्वमेकदन्त गजानन ।
षष्ठीगेहेऽर्चितः प्रीत्या बालं दीर्घायुषं कुरु ।। इति ।

द्वारदक्षिणे- **क्षेत्रपालाय नमः** । द्वारवामे- **दुर्गायै नमः** । इति बहिः पूजा ।

सूतिकागृहाभ्यन्तरपूजनम्- ततः सूतिकागृहे पीठादौ अक्षतपुञ्जान् संस्थाप्य तेषु क्रमेण पूजयेत् । तत्र कर्ता प्राङ्मुख उदङ्मुखो वा उपविश्याचम्य प्रायश्चित्तगोदानं कुर्यात् ।

गोदानसङ्कल्पः - ममास्यां रात्रौ अभिनवजातकुमारस्य नैरुज्यपूर्वकं दीर्घायुष्यकामनयाभगवत्याः षष्ठिका देव्याः करिष्यमाणपूजनादिकर्मणोऽधिकारितामिद्ध्यर्थं ज्ञाताज्ञातसकलपापप्रायश्चित्तासिद्ध्ये प्राजापत्यप्रत्याम्नायीभूतामिमां गां तन्निष्क्रयीभूतं द्रव्यं वेत्यादि । प्रार्थना- **कपिले०** इत्यादि । ततो दानप्रतिष्ठा । ततो ब्राह्मणवरणम्, पुण्याहवाचनम्, अष्टौ दीपान् क्रमेण प्रज्वलय्य प्रतिज्ञासङ्कल्पं कुर्यात् ।

प्रतिज्ञासङ्कल्पः - ततः कुशादीन्यादाय देशकालौ संकीर्त्य ममाभिनवजातकुमारस्य षष्ठीमहोत्सवकर्मणि गणेशकलशदीपपूजनपूर्वकं षष्ठिकास्कन्दप्रद्युम्नषोडमातृकाषट्कृत्तिकादिपूजनमहं करिष्ये ।

गणेशकलशदीपादिपूजनम्- तत्र प्रथमाक्षतपुञ्जे गणेशमावाह्य संपूज्य **वक्रतुण्डे**ति प्रार्थयेत् । ततः कलशस्थापनविधिना कलशं संस्थाप्य सर्वौषध्यादीनि तत्तन्मन्त्रैः प्रक्षिप्य तत्र **तत्त्वायामी**ति वरुणमावाह्य पूजयेत् । **कलशस्य मुखे विष्णुरि**त्यादिना कलशमभिमन्त्र्य **देवदानसंवादे** इत्यादिना प्रार्थयेत्। तत्र **नमः शंभवाये**ति मन्त्रेण मृत्युञ्जयम्, **देवीर्द्वार** इति मन्त्रेण उमाम्, **विष्णोरराटम्** इति मन्त्रेण विष्णुं सम्पूज्य, नवग्रहाँश्च स्वस्वमन्त्रैः पूजयेत्।

नवग्रहादिपूजनम्- आकृष्णेनेति सूर्यम्, **इमन्देवा** इति सोमम्, **अग्निर्मूर्द्धे**ति भौमम्, **उद्बुद्ध्यस्वे**ति बुधम्, **बृहस्पतेऽअती**ति गुरुम्, **अन्नात्परी**ति शुक्रम्, **शन्नोदेवीरि**ति शनैश्चरम्, **कयानश्चित्र** इति राहुम्, **केतुङ्कृण्वन्** इति केतुम् । **ॐ पृथिव्यै नमः, ॐ विष्कुम्भादियोगेभ्यो नमः, ॐ ववादिकरणेभ्यो नमः, मुहूर्त्तेभ्यो नमः, ॐ मेषादिराशिभ्यो नमः, ॐ वारेभ्यो नमः, ॐ ऋतुभ्यो नमः** इति ।

अष्टचिरञ्जीव्यादीनां पूजनम्- ततोऽष्टदलेऽष्टचिरञ्जीविनः पूजयेत् ।

अश्वत्थामानम्- **श्यामवर्णं महाशक्तिं खड्गपाणिं वरप्रदम् ।**
अश्वत्थामानमाचार्यं ध्याये द्रोणसुतं शिवम् ।।

इति ध्यात्वा **ॐ ब्राह्मणासःपितर** इति मन्त्रेणावाहनादियथामिलितोपचारैः पूजयेत् ।

बलिम्- **स्वर्गं मर्त्यं च पातालं दत्तं येन द्विजन्मने ।**
विरोचनात्मजं वन्दे दानवाधिपतिं बलिम् ।।

इति ध्यात्वा यथामिलितोपचारैः पूजयेत् ।

व्यासम्- **सर्वशास्त्रार्थ तत्त्वज्ञं वेदवेदाङ्ग पारगम् ।**
शास्त्रमूलप्रवक्तारं पराशरसुतं नुमः ।।

इति ध्यात्वा पूजयेत् ।

हनूमन्तम्- **अञ्जनीगर्भसंभूतं जानकीशोकनाशनम् ।**
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ।।

इति ध्यात्वा पूजयेत् ।

विभीषणम्- **लङ्कावास नमस्तेस्तु पौलस्त्यकुल संभव ।**
राक्षसाधिपते देव नमस्तेस्तु बिभीषण ।।

इति ध्यात्वा पूजयेत् ।

कृपम्- **राजर्षिभिर्नुतः पातु भारद्वाजकुलोद्भवः ।**
कृपाचार्योतितुष्टो मां वीरो धीरपराक्रमः ।।

इति ध्यात्वा पूजयेत् ।

परशुरामम्- **कार्तवीर्यस्य हन्तारं पर्शुहस्तं[१] महाबलम् ।**
क्षत्रान्तकरणं वीरं जामदग्न्यं नमाम्यहम् ।।

इति ध्यात्वा पूजयेत् ।

---

[१] परशुहस्तम् इति मूलपाठः ।

मार्कण्डेयम्- **वटवृक्षसमारूढं जटामुकुटशोभितम् ।**
ऋषिवृन्दैःस्तुतं नित्यं मार्कण्डेयं नमामि वै ।।

इति ध्यात्वा पूजयेत् । ततो **नमोस्त्वनन्तायेति** दीपं पूजयेत् ।

षष्ठीपूजा- नूतनकाष्ठपीठे गोमयेन पार्श्वयोः स्कन्दप्रद्युम्नयोर्मध्ये षष्ठ्या एवं तिस्रः प्रतिमाः कृत्वा शुक्लतण्डुलैर्यवैर्वा पूरयित्वा षष्ठ्याः कर्णप्रदेशे दूर्वापल्लवैः कुण्डले, सर्वाङ्गेषु षोडशकपर्दिका दद्यात् । एवं रचितायां गोमयप्रतिमायां तदभावेऽक्षतपुञ्जे वा षष्ठीं पूजयेत् ।

आवाहनम् - ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन । **ससस्त्यश्वकः–सुभद्रिकाङ्काम्पीलवासिनीम् ।।** इति मन्त्रेण गन्धाक्षतपुष्पैः-

आयाहि वरदे देवि महाषष्ठीति विश्रुते ।
शक्तिभिः सह पुत्रं मे रक्ष जागरवासरे ।।

इत्यावाह्य न्यासं कुर्यात् ।

न्यासः - ॐ षं अङ्गुष्ठाभ्यां नमः, ॐ ष्ठिं तर्जनीभ्यां नमः, ॐ कां मध्यमाभ्यां नमः, ॐ यैं अनामिकाभ्यां नमः, ॐ नं कनिष्ठिकाभ्यां नमः, ॐ मं करतलकरपृष्ठाभ्यां नमः, ॐ षं हृदयाय नमः, ॐ ष्ठिं शिरसे स्वाहा, ॐ कां शिखायै वौषट्, ॐ यैं कवचाय हुम्, ॐ नं नेत्रत्रयाय वौषट्, ॐ मं अस्त्राय फट् इति ।

अर्घ्यम्- ततो नाममन्त्रेण आसनं पाद्यं दत्त्वा अर्घ्यं दद्यात् । तत्र मन्त्रः -

पत्रपुष्पफलाम्भोभी रत्नैश्च बहुभिर्युतम् ।
षष्ठि देवि मया दत्तमर्घ्यं गृह्ण नमोऽस्तु ते ।।

स्नानम्- **काबेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती ।**
गङ्गा च यमुना चैव ताभ्यः स्नानार्थमाहृतम् ।।

तत आचमनं दद्यात् ।

पञ्चामृतस्नानम्

पयःस्नानम्- ॐ पयःपृथिव्याम्पयओषधीषुपयोदिव्यन्तरिक्षेपयोधाः। पयस्वतीःप्प्रदिशःसन्तुमह्यम् ।। इति पयसा ।

दधिस्नानम् - ॐ दधिक्क्राव्णोऽअकारिषञ्जिष्णोरश्श्वस्यवाजिनः । सुरभिनोमुखाकरत्त्प्रणऽआयूꣳषितारिषत् ।। इति दध्ना ।

घृतस्नानम्- ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्श्रितोघृतम्वस्यधाम। अनुष्ष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ।। इति घृतेन ।

मधुस्नानम्- ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माद्ध्वीर्नः-सन्त्वोषधीः ।। इति मधुना ।

शर्करास्नानम्- ॐ अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम् । अपाꣳ-रसस्ययोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्ये-षतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ।। इति शर्करया ।

शुद्धोदकस्नानम् - ॐ आपोऽअस्म्मान्मातरःशुन्धयन्तुघृतेननोघृतप्प्वः-पुनन्तु । विश्श्वꣳहिरिप्प्रम्प्रवहन्तिदेवीरुदिदाब्भ्यःशुचिरापूतऽएमि ।। इति शुद्धोदकेन ।

वस्त्रादिभिः पूजनम्

वस्त्रसमर्पणम्- ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्युमद्द्विभातिक्क्रतु-मज्जनेषु । यद्दीदयच्छवसऽऋतप्रजाततदस्म्मासुद्रविणंधेहिचित्रम् ।। इति वस्त्रं समर्पयेत् ।

यज्ञोपवीतसमर्पणम्- ॐ यज्ञोपवीतम्परमम्पवित्रम्प्रजापतेर्यत्सहजम्पु-रस्तात् । आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतम्बलमस्तुतेजः ।। इति यज्ञोपवीतम् समर्पयेत् ।

चन्दनसमर्पणम्- ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीरिणीम् । ईश्वरींसर्वभूतानान्तामिहोपह्वयेश्रियम् ।। इति गन्धं समर्पयेत् ।

अक्षतसमर्पणम्- ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत । अस्त्तोषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी ।। इत्यक्षतान् समर्पयेत्।

पुष्पसमर्पणम्- ॐ श्रीश्श्चतेलक्ष्मीश्श्चपत्न्न्यावहोरात्रेपार्श्श्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम् । इष्णान्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।। इति पुष्पाणि समर्पयेत् ।

दूर्वासमर्पणम्- ॐ काण्डात्त्काण्डात्त्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्व्वेप्प्रतनुसहस्त्रेणशतेनच ।। इति दूर्वाः समर्पयेत् । एवमेव सिन्दूरमपि समर्पयेत् ।

ताम्बूलसमर्पणम्- कर्पूरैलालवङ्गादिपूगीफलसमन्वितम् ।
ताम्बूलं कल्पितं भक्त्या गृहाण षष्ठिके नमः ।।

इति ताम्बूलं समर्पयेत् ।

द्रव्यसमर्पणम् - ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ।। इति द्रव्यं समर्पयेत् ।

फलसमर्पणम् - ॐ याःफलिनीर्य्याऽअफलाऽअपुष्प्पायाश्श्चपुष्प्पिणीः। बृहस्प्पतिप्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः ।। इति फलं समर्पयेत् ।

धूपसमर्पणम्- ॐ धूरसिधूर्व्वधूर्व्वन्तंधूर्व्वतंय्योस्म्मान्धूर्व्वतितन्धूर्व्वयंवयन्धूर्व्वामः । देवानामसिवह्नितमꣳसस्नितमम्पप्प्रितमञ्जुष्टतमन्देवहूतमम्।। इति धूपं समर्पयेत् ।

दीपसमर्पणम्- ॐ अग्ग्निर्ज्ज्योतिर्ज्ज्योतिरग्ग्निःस्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यःस्वाहा । अग्ग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्चःस्वाहा । ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिःस्वाहा ।। इति दीपं समर्पयेत् ।

नैवेद्यसमर्पणम्- **ॐ नाब्भ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत । पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ२।।ऽअकल्प्ययन् ।।** इति नैवेद्यं समर्पयेत् ।

आरार्त्तिकसमर्पणम्-

अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।
आरार्तिकमिदं देवि गृहाण मदनुग्रहात् ।।

इति आरार्त्तिकं समर्पयेत् ।

क्षमार्पणम् (प्रार्थना)-

प्रसन्नवरदा देवी स्वयं रक्षतु बालकम् ।
भूतप्रेतपिशाचेभ्यो डाकिनीशाकिनीषु च ।।१।।
मातेव रक्ष मे पुत्रं श्वापदे पन्नगेषु च ।
पुरा देवैः पूजिताऽसि ब्रह्मविष्णुशिवादिभिः ।।२।।
आवाभ्यामपि देवि त्वं पूज्यसे भक्तिपूर्वकम् ।
देह्यस्य बालकस्यायुर्दीर्घं देवि नमोऽस्तु ते ।।३।। इति।

पुण्याहवाचनम्- ततः पूर्वोक्तविधिना पुण्याहं वाचयेत्। भोब्राह्मणा अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम यजमानस्य गृहेऽस्मिन् षष्ठीमहोत्सवकर्मणि **ॐ पुण्याहं भवन्तो ब्रुवन्तु३, ॐ पुण्याहम्३, ॐ पुनन्तुमादेवजनाः**, इत्यादि पुण्याहवाचनान्ते सर्वे ब्राह्मणा यजमानाय तिलकं फलञ्च दद्युः ।

बालकस्यायुष्यप्रार्थना-

अथ सर्वे बान्धवाश्च स्वस्तिवाक्यपुरःसरम् ।
कामयन्तोऽर्भकस्यायुः प्रार्थयन्तां सयोषितः ।।१।।
जननी सर्वसौख्यानां वर्धनी कुलसंपदाम् ।
साधनी सर्वसिद्धीनां जन्मदे त्वां नता वयम् ।।२।।

इति षष्ठिकायै संकल्पपूर्वकं पूजां समर्पयेत् ।

पूजासमर्पणम्- अस्यां रात्रौ ममाभिनवजातकुमारस्य दीर्घायुष्यकामनया एतानि गन्धपुष्पादीनि **षष्ठिकादेव्यै नमः** इति ।

षष्ठिकायै बालकसमर्पणम्- ततो बालकं व्यजने स्थापयित्वा षष्ठिकायै निवेदयेदनेन मन्त्रेण-

देवतानामृषीणां च भक्तानां भक्तवत्सले ।
अर्पितं रक्ष मे पुत्रं महाषष्ठि नमोऽस्तु ते ।।

ततो बालकं गोमयोदकादिभिरभ्युक्ष्य स्कन्दप्रद्युम्नौ पूजयेत् ।

स्कन्दध्यानम्- मयूरवरमारूढो द्विभुजो बालरूपधृक् ।
मुद्गरं वामहस्ते तु शक्तिं दक्षिणतो न्यसेत् ।।१।।
वराभयकरः साक्षाद् द्विभुजः शिखिवाहनः ।
किरीटी कुण्डली देवो दिव्याभरण भूषितः ।।२।

इति स्कन्दं ध्यात्वा प्रद्युम्नं ध्यायेत् ।

प्रद्युम्नध्यानम्- प्रद्युम्नस्तु चतुर्बाहुः शङ्खचक्रगदाधरः ।
चक्रं दक्षिणहस्तेऽस्य वामहस्ते धनुस्तथा ।।१।।
शङ्खञ्च दक्षिणे दद्याद्गदां वामे प्रदापयेत् ।
प्रद्युम्नं कारयेद्देवं सर्वलक्षणसंयुतम् ।।२।।
स्त्रियौ चैवास्य कर्तव्ये सर्वलक्षणसंयुते ।

इति प्रद्युम्नं ध्यात्वा स्कन्दस्यावाहनं कुर्यात् ।

स्कन्दस्यावाहनम्- ॐ स्कन्दाय नमः इति नाममन्त्रेण, तथा- **ॐ द्रप्सश्श्चस्कन्दपृथिवीमनुद्यामिमञ्चयोनिमनुयश्श्चपूर्वः । समानंयोनिमनुसञ्चरन्तन्द्रप्सञ्जुहोम्म्यनुसप्प्तहोत्राः ।।** इति वैदिकमन्त्रेण च स्कन्दमावाहयेत्।

प्रद्युम्नस्यावाहनम्- ॐ प्रद्युम्नाय नमः इति प्रद्युम्नं चावाह्य तैरेव मन्त्रैः आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानम्, वस्त्रम्, यज्ञोपवीतम्, गन्धम्, अक्षतान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, ताम्बूलम्, फलम्, द्रव्यम्, नीराजनञ्च स्कन्दप्रद्युम्नाभ्यां समर्प्य क्रमशः प्रार्थयेत् ।

कार्तिकेयप्रार्थना- **कार्तिकेय महाबाहो गौरीहृदयनन्दन ।**
कुमारं रक्ष मे भीत्या एहि देव नमोस्तु ते ।।

इति स्कन्दं प्रार्थ्य प्रद्युम्नं च प्रार्थयेत् ।

प्रद्युम्नप्रार्थना- **भो प्रद्युम्न महाबाहो लक्ष्मीहृदयनन्दन ।**
कुमारं रक्ष मे भीतेः प्रद्युम्नाय नमो नमः ।।

इति ततो यथामिलितोपचारैर्वंशं पूजयेत् ।

वंशध्यानम्- **सर्वमङ्गलमाङ्गल्य गोविन्दस्य करस्थित ।**
वंशंवर्द्धय मे वंश सदानन्द नमोस्तु ते ।। इति ।

खड्गपूजनम्- ततो यथामिलितोपचारैः खड्गं पूजयेत् ।

खड्गध्यानम्- **इयं येन धृता क्षोणी हतश्श्च महिषासुरः ।**
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ।।

मातृकापूजा- अथ अक्षतपुञ्जे गौरीमावाह्य आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानम्, वस्त्रम्, द्रव्यम्, गन्धम्, अक्षतान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, ताम्बूलम्, पूगीफलञ्च निवेदयेत्। एवमक्षतपुञ्जेषु पद्माम्, शचीम्, मेधाम्, सावित्रीम्, विजयाम्, जयाम्, देवसेनाम्, स्वाहाम्, स्वधाम्, मातॄः, लोकमातॄः, धृतिम्, तुष्टिम्, पुष्टिम्, आत्मनः कुलदेवताञ्च यथामिलितोपचारैः पूजयेत् ।

षट्कृत्तिकापूजा- अथ अक्षतपुञ्जे षट्कृत्तिकापूजनं कुर्यात् । तत्र क्रमः- **ॐ शिवे इहागच्छ इह तिष्ठे**त्यावाह्य पाद्यादिभिः पूजयेत्। एवम् संभूतिम्, कीर्तिम्, सन्नतिम्, अनसूयाम्, क्षमाञ्च यथामिलितोपचारैः पूजयेत् ।

ब्रह्मसूत्राभिमन्त्रणम् - ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु । व्विश्श्वेदेवासऽइहमादयन्तामोँ३म्प्रतिष्ठ ।।१।। ॐ सूर्य्यरश्मिम्महरिकेशःपुरस्तात्तसविताज्ज्योतिरुदयाँ२।।ऽअजस्त्रम् । तस्यपूषाप्प्रसवेयातिव्विद्द्वान्त्सम्प्पश्श्यन्न्विश्श्वाभुवना-

निगोपाः ।।२।। ॐ सोमोधेनुꣳसोमोऽअर्व्वन्तमाशुꣳसोमोव्वीरङ्कर्म्मण्यन्ददाति । सादन्न्यंव्विदत्थ्यꣳसभेयम्पितृश्श्रवणंय्योददाशदस्म्मै ।।३।। ॐ पितृब्भ्यःस्वधायिब्भ्यःस्वधानमःपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमःप्प्रपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमः । अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धद्ध्वम् ।।४।। ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्त्कामास्त्तेजुहुमस्त्तन्नोऽअस्त्तुव्वयꣳस्यामपतयोरयीणाम् ।।५।। ॐ व्वातोवामनोवागन्धर्व्वाःसप्प्तविꣳशतिः। तेऽअग्ग्रेश्श्वमयुञ्जँस्त्तेऽअस्म्मिञ्जवमादधुः ।।६।। ॐ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्क्करायचनमःशिवायचशिवतरायच।।७।। ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेशूरमिन्द्रम् । ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्त्तिनोमघवाधात्त्विन्द्रः ।।८।। ॐ नमोस्त्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः।।९।। ॐ अग्ग्निर्द्देवताव्वातोदेवतासूर्य्योदेवताचन्द्रमादेवताव्वसवोदेवतारुद्द्रादेवतादित्त्यादेवतामरुतोदेवताव्विश्श्वेदेवताबृहस्प्पतिर्द्देवतेन्द्रोदेवताव्वरुणोदेवता ।।१०।। ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्त्ताद्विसीमतःसुरुचोव्वेनऽआवः। सबुध्न्न्याऽउपमाऽअस्यव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।।११।। एतैर्मन्त्रैर्ब्रह्मसूत्रमभिमन्त्रयेत् ।

ब्रह्मसूत्रपरिधापनम्- ॐ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्त्तंव्वलगमुत्त्किरामियम्मेनिष्ट्योयममात्त्योनिचखानेदमहन्त्तंव्वलगमुत्त्किरामियम्मेसमानोयमसमानोनिचखानेदमहन्त्तंव्वलगमुत्त्किरामियम्मेसबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्त्तंव्वलगमुत्त्किरामियम्मेसजातोयमसजातोनिचखानोत्त्कृत्त्याङ्किरामि ।। इति मन्त्रेण बालकाय ब्रह्मसूत्रं परिधापयेत् ।

अजकर्णताडनम्- ततः अजस्य कर्णताडनं कुर्यात् । तच्च यथा-

बटकाष्टकमालाभिर्बद्धग्रीवमजासुतम् ।
पुनः पुनर्महाशब्दं कारयेत् कर्णताडनात् ।।

भूतप्रेतपिशाचाश्च यातुधानाश्च शाकिनी ।
बालग्रहाश्च नश्यन्ति तच्छब्दात् कर्णताडितात् ।।

अजबन्धनं तु द्वारदेशे ।

मुसलं च द्वारदेशे बध्नीयात् । ततो धनुः शरपाणयः पुरुषाः सूतिकारक्षार्थं द्वारदेशे तिष्ठेयुः । ततो नारायणं पूजयेत् ।

नारायणपूजनम् - कर्ता नारायण पूजनाङ्गत्वेन ध्यानं कुर्यात् ।

ध्यानम्- **त्रैलोक्यपूजितः सौम्यः सदा विजयवर्द्धनः ।**
शान्तिं कुरु गदापाणे नारायण नमोऽस्तु ते ।। इति ।

मन्थानपूजनम्- ततो यथामिलितोपचारैर्मन्थानं पूजयेत् ।

ध्यानम्- **मन्थान त्वं हि गोलोके देवदेवेन निर्मितः ।**
पूजितश्च विधानेन सूतीरक्षां कुरुष्व मे ।।

जातबालहारिणीमातृपूजनम्- ततो जातबालहारिणीर्मातृः पूजयित्वा प्रार्थयेत्।

प्रार्थना- **जातं हरन्ति या बालं मातरो गूढविग्रहाः ।**
अभिरक्षन्तु मे पुत्रं बलिं पूजां हरन्तु नः ।। इति ।

पूर्णपात्रदक्षिणादानम्- ततः पूर्णपात्रं दत्त्वा दक्षिणां दद्यात्- ॐ अद्येहामुकगोत्रस्यामुकशर्मणो ममाभिनवजातकुमारस्य दीर्घायुरारोग्याभ्युदयप्राप्तये षष्ठीमहोत्सवकर्मणि सपरिवारषष्ठिकादेवीपूजासाङ्गतासिद्ध्यर्थमिमां दक्षिणाममुकद्रव्यममुकदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथायोग्यभागं विभज्य दातुमहमुत्सृजे । **ॐ तत्सन्नमम ।**

पूजासमर्पणं विसर्जनञ्च- ॐ कायेनवाचा० ।
यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ।।

इत्यादिमन्त्रवाचनपुरःसरं **गच्छ गच्छे**ति आवाहनम्, **नजानामी**ति च पठित्वा मन्त्राशीर्वादान् गृहीत्वा ब्राह्मणान् भोजयेत् ।

सर्षपपोटलिकाताडनम्- ततः सर्षपपोटलिकां काण्डेन ताडयेत् । तत्र क्रमः- अमुकोऽहं ममाभिनवजातकुमारस्य षष्ठीमहोत्सवकर्मण उत्तराङ्गत्वेन एतस्य बालस्य परिरक्षार्थमायुर्वृद्धये सर्वोपद्रवशान्त्यर्थञ्च राहोर्वेधनं करिष्ये तदङ्गत्वेन धनुर्बाणयोः पूजनं करिष्ये इति संकल्प्य पूर्वलम्बितां पोटलिकां प्रतिष्ठाप्य पूजयित्वा धनुर्बाणौ प्रतिष्ठाप्य पूजयेत् ।

धनुःपूजनम्- पूजनमन्त्रः-

धृतं कृष्णेन रक्षार्थं संहारार्थं हरेण च ।
त्रयीमूर्तिगतं दिव्यं धनुः शस्त्रं नमाम्यहम् ।।

ॐ धनुषे नमः ।

बाणपूजनम्- बाणपूजामन्त्रः-

कामदेवस्य ये बाणाः सफलाश्चार्जुनस्य च ।
रामस्य च यथा बाणास्तथास्माकं भवन्त्विह ।।

ॐ बाणाय नमः ।

इति धनुर्बाणौ संपूज्य बालकमङ्के गृहीत्वा स्वस्तिवाचनं पठन् धनुर्गृहीत्वा बाणेन संयोज्य घण्टाशङ्खवादनपूर्वकं पोटलिकां बाणेन वेधयेत्। ततोऽस्याभिनवजातकुमारस्य सर्वोपद्रवशान्तये कृतस्य राहुवेधनकर्मणः साद्गुण्यार्थमिमां दक्षिणां ब्राह्मणेभ्यो दास्ये **ॐ तत्सन्न मम** ।

सूतिकागृहे धूपदानम्- ततो गव्यघृतसर्षपैः सैन्धवनिम्बपत्रैश्च सूतिकागृहे धूपो देयः ।

मुराऽहिकृत्तिनिर्गुण्डीवचाः कुष्ठञ्च सर्षपाः ।
बिल्वपत्रमयो धूपः कुमारायुःप्रपोषकृत् ।। इति ।

--भविष्योत्तरपुराणोक्तषष्ठिकापूजा--

षष्ठिकापूजनावश्यकसामग्रीसमूहः-

अथ पूजार्थे सामग्री- षष्ठीमूर्तिसंपादनार्थं गोमयम्, वराटका द्वाविंशतिः, द्विवारं ब्राह्मणवरणार्थं वस्त्रपूगीफलादीनि, सर्षपराजिकापीतवस्त्राक्षतपूगीफलानि, पोटलिकार्थं पश्चादेतद्वेधार्थं शरचापौ, अष्टौ दीपाः, बहिर्बलिदानार्थमेकश्छागः, गणेशपूजासामग्रीसिन्दूरादि, ताम्रकलशः, मृत्युञ्जयादिपूजार्थं द्रव्यम्, घृतपूर्णो दीपः, एको वंशः, पूजनार्थम् नवं काष्ठपीठम्, पीतवस्त्रम्, षष्ठिकायै मोदकाः, एकस्मिन् घटे गव्यं दुग्धम्, दधिघृतमधुशर्कराः, बन्धनार्थं छागो मुसलञ्च इति ।

— इति षष्ठिकापूजा —

८. नामकरणम्[1]

प्रयोगः - दशमेऽहनि सूतिकामुत्थाप्य एकादशेऽहनि विहितदिनान्तरे वा पिता नाम करोति । तत्र प्रथमं मातृकापूजाभ्युदयिकादि कृत्वा ब्राह्मणान्

---

[1] **प्रयोगः**- अत्रायं विशेषः नामकर्मदिवसे प्रातः सबालां सूतिकां संस्नाप्य कर्ता पिता दीपं प्रज्वलय्याचम्य स्वस्तिवाचनं कृत्वा प्राणानायम्य देवान् प्रणम्य प्रधानसंकल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्रोऽमुकराशिरमुकशर्माहं ममामुकराशेरस्य-पुत्रस्य अस्याः कन्याया वा आयुर्वृद्धिव्यवहारसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणसिद्धिद्वारा श्रीपरमेश्वर-प्रीतये नामकर्म, तथास्य पुत्रस्य श्रीवृद्धिबीजगर्भसमुद्भवैनोनिबहर्णद्वारा श्रीपरमेश्वरप्रीतये सूर्याव-लोकनसहितनिष्क्रमणकर्म, तथास्य बालकस्यायुर्वृद्धिधनप्राप्तिद्वारा श्रीपरमेश्वरप्रीतये भूम्युपवेशनं चैकतन्त्रेण करिष्ये, करिष्यमाणनामकर्मसूर्यावलोकनसहितनिष्क्रमणभूम्पुपवेशनकर्मणां पूर्वाङ्गत्वेन गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धं च करिष्ये । इति संकल्प्य यथाक्रमं तानि विदध्यात् ।

स्वकालजातकर्मपक्षे- जातकर्मणि स्वकालेऽकृते अस्यबालस्य गर्भाम्बुपानजनितदोषनिवर्हणायुरभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माख्यसंस्कारं करिष्ये इति संकल्प्य नामकर्मादीनां संकल्पः कार्यः । नसोष्यन्ती जातकर्मेति निषेधान्मातृपूजाभ्युदयिकश्राद्धादौ न तदङ्गत्वोल्लेखः ।

अग्निस्थापना - ततो वेदीं कृत्वा पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य वेद्या ईशानदिग्भागे कलशविधिना कलशं संस्थाप्य तत्र वरुणादीनावाह्य संपूज्य ब्रह्मणो वरणं कुर्यात् । ततो नामकर्माधिकारसिद्धये त्रीन्ब्राह्मणान् भोजयिष्ये इति संकल्प्य त्रीन् ब्राह्मणान् भोजयेत् । तदसंभवे भोजनपर्यन्तं मिष्ठान्नमामान्नं तन्निष्क्रयद्रव्यं वा तेभ्यो दत्त्वा ब्रह्मासनास्तरणादिपर्युक्षणान्तं कर्म समाप्य होमार्थं पानार्थं भूप्रोक्षणार्थं च पञ्चगव्यं कुर्यात् ।

पञ्चगव्यविधिः

गोमूत्रम्- अरोगाणां गवां गोमूत्रगोमयक्षीरदधिसर्पींषि कुशयुतमुदकं च पृथक् पृथक् संपाद्य अङ्गुष्ठार्धपरिमितं गोमयं तद्द्विगुणं गोमूत्रं, **ॐ भूः॰** इत्यादि गायत्र्या वरुणं ध्यायन् ताम्रपात्रे पलापत्रपुटे वा निक्षिपेत्।

गोमयम्- ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । **ईश्वरींसर्वभूतानां-तामिहोपह्वयेश्रियम्** ।। इति मन्त्रेण प्रणवेन वा अग्निं ध्यायन् अङ्गुष्ठार्धपरिमितं गोमयं निक्षिपेत् ।

भोजयित्वा कुमारं संस्नाप्याहतं वासः परिधाप्य कृतस्वस्त्ययनं प्राङ्मुखं दक्षिणकर्णे अमुकनामासीति त्रिः श्रावयति ।

क्षीरम्- गोमयाष्टगुणं क्षीरं **ॐ आप्प्यायस्वसमेतुतेव्विश्श्वतःसोमवृष्ण्यम् । भवाव्वाजस्यसङ्गथे** ।। इति मन्त्रेण प्रणवेन वा सोमं ध्यायन् तत्रैव निक्षिपेत् ।
दधि- गोमयाष्टगुणं दधि **ॐ दधिक्क्राब्णोऽअकारिषञ्जिष्णोरश्श्वस्यव्वाजिनः । सुरभिनोमुखाकरत्त्प्रणऽआयूꣳषितारिषत्** ।। इति मन्त्रेण प्रणवेन वा वायुं ध्यायन् तत्रैव निक्षिपेत्।
घृतम्- गोमयचतुर्गुणं घृतं **ॐ तेजोसिशुक्क्रमस्यमृतमसिधामनामासिप्प्रियन्देवानामनाधृष्टन्देवयजनमसि** ।। इति मन्त्रेण प्रणवेन वा निक्षिपेत् । **कुशोदकम्-** चतुर्माषं कुशोदकम् **ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्** ।। इति मन्त्रेण कुशोदकं निक्षिपेत् ।

अभिषिञ्चामि इति स्मृत्वा हरिं ध्यायन् निक्षिप्य **ॐ आपोहिष्ठेति** तिसृभिरालोड्य ॐ कारेण कुशत्रयं साग्रं समूलं गृहीत्वा पुनरोङ्कारेण तद्गृहीत्वा जुहुयात् ।
अग्नेरावाहनपूजनादि- ततः विधिनामानमग्निम् **ॐ मनोजूतिः०, ॐ भूर्भुवः स्वः, विधिनामाग्ने इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भव**ेति प्रतिष्ठाप्य **ॐ तदेवाग्निरिति** ध्यात्वा **ॐ विधिनामाग्नये नमः** इति नाममन्त्रेणावाहानादि नीराजनान्तं संपूज्य दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धो जुहुयात् ।

(पारस्कराचार्येण नामकर्मणि होमानुपदेशात् कतमोऽग्निर्ग्राह्य इत्याकाङ्क्षाया अभावेन "**नाम्नि वै पार्थिवो नाम**" इति नोपतिष्ठते, किन्तु शुद्ध्यर्थं पञ्चगव्यपानार्थं क्रियमाणे होमे "**प्रायश्चित्ते विधिश्चैव**" इत्युपतिष्ठते । तस्मादत्र विधिनामाग्नेरेवावाहनं पूजनञ्चोचितम् । पार्थिवाग्नेरुल्लेखस्तु भ्रमादेवेति सुधियो विभावयन्तु ।)
आघाराज्यहोमः- **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** । **ॐ अग्नये स्वाहा, इदमग्नये** । **ॐ सोमाय स्वाहा, इदꣳसोमाय स्वाहा** इत्याघारावाज्यभागौ चाज्येन हुत्वा अन्वारम्भं त्यक्त्वा सप्ताधिकहरितदर्भतरुणैः पञ्चगव्यहोमं कुर्यात् ।
पञ्चगव्यहोमः- **ॐ इरावतीधेनुमती** इत्यस्यवसिष्ठऋषिर्विष्णुर्देवता त्रिष्टुप्छन्दः पञ्चगव्यहोमे विनियोगः । **ॐ इरावतीधेनुमतीहिभूतꣳसूयवसिनीमनवेदशस्या । व्व्यस्कब्भ्नारोदसीव्विष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः**स्वाहा ।। इदं व्विष्णवे ।

ॐ इदं व्विष्णुरित्यस्य मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीच्छन्दः पञ्चगव्यहोमे विनियोगः।
ॐ इदंव्विष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।। इदं व्विष्णवे ।

ॐ मानस्तोके इत्यस्य परमेष्ठीर्ऋषी रुद्रो देवता जगतीच्छन्दः पञ्चगव्यहोमे विनियोगः।
ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः । मानोव्वीरान्रुद्रभामिनो-

नाम च द्व्यक्षरं चतुरक्षरं वा सुखोद्यं शर्मान्तं ब्राह्मणस्य, वर्मान्तं क्षत्रियस्य, गुप्तान्तं वैश्यस्य, दासान्तं शूद्रस्य चेति ।

– इति नामकरणम् –

* * *

वर्धीर्हविष्मन्तःसदमित्त्वाहवामहे ।। स्वाहा इदꣳरुद्राय । अत्र प्रणीतोदकस्पर्शः ।

ॐ शन्नोदेवीरित्यस्य दध्यङ्ङाथर्वणऋषिरापो देवता गायत्रीच्छन्दः पञ्चगव्यहोमे विनियोगः । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्स्रवन्तुनः ।।** स्वाहा इदमद्भ्यः ।

ॐ तत्सवितुरित्यस्य विश्वामित्रऋषिः सविता देवता गायत्रीच्छन्दः पञ्चगव्यहोमे विनियोगः । **ॐ भूर्भुवःस्वःतत्सवितु०** ।। स्वाहा इदꣳसवित्रे ।

ॐ प्रजापतेनत्त्वेतस्य हिरण्यगर्भऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः पञ्चगव्यहोमे विनियोगः। **ॐ प्रजापतेनत्त्वदेतान्यन्न्योविश्श्वारूपाणिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ।।** स्वाहा इदं प्रजापतये । इति पञ्चगव्यहोमं कुर्यात् ।

ततो ब्रह्मणान्वारब्ध आज्येन भूराद्या नवाहुतीर्हुत्वा पञ्चगव्यमिश्राज्येन स्विष्टकृद्धोमञ्च कृत्वा संस्रवप्राशनादि पूर्णपात्रदानान्तं कर्म समापयेत्।

दक्षिणा- तत अद्येह पञ्चगव्यपानाङ्गहोमकर्मणः साङ्गतासिद्ध्यर्थमिमां दक्षिणां ब्राह्मणाय दास्ये इति संकल्प्य दक्षिणां दद्यात् । ततो हुतशेषं पञ्चगव्यं सूतिकायै दद्यात् । प्रसवगृहञ्च प्रोक्षेत्। सा च ब्रह्मतीर्थेन त्रिः प्राश्नाति ।

(अत्राचारात् स्रुवं गन्धाक्षतपुष्पादिभिः संपूज्य ब्रह्मा स्रुवेणान्वारम्भं कृत्वा सूतिकां भर्तुः समीपमानयति । सा च बालकमङ्के कृत्वाऽग्निं प्रदक्षिणीकृत्य भर्तुर्वामत उपविशेत्, गणेशाय नवग्रहेभ्यश्च पुष्पाञ्जलिं समर्पयेत् ।)

नामकरणं विसर्जनञ्च- ततो यथाचारं बालस्य दक्षिणकर्णे नामानि श्रावयित्वा नामकरणाङ्गदक्षिणां भूयसीं दक्षिणां चाचार्यादिभ्यः संकल्पपूर्वकं दत्त्वा कृतस्य नामकर्माख्यसंस्कारकर्मणः साद्गुण्यार्थं दश यथाशक्ति वा ब्राह्मणान् भोजयिष्ये इति संकल्प्याग्निं संपूज्य त्र्यायुषादिकृत्वाग्निं विसर्जयेत्।

९. निष्क्रमणम्[1]

प्रयोगः अदितिहरिणशीर्षाविष्णुपूषानुराधा-
तरणिसलिल-मूलज्येष्ठपुष्याश्विनीषु ।
उडुशशधरशुद्धौ प्रोज्झ्य रिक्ताः सुलग्ने
रविगुरुकविवारे बालनिष्काशनं स्यात् ।।

तत्र चतुर्थेमासि चन्द्रताराऽनुकूलदिने बालं स्नातमलङ्कृत्य गृहाद्बहिरानीय पिता अन्यो वा ब्राह्मणः सूर्यमुदीक्षयति ।

---

[1] **अथ निष्क्रमणम्** - तच्च पारस्कराचार्येण चतुर्थमासे विहितमपि शिष्टा व्यवहारसौकर्यार्थं समाचारात् "द्वादशेऽहनिराजेन्द्र शिशोर्निष्क्रमणं गृहात्" इति भविष्योत्तरवचनाच्च अपकृष्य नामकर्मदिवसे एवाचरन्ति । अतस्तस्मिन्नेव दिने निष्क्रमणं कुर्यात् ।

सङ्कल्पः - अद्येहेत्यादि अमुकराशेरमुकशर्मणो बालस्य करिष्यमाणनिष्क्रमणकर्मणि सर्वारिष्टनिवृत्तये जले दिगीशानां दिशां चन्द्रस्यार्कस्य वासुदेवस्य गगनस्य च पूर्वाङ्गत्वेन पूजनं करिष्ये ।

दिगीशादिदेवतापूजनम्- ॐ मनोजूतिः० भूः० जलदिगीशादिदेवता गगनपर्यन्ताः आगच्छन्तु तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । एवं प्रतिष्ठाप्य **ॐ दिगीशेभ्यो नमः, ॐ दिग्भ्यो नमः, ॐ चन्द्राय नमः, ॐ अर्काय नमः, ॐ वासुदेवाय नमः, ॐ गगनाय नमः** इति नाममन्त्रैर्ध्यात्वाऽऽवाह्य पाद्यादिभिः संपूज्य प्रार्थयेत् ।

प्रार्थना- **चन्द्रार्कयोर्दिगीशानां दिशाञ्च गगनस्य च ।
निक्षेपार्थमिमं दद्मि ते मे रक्षन्तु बालकम् ।।
अप्रमत्तं प्रमत्तं वा दिवा रात्रावथापि वा ।
रक्षन्तु सततं सर्वे देवाः शक्रपुरोगमाः ।।**

इति संप्रार्थ्य शाकुन्तसूक्ते अपि पठेत् ।

आदित्यपूजनम्- अथ शङ्खघण्टावादनस्वस्तिवाचनपूर्वकं मातुरङ्के स्थितं बालकं बहिरानीय आदित्यं पूजयेत् । तद्यथा- आचम्य अर्घं संस्थाप्य रक्तचन्दनेन ताम्रपात्रे सूर्यं लिखित्वा **ॐ मनोजूतिः, ॐ भूः०** इति प्रतिष्ठाप्य देशकालौ संकीर्त्य अमुकराशेरस्यबालकस्य बैजिकदुरितोपशान्तये आदित्यस्य पूजनं करिष्ये इति संकल्पं कुर्यात् ।

आदित्यध्यानम्- **ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।**

सूर्योदीक्षणम्- तत्र विनियोगः - **ॐ तच्चक्षुरि**त्यस्य दध्याङ्ङाथर्वण-ऋषिर्ब्राह्मी त्रिष्टुप्छन्दः सूर्यो देवता सूर्यदर्शने विनियोगः । **ॐ तच्चक्षुर्देव-**

केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ।।

इति ध्यात्वा **ॐ आकृष्णेन०** इति वेदमन्त्रेण **ॐ आदित्याय नमः** इति नाममन्त्रेण च आवाहनादिनीराजनान्तं संपूज्य **ॐ नमोस्तु सूर्यायेति एहिसूर्यसहस्रांशो** इति मन्त्राभ्याञ्च अर्घं दत्त्वा बालकं सूर्यं प्रदर्शयेत् **ॐ तच्चक्षुरि**ति मन्त्रेण ।

दक्षिणादानं विसर्जनञ्च- ततः कृतस्य निष्क्रमणाख्यसंस्कारकर्मणः साङ्गतासिद्ध्यर्थमिमां-दक्षिणामित्यादि । तथा दश यथासंख्याकान्वा ब्राह्मणान् भोजयिष्ये इति भोजनसंकल्पञ्च कुर्यात् ।

--इति सूर्यावलोकनसहितनिष्क्रमणम्--

भूम्युपवेशनम्-

प्रयोगः- इदमपि- **''पञ्चमे च तथा मासि भूमौ तमुपवेशयेत्''** इति विष्णुधर्मोत्तरवचनेन पञ्चममासि विहितमपि नामकर्मदिवसे एवाचरन्ति ।

गोमयेन सुलिप्तायां भूमौ मृदा मण्डलं कृत्वाचम्यार्घं संस्थाप्य अद्येह भूम्युपवेशनकर्मणि पूर्वाङ्गत्वेन भूम्यादीनां पूजनं करिष्ये इति संकल्प्य । **ॐ मनोजूतिरि**ति प्रतिष्ठाप्य **ॐ पृथिव्यै नमः, ॐ वराहाय नमः, ॐ कुलदेवतायै नमः,** इति नाममन्त्रैः पृथिवीं वराहं कुलदेवतां च गन्धादिभिः संपूज्य पृथिव्याः प्रार्थनां कुर्यात् ।

पृथिवीप्रार्थना- **रक्षैनं वसुधे देवि सदा सर्वगते शुभे ।**
आयुष्प्रमाणं निखिलं निक्षिपस्व हरिप्रिये ।।
अचिरादायुषस्तस्य ये केचित् परिपन्थिनः ।
जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान् ।।
धारिण्यशेषभूतानां मातस्त्वमधिका ह्यसि ।
अजरा चाप्रमेया च सर्वभूतनमस्कृते ।।
त्वमेवाशेषभूतानां प्रतिष्ठा चाश्रयो ह्यसि ।
कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यताम् ।।

इति भूमिं संप्रार्थ्य शङ्खघण्टावादनपूर्वकं बालकं भूमावुपवेशयेत् । आचाराद्द्रव्येऽपि पादस्थापनं कृत्वा दक्षिणां दत्त्वा तेन बालेन ब्राह्मणान् प्रणमय्य तैराशीर्वादैरभिनन्दितं प्रदक्षिणमार्गेण गृहाभ्यन्तर्णयेत् ।

जीवमातृणां पूजनम्- आचम्यार्घं संस्थाप्य अद्येहेत्यादि अमुकराशेरमुकनाम्नः पुत्रस्य नामकर्मादिकर्मणामुत्तराङ्गत्वेन भित्तौ पटे वा लिखितानां कल्याण्यादिजीवमातृणां पूजनं करिष्ये

हितम्पुरस्ताच्छुक्क्रमुच्चरत् । पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्श्चशरदःशतात् ।।

अत्र च फलपुष्पसमन्वितेन पयसा भगवते भास्करायार्घो दीयते इति समाचारः ।

— इति निष्क्रमणम् —

इति संकल्प्य **ॐ मनोजूतिः० ॐ भूः० कल्याण्यादि सप्तजीवमातर इहागच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु** इति प्रतिष्ठाप्य ध्यायेत् ।

जीवमातृध्यानम्- **कल्याणी मङ्गला भद्रा पुण्या पुण्यमुखी तथा ।**
जया च विजया चैव वरदाऽभयपाणयः ।। इति ध्यायेत् ।

पूजनम्- ॐ कल्याण्यै नमः, ॐ मङ्गलायै नमः, ॐ भद्रायै नमः, ॐ पुण्यायै नमः, ॐ पुण्यमुख्यै नमः, ॐ जयायै नमः, ॐ विजयायै नमः, इति नाममन्त्रैरावहनादि नीराजनान्तं संपूजयेत् ।

वसुधारा- ततो गुडसर्पिर्भ्याम् **ॐ वसोः पवित्रमसि** इति मन्त्रेण वसोर्धाराः पातयित्वा संप्रार्थ्य क्षमापयेत् ।

दक्षिणा- अद्येहामुकोऽहममुकराशेरमुकनाम्नोऽस्य बालस्य नामकर्माद्युत्तराङ्गजीवमातृकापूजनकर्मणः साद्गुण्यार्थमिमां दक्षिणां ब्राह्मणाय दास्ये । इत्यादि ।

भूयसीदक्षिणा- अद्येहेत्यादि अमुकोऽहममुकराशेरमुकनाम्नोऽस्य बालकस्य दीर्घायुरारोग्यावाप्तिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृतानां नामकरणसूर्यावलोकनसहितनिष्क्रमण भूम्युपवेशनजीवमातृकापूजनकर्मणां साद्गुण्यार्थम्, कलशे आवाहितानां वरुणादिदेवानां पूजायाः साद्गुणार्थञ्च इमां भूयसीं दक्षिणां नामानामगोत्रेभ्यो ब्राह्मणेभ्य इत्यादि दक्षिणां दत्त्वा अभिषेकतिलकादि कारयेत् । आवाहितदेवता विसृज्य कृतं कर्मेश्वरार्पणं कृत्वा ब्राह्मणान्बधूँश्च भोजयित्वा स्वयं भुञ्जीतेति ।

--इति नामकरणसूर्यावलोकनसहितनिष्क्रमणभूम्युपवेशनप्रयोगः--

शिशोर्नवीनपर्यङ्कारोहणम्- तद्यथा- नामकर्मदिवसे षोडशे द्वात्रिंशेऽन्यस्मिन् शुभदिने वा मृदुध्रुवक्षिप्रनक्षत्रे कुलदेवतां संपूज्य हरिं स्मरन्त्यः सुवासिन्यः कुलयोषितो गीतवाद्यपुरःसरं स्वलङ्कृतं शिशुं नूतने पर्यङ्के कण्डोले दोलायां वा प्राक्शिरसं न्यस्येयुः ।

दुग्धपानम्- एकत्रिंशेदिनेऽन्यस्मिन् वा शुभे दिने कुलदेवतापूजान्ते शङ्खेन गोक्षीरं माताऽन्या वा सुभगा बालकं पाययेदिति ।

१०. अन्नप्राशनम्[१]

प्रयोगः - ततः षष्ठे मासि चन्द्रतारानुकूले शुभदिने स्नातः शुचिराचान्तः पिता गृह एव कुशकण्डिकां कुर्यात् । तत्रकुशैर्हस्तमात्रेत्यारभ्य आज्यस्थालीत्यग्रे चरुस्थाली पूर्णपात्रमित्यग्रे चर्वर्थामतण्डुला इति । आज्ये निरूप्येत्यग्रे प्रणीतोदकेन तण्डुलान् प्रक्षाल्य चरौ प्रणीतोदकं दत्त्वा तत्र तण्डूलान् प्रक्षिप्य स्वयं चरुं गृहीत्वा ब्रह्मणान्वाज्यं वह्नावुत्तरतश्चरुं दक्षिणतश्चाज्यं निदध्यात् । ततो ज्वलत्तृणेत्यादि ।

आघाराज्यहोमः - **ॐ प्रजापतये** इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा। **ॐ इन्द्राये**ति प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः। **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ । **ॐ अग्नये** इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये ।**

---

[१] अत्र विशेषः- बालकस्य पिताऽन्नप्राशनदिनात्पूर्वम् अतृतीयेऽषष्ठेऽनवमे दिवसे गणेशपूजनपूर्वकं सोहालिकापाकादि सर्वारम्भं कुर्यात् । तस्मिन्नेव दिने बालकस्य कङ्कणबन्धञ्च कारयेत् ।

अथान्नप्राशनदिवसे कर्ता कृत्यनित्यक्रियः शुचिः शुक्लवासाः स्वासने उपविश्याचम्य स्वस्तिवाचनं कृत्वा दीपं प्रज्वलय्यार्घं संस्थाप्य संकल्पं कुर्यात् - अद्येहेत्यादि अमुकगोत्रोमुकराशिरमुकशर्माहं ममामुकराशेरस्य पुत्रस्य मातृगर्भमलप्राशनशुद्ध्यन्नाद्य-ब्रह्मवर्चसतेजइन्द्रियायुर्लक्षण-फलसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीतये अन्नप्राशनाख्यं कर्म करिष्ये, तत्पूर्वाङ्गत्वेन गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धं करिष्ये ।

इति संकल्प्य यथा क्रमं तानि कृत्वा होमार्थं वेदीं कृत्वा तत्र पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य स्वस्य कर्तृत्वे केवलं ब्रह्मणो वरणं कुर्यात् । असामर्थ्यादिना स्वस्याकर्तृत्वे आचार्य-ब्रह्मणोर्वरणं कृत्वा वेद्या ईशाने कलशविधिना कलशं संस्थाप्य तत्र वरुणादीनावाह्य संपूजयेत् रक्षाविधानञ्च कुर्यादिति ।

ॐ सोमायेति प्रजापतिर्ऋषिः सोमोदेवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** इत्याज्यभागौ ।

असाधारणाहुतिद्वयम्- अन्वारम्भपूर्वकं हुत्वा तदनन्तरमन्वारम्भं त्यक्त्वाऽसाधारणाहुतिद्वयम् ।

प्रथमाहुतिः - तत्र विनियोगः - **ॐ देवीं वाचम**िति मन्त्रस्य भार्गवऋषिर्देवीवाग्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ देवींव्वाचमजनयन्तदेवास्त्तांव्विश्श्वरूपाःपशवोव्वदन्ति । सानोमन्द्रेयमूर्ज्जन्दुहानाधेनुर्व्वागस्म्मानुपसुष्टुतैतु ।।** स्वाहा इदं व्वाचे ।

द्वितीयाहुतिः - द्वितीयाहुतिस्तु विनियोगपूर्वकं **(१)ॐ देवीं वाचम्० (२)ॐ व्वाजोनोऽअद्ये**ति मन्त्रस्य देवा ऋषयोऽन्नं देवता आज्यहोमे विनियोगः । **ॐ व्वाजोनोऽअद्यप्प्रसुवातिदानंव्वाजोदेवाँ२।।ऽऋतुःकल्प्पयाति । व्वाजोहिमासर्व्ववीरञ्जजानव्विश्श्वाऽआशाव्वाजपतिर्ज्जयेयम् ।।** स्वाहा इति मन्त्राभ्याम् **इदं व्वाचे व्वाजाय** ।

स्थालीपाकहोमः - ततः स्थालीपाकेनाहुतिचतुष्टयम् । तत्र विनियोगः - **ॐ प्राणेने**त्यादीनां चतुर्णां प्रजापतिर्ऋषिरन्नं देवता यजुर्होमे विनियोगः । **ॐ प्राणेनान्नमशीय स्वाहा, इदम्प्राणाय १, ॐ अपानेन गन्धानशीय स्वाहा, इदमपानाय २, ॐ चक्षुषा रूपाण्यशीय स्वाहा, इदं चक्षुषे३, ॐ श्रोत्रेण यशोऽशीय स्वाहा, इदꣳश्रोत्राय ४** ।

ततोऽन्वारब्धकर्तृको होमः । तत्र तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ।

स्विष्टकृद्धोमः - तत्रैवाज्यस्थालीपाकाभ्यां स्विष्टकृत् । तत्र विनियोगः - **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते** ।

महाव्याहृतिहोमः - तत आज्येन होमः । तत्र विनियोगः - महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि होमे विनियोगः।

ॐ भूः स्वाहा, इदं भूः । ॐ भुवः स्वाहा, इदं भुवः । ॐ स्वः स्वाहा, इदंꣳस्वः । एता महाव्याहृतयः ।

पञ्चवारुणीहोमः - ॐ त्वन्नोऽअग्ग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ त्वन्नोऽअग्ग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्श्वाद्वेषाꣳसिप्प्रमुमुग्ध्यस्म्मत् ।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ सत्वन्न इति वामदेव ऋषिरग्ग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्ग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि ।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्ग्न इति वामदेव ऋषिरग्निर्देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ अयाश्चाग्ग्नेस्यनभिशस्त्तिपाश्चसत्त्यमित्त्वमयाऽअसि । अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा ।।** इदमग्ग्नये ।

ॐ येतेशतमिति व्वामदेवऋषिर्व्वरुणः सविता व्विष्णुर्व्विश्वे (देवाः) मरुतः स्वर्क्का देवतास्त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ येतेशतंव्वरुणयेसहस्रंय्यज्ञियाःपाशाविततामहान्तः। तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।।** इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो (देवेभ्यो) मरुद्भ्यः स्वर्क्केभ्यः ।

ॐ उदुत्तममिति शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं व्वरुणाय । इति सर्वप्रायश्चित्तम् ।

प्राजापत्यहोमः - ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा। इदं प्राजापत्यम् ।

होमान्तकृत्यम्- अथ संस्रवप्राशनमाचमनञ्च ब्रह्मदक्षिणा च । ततः

प्रणीताविमोको बर्हिर्होमश्च ।

[२]**कुमारभोजनम्-** अथ सर्वान् कटुमधुरलवणाम्लतिक्तक्षारादिरसान् सर्वाणि च शाल्यन्नादीनि यथासम्भवमुद्धृत्य एकस्मिन्नुत्तमपात्रे कृत्वा कृतस्नानालङ्करणादिरहतवासाः [३]कुमारस्तूष्णीं हन्तेति मन्त्रेण वा भोजयितव्यः ।

अथ कुमारस्य वाक्प्रसारकामेन भारद्वाजीमांसं स्वन्नाद्यकामेन कपिञ्जलमांसं जवनकामेन मत्स्यान् आयुष्कामेन कृकषाया मांसं ब्रह्मवर्चसकामेनाद्यामांसं सर्वफलकामेन कथितसर्वमांसम् ''कपिञ्जलः = करण्डुआ, गौरतित्तिर इति केचित्'' । एतेषामलाभे पिष्टकमयभारद्वाजीप्रभृतिमांसमेकदैव प्राशयितव्यः ।

पूर्णाहुतिः - तत आचम्योत्थाय फलपुष्पसमन्वितघृतेन स्रुवं परिपूर्य पूर्णाहुतिं कुर्यात् । तत्र मन्त्रः- **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्ग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।** स्वाहा इति पूर्णाहुतिः। तत स्त्र्यायुषम्, दूर्वाक्षतादि, ब्राह्मणभोजनञ्च ।

— इत्यन्नप्राशनम् —

* * *

---

२. अथ सुलग्ने समागते लग्नदानम् । अद्येहामुकोहममुकराशेर्ममपुत्रस्यान्नप्राशनलग्नाद्यत्रकुत्रस्थितानामादित्यादिग्रहाणां दुष्टानां दुष्टफलोप-शान्त्यर्थं शुभानां शुभफलाधिक्यप्राप्तये इदं सुवर्णतन्निष्क्रयद्रव्यदक्षिणां वा ज्योतिर्विदे ब्राह्मणाय दास्ये ॐ तत्सत् ।

३. प्राङ्मुखो मातुः स्वस्य वा उत्सङ्गे स्थितो बालः पित्रा सुवर्णान्तर्हितयाऽनामिकया देवतापुरतो **हन्त** इति मन्त्रेण एकवारं भोजयितव्यः । ततस्तूष्णीं पञ्चवारं कन्या तु तूष्णीमेव भोजयित्वा। ततो मत्स्याधारजलाशयोद्धृतजलेन त्रिवारं मुखं शोधयेत् ।

ततो माता बालकं पुस्तकादिवस्तुमध्ये स्वाङ्कादुत्सृजेत् । तदा स बालको वस्त्रशस्त्रलेखनीपुस्तकादिकादिषु यत्प्रथमं गृह्णाति तेन तस्य जीविका भवेदिति ज्ञातव्यम् । ततो दक्षिणा, भूयसी दक्षिणा, दश यथासंख्याका वा ब्राह्मणा भोज्याः । अग्निविसर्जनम्, रक्षाबन्धनम्, घृतच्छाया, जीवमातृपूजनम्, कर्मेश्वरार्पणञ्चेति विशेषो बोध्य इति ।

११. जन्मोत्सवविधिः

जन्मवारादिफलम्- **जन्मर्क्षयुक्ता यदि जन्ममासि**
यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवन्ति संवत्सरमेव तस्य
नैरुज्यसंमानसुखादिकानि ।।१।।
कृतान्तकुजयोवरि यस्य जन्मदिनं भवेत् ।
अनृक्षयोगसम्प्राप्तौ विघ्नस्तस्य पदे पदे ।।२।।
तस्य सर्वोषधिस्नानं गुरुविप्रसुरार्चनम् ।
सर्वोषध्यः - **मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।।३।।**
शटीचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः ।

अत्र दिनद्वये तिथिप्राप्तौ उदयगामिनी तिथिरेव ग्राह्या ।

जन्मदिने निषिद्धकर्माणि-

खण्डनं नखकेशानां मैथुनाध्ययने तथा ।
आमिषं कलहं हिंसा वर्षवृद्धौ विवर्जयेत् ।।

इदञ्च उपनयनात्पूर्वं बालस्य पिता कुर्यात् । तत्रममेत्यस्य स्थाने मम बालस्येत्येवं संकल्पे उल्लेखः कर्तव्यः । अनन्तरं स्वयमेव कुर्यात्।

प्रयोगः- कर्ता सुगन्धतैलाभ्यक्तः सर्वौषधीयुतः **शन्नोदेवीरि**त्यभिमन्त्रित-जलपूर्णसुपूजितकलशोदकेन स्नात्वा । सन्ध्यादिनित्यकर्म विधाय दीपं प्रज्वलय्याचम्य प्राणानायम्य जन्मदिने शनिभौमवारसत्त्वे तत्तत्सूचिताशुभ-परिहाराय **''अष्टमुष्टि भवेत् किञ्चित्''** इति परिभाषितं किञ्चिद्धान्यं ब्राह्मणाय दत्त्वा नवीनवस्त्रधारणं कुर्यात् ।

नवीनवस्त्रधारणम्- तत्र विनियोग: - **ॐ परिधास्यै** इत्याथर्वणऋषिर्वासो देवता पङ्क्तिश्छन्दो वस्त्रपरिधाने विनियोग: । **ॐ परिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि । शतंचजीवामिशरद:पुरूचीरायस्पोषमभिसंव्ययिष्ये ।।** इति नवं धौतमधोवस्त्रं धारयेत् ।

उत्तरीयधारणम्- तत्र विनियोग: - **ॐ यशसामे**त्याथर्वणऋषिर्लिङ्गोक्ता देवता पङ्क्तिश्छन्द उत्तरीयपरिधाने विनियोग: । **ॐ यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती । यशोभगश्चमाऽविन्दद्यशोमाप्रतिपद्यताम् ।।** इति।

वस्त्रधारणानन्तरकृत्यम्- तत आचम्य यथाविभवमलङ्कारधारणं कुर्यात्। तत: पूर्वाभिमुख उत्तराभिमुखो वा उपविश्य किञ्चिज्जपं विधाय अर्घ्यं संस्थाप्य तज्जलेन- **ॐ अपवित्र:पवित्रोवे**ति पूजादेशद्रव्याण्यात्मानञ्चाभिषिञ्चेत् ।

भूतोत्सारणम्- **ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिता: ।**
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।
अपक्रामन्तु भूतानि पिशाचा: सर्वतोदिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ।।

सङ्कल्प: - तत: कलशस्थापनविधिना कलशं संस्थाप्य तत्र गङ्गामृत्तिकाफलद्रव्यगन्धपुष्पाक्षतपञ्चपल्लवपञ्चरत्नादीनि निक्षिप्य पूजासंकल्पं कुर्यात्- ॐ अद्येत्यादि देशकालौ संकोर्त्यामुकगोत्रोमुकशर्माहं ममामुकवर्षप्रवेशशुभवर्षवृद्धौ सकलारिष्टनाशनपूर्वकारोग्यशतदीर्घायुष्टप्राप्तये मार्कण्डेयादिसकलदेवतानां पूजनं तदङ्गत्वेनादौ दीपकलशगणेशानां पूजनं चाहं करिष्ये इति संकल्प्य दीपकलशगणेशपूजां कुर्यात् ।

मार्कण्डेयपूजनम्- तत: कलशोपरि कुङ्कुमादिनाष्टदलं विलिख्य तन्मध्ये मार्कण्डेयं पूजयेत् - **ॐ मां हृदयाय नम:, ॐ कं शिरसे स्वाहा, ॐ डें शिखायै वषट्, ॐ यां कवचाय हुम्, ॐ यं नेत्राभ्यां वौषट्, ॐ नं अस्त्राय फट्, ॐ मं इति दिग्बन्ध: ।** इत्यङ्गन्यासं कुर्यात् ।

ध्यानम्- **ॐ द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।**
दण्डाक्षसूत्रहस्तञ्च मार्कण्डेयं विचिन्तये ।।

आवाहनं पूजनञ्च- ॐ भूर्भुवःस्वः भगवन् मार्कण्डेय इहागच्छ इह तिष्ठेत्यावाह्य ॐ मार्कण्डेयाय नमः इति पाद्यादिभिः संपूज्य पुष्पाञ्जलिं दद्यात् ।

पुष्पाञ्जलिः - ॐ आयुष्प्रद महाभाग सोमवंशसमुद्भव ।
महातपोमुनिश्रेष्ठ मार्कण्डेय नमोऽस्तु ते ।।

इति पुष्पाञ्जलिं समर्प्य प्रणम्य प्रार्थयेत ।

प्रार्थना- ॐ मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ।। इति ।

व्यासादिचिरञ्जीविजन्मनक्षत्रादिपूजनम्- ततोऽष्टदले पूर्वादिक्रमेण व्यासम्, परशुरामम्, अश्वत्थामानम्, कृपम्, वलिम्, प्रह्लादम्, हनूमन्तम्, बिभीषणम्, (प्रणवादिनमोन्तैर्नाममन्त्रैः) पूजयेत् । तद्वाह्ये - **ॐ जन्मनक्षत्राय नमः, ॐ जन्मतिथये नमः, ॐ जन्मवाराय नमः, ॐ जन्मराशये नमः, ॐ जन्मलग्नाय नमः** इति संपूज्य विशेषेण **ॐ वासुदेवाय नमः, ॐ लक्ष्म्यै नमः, ॐ प्रजापतये नमः,** इति पूजयेत् ।

षष्ठीपूजनम्- ततः षष्ठीमावाह्य **ॐ षष्ठिकायै नमः** इति षोडशोपचारैः संपूज्य **ॐ षाँ षष्ठ्यै नमः** दधिभक्तबलिं समर्पयामि इति दधिभक्तबलिं समर्पयेत् । ततोऽञ्जलिं बध्वा प्रार्थयेत ।

षष्ठीप्रार्थना- ॐ आद्यभूतासि भूतानां ब्रह्मणा निर्मिता पुरा ।
तस्मान्मां पुत्रवत्कृत्वा पालय त्वं नमोस्तु ते ।। इति।

ततः प्रणमेत् । ततः **त्रिषणादिभ्यो नमः** इति ताः पूजयेत् ।

त्रिषवणानामानि- **त्रिषणावृद्धमाता च गौरी च कठपूतना ।**
आयुर्दात्र्यो भवन्त्वेता अद्य जन्मदिने मम ।। इति ।

ततः **ॐ कार्तिकेयाय नमः, ॐ कुलदेवतायै नमः,** इति संपूज्य कलशे पूजितदेवताश्च क्षमध्वम् इति प्रणमेत् ।

पोटलिकाधारणम्- ततः पीतवस्त्रे आचारादष्टोत्तरशतदूर्वाक्षतसिद्धार्थगुग्गुलुगोरोचनानिम्बपल्लवान् धृत्वा तत्र गणेशं भास्करञ्च पूजयित्वा पीतसूत्रेण पोटलिकां बद्ध्वा महर्षिं मार्कण्डेयं संप्रार्थ्य कण्ठे दक्षिणबाहौ वा धारयेदनेन मन्त्रेण -

ॐ मार्कण्डेय महाभाग आयुरारोग्यदायक ।
शुभदौ विघ्नहर्त्तारौ भानुर्विघ्नेश एव तु ।।
धारयामि भुजे दक्षे मम कल्याणहेतवे ।
पूरयध्वं सदाऽस्माकं कामनाश्च मनोरथान् ।। इति ।

अग्निस्थापनम्- ततः स्वगृह्योक्तविधिनाऽग्निं संस्थाप्य अस्मिन्कर्मणि प्रतिष्ठापितदेवताभ्यः प्रधानभूताभ्यो यथासंख्याकं तिलयवाज्येन होमं कारयेत् । ततः पूर्णाहुतिं हुत्वा गोभूहिरण्यवस्त्रादि यथाशक्ति दक्षिणां दद्यात् ।

दक्षिणासङ्कल्पः - ॐ अद्येत्यादि अमुकगोत्रोऽमुकशर्माहं ममायुरारोग्याभीष्टसिद्ध्यर्थं कृतस्य मार्कण्डेयादिसकलदेवतानां पूजनहवनकर्मणःसाङ्गतासिद्धिद्वारा श्रीमत्परमेश्वरप्रीतये इदं सुवर्णमग्निदैवतं तन्मूल्योपल्पितं रजतं चन्द्रदैवतं वा तन्मूल्योपकल्पितं ताम्रं सूर्यदैवतं वा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे ।

घातकहस्तात् पशुपक्षिमोचनम्- ततः पक्षिणो मत्स्याँश्च वा घातकहस्तान्मोचयेत्-

जीव मत्स्य जले चैव प्रविश्य मम हस्ततः ।
तव मोक्षप्रदानेन अस्तु मे चिरजीविता ।। इति मन्त्रेण ।

यज्ञोत्तराङ्गकृत्यम्- ततः सतिलगुडं पयः पिबेदनेन मन्त्रेण-

सतिलं गुडसंमिश्रमञ्जल्यर्धमितं पयः ।
मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ।। इति ।

ततो भूयसीदक्षिणां च यथाशक्ति दद्यात् । ब्राह्मणभोजनसंकल्पमपि कुर्यात् । तत आवाहितदेवताविसर्जनं कृत्वा कलशोदकेन **सुरास्त्वामभिषिञ्चन्तु** इत्यादिभिःपौराणैः **देवस्यत्त्वा** इत्यादिभिर्वैदिकैश्च मन्त्रैरभिषेकं तिलकादि च गृहीत्वा ब्राह्मणान् भोजयित्वा स्वयमपि सुहृद्युतो भुञ्जीत ।

— इति जन्मोत्सवविधिः —

* * *

१२. कर्णवेधः

प्रयोगः- तत्र तृतीयवर्षे पञ्चमे वा पुष्येन्दुचित्राहरिरेवत्यन्यतमनक्षत्रसमन्वितविहिततिथिपूर्वाह्ने पिताऽन्यो वा कृतनित्यक्रियो दीपं प्रज्वलय्याचम्य स्वस्तिवाचनं कृत्वा प्राणानायम्य अर्घ्यं संस्थाप्य संकल्पं कुर्यात् ।

सङ्कल्पः - ॐ अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रोऽमुकराशिरमुकशर्माहं अमुकराशेःपुत्रस्य बीजगर्भसमुद्भवैनोनिबर्हणपुष्ट्यायुःश्रीवृद्धिद्वारा श्रीपरमेश्वरप्रीतये कर्णवेधाख्यं कर्म करिष्ये, तत्पूर्वाङ्गत्वेन गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धञ्च करिष्ये इति संकल्प्य पूर्वोक्तविधिना गणेशपूजनादीनि सर्वाणि कर्माणि कृत्वा कलशविधिना कलशं संस्थाप्य तत्र वरुणादीनावाह्य रक्षासूत्रमभिमन्त्र्य जले केशवादिदेवानां विष्णुधर्मोत्तरोक्तं पूजनं कुर्यात् ।

केशवादिदेवपूजनम्- तत्र संकल्पः - ॐ अद्येत्यादि० अमुकराशेर्मम पुत्रस्य कर्णवेधकर्मणि कलशे वरुणसहितानामादित्यादिनवग्रहाणां जले केशवादिदेवानाञ्च पूर्वाङ्गत्वेन पूजनं करिष्ये इति संकल्प्य **ॐ मनोजूतिरि**ति प्रतिष्ठाप्य नाममन्त्रेण वरुणादीन् पूजयित्वा जले केशवादीन्पूजयेत् । यथा- **ॐ केशवाय नमः, ॐ हराय नमः, ॐ ब्रह्मणे नमः, ॐ चन्द्राय नमः, ॐ सूर्याय नमः, ॐ दिगीशेभ्यो नमः, ॐ नासत्याभ्यां नमः, ॐ सरस्वत्यै नमः, ॐ ब्राह्मणेभ्यो नमः, ॐ गवे नमः, ॐ गुरुभ्यो नमः**, इति नाममन्त्रेण ध्यानादिजपनीराजनान्तोपचारैः संपूज्य पुष्पाञ्जलिं समर्पयेत् ।

कर्णवेधपूर्वकृत्यम्- ततः स्वेष्टदेवं भिषग्वरं ब्राह्मणान् सौचिकं च नमस्कृत्य मातुरुत्सङ्गस्थितस्य वस्त्रभूषणदिभिरलङ्कृतस्य बालकस्य प्रत्यङ्मुखस्य गुडमोदकादिभोजनार्थं दत्त्वा अद्येत्यादि० सं० अमुकराशेरस्य मम बालस्य

कर्णवेधलग्नाद्यत्रकुत्रस्थानस्थितदुष्टग्रहैः सूचितारिष्टनिवृत्त्यर्थं ग्रहाणां प्रीतये इमां दक्षिणां ब्राह्मणाय दास्ये इति लग्नदानं कुर्यात् ।

कर्णवेधनम्- ततो दैवज्ञबोधिते शुभे लग्ने पिता सौचिकोऽन्यो वा सुवर्णसूच्या क्षत्रियस्य, रजतसूच्या विप्रवैश्ययोः, आयस्या सूच्या शूद्रस्य, अष्टाङ्गुलया द्विगुणसूत्रसंलग्नया पुरुषस्य पूर्वं दक्षिणं कर्णमभिमन्त्रयेत् ।

दक्षिणकर्णाभिमन्त्रणम्- तत्र विनियोगः - (पूर्वाभिमुखोपविष्टः कुमारस्य) **ॐ भद्रङ्कर्णेभिरि**ति मन्त्रस्य प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दो दक्षिणकर्णाभिमन्त्रणे विनियोगः । **ॐ भद्रङ्कर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाᳫँसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ।।** इति दक्षिणकर्णमभिमन्त्रयेत् ।

वामकर्णाभिमन्त्रणम्- ॐ व्वक्ष्यन्तीवेदागनीति मन्त्रस्य प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दो वामकर्णाभिमन्त्रणे विनियोगः । **ॐ व्वक्ष्यन्तीवेदागनीगन्तिकर्णम्प्रियᳫँसखायम्परिषस्वजाना । योषेवशिङ्क्तेवितताधिधन्वञ्ज्यायाऽइयᳫँसमनेपारयन्ती ।।** इति वामकर्णमभिमन्त्रयेत् ।

ततो मध्यं निरीक्ष्य नापितद्वारा वेधयेत् । तस्मिन् समये मधुरादानं समाचारात् । ततो ब्राह्मण-भोजनम् ।[१]

— इति कर्णवेधप्रयोगः —

---

[१] अभिमन्त्रितौ कर्णौ अलक्तरसेनाङ्कयित्वा विध्येत् स्त्रियास्तु वामं पूर्वं विद्ध्वा दक्षिणं विद्ध्येदमन्त्रकम्, स्त्रीणां वामनासावेधोऽपि कर्तव्यः ।

कन्याया घ्राणवेधः स्यात्सद्वारे विषमेऽब्दके
आद्ययामे सिते पक्षे मैत्रक्षिप्रोत्तराचरे । इति संस्कारगणपतौ वचनात् ।

ततो दक्षिणासंकल्पं कुर्यात्- अद्येहामुकोहम् अमुकराशेरस्य मम बालकस्य कर्णवेधकर्मणः साङ्गफलप्राप्तये साद्गुण्यार्थं चेमां दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये **ॐ तत्सन्न मम** । तथा दश यथासंख्याकान् वा ब्राह्मणान् यथोपपन्नेनान्नेन तर्पयिष्ये इति संकल्प्य दक्षिणां दत्त्वा अभिषेकतिलकरक्षाबन्धनघृतच्छायामन्त्रपाठादि कारयित्वा जीवमातृपूजनं महानीराजनञ्च कुर्यात्। आवाहितदेवता विसृज्य कृतं कर्मेश्वरार्पणं कुर्यात् । अयञ्च कर्णवेधः चूडाकर्मणि उपनयनात्पूर्वं पृथक् कृते तदनन्तरं कर्तव्यः । उपनयनेन सहैव चूडाकरणे तु पूर्वमेव कर्तव्य इति बोद्धव्यम्।

चूडोपनयनवेदारम्भसमावर्तनकर्मणां सहप्रयोगः

१३. चूडाकर्मविधिः

प्रयोगः - चूडाकर्मादिदिनात् पूर्वदिने कृतनित्यक्रियः पित्रादिः संस्कार्यबटुना कारिताभ्यङ्गस्नानेन परिधापितनूतनवस्त्रेणालङ्कृतेन सहितः कर्मस्थानमागत्य प्राङ्मुख उपविश्य शुभासने स्वदक्षिणतः संस्कार्यमुपवेश्य दीपं प्रज्वलय्याचम्य प्राणानायम्य स्वस्तिवाचनं कृत्वा गणेशादीन् प्रणम्य तेषु पुष्पाञ्जलिं समर्प्य प्रधानसंकल्पं कुर्यात् ।

प्रतिज्ञासङ्कल्पः- ॐ अद्येहेत्यादिदेशकालादिकीर्तनान्ते अमुकगोत्रोऽमुकशर्माहम् अमुकशर्मणोऽस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोमेधाभिवृद्धिद्वारा श्रीपरमेश्वरप्रीतये श्व उपनयनसंस्कारात्पूर्वं चूडाकरणाख्यं कर्म करिष्ये । तथाऽस्य द्विजत्वसिद्ध्या वेदाध्ययनाद्यधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीतये वेदारम्भात्प्रागुपनयनसंस्कारं करिष्ये । तथा अस्य कुमारस्य ब्रह्मवर्चससम्पादनपूर्वकं श्रौतस्मार्तकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यै वेदारम्भसंस्कारं करिष्ये । तत्र ग्रहानुकूल्यसिद्ध्यर्थं ग्रहयज्ञञ्च करिष्ये । करिष्यमाणचूडोपनयनवेदारम्भसमावर्तनग्रहयागकर्मणां पूर्वाङ्गत्वेन पुण्याहवाचनं मातृकापूजनं वसोर्धारापातनमाभ्युदयिकश्राद्धं निर्विघ्नतासिद्ध्यर्थमादौ गणपतिपूजनञ्च तन्त्रेणाद्य करिष्ये । इति संकल्प्य तानि क्रमेण कृत्वा भुञ्जीत ।

आचारात् तद्दिनस्य पूर्वरात्रे जूटिकाधिवासनं कुर्यात् ।

जूटिकाधिवासनम्[१] **-**

पीतवस्त्रखण्डत्रये गौरसर्षपदध्यक्षतदूर्वागोरोचनकुङ्कुमहरिद्रायवचन्दनकुशगोमयानि प्रक्षिप्य पोटलिकात्रयं कृत्वा **ॐ ब्रह्मजज्ञानम्०, ॐ विष्णोरराटम०, ॐ नमः शम्भवायच०,** इति त्रिभिर्मन्त्रैः क्रमेण पोटलिकात्रये ब्रह्माणं विष्णुं शिवञ्च संपूज्य यथा शिखास्थापने सौकर्यं भवति तथा बटुशिरसो दक्षिणभागस्थितेषु केशेष्वेकाम्, पश्चिमभागस्थितेषु द्वितीयाम्, उत्तरभागस्थितेषु तृतीयाञ्च पोटलिकां बध्वा पीतोष्णीषेण बटुशिरो वेष्टयेत् ।

दक्षिणादानम्- अस्य कुमारस्य चूडाकर्मसिद्ध्यै कृतस्यास्य जूटिकाधिवासनकर्मणः साङ्गतासिद्धये इमां दक्षिणां ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे इति संकल्प्य तेभ्यो दद्यात् । इदं पूर्वदिनकृत्यम् । इति केशलतिकाधिवासनम्।

ग्रहयज्ञार्थं ब्राह्मणवरणम् - अथापरदिने स्नातः कृतनित्यक्रियः पिता देशकालकीर्तनान्ते अमुकगोत्रोऽमुकशर्माहं ममामुकशर्मणः अस्य कुमारस्य चूडोपनयनवेदारम्भसमावर्तनकर्मसु ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये । तत्कर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमाचार्यत्वेनत्वामहं वृणे इति वृत्वा तद्द्वारा ग्रहयज्ञं समापयेत् ।

चूडाकरणम्

पूर्वकृत्यम्- तत्र संवत्सरानन्तरमादित्यशुद्धौ उदगयन आपूर्यमाणपक्षे शुक्रास्तादिदोषरहितरिक्तादिदोषवर्जं सोमबुधशुक्रान्यतमवारविहितनक्षत्रसमन्वितायां तिथौ कृतनित्यक्रियो यजमानो मातृपूजापूर्वकाभ्युदयिकादि कृत्वा ब्राह्मणान्भोजयित्वा मण्डपे परिष्कृतभूमौ कुशकण्डिकामारभेत ।

---

[१] तत्रादौ गणेशपूजनम्, तत्र संकल्पः - अद्येहामुकशर्माहममुकशर्मणोऽस्यकुमारस्य करिष्यमाणजूटिकाधिवासनकर्मणि निर्विघ्नतासिद्ध्यै महागणपतेः पूजनं करिष्ये । इति संकल्प्य विधिवत्संपूज्य जूटिकाधिवासनसंकल्पं कुर्यात् - अद्येहामुकशर्माहम् अमुकशर्मणोऽस्य कुमारस्य श्वः करिष्यमाणचूडाकर्मसिद्ध्यै अद्य रात्रौ जूटिकाधिवासनं करिष्ये इति ।

तत्र क्रमः - कुशैः परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवसूलेन प्रादेशमात्रं त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य वारिणाभ्युक्ष्य कांस्यपात्रेणाग्निमादाय प्रत्यङ्मुखमग्रेरुपसमाधानं कुर्यात् ।

ब्राह्मणवरणम्- ततोऽग्रेः पश्चिमतो यजमानदक्षिणदिशि स्नापितमहतवासः परिधाप्य कुमारमङ्के निधाय माता उपविशति । ततः सङ्कल्पं कुर्यात् - पुष्पचन्दनताम्बूलवस्त्राण्यादाय- ॐ अद्यकर्तव्यचूडाकरणहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् । **ॐ वृतोस्मि** इति प्रतिवचनम्। **यथाविहितं कर्म कुरु** इति यजमानेनोक्ते, **ॐ करवाणि** इति प्रतिवचनम् ।

ततो यजमानोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्याग्निप्रदक्षिणं कारयित्वा **अस्मिन्कर्मणि त्वं मे ब्रह्मा भवे**त्यभिधाय, **भवानि** इति तेनोक्ते, ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणोमुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम्- बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तम्(उदगग्रैः), ब्रह्मणोऽग्निपर्यन्तम् (प्रागग्रैः), नैर्ऋत्याद्वायव्यान्तम् (उदगग्रैः), अग्नितः प्रणीतापर्यन्तम् (प्रागग्रैः), ततोऽग्नेरुत्तरतः पश्चिमायां दिशि पवित्रच्छेदनार्थ कुशत्रयम्, पवित्रकरणार्थं साग्रं कुशद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्त्रः, स्रुवः, आज्यम्, षट्पञ्चाशदधिकशतद्वयमुष्टिमिततण्डुलपूर्णपात्रम्, पवित्रच्छेदनकुशानां पूर्वदिशि क्रमेणा सादनीयम्। अमीषामुत्तरतोऽसाधारणवस्तून्युपकल्पनीयानि । तत्र शीतोदकम्, उष्णोदकम्, घृतम्, दधिनवनीतान्यतमपिण्डः, त्रिः श्वेतशल्लकीकण्टकम्, प्रादेशमितसाग्रसप्तविंशतिकुशपत्रणि, ताम्रपरिष्कृतलोहक्षुरः, नापितः, बृषभगोमयपिण्डः, अन्यदप्याचारप्राप्तनलिनीदलादि ।

होमपृष्ठभूमिसम्पादनम्- ततः पवित्रच्छेदनकुशैः पवित्रं छित्त्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे कृत्वा अनामिकाङ्गुष्ठाभ्यामुत्तराग्रं पवित्रं गृहीत्वा त्रिरुत्पवनम् । ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा अनामिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीरभिषिच्य प्रोक्षणीजलेनासादितवस्तून्यभिषिच्य अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । तत आज्यस्थाल्यामाज्यं निधायाधिश्रित्य ज्वलत्तृणमादायान्यस्योपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत् प्रक्षिपेत् । ततस्त्रिः स्रुवप्रतपनम्, ततः संमार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत्त्रिःप्रतप्य दक्षिणतो निदध्यात् । ततोऽग्निप्रदक्षिणक्रमेणाज्यमवतार्य स्वाग्रतो निदध्यात्। ततः प्रोक्षणीवत्त्रिरुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरस्य पूर्ववत्प्रोक्षिण्युत्पवनम्। तत उत्थाय उपयमनकुशान् वामहस्ते कृत्वा **प्रजापतिं मनसा** ध्यात्वा तूष्णीं समित्त्रयमादायाग्नौ प्रक्षिपेत् । तत उपविश्य सपवित्र प्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य[२] प्रणीतापात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ जुहुयात् । तत्र प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

आघाराज्यहोमः - ॐ प्रजापतय इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा ।

---

[२] **ॐ मनोजूतिः०, ॐ भूर्भुवःस्वः सभ्यनामाग्ने सुप्रतिष्ठितो वरदो भवे**ति प्रतिष्ठाप्य **ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः । तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्रजापतिः।। ॐ चत्त्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्त्यॉं२।।ऽआविवेश ।।** इति मन्त्राभ्यां ध्यानावाहनासनपाद्यादिनीराजनान्तं संपूज्य **ॐ ब्रह्मणे नमः** इति प्रथमरेखाम्, **ॐ विष्णवे नमः** इति द्वितीयरेखाम्, **ॐ रुद्राय नमः** इति उत्तररेखां संपूज्य उदकं स्पृष्ट्वा **ॐ कराल्यै नमः, ॐ धूमिन्यै नमः, ॐ श्वेतायै नमः, ॐ लोहितायै नमः, ॐ महालोहितायै नमः, ॐ सुवर्णायै नमः, ॐ पद्मरागायै नमः**, इति सप्तजिह्वाश्च पूजयेदिति विशेषो बोध्यः ।

ॐ इन्द्रायेति प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुछन्द आज्यहोमे विनियोगः। **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ ।

ॐ अग्नय इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुछन्द आज्यहोमे विनियोगः। **ॐ अग्नये स्वाहा इदमग्नये ।**

ॐ सोमायेति प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** इत्याज्यभागौ ।

महाव्याहृतिहोमः- ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि आज्यहोमे विनियोगः । **ॐ भूः स्वाहा, इदमग्नये । ॐ भुवः स्वाहा, इदं वायवे । ॐ स्वः स्वाहा, इदꣳसूर्याय** । एता महाव्याहृतयः ।

पञ्चवारुणीहोमः - ॐ त्वन्नोऽअग्ग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ त्वन्नोऽअग्ग्नेव्वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोव्वह्नितमःशोशुचानोविश्श्वाद्द्वेषाꣳसिप्प्रमुमुग्ध्यस्म्मत् ।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ सत्वन्न इति वामदेवऋषिरग्ग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्ग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि ।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्ग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ अयाश्चाग्ग्नेस्यनभिशस्त्तिपाश्चसत्त्यमित्त्वमयाऽअसि । अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा ।।** इदमग्ग्नये।

ॐ येतेशतमिति व्वामदेवऋषिर्व्वरुणः सविता व्विष्णुर्व्विश्वे(देवाः) मरुतः स्वर्क्का देवतास्त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ येतेशतंव्वरुणयेसहस्त्रंय्यज्ञियाःपाशाव्विततामहान्तः । तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।।** इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो (देवेभ्यो) मरुद्भ्यः स्वर्क्केभ्यः ।

ॐ उदुत्तमामिति शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । **ॐ उद्दुत्तमंव्वरुणपाशमस्मदवाधमंव्विमद्धयमᳬश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं व्वरुणाय ।

--इति सर्वप्रायश्चित्तम्--

प्राजापत्यहोमः - ॐ प्रजापतये इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । इति प्राजापत्यम् ।

स्विष्टकृद्धोमः - ॐ अग्नयेस्विष्टकृत इति मन्त्रस्य प्रजापति ऋषिरग्निर्देवता गायत्रीछन्दः स्विष्टकृद्धोमे विनियोगः । **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते** । इति स्विष्टकृतं जुहुयात् ।

ततः संस्रवं प्राश्याचम्य पवित्राभ्यां मुखं मार्जयित्वा पवित्रे अग्नौ प्रक्षिपेत् ।

पूर्णपात्रदानम्- ततः पूर्णपात्रमादाय- ममामुकनाम्नः कुमारस्य चूडाकरणाङ्गहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्रह्मकर्मकर्त्रे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् । ब्रह्मा च प्रतिगृहय **स्वस्तीति** ब्रूयात् ।

प्रणीताविमोकः- तत्र विनियोगः - **ॐ सुमित्रियादुर्म्मित्रिया** इति मन्त्रद्वयस्य प्रजापतिर्ऋषिरापो देवता यजुश्छन्दः प्रणीताविमोके विनियोगः। **ॐ सुमित्रियानऽआपऽओषधयःसन्तु ।।** इति पवित्राभ्यां शिरः सम्मार्जयेत् ।

ॐ दुर्म्मित्रियास्त्तस्म्मैसन्तुयोस्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्म्मः ।। इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ।

बर्हिर्होमः- तत आस्तृतं बर्हिःपूर्वोपक्रममुत्थाप्य विनियोगं कुर्यात्- **ॐ देवागातुविद** इति मन्त्रस्य मनसस्पतिऋषिर्वातो देवता विराट्छन्दो बर्हिर्होमे

विनियोगः । **ॐ देवागातुविदोगातुंवित्त्वागातुमित । मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ।।** स्वाहा इदं प्रजापतये । इति मन्त्रेण हस्तेन जुहुयात् ।

[3]**उदकासेकः -** ततः शीतास्वप्सु उष्णा अपो मिश्रयेत् । तत्र विनियोगः- **ॐ उष्णेनवाय** इति मन्त्रस्य परमेष्ठी ऋषिरदितिर्देवता प्रतिष्ठाछन्द उष्णोदकासेके विनियोगः । **ॐ उष्णेनवायऽउदकेनह्यदितेकेशान्वप ।।** इति मन्त्रान्ते आसिञ्चेत् । ततो मिश्रितास्वप्सु नवनीतघृतदधिपिण्डान्यतमं तूष्णीं प्रक्षिपेत् । अनेनैवोदकेनोन्दनम् ।

जूटिकाक्लेदनम्- ततो दक्षिणपश्चिमोत्तरक्रमेण पूर्वनिशाबद्धकुमारजूटिकात्रये दक्षिणजूटिकां क्लेदयेत् । तत्र विनियोगः:- **ॐ सवित्रे**तिप्रजापतिर्ऋषिरापो देवता गायत्रीच्छन्दः क्लेदने विनियोगः । **ॐ सवित्राप्प्रसूतादैव्याऽआपऽउन्दन्तुतेतनूम् । दीर्घायुत्त्वायवर्च्चसे ।।** इति मन्त्रं पठित्वा मिश्रितवारिणा आर्द्रीकुर्यात् ।

कुशतरुणान्तर्धानम्- ततस्त्रिस्थानश्वेतेन शल्यककण्टकेन तूष्णीं पृथक् कृतेषु केशेषु पूर्वोपकल्पितसप्तविंशतिकुशपत्रतः त्रीणिपत्राण्यादाय केशमूलाभिमुखाग्राणि केशाग्राभिमुखमूलानि । तत्र विनियोगः - **ॐ ओषधे** इति मन्त्रस्य प्रजापतिर्ऋषिस्तरुणो देवता[4] यजुःकुशतरुणान्तर्धाने विनियोगः। **ॐ ओषधेत्रायस्व (स्वधितेमैनꣳहिꣳसीः)** एतावतैव मन्त्रेणान्तर्दध्यात् ।

क्षुरग्रहणम् - तत्र विनियोगः - **ॐ शिवोनामे**ति मन्त्रस्य प्रजापतिर्ऋषिः क्षुरो देवता यजुःक्षुरग्रहणे विनियोगः । **ॐ शिवोनामासिस्वधितिस्त्तेपितानमस्त्तेऽअस्त्तुमामाहिꣳसीः ।।** इति मन्त्रेण । **क्षुरकेशसंयोगः-** लोहक्षुर-

---

[3] ततो दैवज्ञबोधिते शुभे लग्ने लग्नदानं कुर्यात् । तत्र संकल्पः- अद्येहामुकोऽहमस्यकुमारस्य चूडाकरणलग्नाद्दुष्टानाममुकग्रहाणां दुष्टदोषोपशान्त्यै इदं सुवर्णमग्निदैवतं तत्प्रत्याम्नायीभूतमन्यदैवतमन्यद्द्रव्यं वा ब्राह्मणाय दास्ये इति संकल्प्य ब्राह्मणाय दद्यात् ।

[4] ओषधिर्देवता इति संस्कारदीपके ।

मादाय विनियोगः- **ॐ निवर्त्तयामी**ति मन्त्रस्य प्रजापतिर्ऋषिः क्षुरो देवता यजुःक्षुरकेशसंयोगे विनियोगः । **ॐ निवर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननाय-रायस्प्पोषायसुप्प्रजास्त्त्वायसुवीर्य्याय ।।** इति मन्त्रेण क्षुरं सकेशकुशपत्रेषु संयोजयेत् ।

सकेशकुशपत्रच्छेदनम्- ततः पृथक्कृतकेशसहितानि कुशपत्राणि आदाय विनियोगः - **ॐ येनावपदि**ति मन्त्रस्य आलम्बायनऋषिः सविता देवता पङ्क्तिश्छन्दः सकेशकुशपत्रच्छेदने विनियोगः। **ॐ येनावपत्सविताक्षुरेणसोमस्य राज्ञोव्वरुणस्यव्विद्द्वान् । तेनब्ब्रह्माणोव्वपतेदमस्यायुष्ष्यञ्जरदष्टिर्य्यथासत् ।।** इति मन्त्रेण च्छेदयेत् ।

ततोऽग्नेरुत्तरतो भगिन्या ध्रियमाणे कांस्यपात्रस्थापितवृषगोमयपिण्डे प्रक्षिपेत्[५] ।

ततो दक्षिणमेव गोदानं तूष्णीमार्द्रंकृत्वा शल्यककण्टकेन तूष्णीं पृथक् कृत्वा तन्मध्ये त्रीणि कुशपत्राणि तूष्णीमन्तर्धाय सकेशकुशपत्रेषु क्षुरं तूष्णीं संयोज्य सकेशानि कुशपत्राणि तूष्णीं प्रच्छिद्य गोमयपिण्डे प्रक्षिपेत्२ । पुनर्दक्षिण एव गोदाने उन्दनं विनयनं कुशपत्रत्रयान्तर्धानं क्षुरसंयोजनं गोमयपिण्डे प्रक्षिपेणं च तूष्णीं कुर्यात्३ । ततः पश्चिमगोदाने **सविन्त्रे**ति मन्त्रेणोन्दनं शल्यककण्टकेन केशानां तूष्णीं पृथक् करणम्, **ओषधे** इति मन्त्रेण कुशपत्रत्रयान्तर्धानं **शिवोनामे**ति मन्त्रेण क्षुरादानम् **निवर्त्तयामी**ति मन्त्रेण क्षुरकेशसंयोजनं कुर्यात् ।

छेदने मन्त्रविशेषः- ॐ ज्यायुषमिति मन्त्रस्य नारायणऋषिराशीर्देवता[६] उष्णिक्छन्दः सकेशकुशपत्रच्छेदने विनियोगः । **ॐ त्र्यायुषञ्जमदग्नेः-कश्यपस्यत्र्यायुषम् । यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ।।** इति मन्त्रेण सकेशानि कुशपत्राणि छिप्त्वा प्रथमस्थापिते वृषगोमयपिण्डे प्रक्षिपेत् १।

---

[५] अत्र छिन्नकेशस्पर्शनिमित्तो जलस्पर्शः कर्तव्यः । एवमुत्तरत्रापीति संस्कारदीपके ।

[६] अग्निर्देवता इति संस्कारदीपके ।

पुनः पश्चिम एव गोदाने उन्दनादिकर्मषट्कं तूष्णीं वारद्वयं कुर्यात् २/३। अत्र छिन्नकेशस्पर्शनिमित्तो जलस्पर्शः कर्तव्यः ।

तत उत्तरगोदाने **सवित्रे**ति मन्त्रेणोन्दनं शल्यककण्टकेन तूष्णीं पृथक्करणं **औषधे** इति मन्त्रेण तत्र कुशपत्रत्रयान्तर्धानं **शिवोनामे**ति मन्त्रेण क्षुरादानं **निवर्त्तयामी**ति मन्त्रेण क्षुरकेशसंयोजनं च कृत्वा विनियोगं कुर्यात्- **ॐ येनभूरिश्वरे**ति मन्त्रस्य वामदेवऋषिः क्षुरो देवता यजुःसकेशकुशपत्रच्छेदने विनियोगः । **ॐ येनभूरिश्चरादिवञ्ज्योक्चपश्चाद्धिसूर्य्यम् । तेनतेवपामि-ब्रह्मणाजीवातवेजीवनायसुश्लोक्यायस्वस्तये ।।** इति मन्त्रेण सकेशानि कुशपत्राणि छित्वा प्रथमस्थापिते वृषगोमपिण्डे प्रक्षिपेत्। अत्र पूर्ववज्जलस्पर्शः।

पुनरुत्तर एव गोदाने उन्दनादिकर्मषट्कं तूष्णीं वारद्वयं कुर्यात् २/३ । अत्र पूर्ववज्जलस्पर्शः ।

क्षुरभ्रामणम् - ततः समन्तात् शिरसः दक्षिणकर्णादाराभ्य दक्षिणकर्णपयन्तं स कृन्मन्त्रेण द्विस्तूष्णीं क्षुरं प्रदक्षिणं यथा स्यात्तथा भ्रमयेत् । तत्र विनियोगः- **ॐ यत्क्षुरेणे**ति मन्त्रस्य वामदेवऋषिः क्षुरो देवता यजुःक्षुरभ्रमणे विनियोगः। **ॐ यत्क्षुरेणमज्जयतासुपेशसावप्त्रावावपतिकेशाँश्छिन्धिशिरोमाऽ-स्यायुःप्प्रमोषीः ।।** इति ।

नापिताय क्षुरदानम्- ततस्ताभिरेवाद्भिः समस्तं शिरः प्रक्षाल्य विनियोगं कुर्यात् - **ॐ अक्षण्वन्नि**ति मन्त्रस्य वामदेवऋषिः क्षुरो देवता यजुःक्षुरदाने विनियोगः । **ॐ अक्षण्वन्परिवप० ।।** इति मन्त्रेण नापिताय क्षुरं दद्यात् ।

ततो नापितः प्राङ्मुखस्योदङ्मुखस्य वा कुमारस्य **वाजसनेयिनामेके**ति लौगाक्षिवचनात् एकां शिखां स्थापित्वा उदक्संस्थं समस्तशिरोवपनं यथा कुलधर्मं कुर्यात् । ताँश्च केशान्नूतनवस्त्रेण प्रतीक्ष्य माता दधिभक्तदुग्धसमन्वित-गोमयपिण्डोपरि निदध्यादितिसमाचारः । ततः पिता सकेशं गोमयपिण्डं

वस्त्रावेष्टनेन गुप्तं कृत्वोदकान्ते स्वयं प्रतिनिधिद्वारा वा निदध्यात्[७] ।

दक्षिणादानम्- ततः पिता उपकल्पितं वरद्रव्यं संयुज्यादायममामुकनाम्नः कुमारस्य चूडाकरणकर्माङ्गतया विहितं वरद्रव्यममुकगोत्रायामुकशर्मणे आचार्याय संप्रददे इत्युक्त्वा स्वाचार्याय दद्यात् ।

पूर्णाहुतिः- ततः पूर्ववत्पूर्णाहुतिः। पिता उत्थाय फलवस्त्रसमन्वितस्त्रुवस्थघृतेन युतो विनियोगं कुर्यात् - **ॐ मूर्धानमि**ति मन्त्रस्य भरद्वाजऋषिरग्निर्देवता त्रिष्टुप्छन्दः पूर्णाहुतिहोमे विनियोगः । **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानरमृतऽआजातमग्निम् । कविङ्सम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाःस्वाहा ।।** इति पूर्णाहुतिः ।

त्र्यायुषकरणम्- ततो ब्राह्मणभोजनभूयस्यादेः संकल्पं कृत्वा उपविश्य स्त्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना त्र्यायुषं कुर्यात् । **ॐ त्र्यायुषञ्जमदग्नेः** इति ललाटे, **ॐ कश्यपस्यत्र्यायुषम्** इति ग्रीवायाम्, **ॐ यद्देवेषु त्र्यायुषम्** इति दक्षिणबाहुमूले, **ॐ तन्नोऽअस्तुत्र्यायुषम्** इति हृदि । अनेनैव क्रमेण कुमारललाटादावपि तत्र तत्ते अस्तु इति विशेषः । ततो दूर्वाक्षताद्याशीर्मन्त्रपाठाः। ततस्तान्केशान्गोमयपिण्डस्थान् गोष्ठे सरित्तीरे अन्यस्मिन् उदकान्ते वा प्रक्षिपेत् । ततो ब्राह्मणान्भोजनादिभिः संतोष्य सुहृद्युतः स्वयमपि भुञ्जीत ।

— इति चूडाकरणप्रयोगः —

* * *

---

[७] ततः पर्युप्तशिरसं सुस्नातं पुष्पमालादिभिश्चालङ्कृतं माणवकं पित्रादिसमीपमानीय अग्नेः पश्चादवस्थापयेत् ।

१४. उपनयनम्

प्रयोगः[१]- तत्र शुद्धसमये रविगुरुचन्द्रतारादिशुद्धौ जन्मतो गर्भाद्वाष्टमेऽब्देऽनानुकूल्ये षोडशसंवत्सराभ्यन्तरे ब्रह्मवर्चसकामस्य पञ्चमेप्युदगयन आपूर्यमाणपक्षेऽनध्यायषष्ठीरिक्ताद्यतिरिक्ततिथौ रविगुरुशुक्रान्यतमवारे मध्याह्नादर्वाक् कुमारपित्राभ्युदयिके कृते तदभावे आचार्येणैव कृते ब्राह्मणान् माणवकञ्च भोजयित्वा अशिखकृतक्षौरं स्नानानन्तरं यथाशक्त्यलङ्कृत्य बहिः शालायां तुषकेशशर्करादिशून्यपरिष्कृतभूमौ आचार्योऽग्निस्थापनं कुर्यात् ।

---

१. **प्रयोगः** - ज्योतिर्विदुपदिष्टं शुभं मूहूर्तं निश्चित्य तन्मुहूर्तात् पूर्वेद्युः सुस्नातः परिहितशुद्धवस्त्रः कृतनित्यक्रियः पिता बटुना सह कर्मस्थानमागत्याचम्य प्राणानायम्य स्वस्योपनेतृत्वाधिकारसिद्धये कृच्छ्रत्रय गायत्र्यपदेशाधिकारसिद्धये द्वादशसहस्त्रं द्वादशाधिकसहस्त्रं वा गायत्रीजपं स्वयं ब्राह्मणद्वारा वा कुर्यात् । बटुना कामचारादिदोषपरिहारार्थं कृच्छ्रत्रयं प्रायश्चित्तं प्रयोगोक्तरीत्या कारयेत् ।

संकल्पः - अमुकगोत्रस्यामुकशर्मणो ममामुकनाम्नः कुमारस्य उपनयनकर्तृत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीतये गोत्रयनिष्क्रयरजतदानप्रत्याम्नायेन कृच्छ्रत्रयमहं करिष्ये, इति प्रतिज्ञाय गोत्रितयमूल्यं ब्राह्मणञ्च संपूज्य देयमादाय देशकालकीर्तनान्ते अमुकगोत्रस्यामुकशर्मणो ममामुकनाम्नः कुमारस्योपनयनकर्तृत्वाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीतये कृच्छ्रत्रयप्रत्याम्नायीभूतमिदं गोत्रयनिष्क्रयरजतखण्डत्रयं चन्द्रदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति दत्त्वा दानप्रतिष्ठां कुर्यात् ।

गायत्रीजपसङ्कल्पः- पुनः देशकालकीर्तनान्ते अमुकगोत्रस्यामुकशर्मणो ममामुकनाम्नः कुमारस्य गायत्र्युपदेशाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीतये द्वादशसहस्त्रसंख्याकं द्वादशाधिकसहस्त्रसंख्याकं वा गायत्रीजपं स्वयं ब्राह्मणद्वारा वा करिष्ये इति संकल्प्य, यथोक्तसंख्याकं गायत्रीजपं कुर्यात्। ब्राह्मणद्वारा करणे तु यथोक्तसंख्यया गायत्रीजपकर्मकर्तुममुकगोत्रानमुकशर्मणो ब्राह्मणानेभिर्गन्धपुष्पाक्षतद्रव्यफलवस्त्रादिभिर्जापकत्वेन **युष्मानहं वृणे** इति यजमानेनोक्ते, ब्राह्मणा **वृताः स्म** इत्युक्त्वा जपं कुर्युः ।

अग्निस्थापनम् - तत्र हस्तमात्रपरिमितचतुरस्रभूमिकुशकरणकसमूहनानन्तरं गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य नवीनकांस्यपात्रेणाग्निमानीय स्वाभिमुखं निदध्यात् ।

कुमारायाचार्यस्यानुशासनम्- ततः कुमारमाचार्यः शिष्यद्वाराऽग्नेः पश्चाद्दक्षिणपार्श्वेऽवस्थापयति । ततः कुमारं बद्धाञ्जलिमाचार्यः- **ॐ ब्रह्मचर्यमागाम्** इति ब्रूहि इति प्रेषयति, माणवकोऽपि - **ॐ ब्रह्मचर्यमागाम्** इत्याह । ततः **ॐ ब्रह्मचार्यसानि** इति ब्रूहि इत्याचार्येणोक्ते, **ॐ ब्रह्मचार्यसानि** इति कुमार आह ।

वासः परिधापनम्- अथ माणवकमाचार्यो वासः परिधापयति । तत्राचार्यपठनीयो मन्त्रः - **ॐ येनेन्द्राये**तिमन्त्रस्याङ्गिरा ऋषिर्बृहतीछन्दो बृहस्पतिर्देवता वासःपरिधापने विनियोगः । **ॐ येनेन्द्रायबृहस्प्पतिर्व्वासःपर्य्यधादमृतम्। तेनत्त्वापरिदधाम्म्यायुषेदीर्ग्घायुत्त्वायबलायवर्च्चसे ।।** ततो माणवकस्य द्विराचमनम् ।

कृच्छ्रत्रयसङ्कल्पः - ततः कुमारः देशकालौस्मृत्वा अमुकगोत्रस्यामुकस्य मम कामचारकामवादकामभक्ष्यदोषापनोदनपूर्वकोपनेयत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीतये गोत्रयनिष्क्रयरजतखण्डत्रयदानप्रत्याम्नायेन कृच्छ्रत्रयमहं करिष्ये इति प्रतिज्ञाय गोत्रयमूल्यं ब्राह्मणं संपूज्य देयमादाय अमुकगोत्रस्यामुकस्य मम कामचारकामवादकामभक्षादिदोषापनोदनपूर्वकोपनेयत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीतये कृच्छ्रत्रयप्रत्याम्नायीभूतमिदं गोत्रयनिष्क्रयरजतखण्डत्रयं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दत्त्वा दानप्रतिष्ठां कुर्यात् ।

(संस्कारभास्करे तु बटुरपि पूर्वोक्तसंख्याकगायत्रीजपं कुर्यादित्युक्तम् ।)

ग्रहयज्ञसङ्कल्पः - अथोपनयनदिने सुस्नातः कृतनित्यक्रियः पिता देशकालौ स्मृत्वा अमुकगोत्रस्यामुकशर्मणो ममामुकनाम्नः कुमारस्योपनयनवेदारम्भसमावर्तनकर्मसु ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये, तत्कर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्गन्धादिभिराचार्यत्वेन त्वामहं वृणे इति वृत्वा तद्द्वारा ग्रहयज्ञं समापयेत् । (ततो बटोरुपनयनाङ्गवपनं स्नानञ्च कारयित्वा) देशकालकीर्तनान्ते अमुकगोत्रस्यामुकशर्मणो ममामुकनाम्नः कुमारस्योपनयनं कर्तुं त्रीन् ब्राह्मणान् भोजयिष्ये इति संकल्प्यानुच्छिष्टपाकेन त्रीन् ब्राह्मणान् मुण्डितशिरसं स्नातं कुमारञ्च भोजयेत् इति ।

मेखलावन्धनम्- अथ माणवकस्य वेष्टनत्रयेण माणवकप्रवरसमसंख्यग्रन्थियुतां कृत्वा मेखलामाचार्यो बध्नाति । तत्र माणवकपठनीयो मन्त्रः- **ॐ इयन्दुरुक्त**मिति मन्त्रस्य वामदेवऋषिर्मेखला देवता त्रिष्टुप्छन्दो मेखलाबन्धने विनियोगः । **ॐ इयन्दुरुक्तम्परिबाधमानाव्वर्णम्पवित्रम्पुनतीमऽआगात् । प्राणापानाब्भ्याम्बलमादधानास्वस्वादेवीसुभगामेखलेयम्**[२] ।।

[३]**ॐ युवासुवासापरिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः । तन्धीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः**।। इति वा तूष्णीं वा।

यज्ञोपवीताष्टकदानम्- अथ यज्ञोपवीताष्टकं सफलनूतनभाण्डाष्टके अष्टौ यज्ञोपवीतानि स्थापयित्वा सम्पूज्याष्टभ्यो ब्राह्मणेभ्यो दद्यात् । तत्र संकल्पः- ॐ तत्सदद्यामुकशर्माहं स्वकीयोपनयनकर्मविषयकसत्सँस्कारप्राप्त्यर्थमिदं भाण्डाष्टकस्थितं यज्ञोपवीताष्टकं सफलं सान्नं सदक्षिणं ब्रह्मदैवतं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो युष्मभ्यमहं संप्रददे इति दत्वा दानप्रतिष्ठां कुर्वीत ।

माणवकस्य यज्ञोपवीतधारणम्- ततो यज्ञोपवीतं परिदधाति माणवकः। **ॐ यज्ञोपवीत**मिति मन्त्रस्य[४] परमेष्ठी ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दः श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीतधारणे विनियोगः । (**ॐ यज्ञोपवीतमसी**ति मन्त्रस्य प्रजापतिर्ऋषिर्यज्ञोपवीतं देवता यजुर्यज्ञोपवीतपरिधाने विनियोगः।) **ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्। आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतंबलमस्तुतेजः** । (**ॐ यज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि** ।। इति मन्त्रं पठितवतो माणवकस्य दक्षिणं बाहुमुद्धृत्य वा मांसोपरि निदध्यात् । अत्र द्विराचमनं माणवकस्य ।)

---

२. अत्रावसरे प्रणवपूर्वया गायत्र्या शिखाबन्धनं कुर्यात् । "**सदोपवीतिना भाव्यं सदा बद्धशिखेन च**" इति वचनात् यद्यप्यत्र यज्ञोपवीतधारणे सूत्रकारेण नोपात्ते तथापि "**बिभृयाद्दण्डकौपीनोपवीता-जिनमेखलाः**" इति व्यासवचनात् ते धार्ये इति संस्कारदीपके।

३. **ॐ युवासुवासा** इति मन्त्रस्य विश्वामित्रऋषिः सूर्यो देवता त्रिष्टुप्छन्दो मेखलाबन्धने विनियोगः ।

४. प्रजापतिर्ऋषिरिति संस्कारदीपके ।

ऐणेयाजिनधारणम्- तत ऐणेयमजिनं तूष्णीं[५] परिधत्ते ।

दण्डधारणम्- ततो माणवककेशमितं पालाशदण्डमाचार्यस्तूष्णीं तस्मै प्रयच्छति । तत्र विनियोगः - **ॐ योमेदण्ड** इति प्रजापतिर्ऋषिर्दण्डो देवता यजुर्दण्डग्रहणे विनियोगः। **ॐ योमेदण्डःपरापतद्वैहायसोधिभूम्याम्। तमहंपुनराददऽआयुषेब्रह्मणेब्रह्मवर्चसाय।।** इति माणवको दण्डं गृह्णाति।[६]

आचार्याञ्जलिवारिणा कुमारस्याञ्जलिपूरणम् - तत आचार्यो वारिणा स्वमञ्जलिं पूरयित्वा कुमारस्याञ्जलिं तेनैवाञ्जलिजलेन पूरयति वारत्रयम् । तत्र विनियोगः- **ॐ आपोहिष्ठे**तित्र्यृचस्य सिन्धुद्वीपऋषिरापो देवता गायत्रीछन्द उदकासेके विनियोगः । **ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणायचक्षसे ।।१।। ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः ।।२।। ॐ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ।।३।।** इति तिसृभिर्ऋग्भिः ।

सूर्योदीक्षणम्- सूर्यमुदीक्ष्वस्व इत्याचार्यप्रैषानन्तरं कुमारो विनियोगं गृह्णाति- **ॐ तच्चक्षु**रिति मन्त्रस्य दध्यङ्ङाथर्वणऋषिः सूर्यो देवता ब्राह्मी त्रिष्टुप्(पुर उष्णिक्)छन्दः सूर्योदीक्षणे विनियोगः । **ॐ तच्चक्षुर्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत् । पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात् ।।** इत्यनेनादित्यं पश्यति ।

---

५. तत्रः प्रदक्षिणमग्निं परीत्य ब्राह्मणादिर्माणवकोऽग्नेः पश्चात्स्थित आचम्य स्वस्ववर्णोक्तमैणेयादि चर्म बहिर्लोम यज्ञोपवीतवत् परिदध्याद् वक्ष्यमाणमन्त्रेण मित्रस्य चक्षुरिति वामदेवऋषिरजिनं देवता त्रिष्टुप्छन्दोऽजिनधारणे विनियोगः । **ॐ मित्रस्यचक्षुर्द्धरुणंबलीयस्तेजोयशस्वीस्थविरꣳसमृद्धम् । अनाहनस्यंवसनंजयिष्णुपरीदंवाज्यजिनंदधेहम् ।।** इति मन्त्रेण ऐणेयं ब्राह्मणः, रौरवं क्षत्रियः, मेषचर्म वैश्यः परिदध्यात् । आचार्यः- पादादिकेशललाटघ्राणप्रमाणं तत्तद्वर्णोक्तं पलाशबैल्वोदुम्बरजातं दण्डं तत्तद्वर्णाय माणवकाय तूष्णीं प्रयच्छति ।

६. **दण्डोच्छ्रयणम्- ॐ उच्छ्रयस्वेति** मन्त्रस्य प्रजापतिर्ऋषिर्दण्डो देवता यजुर्दण्डोच्छ्रयणे विनियोगः । **ॐ उच्छ्रयस्ववनस्प्पतऽऊर्द्ध्वोमापाह्यꣳहसऽआस्ययज्ञस्योदृचः ।।** इति मन्त्रेण दण्डमुच्छ्रयति इति संस्कारदीपके ।

हृदयालम्भनम्- अथ माणवकस्य दक्षिणांसं सहृदयं दक्षिणहस्तेन गृहीत्वा आचार्य विनियोगं गृह्णाति- **ॐ ममव्व्रतेत** इति मन्त्रस्य प्रजापतिर्ऋषिर्बृहस्पतिर्देवता त्रिष्टुप्छन्दो हृदयालम्भने विनियोगः । **ॐ ममव्व्रतेतेहृदयन्दधामिममचित्तमनुचित्तन्तेऽअस्तु । ममवाचमेकमनाजुषस्वबृहस्प्पतिष्ट्वानियुनक्तुमह्यम् ।।** इति मन्त्रेण स्पृशत्याचार्यः ।

आचार्यकुमारयोः प्रश्नोत्तरम् - ततः कुमारस्य दक्षिणहस्तं[७] गृहीत्वा तं पृच्छति- **ॐ कोनामासि** इति, **अमुकशर्माहं भो ३ः** इति कुमार आह, **ॐ कस्य ब्रह्मचार्यसी**त्याचार्यः, **ॐ भवत** इति कुमार आह, पुनराचार्यो भाषते विनियोगपूर्वकम्- **ॐ इन्द्रस्ये**ति मन्त्रस्य प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता यजुःपाठे विनियोगः । **ॐ इन्द्रस्यब्ब्रह्मचार्य्यस्यग्निराचार्य्यस्तवाहमाचार्य्यस्तव ।। श्रीअमुकशर्मन्** इति ।

उपस्थानम्- अथ माणवकं बद्धाञ्जलिं पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयति। (भूतेभ्यः परिददाति।) तत्राचार्यस्य विनियोगपूर्वकं मन्त्रपाठः - **ॐ प्रजापतयेत्वे**त्यादीनां प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता यजूंषि (षट्) रक्षणे विनियोगः। **ॐ प्रजापतयेत्त्वापरिददामि** इति प्राच्याम्, **ॐ देवायत्त्वासवित्रेपरिददामि** इति दक्षिणस्याम्, **ॐ अद्भ्यस्त्वौषधीब्भ्यःपरिददामि** इति प्रतीच्याम्, **ॐ द्यावापृथिवीब्भ्यान्त्वापरिददामि** इत्युदीच्याम्, **ॐ विश्वेभ्यस्त्वादेवेभ्यःपरिददामि** इत्यधः, **ॐ सर्वेभ्यस्त्वाभूतेभ्यःपरिददामि** इत्यूर्ध्वम्।

ब्राह्मणवरणम् - ततोऽग्निं प्रदक्षिणीकृत्याचार्यदक्षिणदिशि माणवक उपविशति । ततः पुष्पचन्दनताम्बूलवासांस्यादाय ब्राह्मणवरणसङ्कल्पं कुर्यात्- ॐ अद्यकर्तव्योपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात्*८* ।

---

७. साङ्गुष्ठम् इति संस्कारदीपके ।

८. पुनः पुष्पचन्दनताम्बूलवासांस्यादाय- ॐ अद्यकर्तव्योपनयनहोमकर्मणि होतृकर्म कर्तुम-

ॐ वृतोऽस्मीति प्रतिवचनम् । **ॐ यथाविहितं कर्म कुरु** इत्याचार्येणोक्ते, **ॐ करवाणि** इति ब्राह्मणो वदेत् । ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानास्तीर्याऽग्निं प्रदक्षिणं कारयित्वा **अस्मिन् कर्मणि त्वं मे ब्रह्मा भवे**त्यभिधाय **भवानीति** तेनोक्ते, तदुपरि बाह्मणम्[१] उदङ्मुखमुपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणाऽऽपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम्- बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तम् (उदगग्रैः), ब्रह्मणोग्निपर्यन्तम् (प्रागग्रैः), नैर्ऋत्याद्वायव्यान्तम् (उदगग्रैः), अग्नितः प्रणीतापर्यन्तम् (प्रागग्रैः कुशैः), ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्म्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशास्त्रयः, उपयमनकुशास्त्रयोदश, समधिस्तिस्त्रः, प्रादेशमात्र्यः पालाश्यः, स्रुवः, आज्यं गव्यम्, षट्पञ्चाशदुत्तराचार्यमुष्टिशतद्वयावच्छिन्नामतण्डुलपूर्णपात्रम्, समिन्धनकाष्ठानि दश, तिस्रः पालाश्यः समिधः, पर्युक्षणार्थमुदकम्, भिक्षापात्रञ्च पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् ।

होमपृष्ठभूमिसम्पादनम्- ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायानामिकाङ्गुष्ठाभ्यां तज्जलं किञ्चित् त्रिरुत्क्षिप्य प्रणीतोदकेन त्रिःप्रोक्षणीरभिषिच्य प्रोक्षणीजलेन यथासादितवस्तुसेचनं कृत्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणम् । ततः कुशं प्रज्वलय्याज्यस्योपरि समन्तादीशानीमारभ्य प्रदक्षिणं भ्रमयित्वाऽग्नौ प्रक्षिप्योदकं स्पृष्ट्वा इतरथा हस्तमावर्तयेत् । ततो

मुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्होतृत्वेन त्वामहं वृणे इति होतारं वृणुयात् । **ॐ वृतोऽस्मी**ति प्रतिवचनम् । इति मुम्बयीस्थजगदीश्वराख्यमुद्रालयमुद्रितरामदशकर्मपद्धतिपुस्तके ।

[१]. प्राङ्मुखमासीनं कर्मतत्त्वज्ञं ब्राह्मणं तदभावे पञ्चाशत्कुशनिर्मितं बटुम् इति काश्यां मुद्रितब्रतवन्धपद्धतिपुस्तके ।

दक्षिणहस्तेन स्रुवमादाय पूर्वाग्रमधोविलमग्नौ प्रतप्य वामेपाणावुत्तानबिलं निधाय दक्षिणहस्तधृतमध्यानां कुशानामग्रैरन्तरतो मूलैर्बाह्यतः संमृज्य कुशानुत्तरतो निरस्य प्रणीतोदकेन न्युब्जपाणिनाभ्युक्ष्य पुनः पूर्ववत् त्रिः प्रतप्योदकं स्पृष्ट्वा दक्षिणतः स्वसमीपे निदध्यात् । तत आज्यमग्नेरवतार्य प्रथमतोऽग्नेरुत्तरतः प्रोक्षणीपात्रस्य पश्चाद्भागेऽवस्थाप्य ततोऽग्नेः पश्चादानीय पवित्राभ्यां किञ्चिदाज्यं प्रादेशमात्रं त्रिरुत्क्षिप्य, अवेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः प्रोक्षणीरुत्पूय प्रोक्षणीषु पवित्रे निधाय उपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः पूर्वमासादितास्तिस्रः समिध आदायोत्थायाग्नौ प्रक्षिपेत् । तत उपविश्य सपवित्रप्रोक्षण्युदकेनाग्निमीशानाद्युदकपर्यन्तं प्रदक्षिणक्रमेण पर्युक्ष्य हस्तमितरथावर्त्य[१०] पवित्रे प्रणीतापात्रे निधाय । पातितदक्षिणजानुर्ब्रह्मणा दक्षिणे बाहौ कुशेनान्वारब्धः सोपयमनकुशं वामहस्तं हृदये निधायोत्तानेन दक्षिणहस्तेन शङ्खमुद्रया मध्यमूलयोर्धृतेन स्रुवेणाज्येन समिद्धतमेऽग्नौ जुहुयात् । तत्र तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

आघाराज्यहोमः - तत्र विनियोगः - **ॐ प्रजापतय** इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा ।

---

[१०] अथाचार्यो द्रव्यदेवताभिध्यानं करोति । अद्येहामुकोऽहमस्य बटोरुपनयनकर्मणा यक्ष्ये । तत्र प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, अग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ । अग्निं वरुणञ्च, सवितारम्, विष्णुम्, विश्वान् (देवान्), मरुतः, स्वर्कान्, वरुणम्, प्रजापतिम्, स्विष्टकृतञ्चाज्येन यक्ष्ये पित्रादेरन्यस्य वृतस्याचार्यस्य होमकर्तृत्वे पित्रादिः एतद्धोमद्रव्यं तत्तद्देवतायै मया परित्यक्तम् । **ॐ तत्सद्यथादैवतमस्तु न मम** इति त्यागमपि पूर्वमेव कुर्यात् । ततः समुद्भवनामानमग्निं **ॐ मनोजूतिरिति ॐ भूर्भुवः स्वः समुद्भवनामाग्ने सुप्रतिष्ठो भव** इति सुप्रतिष्ठाप्य, अद्यामुकोऽहमुपनयनकर्माङ्गहोमकर्मणि समुद्भवनामाग्नेः पूजनं करिष्ये इति संकल्प्य **ॐ चत्वारिशृङ्गा०** इति ध्यात्वा **अग्निं प्रज्वलितमित्यादिना** गन्धादिभिः संपूज्य रेखापूजनं जिह्वापूजनञ्च कुर्यात् । इति संस्कारदीपके ।

ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ ।

ॐ अग्नय इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये ।**

ॐ सोमायेति प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** इत्याज्यभागौ ।

महाव्याहृतिहोमः - तत्र विनियोगः - **ॐ भूर्भुवःस्वरि**ति महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दाꣳसि उपनयनहोमे विनियोगः। **ॐ भूः स्वाहा, इदमग्नये। ॐ भुवः स्वाहा, इदं व्वायवे। ॐ स्वः स्वाहा, इदꣳसूर्याय** । एता महाव्याहृतयः ।

पञ्चवारुणीहोमः - ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द उपनयनहोमे विनियोगः । **ॐ त्वन्नोऽअग्नेव्वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोव्वह्नितमःशोशुचानोविश्वाद्द्वेषाꣳसिप्प्रमुमुग्ध्यस्म्मत् ।।** स्वाहा इदमग्नीवरुणाभ्याम् ।

ॐ सत्वन्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द उपनयनहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि।।** स्वाहा इदमग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्द उनपयनहोमे विनियोगः । **ॐ अयाश्चाग्नेस्यनभिशस्त्तिपाश्चसत्त्यमित्त्वमयाऽअसि। अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा ।।** इदमग्नये ।

ॐ येतेशतमिति व्वामदेवऋषिर्व्वरुणः सविता व्विष्णुर्व्विश्वे (देवाः) मरुतः स्वर्क्का देवतास्त्रिष्टुप्छन्द उपनयनहोमे विनियोगः । **ॐ येतेशतंव्वरुणयेसहस्त्रंय्यज्ञियाःपाशाव्वितताम्महान्तः । तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।।** इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो (देवेभ्यो) मरुद्भ्यः स्वर्क्केभ्यः ।

ॐ उदुत्तममिति शुन:शेफऋषिर्वरुणो देवता त्रिष्टुप्छन्द उपनयनहोमे विनियोग: । **ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमद्ध्यमꣳश्रथाय । अथावयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं व्वरुणाय। एता प्रायश्चित्तसंज्ञका: ।

प्राजापत्यहोम: - तत्र विनियोग: - **ॐ प्रजापतय** इति प्रजापतिर्ऋषि: प्रजापतिर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोग: । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इदं प्राजापत्यम् ।

स्विष्टकृद्धोम: - तत्र विनियोग: **ॐ अग्ग्नये स्विष्टकृत** इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्द: स्विष्टकृद्धोमे विनियोग:। **ॐ अग्ग्नये स्विष्टकृते स्वाहा, इदमग्ग्नये स्विष्टकृते** ।। इति स्विंष्टकृत् । तत: संस्रवप्राशनममाचमनञ्च (पवित्राभ्यां मुखमार्जनमग्नौ पवित्रयो: प्रक्षेपश्च ।) ।

दक्षिणारूपपूर्णपात्रदानम्- तत: पूर्णपात्रमादाय- ॐ अद्य ममामुकनाम्न: कुमारस्य कृतैतस्मिन्नुपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणारूपपूर्णपात्रं तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् । **ॐ स्वस्तीति** प्रतिवचनम् ।

प्रणीताविमोक:- तत्र विनियोग: - **ॐ सुमित्रियादुर्म्मित्रिया** इति द्वयो: प्रजापतिर्ऋषिरापो देवता यजुषी प्रणीताविमोके विनियोग: । **ॐ सुमित्रियानऽआपऽओषधय:सन्तु** ।। इति मन्त्रेण पवित्राभ्यां प्रणीताजलेन शिर: संमृज्य **ॐ दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्द्वेष्टियञ्चवयन्द्द्विष्म:** इत्यैशान्यां प्रणीतापात्रं सावशिष्टजलं न्युब्जीकुर्यात् ।

बर्हिर्होम:- ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव जुहुयात्। तत्र विनियोग: - **ॐ देवागातुविद** इति मन्त्रस्य मनसस्पतिर्ऋषिर्विराट्छन्दो व्वातो देवता बर्हिर्होमे विनियोग: । **ॐ देवागातुविदोगातुंवित्त्वागातुमित। मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहावातेधा: ।।** स्वाहा, इति ।

आचार्यद्वारा कुमारस्यानुशासनम्- तत आचार्यः कुमारस्यानुशासनं करोति - **ॐ ब्रह्मचार्य्यसी**ति आचार्यः, **ॐ असानी**ति कुमारः । **ॐ अपोऽशाने**त्याचार्यः, **ॐ अश्नानी**ति कुमारः । **ॐ कर्म्म कुरु** इत्याचार्यः, **ॐ करवाणी**ति कुमारः । **ॐ मा दिवा सुषुप्थाः** इत्याचार्यः, **ॐ न स्वपानि** इति कुमारः । **ॐ व्वाचं य्यच्छ** इत्याचार्यः, **ॐ यच्छानि** इति कुमारः । **ॐ समिधमाधेहि** इत्याचार्यः, **ॐ आदधानि** इति माणवकः। **ॐ अपोऽशान** इत्याचार्यः, **ॐ अश्नानि** इति कुमारः।

सावित्र्युपदेशः[११]**-** अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायाचार्यचरणोपसंग्रहपूर्वकमुपसन्नायाचार्यं समीक्षमाणायाचार्यः स्वयमपि समीक्षितायास्मै निवारित शङ्खतुर्यादिशब्द इष्टांशके सावित्रीमन्वाह[१२] ।

तत्र **प्रथमावृत्तौ - ॐ भूर्भुवः स्वः, ॐ तत्सवितुर्व्वरेण्यम्, ॐ भर्ग्गोदेवस्यधीमहि । धियोयोनःप्प्रचोदयात् ॐ** ॥

द्वितीयावृत्तौ- ॐ भूर्भुवः स्वः, ॐ तत्सवितुर्व्वरेण्यम्भर्ग्गोदेवस्यधीमहि । धियोयोनः प्प्रचोदयात् ॥

तृतीयावृत्तौ सहपाठो विशेषः ।

---

[११] दैवज्ञबोधिते दीक्षालग्ने लग्नदानं कुर्यात् । अद्येहामुकोऽहममुकराशेरस्य पुत्रस्य सावित्रीग्रहणलग्नात् अमुकस्थानस्थितैरमुकग्रहैः सूचितारिष्टनिवृत्तिद्वारा शुभफलप्राप्तये ग्रहाणां प्रीतये च इदं सुवर्णनिष्क्रयीभूतं द्रव्यं वा दैवज्ञाय अन्यब्राह्मणेभ्यश्च दास्ये । **ॐ तत्सन्न मम** इति ।

[१२] उपसङ्ग्रहणप्रकारो यथा । अभिवादकः पुष्पमालादिभिर्गुरुमभ्यर्च्य श्रीफलादिकं समर्प्य उत्ताने वाममणिबन्धे उत्तानं दक्षिणमणिबन्धं निधाय पूर्वं स्वकर्णौ स्पृष्ट्वोत्तानेन पद्माकारेण करेण दक्षिणेन दक्षिणम्, वामेन वामं गुरोश्चरणं स्पृशन् अमुकगोत्रोऽमुकैतावत्प्रवरोऽभिवादयेऽभिवादयेऽमुकनामाऽहमस्मि भोः । इति वदेत् । गुरुश्च आयुष्मानेधि सौम्यामुकशर्म३न् इति नामान्तप्रत्यभिवादवाक्यस्य टेरचं प्लुतं कृत्वाशिषं दद्यात् । ततः ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दः महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छदांसि तत्सवितुरिति विश्वामित्रऋषिः सविता देवता गायत्रीच्छन्दः सर्वेषां माणवकोपदेशे विनियोगः। इत्यार्षादिकं स्मृत्वा दक्षिणकर्णे पच्छोर्धर्चशः सर्वाञ्च सावित्रीं त्रिवारं श्रावयित्वा यथाशक्ति वाचयेत् इति संस्कारदीपके ।

माणवकानुष्ठेयो होमः[१३] - अथ माणवकः आचार्यदक्षिणदिशि अग्निपश्चिमोपविष्टो घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात् । तत्र विनियोगः- **ॐ अग्ग्नेसुश्श्रव** इत्यादीनां पञ्चानां ब्रह्मा ऋषिरग्निर्द्देवता यजूꣳषि समिन्धने विनियोगः । **ॐ अग्ग्नेसुश्श्रवःसुश्श्रवसम्माकुरु ।।१।।** (इत्येकं काष्ठं गोमयपिण्डं वाग्नौ प्रक्षिपेत् ।) **ॐ यथात्त्वमग्ग्नेसुश्श्रवःसुश्श्रवाऽअसि ।।२।। ॐ एवम्माꣳसुश्श्रवःसौश्श्रवसङ्कुरु ।।३।। ॐ यथात्त्वमग्ग्नेदेवानांय्यज्ञस्यनिधिपाऽअसि ।।४।। ॐ एवमहम्मनुष्ष्याणांव्वेदस्यनिधिपोभूयासम् ।।५।।** इति मन्त्रैः पञ्चाहुतीर्जुहुयात् ।

पलाशसमिद्धोमः - ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्योत्थाय घृताक्तां स्वप्रादेशमितां पलाशसमिधमादाय विनियोगः - ॐ **अग्ग्नयेसमिधमि**ति मन्त्रस्य प्रजापतिर्ऋषिः समिद्देवताऽऽकृतिश्छन्दः समिदाधाने विनियोगः । **ॐ अग्ग्नयेसमिधमाहार्यम्बृहतेजातवेदसे । यथात्त्वमग्ग्नेसमिधासमिद्ध्यसऽएवमहमायुषामेधयाव्वर्च्चसाप्प्रजयापशुभिर्ब्ब्रह्मवर्च्चसेनसमिन्धे । जीवपुत्रोममाचार्य्योमेधाव्व्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्ब्रह्मवर्च्चस्यन्नादोभूयासꣳस्वाहा ।।** इति मन्त्रेण जुहुयात् । ततोऽनेनैव क्रमेण द्वितीयां तृतीयामपि समिधं जुहुयात् ।

पुनः पञ्चाहुतिहोमः - तत उपविश्य पूर्ववत् घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात् । तत्र विनियोगः - **ॐ अग्ग्नेसुश्श्रव** इत्यादीनां पञ्चानां ब्रह्मा ऋषिरग्निर्द्देवता यजूꣳषि समिन्धने विनियोगः । **ॐ अग्ग्नेसुश्श्रवःसु-**

---

[१३] ततो ब्रह्मचारी स्वाचार्याय समाचारादस्मिन्नवसरे गुरुदक्षिणां दद्यात् । अद्येहामुकराशिरमुकशर्माऽमुकवर्माऽमुकगुप्तो वाऽहं कृतैतद्गायत्रीग्रहणकर्मणः साद्गुण्यार्थमिदं सुवर्णमग्निदैवतं वररूपेणाचार्याय तुभ्यमहं संप्रददे, इति संकल्प्य गुरुपादयोः प्रणिपत्य समर्पयेत् । गुरुरप्याशीर्भिरभिनन्दयेत् । ततो ब्रह्मचारी कालोपस्थितां मध्याह्नसन्ध्यामुपासीत ।

यावद्वेदोपदेशो न तावत् सन्ध्यादिकं न च ।
ततो मध्याह्नसन्ध्यादि सर्वं कर्म समाचरेत् ।।

इति जैमिनिवचनात् । इति संस्कारदीपके ।

श्श्रवसम्माकुरु ।।१।। ॐ यथात्त्वमग्ग्नेसुश्श्रवःसुश्श्रवाऽअसि ।।२।। ॐ एवम्माꣳसुश्श्रवःसौश्श्रवसङ्कुरु ।।३।। ॐ यथात्त्वमग्ग्नेदेवानांय्यज्ञस्यनिधिपाऽअसि ।।४।। ॐ एवमहम्मनुष्ष्याणांव्वेदस्यनिधिपोभूयासम् ।।५।।

मुखादिस्पर्शः - ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्य तूष्णीं पाणी प्रतप्य मुखं प्रतिमन्त्रान्तेऽवमृशति । (ललाटादिचिबुकान्तं प्रोञ्छति ।) तत्र विनियोगः- **ॐ तनूपाऽअग्ग्ने** इत्यादीनां बृहद्देवा ऋषयोऽग्निर्द्देवता यजूꣳषि मुखविमर्शने विनियोगः । **ॐ तनूपाऽअग्ग्नेसितन्न्वम्मेपाहि ।।१।। ॐ आयुर्द्दाऽअग्ग्नेस्यायुर्म्मेदेहि ।।२।। ॐ व्वर्च्चोदाऽअग्ग्नेसिव्वर्च्चोमेदेहि ।।३।। ॐ अग्ग्नेयन्मेतन्न्वाऽऊनन्तन्मऽआपृणः।।४।। ॐ मेधाम्मेदेवःसविताआदधातु ।।५।। ॐ मेधाम्मेदेवीसरस्वतीआदधातु ।।६।। ॐ मेधामश्श्विनौदेवावाधत्ताम्पुष्क्करस्त्रजौ ।।७।।**

सर्वगात्रस्पर्शः - ततः सर्वगात्रादिषु दक्षिणपाणिना स्पर्शः । तत्र विनियोगः- **ॐ अङ्गानिचम** इत्यादीनां प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता यजूꣳषि अङ्गाप्यायने विनियोगः । **ॐ अङ्गानिचमऽआप्प्यायताम्** ।। इति सर्वगात्रालम्भने । **ॐ व्वाक्चमऽआप्प्यायताम्** ।। इति मुखालम्भने । **ॐ प्राणश्श्चमऽआप्प्यायताम्** ।। इति नासिकयोः । **ॐ चक्षुश्श्चमऽआप्प्यायताम्** ।। इति चक्षुषोः। **ॐ श्रोत्रञ्चमऽआप्प्यायताम्** ।। इति श्रोत्रयोः। **ॐ यशोबलञ्चमऽआप्प्यायताम्** ।। इति मन्त्रपाठमात्रम् ।

पूर्णाहुतिहोमः- यदि तस्मिन्नेव दिने वेदारम्भसमावर्तने क्रियेते तदा आचार्य उत्थाय ब्रह्मचारिस्पृष्टस्त्रुवस्थघृतेन पूर्णाहुतिं दद्यात् । तत्र विनियोगः - **ॐ मूर्द्धानम्**िति मन्त्रस्य भरद्वाजऋषिरग्निर्द्देवता त्रिष्टुप्छन्दः पूर्णाहुतिहोमे विनियोगः । **ॐ मूर्द्धानन्दिवोऽअरतिंपृथिव्याव्वैश्श्वानरमृतऽआजातमग्निनम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।** स्वाहा, इदमग्ग्नये । इति पूर्णाहुतिः ।

त्र्यायुषकरणम् - ततो दक्षिणकरानामिकागृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात् । तत्र यथासंख्येन मन्त्रचतुष्टयम् । तत्र विनियोगः- **ॐ त्र्यायुषमि**ति मन्त्रस्य नारायणऋषिरग्निर्देवता उष्णिक्छन्दो भस्मना तिलककरणे विनियोगः । **ॐ त्र्यायुषञ्जमदग्ग्ने** इति ललाटे । **ॐ कश्यपस्यत्र्यायुषम्** इति ग्रीवायाम् । **ॐ यद्देवेषुत्र्यायुषम्** इति दक्षिणबाहुमूले । **ॐ तन्नोऽअस्तुत्र्यायुषम्** इति हृदि । (अनेनैव क्रमेण कुमारललाटादावपि तत्र तन्न इति स्थाने तत्ते इति विशेषः ।)

कुमारानुष्ठेयमभिवादनम्- ततो व्यस्तपाणिभ्यां पृथिवीं स्पृशन्नभिवादयेत्। तत्र प्रकारः - अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं **भो वैश्वानर त्वामभिवादये**। ततोऽनेनैव क्रमेण वरुणमभिवाद्योपसङ्ग्रहणपूर्वमाचार्यमभिवादयेत् । उपसङ्ग्रहणप्रकारस्तु पूर्वमेव प्रदर्शितः ।

कुमारायाशीर्वादप्रदानम् - तत आचार्यः - **आयुष्मान् भव सौम्यामुकशर्म३न्** इति नामान्तवाक्यस्य टेरचं प्लुतं कृत्वाशिषं दद्यात् ।

भिक्षाग्रहणम्- ततः कुमारोऽस्मिन्नवसरे दण्डं प्रगृह्य गायत्र्यादित्यमुपस्थायाग्निं प्रदक्षिणीकृत्य कांस्यभिन्नधातुमयं भिक्षार्थं पात्रमादाय प्रथमं मातुः सकाशात् - **ॐ भवति भिक्षां देहि** इति प्रार्थनानन्तरं तद्दत्ताञ्चादाय (ततोऽन्या अपरिमिता भिक्षित्वा भो गुरो इयं भिक्षा मया लब्धा इति) आचार्याय निवेद्य तथैव भिक्षान्तरं याचेत । तत आचार्येण भुङ्क्ष्वेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ।[१४]

---

[१४] अत्रावसरे केचिन्मध्याह्नसन्ध्यां कारयन्ति । अनाश्रमस्थितिप्रयुक्तप्रत्यवायपरिहारप्रायश्चित्तापेक्षया ब्रह्मचर्यलोपप्रयुक्त-प्रत्यवायपरिहारप्रायश्चित्तस्य गुरुत्वाद् यथाविधि भिक्षाचरणादिनियमानामद्यत्वे एकस्मिन्नपि दिने दुःशकत्वं मन्यमानैरभियुक्तैः -

सावित्रीग्रहणादूर्ध्वं तद्दिने वा चतुर्थके ।
तृतीये द्वादशे वापि वत्सरे व्रतमुत्सृजेत् ।।

इति संस्कार-भास्करोक्तकारिकावचनाश्रयणेन प्रथितस्य, उपनयनदिने एववेदारम्भपूर्वकं समावर्तनमितिपक्षाश्रयेण समावर्तनस्यानुष्ठास्यमानत्वात् कालापकर्षं कृत्वा ब्रह्मचारी सायं सन्ध्यामुपास्यो-

ब्रह्मचारिनियमाः- अथ क्षारलवणमधुमांसादिनिवृत्तिः, दण्डकृष्णाजिनधारणम्, वृक्षारोहणविषमभूमिलङ्घननग्नस्त्रीनिरीक्षणस्त्रीसहोपवेशनव्यावृत्तिरूपा ब्रह्मचारिणो नियमाः । तद्दिने ब्रह्मचारी वाग्यतोऽहःशेषं स्थित एव नयेत् । ततः सायं सन्ध्यां कृत्वा तस्मिन्नेवाग्नौ पूर्ववत् पर्युक्षणपरिसमूहने कृत्वा वाचं विसृजेत् । परिसमूहनं तु शुष्कनिषिद्धेत्तरेन्धनस्याग्नौ प्रक्षेपः। तच्च सन्ध्यामुपास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्तव्यम् ।

— इत्युपनयनम् —

◆

पनयनाग्नावेव समिदाधानं कृत्वाभिवादनं कुर्यात् ।

होमदक्षिणा - अद्येहामुकोऽहममुकराशेः पुत्रस्योपनयनाङ्गहोमकर्मणः साद्गुण्यार्थमिदं सुवर्णं वररूपेणाचार्याय तुभ्यमहं संप्रददे **ॐ तत्स**दिति कर्मोपदेशकायाचार्याय दत्वाशिषं गृह्णीयात्। तथा अद्येहकृतस्यास्य पुत्रस्योपनयनकर्मणः साङ्गतासिद्ध्यर्थं पञ्चाशतं यथाशक्ति वा ब्राह्मणान् भोजयिष्ये, इति संकल्प्य समुद्भवनामाग्निं संपूज्य विसृजेत् । इति संस्कारदीपके ।

१५. वेदारम्भः

प्रयोगः[१]- तत्र कृतनित्यक्रिय आचार्यः कुशैर्हस्तमात्रपरिमितां चतुरस्त्रां भूमिं परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्त्रुवमूलेनोत्तरोत्तरतः प्रागग्रप्रादेशमात्रं त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेण अग्निमादाय स्वाभिमुखमुपसमाधाय पुष्पचन्दन-ताम्बूलवस्त्राण्यादाय ब्राह्मणवरणं कुर्यात् ।

ब्राह्मणवरणम् - ॐ अद्यकर्तव्यवेदारम्भहोमकर्मणि कृताकृतावेक्षणरूप-ब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभि-र्ब्रह्मत्वेन **त्वामहं वृणे,** इति ब्रह्माणं वृणुयात् । **ॐ वृतोस्मी**ति प्रतिवचनम्।

---

[१] आचार्यो वेदारम्भवेदीसमीपमागत्योपविश्याचम्य गणेशादीन्नमस्कृत्य पञ्चभूसंस्कारपूर्वक-मग्निस्थापनां विधाय अर्घं संस्थाप्य ब्रह्मोपवेशनादिपर्युक्षणान्तं कर्म कृत्वा सङ्कल्पं कुर्यात् - अद्येहामुकराशेरस्य बटोर्यजुर्वेदादिक्रमेण वेदारम्भं करिष्ये । इति प्रतिज्ञाय द्रव्ये देवताभिध्यानं करोति । अद्येह अस्य बटोर्वेदारम्भकर्मणाहं यक्ष्ये । तत्र प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, अन्तरिक्षम्, व्वायुम्, ब्रह्माणम्, छन्दाꣳसि, पृथिवीम्, अग्निम्, ब्रह्माणम्, छन्दाꣳसि, दिवम्, सूर्यम्, ब्रह्माणम्, छन्दाꣳसि, दिशः, चन्द्रमसम्, ब्रह्माणम्, छन्दाꣳसि, देवान्, ऋषीन्, श्रद्धाम्, मेधाम्, सदसस्पतिम्, अनुमतिम्, अग्निम्, व्वायुम्, सूर्य्यम्, अग्नीवरुणौ, अग्नीवरुणौ, अग्निम्, व्वरुणꣳ, सवितारम्, व्विष्णुम्, व्विश्वान् (देवान्), मरुतः, स्वर्कान्, व्वरुणम्, प्रजापतिम्, स्विष्टकृतञ्चाज्येनाहं यक्ष्ये । वृतस्याचार्यस्य होमकर्तृत्वे इदमाज्यं तत्तद्देवतायै मया परित्यक्तम्, यथा दैवतमस्तु न ममेति त्यागं पूर्वमेव पित्रादिः कुर्यात् । **ॐ मनोजूतिः०, ॐ भू० हरिनामाग्ने सुप्रतिष्ठितो वरदो भवे**ति प्रतिष्ठाप्य अद्येहामुकोऽहममुकराशेरस्य बटोर्वेदारम्भहोमकर्मणि हरिनामाग्नेः पूजनं करिष्ये इति संकल्प्य, **तदेवाग्निर**िति मन्त्रेण नाममन्त्रेण च ध्यानादिनीराजनान्तं संपूज्य रेखापूजनं जिह्वापूजनञ्च कृत्वा ब्रह्मणचारिणमग्नेः पश्चात् स्वस्योत्तरतः समुपवेश्य दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धो जुहुयात् । इति संस्कारदीपके।

ॐ यथाविहितं कर्म कुर्वित्याचार्येणोक्ते, **ॐ करवाणी**ति प्रतिवचनम्। इति ब्रह्मवरणं कृत्वा अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निं प्रदक्षिणक्रमेण भ्रमयित्वा अस्मिन् कर्मणि **त्वं मे ब्रह्मा भवे**त्यभिधाय **भवानी**ति तेनोक्ते, ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम् - बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं (उदगग्रैः), ब्रह्मणोऽग्निपर्यन्तं (प्रागग्रैः), नैर्ऋत्याद्वायव्यान्तं (उदगग्रैः), अग्नितः प्रणीतापर्यन्तं (प्रागग्रैः) कुशैः, ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्रः, स्रुवः, आज्यम्, पूर्णपात्रम्, पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् ।

होमपृष्ठभूमिसम्पादनम्- ततः पवित्रच्छेदनकुशैः पवित्रे च्छित्वा सपवित्रकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे धृत्वा त्रिरूत्पूय प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिरुद्दिङ्गनम् । ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तून्यभिषिच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ।

तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणम् । ततः कुशं प्रज्वलय्याज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रमयित्वा वह्नौ तत्प्रक्षेपः । ततस्त्रिः स्रुवप्रतपनम्, संमार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् । तत आज्यमग्निप्रदक्षिणं कारयित्वाऽवतार्य्य स्वाग्रतो निदध्यात् । तत आज्ये प्रोक्षणीवदुत्पवनम् । अवेक्ष्य सत्यपद्रव्ये तन्निरसनम् । ततः प्रोक्षण्युत्पवनम् । ततः उत्थायोपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्वात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः

प्रक्षिपेत् ।

तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ आज्याहुतीर्जुहुयात् । तत्र प्रथमाहुतिचतुष्टये स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

आघाराज्यहोमः - तत्र विनियोगः - **ॐ प्रजापतय** इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा ।

ॐ इन्द्रायेति प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ ।

ॐ अग्नय इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये** ।

ॐ सोमायेति प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** । इत्याज्यभागौ ।

वेदारम्भसम्बद्धविभिन्नदेवहोमः - (प्राकृतोऽनन्वारब्धकर्तृको होमः ।) **ॐ अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय । ॐ वायवे स्वाहा, इदं वायवे। ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः।** इति **यजुर्वेदे** । **ॐ पृथिव्यै स्वाहा, इदं पृथिव्यै । ॐ अग्नये स्वाहा, इदमग्नये । ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः** । इति **ऋग्वेदे** । **ॐ दिवे स्वाहा, इदं दिवे । ॐ सूर्य्याय स्वाहा, इदꣳसूर्य्याय । ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः** । इति **सामवेदे** । **ॐ दिग्भ्यः स्वाहा, इदं दिग्भ्यः । ॐ चन्द्रमसे स्वाहा, इदं चन्द्रमसे । ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः । इत्यथर्ववेदे** ।

सामान्याहुतयः- ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा । **ॐ देवेभ्यः स्वाहा, इदं देवेभ्यः । ॐ ऋषिभ्यः स्वाहा, इदमृषिभ्यः। ॐ श्रद्धायै स्वाहा, इदꣳश्रद्धायै । ॐ मेधायै स्वाहा, इदं मेधायै । ॐ सदसस्पतये स्वाहा, इदꣳसदसस्पतये ।ॐ अनुमतये स्वाहा, इदमनुमतये ।**

ततोऽन्वारब्धकर्तृको होमः तत्र तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

महाव्याहृतिहोमः - तत्र विनियोगः - **ॐ भूर्भुवः स्वरि**ति महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि व्वेदारम्भहोमे विनियोगः। **ॐ भूः स्वाहा, इदमग्नये । ॐ भुवः स्वाहा, इदं व्वायवे। ॐ स्वः स्वाहा, इदꣳसूर्य्याय** । एता महाव्याहृतयः ।

पञ्चवारुणीहोमः - ॐ त्वन्नोऽअग्ग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ त्वन्नोऽअग्ग्नेव्वरुणस्यव्विद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोव्वह्नितमःशोशुचानोव्विश्वाद्द्वेषाꣳसिप्प्रमुमुग्ध्यस्म्मत् ।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ सत्वन्न इति वामदेवऋषिरग्ग्नीवरुणौ देवते त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्ग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्ग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ अयाश्चाग्ग्नेस्यनभिशस्त्तिपाश्चसत्त्यमित्त्वमयाऽअसि। अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा ।।** इदमग्ग्नये ।

ॐ येतेशतमिति व्वामदेवऋषिर्व्वरुणः सविता व्विष्णुर्व्विश्वे (देवाः) मरुतः स्वर्क्का देवतास्त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ येतेशतंव्वरुण-**

येसहस्त्रंय्यज्ञियाःपाशाविततामहान्तः। तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्वे-मुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।। इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो(देवेभ्यो) मरुद्भ्यः स्वर्क्केभ्यः ।

ॐ उदुत्तमम्इति शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दो वेदारम्भहोमे विनियोगः । **ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमद्ध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।।** स्वाहा इदं व्वरुणाय। एता प्रायश्चित्तसंज्ञकाः ।

प्राजापत्यहोमः - ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा । इदं प्राजापत्यम् ।

स्विष्टकृद्धोमः - ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते। इति स्विष्टकृत् । ततः संस्रवप्राशनम् (मुखमार्जनं पवित्रप्रतिपत्तिः) ।

दक्षिणारूपपूर्णपात्रदानम् - तत आचम्य ॐ अद्यकृतैतद्वेदारम्भहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे पूर्णपात्ररूपां दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् । **ॐ स्वस्ती**ति प्रतिवचनम् ।

प्रणीताविमोकः- तत्र विनियोगः - **ॐ सुमित्रियादुर्म्मित्रिया** इति द्वयोः प्रजापतिर्ऋषिरापो देवता यजुषी प्रणीताविमोके विनियोगः । **ॐ सुमित्रियानऽआपऽओषधयःसन्तु** ।। इति मन्त्रेण पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य **ॐ दुर्म्मित्रियास्तस्मैसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्द्विष्मः** इत्यैशान्यां प्रणीतापात्रं सावशिष्टजलं न्युब्जीकुर्यात् ।

बर्हिर्होमः- ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव जुहुयात्। तत्र विनियोगः - **ॐ देवागातुविद** इति मन्त्रस्य मनसस्पतिर्ऋषिर्व्विराट्छन्दो व्वातो देवता बर्हिर्होमे विनियोगः । **ॐ देवागातुविदोगातुंवित्त्वागातुमित।**

मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः ।। स्वाहा, इति बर्हिर्होमः ।

---

२. वेदारम्भप्रयोगः अथ ब्रह्मचारी प्रथमं गणेशादीन् पूजयेत् । तद्यथा - अद्येहामुकोऽहं वेदारम्भकर्मणः पूर्वाङ्गत्वेन गणेशादीनामावाहनस्थापनपूजनानि करिष्ये इति संकल्प्य, ताम्रस्थाल्यादौ दध्यक्षतान् गृहीत्वा उत्तरवृद्ध्या स्थापयेत् ।

ॐ भूः गणेश इहागच्छ पूजार्थं त्वामावाहयामि इह तिष्ठ, ॐ भूर्भुवःस्वः विष्णो इहा०, ॐ भू० सरस्वति इहा०, ॐ भू० लक्ष्मि इहा०, ॐ भू० स्वविद्ये इहा०, ॐ मनोजूतिः० इति प्रतिष्ठाप्य ध्यानादिनीराजनान्तं संपूज्य गुरुञ्च गन्धपुष्पादिभिरभ्यर्च्य पादोपसङ्ग्रहणं कुर्यात् । गुरुश्च ततो ब्रह्मचारिणं यथाविधि वेदानध्यापयेत् । तद्यथा- अग्नेरुत्तरतोब्रह्मचारिणमुदङ्मुखं प्राङ्मुखं वा प्रागग्रेषु कुशेषूपवेश्य स्मार्ताचमनं प्राणायामं ब्रह्माञ्जलिञ्च कारयित्वा प्रणवव्याहृतिपूर्वां गायत्रीं पाठयित्वा स्ववेदारम्भं कारयेत् ।

यजुर्वेदाध्ययनविनियोगः - तत्र **ॐ इषेत्वादि खम्ब्रह्मान्तस्य** माध्यन्दिनीयकस्य व्वाजसनेयकस्य यजुर्व्वेदाम्नायस्य विवस्वानृषिर्गायत्र्यादीनि सर्व्वाणि छन्दाꣳसि सर्व्वाणि यजूꣳषि लिङ्गोक्ता देवताः स्वाध्यायाध्ययने विनियोगः । **ॐ हरिः ॐ, ॐ भूर्भुवः स्वः तत्स०, ॐ इषेत्वोर्ज्जेत्त्वाव्वायवस्त्थदेवोवःसविताप्प्रार्पयतुश्श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमग्घ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्त्तेनऽईशतमाघशꣳसोद्ध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि ।।१।।** व्वसोपवित्त्रम् इति स्वल्पारम्भं कारयित्वा अध्यायादीन् प्रब्रूयात् । **ॐ कृष्णोसि०।।२।। ॐ समिधाग्ग्निम्०।।३।। ॐ एदम्०।।४।। ॐ अग्ग्नेस्त्तनूः० ।।५।। ॐ देवस्यत्त्वा० ।।६। ॐ व्वाचस्पतये० ।।७।। ॐ देवसवितः०।।९।। ॐ अपोदेवाः०।।१०।। ॐ युञ्जानःप्प्रथमम्०।।११।। ॐ दृशानोरुक्मः० ।।१२।। ॐ मयिगृह्णामि० ।।१३।। ॐ ध्रुवक्षितिर्द्ध्रुवयोनिः० ।।१४।। ॐ अग्ग्नेजातान्० ।।१५।। ॐ नमस्त्ते० ।।१६।। ॐ अश्म्मन्नूर्ज्जम्० ।।१७।। ॐ व्वाजश्श्च० ।।१८।। ॐ स्वाद्द्वीन्त्वा० ।।१९।। ॐ क्षत्रस्ययोनिः० ।।२०।। ॐ इमम्मे० ।।२१।। ॐ तेजोसि० ।।२२।। ॐ हिरण्यगब्र्भःसम्० ।।२३।। ॐ अश्श्वस्तूपरः०।।२४।। ॐ शादन्दद्भिः०।।२५।। ॐ अग्ग्निश्श्च०।।२६।। ॐ समास्त्त्वा० ।।२७।। ॐ होतायक्षत्० ।।२८।। ॐ समिद्धोऽअञ्जन्० ।।२९।। ॐ देवसवितः० ।।३०।। ॐ सहस्रशीर्षापुरुषः० ।।३१।। ॐ तदेव० ।।३२।। ॐ अस्याजरासः०।।३३।। ॐ यज्जाग्ग्रतः०।।३४।। ॐ अपेतः०**(जलस्पर्शः विष्णोर्वास्मरणम्) **।।३५।। ॐ ऋचंव्वाचम्० ।।३६।। ॐ देवस्यत्त्वा० ।।३७।। ॐ देवस्यत्त्वा० ।।३८।। ॐ स्वाहाप्प्राणेब्भ्य० ।।३९।। ॐ ईशाव्वास्यम्० ।।४०।। ॐ हिरण्मयेनपात्रेणसत्त्यस्यापिहितम्मुखम् । योसावादित्त्येपुरुषःसोसावहम् ।। ॐ खम्ब्रह्म ।।४०।। ॐ व्व्रतमुपैष्ष्यन्नन्तरेणाहवनीयञ्चगार्हपत्त्यञ्चप्प्राङ्क्तिष्ठन्नपऽउपस्पृशतितद्यदपऽउपस्पृशत्त्यिमेद्ध्यस्वैपुरुषोयदनृतंव्वदतितेनपूतिरन्त्तरतोमेद्ध्यावाऽआपोमेद्ध्योभूत्त्वाव्व्रतमुपाया-**

(ततः काश्मीरगमनम्) तत इष्टांशके गुरुर्वेदारम्भं कारयेत् ।[2]

वेदारम्भः - तत्र मन्त्रः- **ॐ भूर्ब्भुवः स्वः (÷ ॐ तत्त्सवितुर्व्वरेण्यम्भर्गो-देवस्यधीमहि । धियोयोनःप्प्रचोदयात् ॐ** इति प्रणवान्तं पाठयित्वा ततो नमस्कारञ्च कारयित्वा - **ॐ समिधाग्ग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम्। आस्म्मिन्न्हव्व्याजुहोतन । सुसमिद्धायशोचिषे ।।** इति कण्डिकान्तं फक्किकान्तं वा पाठयेत् । ततः सप्रणवं स्वस्ति वाचयित्वा उत्थाय फलपुष्पसमन्वित

नीतिपवित्रंवाऽआपःपवित्रपूतोव्व्रतमुपायानीतितस्म्माद्द्वाऽअपऽउपस्पृशति ।।१।। ॐ सोग्ग्निमेवाभीक्षमाणोव्व्रतमुपैति । ॐ प्राश्न्नीपुत्रादासुरिवासिनःप्राश्न्नीपुत्रऽआसुरायणादासुररायणऽआसुरेरासुरिर्य्याज्ञवल्क्याद्याज्ञवल्क्यऽउद्दालकादुद्दालकोरुणादरुणऽउपवेशेरुपवेशिःकुश्श्रेःकुश्श्रिर्व्वाजश्श्रवसोव्वाजश्श्रवाजिह्वावतोबाद्ध्योगाज्जिह्वावान्बाद्ध्योगोसिताद्द्वार्षगणादसितोव्वार्षगणोहरितात्कश्यपाद्धरितःकश्यपःशिल्पात्कश्यपाच्छिल्पःकश्यपःकश्यपान्नैध्रुवेकश्यपोनैध्रुविर्व्वाचोव्वागम्भिण्याऽअम्भिण्यादित्त्यादादित्त्यानीमानिशुक्लानियजूꣳषिव्वाजसनेयेनयाज्ञवल्क्येनाख्यायन्ते ।।२।। इत्येवं यजुर्वेदारम्भं परिसमापयेत् ।

ऋग्वेदाध्ययनविनियोगः - अथ ऋग्वेदादिमन्त्रस्यमधुच्छन्दाऋषिर्गायत्रीच्छन्दोऽग्निर्देवता स्वाध्यायाध्ययने विनियोगः । **ॐ अग्ग्निमीळेपुरोहितंयज्ञस्यदेवमृत्त्विजम् । होतारंरत्नधातमम् ।।** इति ऋग्वेदारम्भः ।

सामवेदाध्ययनविनियोगः - अथ सामवेदादिमन्त्रस्य गौतमऋषिर्गायत्रीछन्दोऽग्निर्देवता स्वाध्यायाध्ययने विनियोगः । **ॐ अग्ग्नआयाहिवीतयेगृणानोहव्यदातये । निहोतासत्सिबर्हिषि।।** इति सामवेदारम्भः ।

अथर्ववेदाध्ययनविनियोगः - **शन्नोदेवी**रिति अथर्ववेदादिमन्त्रस्य दध्यङ्ङाथर्वणऋषिर्गायत्रीछन्दोऽग्निर्देवता स्वाध्यायाध्ययने विनियोगः । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंयोरभिस्त्रवन्तुनः ।।** इत्यथर्ववेदारम्भः ।

अनिराकरणमन्त्रपाठः - पुनः पूर्ववत् प्रणव्याहृतिपूर्विकां गायत्रीं पठित्वा **ॐ विरामोऽस्तु** इति वदन्तं गुरुं शिष्यः पादोपसङ्ग्रहणपूर्वकं प्रणम्य विरमेत् । ततः अधीत्यानिराकरणमन्त्रान्पठेत्। **ॐ अथातोधीत्याधीत्यानिराकरणम् । प्रतीकम्मेव्विचक्षणंजिह्वामेमधुयद्वचःकर्णाभ्यांभूरिशुश्रुवेमात्वꣳहार्षीच्छ्रुतम्मयिब्रह्मणःप्रवचनमसि । ब्रह्मणःप्रतिष्ठानमसि । ब्रह्मकोशोसि । सनिरसिशान्तिरस्यनिराकरणमसि । ब्रह्मकोशम्मेव्विश । व्वाचात्वापिदधामिव्वाचात्वापिदधामि । स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्म्मयिभवतु।**

ब्रह्मचारिदक्षिणकरस्पृष्टस्रुवस्थघृतेन पूर्णाहुतिं जुहुयात् ।

पूर्णाहुतिः- तत्र विनियोगः- **ॐ मूर्द्धानमि**ति मन्त्रस्य भरद्वाजऋषिरग्निर्देवता त्रिष्टुप्छन्दः पूर्णाहुतिहोमे विनियोगः । **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानरमृतऽआजातमग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।** स्वाहा इति पूर्णाहुतिः ।

त्र्यायुषकरणम् - तत उपविश्य स्रुवेण भस्मानीय दक्षिणकरानामिकागृहीतभस्मना **त्र्यायुषमि**ति मन्त्रस्य नारायणऋषिरग्निर्देवता उष्णिक्छन्दो भस्मना तिलककरणे विनियोगः। **ॐ त्र्यायुषंजमदग्नेः** इति ललाटे । **ॐ कश्यपश्यत्र्यायुषम्** इति ग्रीवायाम् । **ॐ यद्देवेषुत्र्यायुषम्** इति दक्षिणबाहुमूले। **ॐ तन्नोऽअस्तुत्र्यायुषम्** इति हृदि । इति त्र्यायुषं कुर्यात् । अनेनैव क्रमेण ब्रह्मचारिललाटादावपि तत्रतन्नो इत्यस्य स्थाने तत्ते इति विशेषः ।

— इति वेदारम्भः —

◆

आप्याययन्तुमेङ्गानिवाक्प्राणश्चक्षुः श्रोत्रंयशोबलम् । यन्मेश्रुतमधीतंतन्मेमनसितिष्ठतुतिष्ठतु ॐ ।। इति पारस्करगृह्ये ३।१५ । अथाचारादस्मिन्नवसरे बटुं पाठार्थं वाराणसीं प्रेषयन्ति।

अध्ययननियमाः- आचार्येणाहूतोऽधीयीत । आचार्येणाहूत उत्थाय प्रतिवचनं दद्यात् । शयानं चेदाह्वयति तदासीनः, आसीनं चेत्तिष्ठन्, तिष्ठन्तं चेदभिमुखं गच्छन्, अभिमुखमागच्छन्तं चेदभिधावन्, गुरुमेवं वर्तमानोऽध्येता ब्रह्मभूयाय कल्पत इति ।

दक्षिणासङ्कल्पः- अद्येहामुकोऽहममुकशर्मणो बटोर्वेदारम्भकर्मणः साङ्गतासिद्ध्यर्थं साद्गुण्यार्थं च इदं सुवर्णमग्निदैवतं वररूपेणाचार्याय कर्मोपदेशकाय तुभ्यमहं संप्रददे इति दद्यात् । ततः पित्रादिर्दश यथाशक्ति वा ब्राह्मणान् भोजयिष्ये इति संकल्पं कृत्वा हरिनामाग्निं संपूज्य विसृजेत् । इति वेदारम्भः । इति संस्कारदीपके ।

१६. समावर्त्तनम्

प्रयोगः[१] - तत्र शुभे दिने प्रह्वीभूय आचार्य ! **स्नास्यामी**ति कुमार आचार्यं भाषते, ततः **स्नाही**त्याचार्यः। ततो ब्रह्मचारिणि आचार्यसन्निहितप्रदेशे उपविष्टे कृतस्नानादिराचार्यः कुशैर्हस्तमात्रपरिमितभूमिं परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमानीय प्रत्यङ्मुखं तदुपरि निदध्यात्।

---

[१] **अथ समावर्त्तनम्**- तत्र विधिस्तु वेदारम्भवत्कार्यः एतदेव व्रतादेशनविसर्गेषु इति पारस्करवचनात्।

अथ स्नास्यन् वररूपेण गवादिकमाचार्याय दद्यात्। गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया इति याज्ञवल्क्यवचनात्। तत्र संकल्पः- अद्येहामुकोऽहं स्नानाधिकारसिद्धये इमां गां गोप्रत्याम्नायीभूतं सुवर्णं रजतं वा आचार्याय तुभ्यं संप्रददे इति संकल्प्य गुरवे वरं दत्त्वा भो गुरो अहं स्नास्यामि इति संप्रार्थ्य स्नाहि इति लब्धानुज्ञो वक्ष्यमाणविधिना स्नायात्। अत्र स्नानादौ ब्रह्मचार्येवाधिकारी **स्नायादि**ति कर्त्रर्थकलकारश्रवणात्।

अथाचार्यः समावर्त्तनवेदी-समीपमागत्य प्राङ्मुख उपविश्य स्वदक्षिणत उदङ्मुखं ब्रह्मचारिणमुपवेश्य गणेशादीन्प्रणम्य वेद्यां पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य प्रतिज्ञासंकल्पं कुर्यात्। अद्येहामुकोऽहममुकराशेरस्य बटोः स्नातकत्वसिद्धये समावर्त्तनकर्म करिष्ये इति संकल्प्य ब्रह्मोपवेशनादिपूर्णपात्रासादनान्ते विशेषोपकल्पनीयानि।

इन्धनं पञ्चधा विभक्तम्, पर्युक्षणार्थमुदकम्, समिधस्तिस्रः पुनरिन्धनं पञ्चधा विभक्तम्, पर्युक्षणार्थमुदकञ्च, हरिताः कुशाः, स्नानाधिकरणाूताः सर्वौषधिमिश्रिततीर्थवारिपूर्णा अष्टौ कुम्भाः, दक्षिणोपक्रमा उदक्संस्थाः सहस्रधाराः, सूर्योपस्थानार्थं वस्त्रम्, भोजनार्थं दधि, क्षौरार्थं नापितः, स्नानार्थं शीतं वारि, औदुम्बरं दन्तधावनम्, उत्सादनीयद्रव्यम्, स्नानार्थमुष्णमुदकम्, चन्दनम्, अहते वाससी, यज्ञोपवीतम्, पुष्पमाला, शिरोवेष्टनम्, कञ्चुकादीनि परिधानवस्त्राणि, कर्णवेष्टकौ, अञ्जनम्, दर्पणः, छत्रम्, उपानहौ, वैणवो दण्डश्चेति। ततः पवित्रच्छेदनादिपर्युक्षणान्तं कर्म कृत्वा द्रव्यदेवताभिध्यानं कुर्यात्।

अद्येह अस्य बटोः समावर्त्तनकर्मणाहं यक्ष्ये तत्र प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, अन्तरिक्षम्, वायुम्, ब्रह्माणम्, छन्दांꣳसि, दिशः, चन्द्रमसम्, ब्रह्माणम्, छन्दांꣳसि,

ब्राह्मणवरणम्- ततः पुष्पचन्दनताम्बूलवासांस्यादाय- ॐ अद्यकर्तव्य-समावर्त्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन **त्वामहं वृणे,** इति ब्रह्माणं वृणुयात् । **ॐ वृतोऽस्मी**ति प्रतिवचनम् । **ॐ यथाविहितं कर्म कुरु,** इत्यभिधाय **ॐ करवाणी**ति तेनोक्ते, अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निप्रदक्षिणं कारयित्वा **अस्मिन् कर्मणि त्वं मे ब्रह्मा भवे**त्यभिधाय **ॐ भवानी**ति तेनोक्ते, ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्रेरुत्तरतः कुशोपरि निदध्यात् ।

परिस्तरणम् - बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं (उदगग्रैः), ब्रह्मणोऽग्निपर्यन्तं (प्रागग्रैः), नैर्ऋत्याद्वायव्यान्तं (उदगग्रैः), अग्नितः प्रणीतापर्यन्तं (प्रागग्रैः) कुशैः, ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्रः, स्रुवः, आज्यम्, पूर्णपात्रम्, पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् ।

होमपृष्ठभूमिसम्पादनम्- ततः पवित्रच्छेदनकुशैः पवित्रे च्छित्वा सपवित्रकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे धृत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां

प्रजापतिम्, देवान्, ऋषीन्, श्रद्धाम्, मेधाम्, सदसस्पतिम्, अनुमतिम्, अग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ, अग्नीवरुणौ अग्निम्, वरुणङ्सवितारम्, विष्णुम्, विश्वान् (देवान्), मरुतः, स्वर्कान्, वरुणम्, प्रजापतिम्, स्विष्टकृतञ्चाज्येनाहं यक्ष्ये ।

पित्रादेरन्यस्य कृतस्याचार्यस्य होमकर्तृत्वे पित्रादिः, **इदमाज्यं तत्तद्देवतायै मया परित्यक्तम् यथा दैवतमस्तु न मम** इति त्यागं पूर्वमेव कुर्यात् । ततो राजपुत्र (वैश्वानरनामाग्निरिति केचित्) नामानमग्निं **ॐ मनोजूतिः० ॐ भू० राजपुत्रनामाग्ने सुप्रतिष्ठो वरदो भव** इति प्रतिष्ठाप्य **ॐ तदेवाग्नि**रित्यादिभिर्मन्त्रैर्नाममन्त्रेण च ध्यानावाहनपाद्यादिनीराजनान्तं संपूज्य रेखापूजनं जिह्वापूजनञ्च कृत्वा दक्षिणं जान्वाच्य जुहुयात् इति संस्कारदीपके ।)

त्रिरुद्दिङ्गनम् । ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तून्यभिषिच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ।

तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणम् । ततः कुशं प्रज्वलय्याज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रमयित्वा वह्नौ तत्प्रक्षेपः । ततस्त्रिः स्रुवप्रतपनम्, संमार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् । तत आज्यमग्निप्रदक्षिणं कारयित्वाऽवतार्य्य स्वाग्रतो निदध्यात् । तत आज्ये प्रोक्षणीवदुत्पवनम् । अवेक्ष्य सत्यपद्रव्ये तन्निरसनम् । ततः प्रोक्षण्युत्पवनम् । ततः उत्थायोपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपेत् ।

तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ आज्याहुतीर्जुहुयात् । तत्र प्रथमाहुतिचतुष्टये स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

आघाराज्यहोमः - तत्र विनियोगः - **ॐ प्रजापतय** इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः समावर्त्तनहोमे विनियोगः । **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा ।

ॐ इन्द्रायेति प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्दः समावर्त्तनहोमे विनियोगः । **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** इत्याघारौ ।

ॐ अग्नय इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दः समावर्त्तनहोमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये** ।

ॐ सोमायेति प्रजापतिर्ऋषिः सोमो देवता त्रिष्टुप्छन्दः समावर्त्तनहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** । इत्याज्यभागौ ।

समावर्त्तनहोमः - (ततः प्रकृतोऽनन्वारब्धकर्तृको होमः) **ॐ अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय । ॐ वायवे स्वाहा, इदं वायवे । ॐ ब्रह्मणे**

स्वाहा, इदं ब्रह्मणे । ॐछन्दोभ्यः स्वाहा, इदं छन्दोभ्यः । ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा । **ॐ देवेभ्यः स्वाहा, इदं देवेभ्यः। ॐ ऋषिभ्यः स्वाहा, इदमृषिभ्यः । ॐ श्रद्धायै स्वाहा, इदꣳश्रद्धायै। ॐ मेधायै स्वाहा, इदं मेधायै । ॐ सदसस्पतये स्वाहा, इदꣳसदसस्पतये । ॐ अनुमतये स्वाहा, इदमनुमतये ।**

अथ प्रत्येकम् **ॐ वायवे स्वाहा, इदं वायवे । ॐ अन्तरिक्षाय स्वाहा, इदꣳअन्तरिक्षाय इति यजुर्वेदे । ॐ पृथिव्यै स्वाहा, इदं पृथिव्यै। ॐ अग्नये स्वाहा, इदमग्नये इति ऋग्वेदे । ॐ दिवे स्वाहा, इदं दिवे। ॐ सूर्य्याय स्वाहा, इदꣳसूर्य्याय इति सामवेदे । ॐ दिग्भ्यः स्वाहा, इदं दिग्भ्यः । ॐ चन्द्रमसे स्वाहा, इदं चन्द्रमसे इत्यथर्ववेदे । ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः ।** इति सर्वत्र स्वस्ववेदाहुतिः प्रथमम् ।

महाव्याहृतिहोमः - तत्र विनियोगः - **ॐ भूर्भुवः स्वरि**ति महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि समावर्त्तनहोमे विनियोगः। **ॐ भूः स्वाहा, इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे। ॐ स्वः स्वाहा, इदꣳसूर्य्याय** । एता महाव्याहृतयः ।

पञ्चवारुणीहोमः - ॐ त्वन्नोऽअग्ग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः समावर्त्तनहोमे विनियोगः । **ॐ त्वन्नोऽअग्ग्नेवरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्वाद्द्वेषाꣳसिप्प्रमुमुग्ध्यस्म्मत् ।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ सत्वन्न इति वामदेवऋषिरग्ग्नीवरुणौ देवते त्रिष्टुप्छन्दः समावर्त्तनहोमे विनियोगः । **ॐ सत्त्वन्नोऽअग्ग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि।।** स्वाहा इदमग्ग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्ग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः समावर्त्तनहोमे

विनियोग: । **ॐ अयाश्चाग्ग्नेस्यनभिशस्तिपाश्चसत्त्यमित्त्वमयाऽअसि। अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳस्वाहा** ।। इदमग्ग्नये ।

ॐ येतेशतमिति व्वामदेवऋषिर्व्वरुण: सविता व्विष्णुर्व्विश्वे (देवा:) मरुत: स्वर्क्का देवतास्त्रिष्टुप्छन्द: समावर्त्तनहोमे विनियोग: । **ॐ येतेशतंव्वरुणयेसहस्त्रंय्यज्ञिया:पाशाव्विततामहान्त:। तेभिर्न्नोऽअद्यसवितोतव्विष्णुर्व्विश्वेमुञ्चन्तुमरुत:स्वर्क्का:स्वाहा** ।। इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो (देवेभ्यो) मरुद्भ्य: स्वर्क्केभ्य: ।

ॐ उदुत्तममिति शुन:शेफऋषिर्वरुणो देवता त्रिष्टुप्छन्द: समावर्त्तनहोमे विनियोग: । **ॐ उद्दुत्तमंव्वरुणपाशमस्मदवाधमंव्विमद्ध्यमꣳश्रथाय । अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम** ।। स्वाहा इदं व्वरुणाय। एता प्रायश्चित्तसंज्ञका: ।

प्राजापत्यहोम: - ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा । इदं प्राजापत्यम् ।

स्विष्टकृद्धोम: - ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते। इति स्विष्टकृत् । तत: संस्रवप्राशनम् (मुखमार्जनं पवित्रप्रतिपत्ति:) ।

दक्षिणारूपपूर्णपात्रदानम् - तत आचम्य ॐ अद्यकृतैतत्समावर्त्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे पूर्णपात्ररूपां दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् । **ॐ स्वस्ती**ति प्रतिवचनम् ।

प्रणीताविमोक: (ब्रह्मग्रन्थिविमोक:) - तत्र विनियोग: - **ॐ सुमित्रियादुर्म्मित्रिया** इति द्वयो: प्रजापतिर्ऋषिरापो देवता यजुषी प्रणीताविमोके विनियोग: । **ॐ सुमित्रियानऽआपऽओषधय:सन्तु** ।। इति मन्त्रेण पवित्राभ्यां प्रणीताजलेन शिर: संमृज्य **ॐ दुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयन्द्द्विष्म:** ।। इत्यैशान्यां प्रणीतापात्रं सावशिष्टजलं न्युब्जीकुर्यात् ।

बर्हिर्होमः- ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव जुहुयात्। तत्र विनियोगः - **ॐ देवागातुविद** इति मन्त्रस्य मनसस्पतिर्ऋषिर्व्विराट्छन्दो व्वातो देवता बर्हिर्होमे विनियोगः । **ॐ देवागातुविदोगातुंव्वित्त्वागातुमित। मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः** ।। स्वाहा, इति बर्हिर्होमः ।

ब्रह्मचारिणानुष्ठेयः पञ्चाहुतिहोमः- अथ माणवकः पूर्ववत् गुरुमभिवाद्य आचार्यदक्षिणदिशि अग्निपश्चिमोपविष्टो घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात् । तत्र विनियोगः - **ॐ अग्ग्नेसुश्श्रव** इत्यादीनां पञ्चानां ब्रह्मा ऋषिरग्निर्देवता यजूꣳषि समिन्धने विनियोगः । **ॐ अग्ग्नेसुश्श्रवः-सुश्श्रवसम्माकुरु** ।।१।। (इत्येकं काष्ठं गोमयपिण्डं वाग्नौ प्रक्षिपेत् ।) **ॐ यथात्त्वमग्ग्नेसुश्श्रवःसुश्श्रवाऽअसि** ।।२।। **ॐ एवम्माꣳसुश्श्रवःसौश्श्रवसङ्कुरु** ।।३।। **ॐ यथात्त्वमग्ग्नेदेवानांय्यज्ञस्यनिधिपाऽअसि** ।।४।। **ॐ एवमहम्मनुष्ष्याणांव्वेदस्यनिधिपोभूयासम्** ।।५।। इति मन्त्रैः पञ्चाहुतीर्जुहुयात् ।

पलाशसमिद्धोमः- ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्योत्थाय घृताक्तां स्वप्रादेशमितां पलाशसमिधमादाय विनियोगः - **ॐ अग्ग्नयेसमिधमिति** मन्त्रस्य प्रजापतिर्ऋषिः समिद्देवताऽऽकृतिश्छन्दः समिदाधाने विनियोगः । **ॐ अग्ग्नयेसमिधमाहार्षम्बृहतेजातवेदसे । यथात्त्वमग्ग्नेसमिधासमिद्ध्यसऽएवमहमायुषामेधयाव्वर्च्चसाप्प्रजयापशुभिर्ब्ब्रह्मवर्च्चसेनसमिन्धे । जीवपुत्रोममाचार्य्योमेधाव्व्यहमसान्न्यनिराकरिष्णुर्यशस्वीतेजस्वीब्ब्रह्मवर्च्चस्यन्नादोभूयासꣳस्वाहा** ।। इति मन्त्रेण जुहुयात् । ततोऽनेनैव क्रमेण द्वितीयां तृतीयामपि समिधं जुहुयात् ।

पुनः पञ्चाहुतिहोमः - तत उपविश्य पूर्ववत् घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात् । तत्र विनियोगः - **ॐ अग्ग्नेसुश्श्रव** इत्यादीनां पञ्चानां ब्रह्मा ऋषिरग्निर्देवता यजूꣳषि समिन्धने विनियोगः । **ॐ अग्नेसुश्श्रवः-सुश्श्रवसम्माकुरु** ।।१।। **ॐ यथात्त्वमग्ग्नेसुश्श्रवःसुश्श्रवाऽअसि** ।।२।।

ॐ एवम्माꣳसुश्श्रवःसौश्श्रवसङ्कुरु ।।३।। ॐ यथात्त्वमग्ग्नेदेवानांय्यज्ञस्यनिधिपाऽअसि ।।४।। ॐ एवमहम्मनुष्ष्याणांव्वेदस्यनिधिपोभूयासम् ।।५।।

मुखादिस्पर्शः - ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्य तूष्णीं पाणी प्रतप्य मुखं प्रतिमन्त्रान्तेऽवमृशति । (ललाटादिचिबुकान्तं प्रोञ्छति ।) तत्र विनियोगः- **ॐ तनूपाऽअग्ग्ने** इत्यादीनां बृहद्देवा ऋषयोऽग्निर्द्देवता यजूꣳषि मुखविमर्शने विनियोगः । **ॐ तनूपाऽअग्ग्नेसितन्न्वम्मेपाहि ।।१।। ॐ आयुर्द्दाऽअग्ग्नेस्यायुर्म्मेदेहि ।।२।। ॐ व्वर्च्चोदाऽअग्ग्नेसिव्वर्च्चोमेदेहि ।।३।। ॐ अग्ग्नेयन्न्मेतन्न्वाऽऊनन्तन्न्मऽआपृण ।।४।। ॐ मेधाम्मेदेवःसविताआदधातु ।।५।। ॐ मेधाम्मेदेवीसरस्वतीआदधातु ।।६।। ॐ मेधामश्श्विनौदेवावाधत्ताम्पुष्करस्त्रजौ ।।७।।**

सर्वगात्रस्पर्शः - ततः सर्वगात्रादिषु दक्षिणपाणिना स्पर्शः[३] । तत्र विनियोगः- **ॐ अङ्गानिचम** इत्यादीनां प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता यजूꣳषि अङ्गाप्यायने विनियोगः । **ॐ अङ्गानिचमऽआप्प्यायताम्** ।। इति सर्वगात्रालम्भने[४] । **ॐ व्वाक्चमऽआप्प्यायताम्** ।। इति मुखालम्भने । **ॐ प्राणश्श्चमऽआप्प्यायताम् ।।** इति नासिकयोः । **ॐ चक्षुश्श्चमऽआप्प्यायताम्** ।। इति चक्षुषोः । **ॐ श्श्रोत्रञ्चमऽआप्प्यायताम्** ।। इति श्रोत्रयोः[५] । **ॐ यशोबलञ्चमऽआप्प्यायताम्** ।। इति मन्त्रपाठमात्रम्[६] ।

त्र्यायुषकरणम् - ततो दक्षिणकरानामिकागृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात् । तत्र यथासंख्येन मन्त्रचतुष्टयम् । तत्र विनियोगः- **ॐ त्र्यायुषमि**ति मन्त्रस्य नारायणऋषिरग्निर्द्देवता उष्णिक्छन्दो

---

३. सप्तभिर्मन्त्रैः प्रतिमन्त्रं ललाटादिचिबुकपर्यन्तं मुखं प्रोञ्छति ।

४. शिरस आपादमङ्गान्यालभ्य जपेत् ।

५. दक्षिणवामे श्रोत्रे मन्त्रावृत्या क्रमेण ।

६. परस्परव्यत्यासेन बाहू तत उदकस्पर्शः । इति संस्कारदीपके ।

भस्मना तिलककरणे विनियोगः । **ॐ त्र्यायुषञ्जमदग्ग्ने** इति ललाटे । **ॐ कश्यपस्यत्र्यायुषम्** इति ग्रीवायाम् । **ॐ यद्देवेषुत्र्यायुषम्** इति दक्षिणबाहुमूले । **ॐ तन्नोऽअस्तुत्र्यायुषम्** इति हृदि । (अनेनैव क्रमेण कुमारललाटादावपि तत्र तन्न इति स्थाने तत्ते इति विशेषः ।)

कुमारानुष्ठेयमभिवादनम्- ततो व्यस्तपाणिभ्यां पृथिवीं स्पृशन्नभिवादयेत्। तत्र प्रकारः - अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं **भो वैश्वानर त्वामभिवादये**। ततोऽनेनैव क्रमेण वरुणमभिवाद्योपसङ्ग्रहणपूर्वमाचार्यमभिवादयेत्। उपसङ्ग्रहणप्रकारस्तु पूर्वमेव प्रदर्शितः ।

कुमारायाशीर्वादप्रदानम् - तत आचार्यः - **आयुष्मान् भव सौम्यामुकशर्म३न्** इति नामान्तवाक्यस्य टेरचं प्लुतं कृत्वाशिषं दद्यात् ।

कलशजलेनाभिषेकः - ततोऽग्नेरुत्तरतः प्रागग्रान् हरितान् कुशानास्तीर्य तदुपरि दक्षिणोत्तरक्रमेणासादितवारिपूर्णकलाशाष्टतये कलशानां पुरतः प्रागग्रेषु हरितेषु कुशेषु स्नानकर्ता (उदङ्मुखः) स्थित्वा एकस्माद् आम्रपल्लवेनोदकं गृह्णाति । तत्र विनियोगः - **ॐ येप्स्वन्तरि**ति प्रजापतिर्ऋषिरापो देवता यजुरुदकग्रहणे विनियोगः । **ॐ येप्स्वन्तरग्ग्नयःप्प्रविष्टागोह्यऽउपगोह्योमयूखोमनोहाऽस्खलोव्विरुजस्तनूदुषिरिन्द्रियहा । तान्विजहामियोरोचनस्त्तमिहगृह्णामि ।।** इति मन्त्रेण ।

तत आम्रपल्लवस्थजलेनात्मानमभिषिञ्चति । तत्र विनियोगः- **ॐ तेनमामि**ति प्रजापतिर्ऋषिरापो देवता यजुरभिषेचने विनियोगः। **ॐ तेनमामभिषिञ्चामिश्रियैयशसेब्रह्मणेब्रह्मवर्च्चसाय ।।** इति मन्त्रेण । ततः पूर्ववद् द्वितीयकलशस्थमुदकमादाय- **ॐ येप्स्वन्तरि**त्यादिमन्त्रेण गृहीत्वा आम्रपल्लवस्थतज्जलेनाभिषिञ्चति । तत्र विंनियोगः - **ॐ येनश्रियमि**ति प्रजापतिर्ऋषिरापो देवता यजुरभिषेचने विनियोगः । **ॐ येनाश्रियमकृणुतांय्येनावमृशताꣳसुराम् । येनाक्ष्यावभ्भ्यषिञ्चतांय्यद्वांतदश्विनायशः ।।** इति मन्त्रेण ।

ततस्तेनैव क्रमेण **ॐ येप्स्वन्तरि**ति मन्त्रेण तृतीय कलशस्थं जलमादाय आम्रपल्लवस्थतज्जलेनाभिषिञ्चति। तत्र विनियोग:- **ॐ आपोहिष्ठे**ति तिसृणां सिन्धुद्वीपऋषिरापो देवता गायत्रीछन्दोऽभिषेचने विनियोग:। **ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ।।** इति मन्त्रेणाभिषिच्य तेनैव क्रमेण **ॐ येप्स्वन्तरि**ति मन्त्रेण चतुर्थकलशस्थं जलमादाय- **ॐ योव:शिवतमोरसस्तस्यभाजतेहन: । उशतीरिवमातर:।।** इति मन्त्रेणाभिषिच्य पञ्चमकलशस्थं जलं तेनैव मन्त्रेण तथैवादाय - **ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचन: ।।** इति मन्त्रेणाभिषिञ्चेत् । पुन: पूर्ववत् **ॐ येप्स्वन्तरि**ति मन्त्रेण षष्ठसप्तमाष्टमकुम्भेभ्य: प्रत्येकमुदकं गृहीत्वा तूष्णीं वारत्रयमभिषिञ्चेत् ।

मेखलमोचनम्- तत: **ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय । अथावयमादित्त्यव्रतेतवानागसोऽअदितयेस्याम ।।** इति मन्त्रेण शिरोमार्गेण मेखलामुन्मुच्य भूमौ निधाय दण्डाजिने च तूष्णीम् (उदगग्रे) भूमौ निधाय कलशाष्टतयस्थाभिषेकावशिष्टशेषजलेन (शिरसि सहस्त्रधारां धृत्वा) स्नात्वा वासोऽन्यत् परिधाय (द्विराचम्य) सूर्यमुपतिष्ठते ।

सूर्योपस्थानम्- तत्रं विनियोग:- **ॐ उद्द्यन्भ्राजभृष्णुरि**ति मन्त्रस्य प्रजापतिर्ऋषिरादित्यो देवता शक्वरीछन्द आदित्योपस्थाने विनियोग: । **ॐ उद्द्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्त्थात्प्रातर्य्यावभिरस्त्थाद्दशसनिरसिदशसनिंमाकुर्वांविदन्मागमयोद्द्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्त्थाद्दिवायावभिरस्त्थाच्छतसनिरसिशतसनिंमाकुर्वांविदन्मागमयोद्द्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्त्थात्सायंय्यावभिरस्त्थात्सहस्त्रसनिरसिसहस्त्रसनिंमाकुर्वांविदन्मागमय ।।** इत्युपस्थानमन्त्रा: (एभिरुर्ध्वबाहु:सूर्यमुपतिष्ठेत्) ।

दन्तधावनम्- ततो दधि तिलान् वा (दक्षिणहस्तमध्यगतसोमतीर्थेन) प्राश्याचम्य जटालोमनखानां छेदनं कारयित्वा (शीतलोदकेन) स्नात्वाऽऽचम्य प्रादेशमितौदुम्बरकाष्ठेन दन्तधावनं कुर्यात् । तत्र विनियोग: - **ॐ अन्नाद्यायेति**

मन्त्रस्याथर्वणऋषिः सोमो देवताऽनुष्टुप्छन्दो दन्तधावने विनियोगः । **ॐ अन्नाद्यायाव्यूहध्वꣳसोमोराजायमागमत् । समेमुखंप्रमार्क्ष्यतेयशसाचभगेनच ।।** इति मन्त्रेण ।

मुखनासिकालम्भनम्- ततो दन्तकाष्ठं परित्यज्याचम्य सुगन्धिद्रव्येणोद्वर्तनं स्नानं द्विराचमनं चन्दनाद्यनुलेपनं गृहीत्वा मुखनासिकालम्भनं कुर्यात् । तत्र विनियोगः - **ॐ प्राणापानावि**ति मन्त्रस्य प्रजापतिर्ऋषिः प्राणापानौ देवते यजुश्चन्दनोपग्रहणे विनियोगः। **ॐ प्राणापानौमेतर्प्पय** (इति नासिकयोः)। **ॐ चक्षुर्म्मेतर्प्पय** (इति चक्षुषोः) । **ॐ श्रोत्रंमेतर्प्पय** (इति श्रोत्रयोः) । इति मन्त्रेणनुलिम्पति ।

अवनेजननिषेकः -ततः पाणी प्रक्षाल्य तदवनेजनं कृतापसव्यो दक्षिणभिमुखः पातितवामजानुः पितृतीर्थेन दक्षिणस्यां दिशि निषिञ्चेत् । तत्र विनियोगः - **ॐ पितरःशुन्धध्वमि**ति मन्त्रस्य प्रजापत्यश्विसरस्वत्य ऋषयः पितरो देवता यजुःपाण्यवनेजननिषेके विनियोगः । **ॐ पितरः-शुन्धध्वम्** ।। इति मन्त्रेण ।

चन्दनलेपनम्- ततः सव्येनाचम्य चन्दनेनात्मानमनुलिम्पेत् । तत्र विनियोगः- **ॐ सुचक्षाऽअहमि**ति मन्त्रस्य प्रजापतिर्ऋषिः सविता देवता यजुर्जपे विनियोगः । **ॐ सुचक्षाऽअहमक्षीब्भ्याम्भूयासꣳसुवर्च्चामुखेन । सुश्श्रुत्कर्णाब्भ्याम्भूयासम् ।।**

वस्त्रधारणम्- ततोऽहतं वासः परिधत्ते । तत्र विनियोगः - **ॐ परिधास्यै** इति मन्त्रस्यालम्बायनऋषिः[६] वासो देवता पङ्क्तिश्छन्दो वस्त्रपरिधाने विनियोगः। **ॐ परिधास्यैयशोधास्यैदीर्ग्घायुत्त्वायजरदष्टिर स्मि । शतञ्चजीवामिशरदःपुरुचीरायस्पोषमभिसंव्ययिष्ये ।।** इति ।

उत्तरीयधारणम्- ततो द्विराचम्य द्वितीययज्ञोपवीतं पूर्वोक्तमन्त्रेण धृत्वा

---

[६] आथर्वणऋषिरिति संस्कारदीपके ।

आचम्य उत्तरीयधारणं कुर्यात् । तत्र विनियोगः- **ॐ यशसामे**ति मन्त्रस्याथर्वणऋषिर्लिङ्गोक्ता देवता पङ्क्तिश्छन्द उत्तरीयवस्त्रधारणे विनियोगः । **ॐ यशसामाद्द्यावापृथिवीयशसेन्द्राबृहस्प्पती । यशोभगश्श्चमाविन्दद्द्यशोमाप्प्रतिपद्द्यताम् ।।** इति मन्त्रेण । (एकमेववासश्चेत्तदापूर्वोत्तरवर्गेणाच्छादयेत्ततो द्विराचमेत् ।) ।

पुष्पमालाग्रहणम्- तत्र विनियोगः- **ॐ याऽआहरज्जमदग्निरि**ति मन्त्रस्य भरद्वाजऋषिः सुमनसो देवता अनुष्टुप्छन्दः पुष्पमालाग्रहणे विनियोगः । **ॐ याऽआहरज्जमदग्निःश्रद्धायैमेधायैकामायेन्द्रियाय । ताऽअहंप्रतिगृह्णामियशसाचभगेनच ।।** इति मन्त्रेण मालां प्रतिगृह्णीयात् ।

शिरसिपुष्पमालाधारणम्- तत्र विनियोगः- **ॐ यद्द्यशोप्सरसामि**ति मन्त्रस्य भरद्वाजऋषिः सुमनसो देवता अनुष्टुप्छन्दः पुष्पमालाबन्धने विनियोगः । **ॐ यद्द्यशोप्सरसामिन्द्रश्श्चकारव्विपुलंपृथु । तेनसंग्रथिताःसुमनसऽआबध्नामियशोमयि ।।**

उष्णीषेण शिरोवेष्टनम्- तत्र विनियोगः - **ॐ युवासुवासा** इति मन्त्रस्य विश्वाभित्रऋषि(उष्णीषं)शिरो देवता त्रिष्टुप्छन्द उष्णीषेण शिरोवेष्टने विनियोगः। **ॐ युवासुवासाःपरिवीतऽआगात्सऽउश्श्रेयान्भवतिजायमानः । तन्धीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः ।।** इति मन्त्रेण । (ततोऽन्यान्यपि समाचारात् कञ्चुकादीनि वासांसि परिधाय) कुण्डले परिदधाति।

कुण्डलधारणम् - तत्र विनियोगः - **ॐ अलङ्करणमि**ति मन्त्रस्य भरद्वाजऋषिः[७] अलङ्करणं देवता उष्णिक्छन्दः[८] अलङ्करणे विनियोगः । **ॐ अलङ्करणमसिभूयोऽलङ्करणंभूयात् ।।** इति मन्त्रेण प्रथमं दक्षिणं कर्णमलङ्करोति । ततो वाममनेनैव ।

---

[७] प्रजापतिर्ऋषि ।

[८] यजुश्छन्दः ।

चक्षुषोरञ्जनम्- तत्र विनियोगः - **ॐ वृत्रस्ये**ति मन्त्रस्य प्रजापतिर्ऋषिरञ्जनं देवता गायत्रीछन्दश्चक्षुरञ्जने विनियोगः । **ॐ वृत्रस्यासिकनीनकश्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि ।।** इति प्रथमं दक्षिणस्य ततो वामस्य[१] ।

दर्पणेनात्मावलोकनम्- तत आदर्शे आत्मानमवलोकयते । तत्र विनियोगः- **ॐ रोचिष्णुरि**ति मन्त्रस्य प्रजापतिर्ऋषिरादर्शो देवता यजुरादर्शावेक्षणे विनियोगः । **ॐ रोचिष्णुरसि** ।। इत्यनेन मन्त्रेण ।

छत्रग्रहणम्- अथ छत्रं प्रतिगृह्णाति । तत्र विनियोगः - **ॐ बृहस्प्पतेरि**ति मन्त्रस्य गौतमऋषिश्छत्रं देवता आर्ची बृहती (त्रिवृद्गायत्री) छन्दश्छत्रग्रहणे विनियोगः । **ॐ बृहस्प्पतेश्छदिरसिपाप्मनोमामन्तर्द्धेहितेजसोयशसोमाऽन्तर्द्धेहि ।।**

उपानत्परिधानम्- तत्र विनियोगः - **ॐ प्रतिष्ठेस्त्थ** इति मन्त्रस्य विश्वामित्र ऋषिर्लिङ्गोक्ता देवता विराट् (यजुः) छन्द उपानहोः परिधाने विनियोगः । **ॐ प्रतिष्ठेस्थोव्विश्श्वतोमापातम् ।।** इत्यनेन मन्त्रेणोपानहौ पादयोर्युगपन्निदधाति ।

दण्डग्रहणम्- तत्र विनियोगः - **ॐ विश्वाब्भ्य** इति मन्त्रस्य याज्ञल्क्यऋषिर्दण्डो देवता यजुः(त्रिष्टुप्छन्दः) दण्डग्रहणे विनियोगः। **ॐ विश्श्वाब्भ्योमानाष्टाब्भ्यस्प्परिपाहिसर्व्वतः ।।** इत्यनेन वैणवं दण्डमादत्ते । दन्तप्रक्षालनादीनि नित्यान्यपि मन्त्रवन्ति । वासश्छत्रोपानहानित्वपूर्वाणिचेन्मन्त्रवन्ति।

ततो रथमारुह्य पूर्वोत्तरं गच्छेत् । अत्र मातृपूजनादिपूर्णपात्रान्तमाचार्यस्य कृत्यम्, अष्टकलशाभिषेकादि दण्डग्रहणान्तं ब्रह्मचारिणः कृत्यम् । ततो विवाहाय वचो वदेत् ।

आचार्यायगोदानम् - तत आचार्याय वरं दद्यात् । तत्र वाक्यम् - ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा अमुकगोत्रस्यामुकशर्मणो मम (स्नातकत्वसिद्धये)

---

[१] वामं पूर्वं दक्षिणं पश्चाद् वह्वृचश्रुत्यनुरोधादिति गदाधरः । इति संस्कारदीपके ।

समावर्त्तनकर्मणः साङ्गतासिद्ध्यर्थमिमां गां सवत्सां रुद्रदैवतां (गोनिष्क्रयीभूतं सुवर्णं रजतं वा) अमुकगोत्रायामुकशर्मणे ब्राह्मणाय गुरवे दक्षिणात्वेन (वररुपेण) तुभ्यमहं संप्रददे **ॐ तत्सत्,** इति दद्यात्। गोभूहिरण्यवस्त्रादिदक्षिणां यथाशक्ति दद्यात् । ततो भूयसीं दक्षिणाञ्च संकल्य यथावसरं ब्राह्मणेभ्यो दद्यात् ।

स्नातकनियमाः - स्नातकस्य नियमा आचार्यमुखाच्छ्रोतव्याःनृत्यगीतवादित्रत्यागः, न तत्र गमनम्। अमार्गेण न गच्छेत्, नग्नो न स्नायात्, न संधिशयनम्, न विषमभूमिलङ्घनम्। अश्लीलं नोपवदेत्, उदितास्तमये सूर्यं नोपपश्येत् । जलमध्ये सूर्यमाकाशस्थं न पश्येत्। देवे वर्षति न गच्छेत्, गमनावश्यकत्वेऽनाच्छादित एव, अनेन प्रकारेण विनियोगपुरसरं मन्त्रं पठित्वा गच्छेत्। तत्र विनियोगः - **ॐ अयमि**ति मन्त्रस्य प्रजापतिर्ऋषिर्वज्रो देवता जगतीछन्दो वृष्टिजपे विनियोगः। **ॐ अयम्मेवज्रःपाप्मानमपहनत् ।।** इमं मन्त्रं जपन् गच्छेत्। जले प्रतिबिम्बितं स्वमुखं न पश्येत् । भ्रूनेत्रादिस्थाने रोमरहितां श्मश्र्वादिना पुरुषाकृतिञ्च स्त्रियं नोपहसेत्, न च गच्छेत्। षण्ढञ्च नोपहसेत्, गर्भिणीं विजन्येति नकुलं सकुलमिति, कपालं भगालमिति, इन्द्रधनुर्मणिधनुरिति, पर्यायशब्दैर्ब्रूयान्न स्वशब्दैः। वत्सं पयो धापयन्तीं गां परस्मै (गौस्ते पयःपाययति वत्सम्) इति तत्स्वामिने न कथयेत् ।

सस्यवत्यां तृणादिनाऽनाच्छन्नायाञ्च भूमौ उत्सर्पन् ऊर्ध्वः सन् वा मूत्रं पुरीषञ्च न कुर्यात् । स्वयं प्रशीर्णेन काष्ठेन, लोष्ठादिना वा गुदं प्रमृज्य शौचं कुर्यात्। नील्यादिना रक्तं वस्त्रं न परिदधीत । दृढसंकल्पः स्यात्, घातादात्मानं यथाशक्ति परञ्च त्रायेत आत्मानं सर्वतो रक्षेत्, सर्वेषां हितकारी भवेत्। इति स्वगृह्योक्ता नियमाः । मन्वादिस्मृत्युक्तान् नियमाँश्च यथाशक्त्यनुतिष्ठेत् ।

समावर्त्तानन्तरं त्रिरात्रनियमाः - तिस्रोरात्रीर्व्रतं चरेत्, मृण्मयेन पात्रेण

जलं न पिबेत्, एतच्चालाबुतुम्ब्यादीनामुपलक्षणम्। स्त्रीशूद्रशवकाककुक्कुराणां दर्शनं भाषणञ्च त्रिरात्रं वर्जयेत्। मृताशौचान्नं, शूद्रस्य भोज्यान्नस्य नापितादेरपि अन्नं जाताशौचान्नं च नाद्यात्। मूत्रपुरीषे ष्ठीवनञ्चातपे न कुर्यात्। छत्रवस्त्रादिना सूर्यादात्मानं गोपायेत्। शौचादींस्तप्तजले न कुर्यात्। दीपादि प्रज्वलय्य रात्रौ भोजनं कुर्यान्नन्धकारे। अथवा सत्यवदनमेव नियमं कुर्यात्। अनृतं मिथ्याभाषणं न कुर्यात्। एवं शिक्षयित्वा एतान्नियमान्करिष्यामीति बटुमवधार्य एनं बटुं स्वपादयोः पातयित्वा आचार्यः पूर्णाहुतिं जुहुयात्।

पूर्णाहुतिहोमः[१] - तत उत्थाय माणवककरस्पृष्टेन फलवस्त्रयुतघृतपूर्णस्रुवेणाचार्यः पूर्णाहुतिहोमं कुर्यात्। तत्र विनियोगः - **ॐ मूर्द्धानमि**ति मन्त्रस्य भरद्वाजऋषिरग्निर्देवता त्रिष्टुप्छन्दः पूर्णाहुतिहोमे विनियोगः।

---

[१] अद्येहामुकोऽहमस्य पुत्रस्य समावर्तनकर्मणो न्यूनातिरिक्तदोषपरिहारार्थं सर्वाभ्युदयप्राप्तये च मृडनामाग्नौ पूर्णाहुतिहोमं करिष्ये इति संकल्प्य मृडाग्निं गन्धाद्युपचारैरभ्यर्च्य स्रुचि स्रुवेण द्वादशकृत्वः स्थाल्या आज्यं गृहीत्वा तत्र घृताक्तं रक्तवस्त्रखण्डावृतं सुपूजितं सुभूषितं निधायाधोमुखेन स्रुवेण पिधाय उत्थाय तिष्ठन् समिद्धेऽग्नौ यवप्रमितधारया **ॐ मूर्द्धानन्दिव** इति मन्त्रेण जुहुयात्। स्रुगभावे स्रुगुक्तविशेषणविशिष्टेन स्रुवेण उपविश्य जुहुयात्। तत आचार्यः - **ॐ एधोस्येधिषीमही**ति वस्त्रहोमं ग्रहादीनामुत्तरपूजाञ्च विधाय ग्रहादीन् **ॐ यज्ञयज्ञच्छे**ति मन्त्रेण विसर्जयेत्। ततः पुरोहितादयः - **ॐ देवस्यत्त्वा०, ॐ सुरास्त्वामि**त्यादिमन्त्रैः स्नातकादीनभिषिच्याशिषं दद्युः। यजमानश्च पुरोहितादीन् भोजयित्वा - **ॐ यस्यस्मृत्ये**ति अच्युतं नत्वा सुहृद्युतो भुञ्जीत इति।

स्नातकस्य पित्रादिः चौलादि समावर्तनान्तकर्मणां परिपूर्त्यर्थं गोदानं कुर्यात्। आचार्यं सम्पूज्य देयं संप्रोक्ष्य संकल्प्य कर्मोपदेशकायाचार्याय दद्यात्। ततः कल्याण्यादिजीवमातृपूजनं कूर्यात्।

देवोत्थापनम्- तच्च स्थापनदिनाच्चतुर्थे पञ्चमे सप्तमे वा कुर्यात्। तत्प्रकारो यथा- सति मण्डपे मण्डपाभ्यन्तरे तदभावे मातृकादिपूजास्थाने सपत्नीको यजमानः शुद्धासने उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्माहं ममामुकशर्मणः पुत्रस्य चूडोपनयनवेदारम्भसमावर्तनकर्माङ्गत्वेन स्थापितानां देवानां पूजनमुत्थापनं मण्डपोद्वासनं पुण्याहवाचनञ्च करिष्ये इति संकल्प्य आवाहितदेवानां पञ्चोपचारैः पूजां कृत्वा देवविसर्जनं कुर्यात्।

देवविसर्जनम् - **ॐ उत्तिष्ठब्ब्रह्मणस्पतेदेवन्तस्त्वेमहे। उपप्रयन्तुमरुतः-सुदानवऽइन्द्रप्प्राशुर्ब्भवासचा॥**

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्वैश्श्वानरमृतऽआजातमग्निम् ।
कविङ्सम्म्राजमदितिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।। स्वाहा इदमग्नये।
इति पूर्णाहुतिः ।

यज्ञावसानकृत्यम् - त्र्यायुषम्, दूर्वाक्षतादि च । ततोऽभिषेकदक्षिणामन्त्रपाठाः। अद्येत्यादि अमुकनाम्नो मम पुत्रस्य कृतैतत्समावर्तनकर्माङ्गभूतहोमादिकर्मन्यूनातिरेकपरिपूर्णातासिद्धिपूर्वकं साङ्गतासिद्ध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं वा द्रव्यं यद्देयं नानानामगोत्रेभ्यो ब्राह्मणोभ्यो दातुमहमुत्सृजे।

— इति समावर्त्तनम् —

◆

इति श्रीविद्वन्मण्डलमार्तण्डपरःसहस्रशिष्यमण्डलीलालितचरणयुगलदधिराममरासिनिलिखिते कर्मकाण्डभास्करे
संस्कारखण्डः सम्पूर्णः ।

◆

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनायच ।।

आवाहितदेवताः स्वस्थाने गच्छत इत्युक्त्वोत्थाप्य मङ्गलघोषेण बहिरानीय निर्माल्यस्य शुद्धस्थाने निक्षेपरूपां प्रतिपत्तिं कारयेत् । ततः पुण्याहं वाचयित्वा पुरोहितादीन् प्रति अस्मद्गोत्रे षट्सु षट्सु मासेषु शोभनमस्तु इति प्रार्थयेत । ते च तथास्तु इत्याशिषं दद्युः । यजमानो दक्षिणादिना विप्राँस्तोषयेदिति शुभम् ।

वर्षकृत्यखण्डः

१. श्रीरामनवमीव्रतपूजाप्रयोगः

प्रयोगः- तत्र व्रतकर्ता प्रातः स्नानादिनित्यकर्म विधाय श्रीरामपूजार्थं स्वगृहोत्तरभागे यथासंभवं पूजामण्डपं पूजासामग्रीञ्च संपाद्य नद्यादौ मध्याह्नस्नानादि विधाय पूजास्थानमागत्य स्वासने उपविश्य दीपं प्रज्वलय्याचम्य शान्तिपाठं कृत्वा **ॐ सुमुखश्चैकदन्तश्चे**त्यादिना गणेशाय, **ॐ नमोस्त्वनन्ताये**ति श्रीष्टदेवतायै च पुष्पाञ्जलिं समर्प्य कर्मपात्रं कृत्वा भूतोत्सादनमासनविधिञ्च कृत्वा गुरुं गणेशञ्च नत्वा द्वारपूजां कुर्यात् ।

द्वारपूजा- पूर्वस्याम् **ॐ हनुमते नमः**, दक्षिणस्याम् **ॐ गरुत्मते नमः**, पश्चिमायाम् **ॐ अङ्गदाय नमः**, उत्तरस्याम् **ॐ नीलाय नमः**, ततोऽर्घ्यं संस्थाप्य तज्जलेनात्मानं पूजासामग्रीञ्च संप्रोक्ष्य प्राणानायम्य सङ्कल्पं कुर्यात्।

सङ्कल्पः- ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकगोत्रोऽमुकशर्माहं सकलपापक्षयकामः श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीरामचन्द्रप्रीत्यर्थं श्रीरामनवमीव्रतं करिष्ये, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं सुवर्णनिर्मितप्रतिमायां शालग्रामशिलादौ वा सपरिवारस्य श्रीरामचन्द्रस्य षोडशोपचारैः पूजनमहं करिष्ये । ततो रामषडक्षरेण षडङ्गन्यासं कुर्यात् ।

षडङ्गन्यासः - ॐ श्रीहृदयाय नमः, ॐ रां शिरसे स्वाहा, ॐ मां शिखायै वषट्, ॐ यं कवचाय हुम्, ॐ नं नेत्राभ्यां वौषट्, ॐ मं अस्त्राय फडिति ततः फलपुष्पाक्षतजलसहितं ताम्रपात्रं गृहीत्वा-

उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव ।
तेन प्रीतो भव त्वं मे संसारात् त्राहि मां हरे ।।

इति मन्त्रेण पात्रस्थं जलं भूमौ उत्सृजेत्, ततो दीपकलशगणेशपूजां कुर्यात्।

पीठपूजा

ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानायै नमः, ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ सत्यायै नमः, ॐ प्रसिद्ध्यै नमः, ॐ प्रकृत्यै नमः, ॐ अनुग्रहायै नमः, मध्ये **ॐ नमो भगवते सकलशक्तियुक्ताय अनन्ताय संयोगपीठात्मने नमः**, इति । ततः शक्तितो हैमीं श्रीरामप्रतिमां कृत्वा अग्न्युत्तारणपूर्वकमष्टदलोपरि संस्थाप्य **ॐ मनोजूतिः०** इति मन्त्रेण प्राणप्रतिष्ठां कुर्यात् ।

ध्यानम्- **कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम् ।**
दक्षिणाङ्गे दशरथं पुत्रावेक्षणतत्परम् ।।
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ।।
अग्रे व्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणम् ।

शालग्रामपक्षे शिलां पीठे निधाय ध्यायेत् नात्र प्राणप्रतिष्ठाद्युपयोगः ॐ अतसीपुष्पनीलं पीतवाससं सौदामिनीनिभजानकीवीक्षणपरं, सौमित्र्यङ्गदादिसेवितपादम्, अग्रेवस्थितवायुसूनुं सुग्रीवविभीषणादिभिर्गीयमानयशसं धनुर्बाणपाणिं मुकुटाङ्गदधरं मुक्तादामविभूषितं श्रीरामं रक्ताम्भोजदलाभिराममनयनमिति च ध्यायेत्।**ॐ विष्णोरराटमसि०** इति ।

आवाहनम्- **आवाहयामि विश्वेशं जानकीवल्लभं विभुम् ।**
कौशल्यातनयं विष्णुं श्रीरामं प्रकृतेः परम् ।। ॐ सहस्रशीर्षा०।

सन्निधापनम्- **श्रीराम आगच्छ भगवन् रघुवीर नृपोत्तम ।**
जानक्या सह राजेन्द्र सुस्थिरो भव सर्वदा ।।
रामचन्द्र महेष्वास रावणान्तक राघव ।
यावत्पूजां समाप्येऽहं तावत्त्वं सन्निधौ भव ।।

संमुखीकरणम्- रघुनायक राजर्षे नमो राजीवलोचन ।
रघुनन्दन मे देव श्रीरामाभिमुखो भव ।।

आसनम्- राजाधिराज राजेन्द्र रामचन्द्र महीपते ।
रत्नसिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो ।।

ॐ पुरुषऽएवे० ।

पाद्यम्- त्रैलोक्यपावनानन्त नमस्ते रघुनायक ।
पाद्यं गृहाण राजर्षे नमो राजीवलोचन ।।

ॐ एतावानस्य० ।

अर्घ्यम्- परिपूर्णपरानन्द नमो रामाय वेधसे ।
गृहाणार्घ्यं मया दत्तं कृष्ण विष्णो जनार्दन ।।

ॐ त्रिपादूर्ध्व उदैत्० ।

आचमनीयम्- नमः सत्याय शुद्धाय नित्याय ज्ञानरूपिणे ।
गृहाणाचमनं नाथ सर्वलोकैकनायक।।

ॐ ततो विराट्० ।

मधुपर्कः- नमः श्रीवासुदेवाय तत्त्वज्ञानस्वरूपिणे ।
मधुपर्कं गृहाणेमं जानकीपतये नमः ।।

पञ्चामृतस्नानम्

पयःस्नानम्- कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम् ।।

ॐ पयःपृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः। पयस्वतीःप्रदिशःसन्तुमह्यम् ।।

दधिस्नानम्- पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया राम स्नानार्थं प्रतिगृह्यताम् ।।

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्श्वस्यवाजिनः । सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् ।।

घृतस्नानम्-   नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्श्रितोघृतम्वस्यधाम । अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ।।

मधुस्नानम्-   तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माध्वीर्न्नःसन्त्वोषधीः।।

शर्करास्नानम्-   इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ।।

ॐ अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम् । अपाꣳरसस्ययोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ।।

उद्वर्तनस्नानम्-   नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् ।
उद्वर्तनं मयानीतं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ अꣳशुनातेऽअꣳशुःपृच्च्यताम्परुषःपरुः । गन्धस्तेसोममवतुमदायरसोऽअच्च्युतः ।।

गन्धोदकस्नानम्-मलयाचलसंभूतं कर्पूरादिसुवासितम् ।
चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ।।

ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ।।

शुद्धोदकस्नानम्- ब्रह्माण्डोदरमध्यस्थैस्तीर्थतोयै रघूत्तम ।
त्वां स्नापयाम्यहं भक्त्या तद् गृहाण जनार्दन ।।

ॐ तस्म्मादद्यज्ञात्त्सर्व्वहुतः० । ॐ सहस्त्रशीर्षेत्यादिषोडशभिर्ऋग्भिर्गन्धयवपुष्पयुतधारापात्रजलेन स्नपयित्वाऽमृताभिषेकोस्तु इत्युक्त्वा ॐ केशवाय नमः, ॐ नारायणाय नमः, ॐ माधवाय नमः, इत्याचमनं दद्यात् ।

वस्त्रम् - तप्तकाञ्चनसंकाशं पीताम्बरमिदं हरे ।
संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ।।

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० ।

यज्ञोपवीतम् - श्रीरामाच्युत यज्ञेश श्रीधरानन्त राघव ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण रघुनन्दन ।।

ॐ तस्मादश्वाऽअजायन्त० ।

चन्दनम्- कुङ्कुमागरुकस्तूरी कर्पूरं चन्दनं तथा ।
तुभ्यं दास्यामि राजेन्द्र श्रीराम स्वीकुरु प्रभो ।।

ॐ तंय्यज्ञम्०।

यवाक्षतान्- अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।

ॐ अक्षन्नमीमदन्त० ।

पुष्पाणि- तुलसीकुन्दमन्दारजातीपुन्नागचम्पकैः ।
कदम्बकरवीरैश्च कुसुमैः शतपत्रकैः ।।
नीलाम्बुजैर्बिल्वपत्रैरर्चयेद्राघवं विभुम् ।
पूजयिष्याम्यहं भक्त्या संगृहाण जनार्दन ।।

ॐ यत्पुरुषम्०।

तुलसीपत्रम्- तुलसीं हेमरूपाञ्च रत्नरूपाञ्च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ।।

अङ्गपूजा

श्रीरामचन्द्राय नमः, पादौ पूजयामि । **राजीवलोचनाय नमः**, गुल्फौ पू० । **रावणान्तकाय नमः**, जानुनी पू० । **वाचस्पतये नमः**, ऊरू पू० । **विश्वरूपाय नमः**, जङ्घे पू० । **लक्ष्मणाग्रजाय नमः**, कटिं पू० । **विश्वमूर्तये नमः**, मेढ्रं पू० । **विश्वामित्रप्रियाय नमः**, नाभिं पू०। **परमात्मने नमः**, हृदयं पू० । **श्रीकण्ठाय नमः**, कण्ठं पू० । **सर्वास्त्रधारिणे**

नमः, बाहू पू० । **रघूद्वहाय नमः**, मुखं पू० । **पद्मनाभाय नमः**, जिह्वां पू० । **दामोदराय नमः**, दन्तान् पू० । **सीतापतये नमः**, ललाटं पू० । **ज्ञानगम्याय नमः**, शिरः पू० । **सर्वात्मने नमः**, सर्वाङ्गं पूजयामि ।

आवरणपूजा

ॐ हनुमते नमः, ॐ सुग्रीवाय नमः, ॐ भरताय नमः, ॐ विभीषणाय नमः, ॐ लक्ष्मणाय नमः, ॐ अङ्गदाय नमः, ॐ शत्रुघ्नाय नमः, ॐ जाम्बवते नमः, ॐ धृष्टये नमः, ॐ जयन्ताय नमः, ॐ विजयाय नमः, ॐ सुराष्ट्राय नमः, ॐ राष्ट्रवर्धनाय नमः, ॐ अकोपाय नमः, ॐ धर्मपालाय नमः, ॐ सुमन्त्राय नमः, ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुबेराय नमः, ॐ ईशानाय नमः, ॐ ब्रह्मणे नमः, ॐ अनन्ताय नमः, ॐ वज्राय नमः, ॐ शक्तये नमः, ॐ कालदण्डाय नमः, ॐ खड्गाय नमः, ॐ पाशाय नमः, ॐ अङ्कुशाय नमः, ॐ गदायै नमः, ॐ त्रिशूलाय नमः, ॐ पद्माय नमः, ॐ चक्राय नमः, सर्वावरणपूजां समर्पयामि ।

धूपः- **वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।**
रामचन्द्र महीपाल धूपोऽयं प्रतिगृह्यताम् ।।

ॐ ब्राह्मणोस्य०।

दीपः- **ज्योतिषां पतये तुभ्यं नमो रामाय वेधसे ।**
गृहाण दीपकं चैव त्रैलोक्यतिमिरापहम् ।।

ॐ चन्द्रमामनसः०।

नैवेद्यम्- नैवेद्यं संप्रोक्ष्य तदुपरि तुलसीदलं दत्त्वा-

इदं नैवेद्यममृतं रसैः षड्भिः समन्वितम् ।
रामचन्द्रेश नैवेद्यं सीतेश प्रतिगृह्यताम् ।।

ॐ नाभ्याऽआसीदन्त० । **ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा ।**

मध्ये पानीयम्- नमस्ते देवदेवेश सर्वतृप्तिकरं परम् ।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम् ।।

ततः क्षणं ध्यात्वा जपं विधाय **गुह्याति०** इति समर्प्य नैवेद्यपात्राण्युत्थाप्य मध्ये किञ्चित् पार्षदेभ्यो दद्यात् -

विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः ।
महाविष्णुप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ।।

उत्तरापोशनं हस्तप्रक्षालनं, मुखप्रक्षालनं करोद्वर्तनार्थे चन्दनं दद्यात्।

ताम्बूलम्- नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् ।
ताम्बूलं गृह्यतां राम कर्पूरादिसमन्वितम्।।

ॐ यत्पुरुषेण०।

फलम्- इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।

ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः । बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः ।।

दर्पणः- दर्शनेन त्वमादर्श नूनं मङ्गलदायक ।
शौर्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ।।

चामरम्- शशाङ्ककरसङ्काश हेमडिण्डीरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामरामरवल्लभ ।।

दक्षिणा- हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ।।

नीराजनम्- मङ्गलार्थं महीपाल नीराजनमिदं हरेः ।
संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ।।
अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।
आरार्तिक्यमिदं देव गृहाण मम सिद्धये ।।

चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आरार्तिः प्रतिगृह्यताम् ।।

ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यः स्वाहा । अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा । ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ।। ॐ इदꣳहविःप्प्रजननम्मेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये । आत्क्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनि । अग्निः प्प्रजाम्बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्म्मासुधत्त ।।

कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ।।

इति कर्पूरारार्तिकम् ।

प्रदक्षिणा- यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

ॐ सप्प्तास्यासन्परिधयः ० । अत्र चतस्रः प्रदक्षिणाः कार्याः ।

मन्त्रपुष्पाञ्जलिः- नमो देवाधिदेवाय रघुनाथाय शार्ङ्गिणे ।
चिन्मयानन्तरूपाय सीतायाः पतये नमः ।।
नानासुगन्धिपुष्पाणि देशकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ।।

ॐ यज्ञेनयज्ञमयजन्त ० । ॐ राजाधिराजायप्रसह्यसाहिनेनमोवयंवैश्रवणायकुर्महे । समेकामान्कामकामायमह्यंकामेश्वरोवैश्रवणोदधातु। कुबेरायवैश्रवणायमहाराजायनमः ।।

नमस्कारः- नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ।।
सर्वलोकशरण्याय रामचन्द्राय वेधसे ।
ब्रह्मानन्दैकरूपाय सीतायाः पतये नमः ।।

विशेषार्घदानम्- फलपुष्पाम्बुसंपूर्णं गृहीत्वा शङ्खमुत्तमम् ।
दधिदूर्वालवङ्गाद्यैर्युक्तं च तुलसीदलैः ।।
अशोककुमुमैर्युक्तं रामायार्घ्यं निवेदयेत् ।
दशाननवधार्थाय धर्मसंस्थापनाय च ।
राक्षसानां विनाशाय दैत्यानां निधनाय च ।।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ।
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।।

प्रार्थना- ततः **अविनयमपनये**त्यादिषट्पदीस्तोत्रेणान्यैश्च विविधस्तोत्रैः स्तुतिपूर्वकं श्रीरामस्य प्रार्थनां कथाश्रवणञ्च कुर्यात् । तदनन्तरं धूपं दीपं नैवेद्यं नीराजनं पुष्पाञ्जलिञ्च विधाय पूर्णपात्रमाचार्याय दद्यात् ।

क्षमापनम्- आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाञ्चैव न जानामि क्षमस्व परमेश्वर ।।
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष रक्ष सुरेश्वर ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत् पूजितं मया देव परिपूर्णं तदस्तु मे ।।

विसर्जनम्- गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
स्वकीयं साकेतलोकं परिपालय राघव ! ।।
यान्तु देवगणाः सर्वे पूजामादाय मामकीम्
इष्टकामन्प्रसिद्ध्यर्थं पुनरागमनाय च ।।

इति देवं विसर्जयेत् ।

प्रतिमादानम्- प्रतिमापक्षे अद्येहामुकशर्माहं कृतसंकल्पसिध्यर्थं रामनवमीव्रताङ्गसपरिवारश्रीरामपूजायाः साङ्गतासिध्यर्थमिमां सुपूजितां सौवर्णीं राजतीं वा श्रीरामप्रतिमाम् आचार्यायामुकगोत्रायामुकशर्मणे दास्ये इति

संकल्प्य, आचार्यं सम्पूज्य-

इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् ।
चित्रवस्त्रयुगच्छन्नां रामाहं राघवार्थिने ।।
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ।

इति मन्त्रेणाचार्याय दद्यात् ।

ब्राह्मणभोजनं दक्षिणादानञ्च- ततः श्रीरामचन्द्रस्य पूजायाः कथाश्रवणस्य च साङ्गतासिध्यर्थं सिद्धान्नेनामान्नेन वा यथाशक्ति अमुकसंख्यकान् ब्राह्मणान् भोजयिष्ये तथा इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्योऽन्येभ्यश्च विभज्य दास्ये ।

अच्युतवन्दना- **यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।**
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।
ॐ अच्युताय नमः ३ ।
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।

इश्वरार्पणम्- **ॐ कायेन वाचा मनसेन्द्रियैर्वा**
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायैव समर्पयामि ।।

इति कर्मेश्वरार्पणं कुर्यात् ।

— इति सङ्क्षिप्तश्रीरामनवमीव्रतपूजाप्रयोगः —

❂

२. नृसिंहजयन्तीव्रतपूजाविधिः

प्रयोगः- तत्र व्रतकर्ता निर्णीतायां वैशाखशुक्लस्य श्रीनृसिंहचतुर्दश्यां प्रातः स्नानादिनित्यकृत्यं विधाय गोमयाद्युपलिप्तायां भूमौ दुकूलमालादिभिः सुशोभितं यागमण्डपं पूजासामग्रीञ्च सम्पाद्य नद्यादौ मध्याह्नस्नानादि विधाय स्वासने उपविश्याचम्य जलपूर्णताम्रपात्रं करयोः कृत्वा श्रीनृसिंहं ध्यात्वा व्रतं संकल्पयेत् ।

सङ्कल्पः - ॐ विष्णुः३ अमुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीनृसिंहदेवप्रीतये श्रीनृसिंहजयन्तीव्रतं करिष्ये इति संकल्प्य -

ॐ नृसिंहदेवदेवेश तव जन्मदिने शुभे ।
उपवासं करिष्यामि सर्वभोगविवर्जितः ।।
उपोष्येऽहं नारसिंह भुक्तिमुक्तिफलप्रद ।
शरणं त्वां प्रपन्नोऽस्मि भक्तिं मे नृहरे दिश ।।
श्रीनृसिंह महोग्रस्त्वं दयां कृत्वा ममोपरि ।
अद्याहं ते विधास्यामि व्रतं निर्विघ्नतां नय ।।

इति पात्रस्थं जलं भूमौ क्षिपेत् ।

ततः प्रदोषे स्नातः शुचिर्यागमण्डपसमीपमागत्य स्वासने उपविश्य दीपं प्रज्वलय्याचम्य प्राणानायम्य अर्घ्यं संस्थाप्य द्वारपूजां कुर्यात् ।

द्वारपूजा- ॐ गङ्गायै नमः, इति द्वारदक्षिणशाखायाम्; **ॐ यमुनायै नमः**, इति द्वारवामशाखायाम्; **ॐ देहल्यै नमः**, मध्ये; **ॐ द्वारश्रियै नमः**, उपरि; **ॐ रत्नमण्डपाय नमः**, मण्डपोपरि; **ॐ वास्तुपुरुषाय नमः**, मध्ये; **ॐ विष्णवे नमः**, सर्वदिक्षु ।

ततः स्वस्तिवाचनं शान्तिपाठं कृत्वा सूर्यायार्घ्यं दत्त्वा प्रणवादिनमोऽन्तैर्नाममन्त्रैः पूर्वाद्यष्टदिक्षु इन्द्रादिलोकपालान् पुष्पादिभिः संपूज्य **ॐ वेदिकायै नमः,** इति वेदिकामध्यं सम्पूज्य दक्षिणे; **ॐ गणपतये नमः,** वामे; **ॐ गुरुभ्यो नमः,** मध्ये; **ॐ श्रीनृसिंहाय नमः,** इति प्रणमेत् । ततो यथाशक्ति भूतोत्सादनमासनविधिञ्च कृत्वा विशेषार्घ्यं संस्थाप्य तज्जलेन पूजासामग्रीमात्मानञ्च संप्रोक्ष्य पूजासङ्कल्पं कुर्यात् ।

पूजासङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकसंवत्सरे उत्तरेऽयने वसन्ते ऋतौ वैशाखे मासि शुक्ले पक्षे अमुकवासरान्वितायां श्रीनृसिंहचतुर्दश्यां तिथौ अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीनृसिंहदेवप्रीत्यर्थं दीपकलशगणेशपूजनपूर्वकं श्रीनृसिंहचतुर्दशीव्रताङ्गत्वेन सुवर्णप्रतिमायां शालग्रामशिलायां वा श्रीनृसिंहरूपिणो विष्णोः षोडशोपचारैः पूजनं करिष्ये । इति संकल्प्य दीपकलशगणेशपूजां विधाय **प्रतिमापक्षे ॐ मनोजूतिः०** इति मन्त्रान्ते **ॐ भूर्भुवः स्वः लक्ष्मीसहितनृसिंह इहागच्छ इह तिष्ठ** इति प्रतिमां प्रतिष्ठाप्य **शालग्रामपक्षे** तां शिलां पीठे संस्थाप्य ध्यायेत् ।

ध्यानम्-

ॐ स्मृत्वेत्थं श्रीनृसिंहं भ्रुकुटिनतमुखं रक्तनेत्राधरोष्ठम्
तेजोभिः प्रज्वलन्तं हुतवहसदृशं दुर्निरीक्ष्यं सुराद्यैः ।
भिन्नो येनोन्नखाग्रैर्गजमदगणितैर्दानवेन्द्रो हिरण्यः
सोऽयं नः पातु नित्यं त्रिभुवनविजयी सिंहरूपेण विष्णुः ।।

आवाहनम्- **आगच्छागच्छ देवेश तेजोराशे जगत्पते ।**
क्रियमाणामिमां पूजां गृहाण सुरसत्तम ।।

ॐ सहस्रशीर्षापुरुष०।

आसनम्- **नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।**
आसनं देवदेवेश गृहाण पुरुषोत्तम ।।

ॐ पुरुषऽएव०।

पाद्यम्- गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थयताहृतम् ।
तोयमेत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ।।

ॐ एतावानस्य० ।

अर्घ्यम्- नमस्ते देवदेवेश नमस्ते नृहरे विभो ।
नमस्ते कमलाकान्त गृहाणार्घ्यं नमोऽस्तु ते ।।

ॐ त्रिपादूर्ध्व० ।

आचमनीयम्- कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां हृषीकेश मया दत्तं हि भक्तितः ।।

ॐ ततोव्विराट्० ।

स्नानम्- गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थयताहृतम् ।
तोयमेतत् सुखस्पर्शं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ तस्माद्यज्ञात्सर्वहुतःसम्भृत० ।

पञ्चामृतस्नानम्- पयो दधि घृतं चैव मधुशर्करयाऽन्वितम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ पञ्चनद्यःसरस्वतीमपियान्तिसस्त्रोतसः । सरस्वतीतु-पञ्चधासोदेशेऽभवत्सरित् ।

महास्नानम्- सहस्रशीर्षेत्यादिभिः । स्नानाङ्गमाचनीयम् ।

वस्त्रम्- सर्वभूषादिके सौम्ये लोकलज्जानिवारके ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ।।

ॐ तस्म्माद्यज्ञात्सर्वहुतऽऋचः० । वस्त्राङ्गमाचनीयम् ।

यज्ञोपवीतम्- नारसिंह नमस्तेऽस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ।।

ॐ तस्म्मादश्वा:० । यज्ञोपवीताङ्गमाचनीयम् ।

चन्दनम्- चन्दनं शीतलं दिव्यं कस्तूरीकुङ्कुमान्वितम् ।
ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर ।।

ॐ तंय्यज्ञम्० ।

यवाक्षताः- ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत । अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ।।

पुष्पाणि- कालोद्भवैः सुपुष्पैस्तु तुलस्यादिभिरेव च ।
पूजयामि नृसिंह त्वां लक्ष्म्या सह नमोऽस्तु ते ।।

ततो गन्धयवाक्षतपुष्पैः प्रत्येकं द्वादशनामभिः पूजयेत् ।

द्वादशनामपूजा

ॐ केशवाय नमः १, ॐ नारायणाय नमः २, ॐ माधवाय नमः ३, ॐ गोविन्दाय नमः ४, ॐ विष्णवे नमः ५, ॐ मधुसूदनाय नमः ६, ॐ त्रिविक्रमाय नमः ७, ॐ वामनाय नमः ८, ॐ श्रीधराय नमः ९, ॐ हृषीकेशाय नमः १०, ॐ पद्मनाभाय नमः ११, ॐ दामोदराय नमः १२।

तत्र मध्ये कर्णिकायाम् -

ॐ ह्रौं तप्तहाटककेशान्तज्वलत्पावकलोचन ।
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ।

ह्रौं ॐ इति पुष्पाञ्जलिं समर्पयेत् । ततः आवरणपूजां कुर्यात् ।

अथावरणपूजा

ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुवेराय नमः, ॐ ईशानाय नमः, ॐ ब्रह्मणे नमः, ॐ अनन्ताय नमः, ॐ सपरिच्छदायै वेदिकायै नमः, ॐ सत्यादिपीठशक्तिभ्यो नमः, ॐ वनमालायै नमः, ॐ श्रीवत्साय नमः, ॐ गरुत्मते नमः, ॐ सरस्वत्यै नमः, ॐ तुष्ट्यै नमः, ॐ पुष्ट्यै नमः, ॐ प्रह्लादाय नमः, ॐ साङ्गाय सायुधाय द्वात्रिंशद्व्यूहपरिवारसहिताय श्रीमहानारसिंहाय नमः, सर्वावरणपूजां समर्पयामि ।

धूपः- कालागुरुमयं धूपं सर्वदेवसुदुर्लभम् ।
निवेदये महाविष्णो सर्वकामसमृद्धये ।।

ॐ ब्राह्मणोस्य० ।

दीपः- दीपः पापहरः प्रोक्तस्तमसो राशिनाशनः ।
दीपेन लभते तेजस्तस्माद्दीपं ददामि ते ।।

ॐ चन्द्रमामनसः०।

नैवेद्यम्- नैवेद्यं सौख्यदं चारु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्वपापक्षयङ्कर ।।

ॐ नाभ्या०।

प्राणादिमुद्राः प्रदर्श्य नैवेद्यमध्ये पानीयं समर्पयेत् । क्षणं ध्वात्वा जपं विधाय **गुह्याती**ति समर्प्य नैवेद्यपात्रमुत्थाप्य मध्ये किञ्चित् **ॐ विश्वक्सेनाय नमः** इत्युत्तरतो निवेदयेत् । ततो नैवेद्याङ्गमाचमनीयम् ।

फलम्- ॐ इदं फलं० ।

ताम्बूलम्- पूगीफलसमायुक्तं नागवल्लीदलं शुभम् ।
कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

ॐ यत्त्पुरुषेण०।

दक्षिणा- हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

**ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् ।
सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ।।**

सर्वोपचारसमर्पणम्- ॐ भूर्भुवः स्वः साङ्गाय सपरिवाराय सवाहनाय सशक्तिकाय **श्रीमते लक्ष्मीनृसिंहाय नमः** । सर्वोपचारान् समर्पयामि ।

आरार्तिक्यम्- ॐ अन्तस्तेजो बहि०, ॐ अग्ग्निर्ज्ज्योतिः० ।

प्रदक्षिणा- यानि कानि च०, ॐ सप्प्तास्यासन्० ।

मन्त्रपुष्पाञ्जलिः- नानासुगन्धिपुष्पैश्च देशकालोद्भवैस्तथा ।
पुष्पाञ्जलिं मया दत्तं गृहाण नृहरे विभो ।।

ॐ यज्ञेनयज्ञमय०, ॐ राजाधिराजाय० ।

नमस्कारः- **तप्तहाटककेशान्तज्वलत्पावकलोचन ।**
वज्राधिकनखस्पर्श दिव्यसिंह नमोस्तु ते ।।

विशेषार्घ्यदानम्- **फलपुष्पाम्बुसंपूर्णं गृहीत्वा शङ्खमुत्तमम् ।**
जानुभ्यामवनीं गत्वा विशेषार्घ्यं निवेदयेत् ।।
परित्राणाय साधूनां जातो विष्णुर्नृकेशरी ।
गृह्णात्वर्घ्यं मया दत्तं सलक्ष्मीर्नृहरिः स्वयम् ।।

इति त्रिर्वा पञ्चकृत्वो वार्घ्यं दद्यात् । **प्रतिमापक्षे-** इमां सुपूजितां सौवर्णीं राजतीं वा श्रीलक्ष्मीनृसिंहप्रतिमामाचार्यायामुकगोत्रायामुकशर्मणे दास्ये इति सङ्कल्प्याचार्यं संपूज्य-

ॐ नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्चाप्रदानेन सफलाःस्युर्मनोरथाः ।।

इति मन्त्रेणाचार्याय प्रतिमां दद्यात्।

प्रार्थना- **नारसिंह महाबाहो प्रह्लादभयनाशन ।**
यथा भूतार्चनात्तत्र यथोक्तफलदो भव ।।
मद्वंशे ये नरा जाता ये जनिष्यन्ति चापरे ।
ते सर्वे पापनिर्मुक्ताः सन्तु नित्यं हि त्वत्पराः ।।

आवाहनं न जानामि०, अन्यथा शरणं नास्ति०, मन्त्रहीनं क्रियाहीनं० यस्य स्मृत्या०, प्रमादात्कुर्वतां कर्म० ।

ततः पूर्णपात्रदानं भूयसीदक्षिणादानञ्च संकल्पपूर्वकं कुर्यात्। **ॐ कायेन वाचेति** कृतं कर्म नारायणचरणारविन्दार्पणं कुर्यात् ।

— इति नृसिंहजयन्तीव्रतप्रयोगः —

◆

३. दशहरापूजाविधिः

प्रयोगः - तत्र कर्ता देशकालौ संकीर्त्य व्रतं गृहीत्वा संकल्पं कुर्यात् ।

प्रतिज्ञासंकल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि ममैतज्जन्मजन्मान्तरसंभूतदशविधपापनिरासत्रयस्त्रिंशच्छतपित्रुद्धारब्रह्मलोकावाप्त्यादिफलप्राप्यर्थं दशहरापर्वण्यस्यां महानद्यां स्नानं तीर्थपूजनं प्रतिमायां जाह्नवीपूजां तिलादिदानं मूलमन्त्रजपमाज्यहोमञ्च यथाशक्ति करिष्ये । इति संकल्प्य यथाविधि स्नानं दशवारं कृत्वा वासःपरिधानादिपितृतर्पणान्तं नित्यकर्म विधाय सर्पिर्मिश्रान् दशप्रसृतिकृष्णतिलाँस्तीर्थेऽञ्जलिना प्रक्षिप्य गुडमिश्रान् सक्तुपिण्डान् दश प्रक्षिपेत् ।

ततो गङ्गातटे ताम्रे मृण्मये वा स्थापितकलशे सुवर्णादिप्रतिमायां सपरिवारां गङ्गां पूजयेत् । तत्रादौ पूजासामग्रीं संपाद्य स्वासने उपविश्य दीपं प्रज्वलय्य आचम्य गणेशाय गङ्गायै च पुष्पाञ्जलिं समर्प्य सूर्यायार्घ्यं दत्त्वा पुनरर्घ्यं संस्थाप्य संकल्पं कुर्यात् ।

पूजासङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ इत्यादिदेशकालौ संकीर्त्य अमुकोहं दशपापहरायां दशम्यां पुण्यतिथौ दीपकलशगणेशपूजनपूर्वकं कृतसंकल्पसिद्धये सौवर्णप्रतिमायां रौप्यप्रतिमायां वा सपरिवारायाः श्रीगङ्गादेव्याः षोडशोपचारैः पूजनं करिष्ये । इति संकल्प्य दीपकलशगणेशपूजां कृत्वा **ॐ मनोजूति**रिति मन्त्रेण प्रतिष्ठाप्य ध्यायेत्।

ध्यानम्- **चतुर्भुजां त्रिनेत्राञ्च सर्वावयवशोभिताम् ।**
पूर्णकुम्भसिताम्भोजवरदाभयसत्कराम् ।।
श्वेतपट्टपरीधानां मुक्तामणिविभूषिताम् ।
ततो ध्यायेत् सुसौम्याञ्च चन्द्रायुतसमप्रभाम् ।।
चामरैर्वीज्यमानाञ्च श्वेतच्छत्रोपशोभिताम् ।
सुप्रसन्नाञ्च वरदां करुणार्द्रहृदन्तराम् ।।

सुधाप्लावितभूपृष्ठां दिव्यगन्धानुलेपनाम् ।
त्रैलोक्यपूजितां गङ्गां पूजयेत्प्रयतः शुचिः ।।

गङ्गादीनामावाहनपूजनादिकम्- ॐ नमः शिवायै नारायण्यै दशहरायै गङ्गायै नमो नमः, श्रीगङ्गामावाहयामि; **ॐ नारायणाय नमः,** नारायणमावाहयामि; **ॐ रुद्राय नमः,** रुद्रमावाहयामि; **ॐ ब्रह्मणे नमः,** ब्रह्माणमा०; **ॐ सूर्याय नमः,** सूर्यमा०; **ॐ भगीरथाय नमः,** भगीरथमा०; **ॐ हिमाचलाय नमः,** हिमाचलमा०; एवमेव आसनादिपुष्पाञ्जल्यन्तैः षोडशोपचारैः पूजयेत् ।

सर्वे उपचारा दशसंख्याका अपेक्षिताः । ततो मत्स्यकच्छपमण्डूकान् पूर्वं निर्मापितान् संपूज्य तीर्थे प्रवाहयेत्, दशदीपाँश्च प्रवाहयेत् । जपहोमचिकीर्षायां पूर्वोक्तमूलमन्त्रस्य पञ्चसहस्रसंख्याकजपो दशांशेन होमश्च कार्यः यथाशक्ति वा ।

होमः - तत्र दशहराव्रताङ्गत्वेन अमुकसंख्याकहोमं करिष्ये इति संकल्प्य स्थण्डिलेऽग्निं प्रतिष्ठाप्य ब्रह्मोपवेशानादि पर्युक्षणान्तं कर्म कृत्वा द्रव्यदेवताभिध्यानं कुर्यात् । तत्र प्रजापतिमिन्द्रमग्निं सोमञ्चाज्येन श्रीगङ्गाममुकसंख्ययाऽऽज्येन नारायणादिषड्देवताश्चैककयाऽऽज्याहुत्या शेषेण- स्विष्टकृतमित्यादि प्रोक्षणीपात्रं प्रणीताग्न्योर्मध्ये निधाय मनसा प्रजापतिं ध्यात्वा **ॐ प्रजापतये स्वाहा इदं प्रजापतये, ॐ इन्द्राय स्वाहा इदमिन्द्राय, ॐ अग्नये स्वाहा इदमग्नये, ॐ सोमाय स्वाहा इदꣳसोमाय।** ततः प्रधानगङ्गादिहोमं विधाय महाव्याहृत्यादिदशाहुतीर्जुहुयात् होमसाङ्गताञ्च दद्यात् । ततो दशविप्रेभ्यः प्रत्येकं षोडशमुष्टितिलान् सदक्षिणान् दद्यात् । यवान् यथाशक्ति गाश्च दद्यात्, अन्ते च दश ब्राह्मणान् दशसुवासिनीर्यथाशक्ति वा भोजयेत् ।

— इति दशहरापूजाप्रयोगः —

४. निर्जलैकादशीव्रतविधिः

निर्जलामहत्त्वम् - मदनरत्ने स्कान्दे-

ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा ।
निर्जलं समुपोष्याऽत्र जलकुम्भान् सशर्करान् ।।
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ । इति ।

तत्रैकादश्यां प्रातः कृतनित्यक्रियः जलपूर्णताम्रपात्रं करयोः कृत्वा-

करिष्याम्यद्य देवेश जलवर्जमुपोषणम् ।
भोक्ष्येऽपरेह्नि देवेश ह्यन्नं वा तव वासरात् ।।
एकादश्यां निराहारो वर्जयिष्यामि वै जलम् ।
केशवप्रीणनार्थाय अन्यदाचमनादृते ।।

इति भूमौ जलं क्षिपेत् ।

ततो विष्णुं षोडशोपचारैः पूजयेत् । शक्तौ रात्रौ जागरणं कृत्वा द्वादश्यां प्रातः कृतनित्यक्रियो विष्णुं संपूज्य ब्राह्मणान् दक्षिणाभोजनदानादिभिः संतोष्य तुलसीदलयुतश्रीविष्णुचरणामृतेनाछिद्रावधारणपूर्वकं ब्राह्मणानुज्ञया पारणां विधाय कर्मेश्वरार्पणं कृत्वा मन्त्राशीर्वादप्रसादान् ब्राह्मणेभ्यो गृहीत्वा तदाज्ञया सुहृद्बन्धुयुतो हविष्यान्नं भुञ्जीत दिवाशयनपुनर्भोजनादि वर्जयेत्।

— इति निर्जलैकादशीव्रतम् —

❂

५. चातुर्मास्यव्रतग्रहणप्रयोगः

हरिशयन्येकादश्यां सामान्यैकादशीवत्सर्वमनुष्ठाय सायं पूजायां कृतायां सोपस्करमञ्चके सुप्तां श्रीविष्णुप्रतिमां शालग्रामशिलां वा नानाविधोपचारैः संपूज्य प्रार्थयेत् ।

प्रार्थना- **त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् ।**
विबुद्धे त्वयि बुद्ध्येत प्रसन्नो मे भवाच्युत ।। इति ।

ततो देवस्याग्रे कृताञ्जलिर्व्रतनियमवाक्यं प्रभाषेत-

चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
श्रावणे वर्जये शाकं दधि भाद्रपदे तथा ।।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ।
अथवा- **हविष्यान्नं भक्षयिष्ये देवाहं प्रीतये तव ।।**
अथवा- **वर्जयिष्ये गुडं देव मधुरस्वरसिद्धये ।**
अथवा- **वर्जयिष्ये तैलमहं सुन्दराङ्गत्वसिद्धये ।।**
अथवा- **योगाभ्यासी भविष्यामि प्राप्तुं ब्रह्मपदं परम् ।**
अथवा- **मौनव्रती भविष्यामि स्वाज्ञापालनसिद्धये ।।**
अथवा- **एकान्तरोपवासञ्च प्राप्तुं ब्रह्मपदं परम् ।**
अथवा- **वृन्ताकादिनिषिद्धानि हरे सर्वाणि वर्जये ।।**

इत्येषां मध्ये यथारुचि प्रतिज्ञाय-

इमं करिष्ये नियमं निर्विघ्नं कुरुमेऽच्युत ।
इदं व्रतं मया देव गृहीतं पुरतस्तव ।।
निर्विघ्नं सिद्धिमायातु प्रसादात्ते रमापते ।
गृहीतेऽस्मिन्व्रते देव पञ्चत्वं यदि मे भवेत् ।।
तदा भवतु संपूर्णं प्रसादात्ते जनार्दन ।
इति संप्रार्थ्य देवाय शङ्खेनार्घ्यं निवेदयेत् ।।

— इति चातुर्मास्यव्रतग्रहणप्रयोगः —

❂

६. कर्कटसंक्रान्तौ प्रदोषे कण्डारकपूजाविधिः

कण्डारकपूजाफलं पूजाविधिनिर्देश्च -

कृत्यसङ्ग्रहे-

प्रदोषसमये राजन् कर्कसंक्रमणे रवेः ।
प्रतिवर्षं पूजनीयः कण्डारकनिशाचरः ।।
लूतादिभ्यो भयं नास्ति तथारिष्टभयापनुत् ।
सरलेन्धनदीपाश्च दातव्या उल्कया सह ।।
फलानि च प्रदेयानि तत्कालसम्भवानि च ।
माषपिण्डमयं देयं नैवेद्यं खोचिकाभिधम् ।।

(सरलः = देवदारुः, उल्का = ज्वाला ।)

पट्टवस्त्रोपरि कण्डारकमूर्तिं कुङ्कुमादिना लिखित्वा सन्ध्यायां पूजयेत्।

तत्र क्रमः- उपलेपनादिसंशोधिते गृहाङ्गणे हस्तपादादिशुद्धिं विधाय स्वासने उपविश्य दीपं प्रज्वलय्य आचम्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - कुशतिलयवजलान्यादाय देशकालौ स्मृत्वाऽमुकगोत्रोऽमुकशर्माहं सपरिवारस्य मम लूताद्यरिष्टभयनिवारणार्थं कर्कटसंक्रान्तौ प्रदोषे कण्डारकनिशाचरस्य यथालब्धोपचारैः पूजनं करिष्ये, इति संकल्प्य कण्डारकपूजां कुर्यात् ।

कण्डारकपूजा

गोमयोपलिप्तपाषाणोपरिस्थापितपट्टवस्त्रोपरि लिखितमूर्तौ ॐ भूर्भुवः स्वः कण्डारक निशाचर इहागच्छ इत्यक्षतैरावाह्य इह तिष्ठ इति प्रतिष्ठाप्य एतानि पद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि **कण्डारकाय नमः**, इदं

वस्त्रम्; इदमनुलेपनम्, एतेऽक्षताः, एतानि पुष्पाणि, एष धूपः, एष दीपः, इदं खोचिकानैवेद्यम्, इदं पूगीफलम्, इदं द्रव्यम्, एतानि तत्कालोद्भवानि फलानि **कण्डारकाय नमः** ।

सरलेन्धनदीपदानमन्त्रः -

कण्डारकाऽसुराधीश गृहाण दीपमुत्तमम् ।
सरलेन्धनसंभूतं ममारिष्टं विनाशय ।।

इति सरलेन्धनदीपान् दत्त्वा उल्का प्रक्षेप्तव्याः ।

उल्काप्रक्षेपमन्त्रः -

कण्डारको रात्रिचरो लूतादिभयनाशनः ।
उल्कामिमां प्रक्षिमामि मास्तु लूताभयं मम ।।

ततः शिष्टाः सप्त व्रीहीनवकिरन्ति । ततो दक्षिणां दद्यात्- अद्य कृतैत्कण्डारकपूजाप्रतिष्ठासिद्ध्यर्थं दक्षिणां यथानामगोत्रायेत्यादि ।

— इति कर्कटसंक्रान्तौ प्रदोषे कण्डारकपूजाप्रयोगः —

◆

७. श्रावणशुक्लपञ्चम्यां नागपूजाविधिः

प्रयोगः - तत्र प्रातर्नित्यान्ते पूर्ववद्व्रतं गृहीत्वा ॐ इदं व्रतं मया इति पठित्वा जलं भूमौ क्षिपेत् । ततो भित्त्यादौ द्वारमुभयतो वा यथाचारं गोमयेन हरिचन्दनादिवर्णैर्वाऽष्टनागान् विलिख्य सुलिप्तायां सुभूषितायां भूमौ दधिदूर्वाङ्कुरकुशसर्पिःफलपायसगन्धपुष्पाद्युपहारान्समाहृत्य स्वासने उपविश्य दीपं प्रज्वलय्याचम्य सामान्यार्घ्यादिविशेषार्घ्यस्थापनान्ते संकल्पं कुर्यात् ।

संकल्पः ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि देशकालौ स्मृत्वाऽमुकगोत्रोऽमुकशर्माहं यथोक्तफलावाप्तये मम कुले गृहे च नागभयशान्तयेऽनन्तादिनागानां प्रीतयेऽस्यां नागपञ्चम्यां दीपकलशगणेशपूजनपूर्वकं भित्ति(पट्ट)-लिखितनागानां यथामिलितोपचारैः पूजनं करिष्ये, इति सङ्कल्पं कुर्यात् ।

नागपूजनम् - दीपकलशगणेशपूजान्ते **ॐ मनोजूतिः०** इति प्रतिष्ठाप्य, **ॐ भूर्भुवः स्वः अनन्तादयो नागा इहागच्छत इह तिष्ठत सुप्रतिष्ठा वरदा भवत ॐ अनन्ताद्यष्टनागेभ्यो नमः** । ध्यानम्, आवाहनम्, आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानम्, वस्त्रम्, यज्ञोपवीतम्, गन्धम्, अक्षतान्, पुष्पाणि, दधि, दूर्वाङ्कुरान्, सर्पिः, कुशान्, धूपम्, दीपम्, पायसादिनैवेद्यम्, फलानि, ताम्बूलम्, दक्षिणाम्, आरार्तिकम्, प्रदक्षिणाम्, नमस्कारञ्च समर्पयेत् ।

पुष्पाञ्जलिः अनन्त- वासुकि- तक्षक- कर्कोटक- शङ्ख- कुलिक- पद्म- महापद्मेत्यष्टमहानागकुलेभ्यो नमः पुष्पाञ्जलिं समर्पयामि । अन्ते ब्राह्मणेभ्यो भूयसीं दत्त्वा यथाशक्ति भोजयेत् ।

— इति नागपूजा —

८. श्रावणीप्रयोगः

प्रयोगः - तत्र श्रावणस्य पूर्णिमादिकाले प्रातः स्नानसन्ध्यादि नित्यकर्म विधाय गुरुः शिष्यगणैः सह ग्रामाद्बहिः प्राच्यामुदीच्यां वा नद्यादिरम्यं जलाशयं गत्वा तत्तीरं प्रक्षाल्य तत्र शुभ्रां यथादेशसंभवां वा मृदमार्द्रं गोमयं भस्म कुशाँस्तिलानक्षतान् सुरभीणि पुष्पाणि दूर्वाङ्कुरापामार्गयज्ञोपवीतादि सर्वां श्रावणीसामग्रीं संस्थाप्य ऋषिस्थापनार्थं नवं पीठं श्वेतवस्त्रं कदलीदलं वा पूजनार्थं गन्धाक्षतपुष्पधूपदीपनैवेद्यादिपूजासंभारञ्च संपाद्य मृल्लेपनपूर्वकं प्रक्षालितपाणिपादः प्राङ्मुख उदङ्मुखो वा सपवित्रकरो गुरुः कृतपश्चाच्छौचादिभिः शिष्यैः सहाचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य सर्वैः सह सङ्कल्पं कुर्यात् ।

सङ्कल्पः - अधीतानामध्येष्यमाणानां चाध्यायानां स्थापनविच्छेदक्रोशघोषणदन्तविवृतिदुर्वृत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविवृतोच्चारितवर्णानां श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां श्रुतीनां यद्यातयामत्वं तत्परिहारार्थम्, अष्टत्रिंशदनध्यायाऽध्ययने रथ्यासञ्चरतः शूद्रस्य शृण्वतोध्ययने म्लेच्छान्त्यजादेः शृण्वतोऽध्ययने अशुचिदेशेऽध्ययने, आत्मनोऽशुचित्वेऽध्ययने, अक्षरानुस्वारपदच्छेदकण्डिकाव्यञ्जनोरस्यकण्ठ्यतालव्यमूर्धन्यदन्त्यौष्ठ्यनासिक्यकण्ठ्यनासिक्यमूर्धन्यनासिक्यदन्त्यनासिक्यौष्ठ्यनासिक्यतालव्यनासिक्यमूर्धन्यनासिक्यदन्त्यनासिक्यक्यौष्ठ्यनासिक्यकण्ठतालव्यकण्ठौष्ठ्यदन्त्यौष्ठ्यरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतचर्द्विर्भावपरसवर्णादीनां व्यत्ययेनोच्चारे माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं सर्वस्य वेदस्य सवीर्यत्वसंपादनद्वारा यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीतये सशिष्योऽहं शुक्लयजुर्वेदोत्सर्जनोपाकरणमहं करिष्ये ।

पूजादिसङ्कल्पः - प्रथमप्रयोगे गणेशपूजनपूर्वकं मातृकापूजाभ्युदयिकश्राद्धे च करिष्ये । इति सङ्कल्प्य तत्कृत्वा पञ्चगव्यपञ्चामृतवस्त्रद्रव्यफलताम्बूलपूगीफलनारिकेलादि पूजासामग्रीं संपादयेत् ।

ततो गुरुःशिष्यैः सह स्मार्तमाचमनं कुर्यात् । तद्यथा- प्रक्षालितपाणिपादः सपवित्रकरोबद्धत्रिकच्छशिखो धृतवामस्कन्धब्रह्मसूत्रो जले स्थले चैकैकं पादं कृत्वोपविश्य बाहू जान्वन्तरा कृत्वा मुक्ताङ्गुष्ठकनिष्ठिकेन दक्षिणहस्तेन फेन बुद्बुदवर्जं स्वच्छं माषमज्जनपरिमितं जलमादायाङ्गुष्ठमूलस्थब्राह्मतीर्थेन शब्दमकुर्वंस्त्रिःपिबेत् ।

ततोऽङ्गुष्ठमूलेन मुखं द्विः प्रमृज्याङ्गुष्ठमूलं प्रक्षाल्य खानि संस्पृशेत्। तद्यथा- तर्जनीमध्यमानामिकाभिरास्यम्, अङ्गुष्ठतर्जनीभ्यां नासारन्ध्रद्वयम्, अनामिकाङ्गुष्ठाभ्यां चक्षुषी, ताभ्यामेव श्रोत्रे, अङ्गुष्ठकनिष्ठाकाभ्यां नाभिम्, पाणितलेन हृदयम्, सङ्कुचितकराग्रेण स्कन्धद्वयम्, एवमेव शिरः संस्पृशेत्।

एवं स्मार्ताचमनं विधाय प्राणायामं कृत्वा गुरुः शिष्यैः सह **उभाकवी**त्युच्चैः पठेत्- **ॐ उभाकवीयुवायोनोधर्मःपरापतत्। परिसख्यानिधर्मिणोविसख्यानिविसृजामहे** ।। इति मन्त्रं पठित्वा यथाज्येष्ठक्रमेणगुरोरभिवादनं कुर्युः । पुनश्च देशकालौ संकीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - यथा अध्यायोत्सर्गोपाकर्मनिमित्तं गणस्नानमहं करिष्ये ।

पुनश्च “**इषेत्वादि ॐ खंब्रह्मान्तेषु** याः क्रियास्तत्र विवस्वानृषिः, सर्वाणि यजूꣳषि, सर्वाणि च्छन्दाꣳसि, प्रजापतिर्लिङ्गोक्ता देवता, स्नानादिसर्वकर्मसु विनियोगः” इत्युक्त्वा स्नानानुज्ञां प्रार्थयेत् ।

प्रार्थना- **नमोऽस्तु वासुदेवाय शितिकण्ठाय वेधसे ।**
रुद्राय चापहस्ताय दण्डिने चक्रिणे नमः ।।
सरस्वती च गायत्री वेदमाता गरीयसी ।
सन्निधात्री भव त्वं च सर्वपापप्रणाशिनी ।।

त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता ।
याचितं देहि मे तीर्थं सर्वपापप्रणाशन ।।
यद्वा सागरनिर्घोष दण्डहस्तासुरान्तक ।
जगत्सष्टर्जगन्मित्र नमामि त्वां सुरान्तक ।।
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ।।
आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ।
पापं नाशय मे देव वाङ्मनःकायकर्मजम् ।।
नमामि गङ्गे तव पादपङ्कजं
सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिं च मुक्तिं च ददासि नित्यं
भावानुसारेण सदा नराणाम् ।।
उत्तिष्ठन्तु महाभूता ये भूता भूमिवासिनः ।
भूतानामविरोधेन स्नानकर्म समारभे ।।
अपसर्पन्तु ते भूता ये भूतास्तीर्थदूषकाः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ।।
अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव ।
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ।।
अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु विचरन्ति याः ।
देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा ।।
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।

इति स्नानाज्ञां प्रार्थ्य जलाभिमन्त्रणं कुर्यात् ।

जलाभिमन्त्रणम्- **उरुꣳहीत्यस्य**शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दो जलाभिमन्त्रणे विनियोगः ।

ॐ उरुꣳहिराजाव्वरुणश्श्चकारसूर्य्यायपन्न्थामन्न्वेतवाऽउ । अपदे-पादाप्प्रतिधातवेकरुतापवक्ताहृदयाविधश्श्चित् । नमोव्वरुणायाभिष्ठितो-व्वरुणस्यपाशः ।। इति तोयमभिमन्त्र्यावर्तयेत् ।

तोयावर्तनम्- ॐ ये ते शतमिति मन्त्रस्य वामदेवऋषिर्वरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्का देवता स्त्रिष्टुप्छन्दस्तोयावर्तने विनियोगः ।

ॐ येतेशतंव्वरुणयेसहस्स्रंयज्ञियाःपाशाव्विततामहान्तः । तेभिर्न्नोऽ-अद्यसवितोतव्विष्णुर्व्विश्श्वेमुञ्चन्तुमरुतःस्वर्क्काः ।। इति मन्त्रेण दक्षिणहस्तानामिकया दक्षिणावर्तं त्रिवारं तोयमालोडयेत् ।

जलग्रहणाञ्जलिप्रक्षेपः– ॐ सुमित्रिया इत्यनेनाञ्जलिनापो गृहीत्वा **ॐ दुर्मित्रिया** इति मन्त्रेण यस्यां दिशि द्वेष्टास्ति तस्यां दिशि द्वेष्टारं मनसा विचिन्त्य तटेऽञ्जलिं प्रक्षिपेत् । द्वेष्टुरभावे कामादीन् स्मृत्वाञ्जलिं प्रक्षिपेत्।

विनियोगः- ॐ सुमित्रियादुर्मित्रिया इति द्वयोः प्रजापतिर्ऋषिरापो देवता यजुश्छन्दो जलग्रहणाञ्जलिप्रक्षेपणयोर्विनियोगः । **ॐ सुमित्रियानऽ-आपऽओषधयःसन्तु ।। ॐ दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्च-व्वयन्द्विष्म्मः** ।। अभिचारकेऽपः स्पृशेत् ।

मृत्तिकास्नानम्- मृत्तिकायास्त्रीन् भागान् कृत्वा प्रथमभागं वामहस्तेन गृहीत्वा तेन नाभेरध उभयकटिप्रदेशावनुलेपयेत् । हस्तं प्रक्षाल्य पुनस्तेनैव हस्तेन द्वितीयं मृत्तिकाभागमादाय दक्षिणहस्तेनाच्छाद्याभिमन्त्रयेत् ।

मन्त्राः- **ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।**
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।।
मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।।
त्वया हतेन पापेन गच्छामि परमां गतिम् ।

इत्यभिमन्त्र्य तथैव बस्तिम्, उरू, जङ्घे, चरणौ, करौ च मृदा प्रत्येकं तूष्णींत्रिस्त्रिरनुलिप्य पुनर्हस्तौ प्रक्षाल्याचम्य **तीर्थोदकाय नमः** इति कायवाङ्मनोभिस्तीर्थोदकं नमस्कुर्यात् ।

ततो मृत्तिकातृतीयभागेन **इदं विष्णु**रितिमन्त्रेण दक्षिणकरगृहीतेन ललाटादिनाभिपर्यंतानि गात्राण्यनुलिम्पेत्, वामहस्तस्थेन नाभेरधः पादपर्यन्तानि ।

मृदनुलेपने विनियोगः- **इदं विष्णु**रिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दो मृदनुलेपने विनियोगः । **ॐ इदंविष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳫंसुरेस्वाहा ।।**

निमज्जनोन्मज्जनम्- ततो नाभिदघ्नं तीर्थजलं प्रविश्य विनियोगं कुर्यात्।

विनियोगः - आपोऽअस्म्मानित्यस्य प्रजापतिर्ऋषिरापो देवता अत्यष्टिश्छन्दोमज्जनोन्मज्जनयोर्विनियोगः । **ॐ आपोऽअस्मान्मातरः-शुन्धयन्तुघृतेननोघृतप्प्वपुनन्तु । व्विश्श्वᳫंहिरिप्प्रंप्रवहन्तिदेवीः ।।** इति निमज्ज्य **ॐ उदिदाब्भ्यःशुचिरापूतऽएमि ।।** इत्युन्मज्जेत् । पुनस्तूष्णीं निमज्ज्योन्मज्ज्य चाचामेत् ।

गोमयस्नानम्- गोमयमादाय-

अग्रमग्रं चरन्तीनामोषधीनां वने वने ।
तासामृषभपत्नीनां पवित्रं कायशोधनम् ।।
तन्मे रोगाँश्च शोकाँश्च पापं मे हर गोमय ।

इति गोमयमभिमन्त्र्य गोमयानुलेपने विनियोगं कुर्यात् ।

विनियोगः- मानस्तोके इत्यस्य कुत्सऋषिः रुद्रो देवता जगती छन्दो गोमयानुलेपने विनियोगः । **ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽ-अश्श्वेषुरीरिषः। मानोव्वीरान्रुद्द्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे।।** इति मन्त्रेण सोदकं गोमयं सूर्याय दर्शयित्वा तेन त्रिवारं मृल्लेपनवत् ललाटादिपादतलपर्यन्तान्यङ्गान्यनुलिप्य स्नायात् ।

भस्मस्नानम्- भस्मादाय- **ॐ अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वꣳहवाइदंभस्ममनएतानिचक्षूꣳषिभस्मानीति ।। ॐ प्रसद्यभस्मनायोनिमपश्श्चपृथिवीमग्ग्ने । सꣳसृज्ज्यमातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः ।।** इति ललाटाद्यङ्गेषु भस्मलेपनं कृत्वा भस्मलिप्त एव वक्ष्यमाणैरष्टभिर्मन्त्रैः प्रतिमन्त्रं कुम्भमुद्रया दक्षिणचुलुकेन वा शिरोभिषिञ्चेत् ।

दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षित्वा हस्तद्वयेन तु ।
सावकाशामेकमुष्टिं कुर्यात्सा कुम्भमुद्रिका ।। इति ।

मन्त्रा यथा- **इमंमेतत्त्वायामीति** द्वयोः शुनःशेपऋषिर्वरुणो देवताऽऽद्यस्य गायत्री छन्दोऽन्त्यस्य त्रिष्टुप्छन्दः, **त्वं नः, सत्वं न** इति द्वयोर्वामदेव ऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः, **माप** इति मन्त्रस्य प्रजापतिर्ऋषिर्हृदयशूलं देवता यजुश्छन्दः, **उदुत्तममित्यस्य**शुनःशेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दः, **मुञ्चन्त्वित्यस्य** आथर्वणो भिषग्बन्धुर्ऋषिरोषधयो देवता अनुष्टुप्छन्दः, **अवभृथेत्यस्य** प्रजापति ऋषिर्यज्ञो देवताऽनुष्टुप्छन्दः सर्वेषामभिषेके विनियोगः।

ॐ इमम्मेवरुणाश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।। ॐ तत्त्वायामिब्ब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः । अहेडमानोवरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।। ॐ त्वन्नोऽअग्ग्नेवरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्श्वाद्द्वेषाꣳसिप्प्रमुमुग्ग्ध्यस्म्मत् ।। ॐ सत्त्वन्नोऽअग्ग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ । अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि ।। ॐ मापोमौषधीर्हिꣳसीर्द्धाम्नोधाम्नोराजँस्ततोवरुणनोमुञ्च। यदाहुरग्घ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च ।। ॐ उदुत्तमंवरुणपाशमस्म्मदवाधमंविमद्ध्यमꣳश्रथाय । अथावयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम ।। ॐ मुञ्चन्तुमाशपत्थ्यादथोवरुण्यादुत । अथोयमस्यपड्वीशात्सर्व्वस्म्मादेवकिल्बिषात् ।। ॐ अवभृथनिचुम्पुण-

निचेरुरसिनिचुम्पुणः । अवदेवैर्द्देवकृतमेनोयासिषमवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्णोदेवरिषस्प्पाहि ।। इति । ततस्तूष्णीं निमज्ज्योन्मज्ज्य चाचामेत् ।

दर्भमार्जनम्- वक्ष्यमाणैरोंकारादिभिर्मन्त्रैः प्रतिमन्त्रं सजलेन कुशत्रयेण नाभिदक्षिणपार्श्वमारभ्य पाणिं शिर उपरि नीत्वा नाभिवामपार्श्वपर्यंतं प्रदक्षिणमात्मानं पावयेत् ।

विनियोगः - ॐ कारस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीछन्दः सप्तानां व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः, अग्निवायुसूर्यवृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः, गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि सर्वेषां पावने विनियोगः ।

ॐ पुनातु, **ॐ इमम्मे०** । ॐ भूः पुनातु०, **ॐ तत्त्वायामि०**। **ॐ भुवः पुनातु, ॐ त्वन्नोऽग्ग्ने०** । ॐ स्वः पुनातु, **ॐ सत्त्वन्नोऽअग्ग्ने०**। ॐ महः पुनातु, **ॐ मापोमौषधीः०** । ॐ जनः पुनातु, **ॐ उदुत्तमम्** । ॐ तपः पुनातु, **ॐ मुञ्चतुमा०** । ॐ सत्यं पुनातु, **अवभृथनिचुम्पुण०**।

विनियोगः - तत्सवितुरित्यस्य विश्वामित्र ऋषिः सविता देवता गायत्रीछन्दः पावने विनियोगः। **ॐ तत्सवितुः** ॐ सर्वं पुनातु। **आपोहिष्ठेति** तिसृणां सिन्धुद्वीप ऋषिरापो देवता गायत्रीछन्दः, **इदमाप** इत्यस्य प्रजापतिर्ऋषिरापो देवता महापङ्क्तिश्छन्दः, **हविष्मती**रित्यस्य प्रजापतिर्ऋषिलिङ्गोक्ता देवताऽनुष्टुप्छन्दः, **देवीराप** इत्यस्य प्रजापतिर्ऋषिरापो देवता पङ्क्तिश्छन्दः, **कार्षिरसी**त्यादित्रयाणां प्रजापतिर्ऋषिः **कार्षिरसी**त्यक्षरचतुष्टयस्याज्यं देवता **समुद्रस्यसमाप** इत्यस्य चापो देवता त्रयाणामनुष्टुप्छन्दः, **अपोदेवा** इत्यस्य वरुणऋषिरापो देवता त्रिष्टुप्छन्दः, **द्रुपदादिवे**त्यस्य प्रजापत्यश्विसरस्वत्य ऋषयः आपो देवता अनुष्टुप्छन्दः, **शन्नोदेवी**रित्यस्य सिन्धुद्वीप ऋषिर्गायत्रीछन्दः, **अपाꣳरसमि**त्यस्य बृहस्पतिर्ऋषिः रसो देवताऽनुष्टुप्छन्दः, **अपोदेवी**रित्यस्य सिन्धुद्वीप ऋषिरापो देवता न्यङ्कुसारिणीबृहतीछन्दः, **पुनन्तुमेति**

द्वयोः प्रजापतिर्ऋषिरापो देवता अनुष्टुप्छन्दः, **अग्नऽआयूꣳषी**त्यस्य वैश्वानरऋषिरग्निर्देवताऽनुष्टुप्छन्दः, **पुनन्तुमे**त्यस्य प्रजापतिर्ऋषिर्लिङ्गोक्ता देवताऽनुष्टुप्छन्दः, **पवित्रेणपुनीही**त्यस्य प्रजापतिर्ऋषिरग्निर्देवता गायत्रीछन्दः, **यत्त** इति मन्त्रस्य प्रजापतिर्ऋषिरग्निर्देवता तृतीयपादस्य ब्रह्मादेवता गायत्रीछन्दः, **पवमान** इत्यस्य प्रजापतिर्ऋषिः सोमो देवता गायत्रीछन्दः, **उभाभ्यामि**त्यस्य प्रजापतिर्ऋषिः सविता देवता गायत्रीछन्दः, **वैश्वेदेवीपुनती**त्यस्य प्रजापतिर्ऋषिर्विश्वेदेवा देवतास्त्रिष्टुप्छन्दः, सर्वेषां पावने विनियोगः ।

(ॐ तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् । ॐ सर्वं पुनातु) ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणायचक्षसे ।। पुनातु ।।१।। ॐ योवशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः।। पुनातु ।।२।। ॐ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ । आपोजनयथाचनः ।। पुनातु ।।३।। ॐ इदमापःप्प्रवहतावद्यञ्चमलञ्चयत् । यच्चाभिदुद्द्रोहानृतंयच्चशेपेऽअभीरुणम् । आपोमातस्म्मादेनसःपवमानश्श्चमुञ्चतु ।। पुनातु ।।४।। ॐ हविष्म्मतीरिमाऽआपोहविष्म्माँ२।।ऽआविवासति । हविष्म्मान्देवोऽअद्ध्वरोहविष्म्माँ२।।ऽअस्तुसूर्य्यः ।। पुनातु ।।५।। ॐ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्य्यऽइन्द्रियावान्मदिन्तमः । तन्देवेभ्योदेवत्रादत्तशुक्क्रपेभ्योयेषाम्भागस्त्थस्वाहा ।। पुनातु ।।६।। ॐ कार्षिरसिसमुद्द्रस्यत्त्वाक्षित्त्याऽउन्नयामि । समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ।। पुनातु ।।७।। ॐ अपोदेवामधुमतीरगृब्भ्णन्नुर्ज्जस्वतीराजस्वश्श्चिताना। याभिर्म्मित्रावरुणावब्भ्यषिञ्चन्न्याभिरिन्द्रमनयन्नत्त्यरातीः ।। पुनातु ।।८।। ॐ द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव । पूतम्पवित्रेणेवाज्ज्यमापःशुन्धन्तुमैनसः ।। पुनातु ।।९।। ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः ।। पुनातु ।।१०।। ॐ अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम् । अपाꣳरसस्ययोरसस्तंवोगृह्णाम्म्युत्तम-

मुपयामगृहीतोसीन्द्रयत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ।। पुनातु ।।११।। ॐ अपोदेवी[illegible]पसृजमधुमतीरयक्ष्मायप्प्रजाब्भ्यः । तासमास्थानादुज्जिहतामोषधयःसुपिप्पलाः ।। पुनातु ।।१२।। ॐ पुनन्तुमापितरःसौम्यासःपुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः । पवित्रेणशतायुषा ।। पुनातु ।।१३।। ॐ पुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः । पवित्रेणशतायुषाविश्श्वमायुर्व्यश्श्नवै ।। पुनातु ।।१४।। ॐ अग्ग्नऽआयूᳬषिपवसऽआसुवोर्ज्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम् ।। पुनातु ।।१५।। ॐ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः । पुनन्तुविश्श्वाभूतानिजातवेदःपुनीहिमा ।। पुनातु ।।१६।। ॐ पवित्रेणपुनीहिमाशुक्क्रेणदेवदीद्यत् । अग्नेक्क्रत्त्वाक्क्रतूँ१।।रनु ।। पुनातु।।१७।। ॐ यत्तेपवित्रमर्च्चिष्ष्यग्ग्नेविततमन्तरा। ब्रह्मपूतेनपुनातुमा।। पुनातु।।१८।। ॐ पवमानःसोऽअद्यनःपवित्रेणविचर्षणिः । यःपोतासपुनातुमा ।। पुनातु ।।१९।। ॐ उभाब्भ्यांदेवसवितःपवित्रेणसवेनच । माम्पुनीहिविश्श्वतः ।। पुनातु ।।२०।। ॐ वैश्श्वदेवीपुनतीदेव्व्यागाद्य स्यामिमाबह्व्यस्तन्न्वोवीतपृष्ठाः । तयामदन्तःसधमादेषुवयᳬस्यामपतयोरयीणाम्।। पुनातु ।।२१।। इति मन्त्रैर्दर्भैर्मार्जयित्वोदकं स्पृशेत्।

विनियोगः - चित्पतिर्मेतित्रयाणां प्रजापतिर्ऋषिराद्ययोः प्रजापतिर्देवताऽन्त्यस्य सविता देवता यजुश्छन्दः पावने विनियोगः। **ॐ चित्त्पतिर्म्मापुनात्त्वच्छिद्द्रेणपवित्रेणसूर्य्यस्यरश्मिम्भिः । तस्यतेपवित्रपतेपवित्रपूतस्ययत्त्कामःपुनेतच्छकेयम् ।। पुनातु ।।** इत्यनेन नाभेरुर्ध्वम्पावयेत् ।

ॐ वाक्क्पतिर्म्मापुनात्त्वच्छिंद्द्रेणपवित्रेणसूर्य्यस्यरश्मिम्भिः । तस्यतेपवित्रपतेपवित्रपूतस्ययत्त्कामःपुनेतच्छकेयम् ।। पुनातु ।। इत्यनेन नाभेर्मध्यं पावयेत् । **ॐ देवोमासवितापुनात्त्वच्छिद्द्रेणपवित्रेणसूर्य्यस्यरश्मिम्भिः । तस्यतेपवित्रपतेपवित्रपूतस्ययत्त्कामःपुनेतच्छकेयम् ।। पुनातु ।।** इति नाभेरधो मार्जयेत् ।

पुनः समुच्चयेन सर्वाङ्गानि पावयेत् । पुन पूर्वोक्तप्रकारेण ॐ पुनातु **इमंमे०** । ॐ भूः पुनातु **तत्त्वायामि०** । ॐ भुवः पुनातु **त्वन्नोऽअग्ने०** । ॐ स्वः पुनातु **सत्त्वन्नोऽअग्ने०** । ॐ महः पुनातु **मापः०** । ॐ जनः पुनातु **उदुत्तमम्०** । ॐ तपः पुनातु **मुञ्चन्तुमा०**। ॐ सत्यं पुनातु **अवभृथ०** । **ॐ तत्सवितुः०** सर्वं पुनातु ।

अपामार्गमार्जनम्- अपाघमित्यस्य शुनःशेपऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दोऽपामार्गमार्जने विनियोगः । **ॐ अपाघमपकिल्बिषमपकृत्यामपोरपः । अपामार्गत्त्वमस्म्मदपदुःष्वप्न्यङ्क्षसुव ।। पुनातु ।।** अपामार्गैस्त्रिभिर्मार्जयेत् ।

दूर्वामार्जनम्- ॐ काण्डात्काण्डादित्यस्याग्निर्ऋषिर्दूर्वेष्टका देवता अनुष्टुप्छन्दो दूर्वामार्जने विनियोगः । **ॐ काण्डात्त्काण्डात्त्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्व्वेप्प्रतनुसहस्त्रेणशतेनच ।। पुनातु ।।** इति तिसृभिर्दूर्वाभिर्मार्जयेत् ।

अघमर्षणम्- ऋतञ्चसत्यञ्चेत्यस्याघमर्षणऋषिर्भाववृत्तंदैवतमनुष्टुप्छन्दोऽघमर्षणे विनियोगः । अन्तर्जले निमग्नोऽनुच्छ्वसन्निमं मन्त्रं मनसा स्मरेत् । **ॐ ऋतञ्चसत्यञ्चाभीद्धात्तपसोध्यजायत । ततोरात्र्यजायतततःसमुद्रोअर्णवः । समुद्रादर्णवादधिसंवत्सरोअजायत । अहोरात्राणिविदधद्विश्वस्यमिषतोवशी । सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् । दिवञ्चपृथिवीञ्चान्तरिक्षमथोस्वः ।। ॐ द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव । पूतम्पवित्रेणेवाज्ज्यमापः शुन्धन्तुमैनसः ।।** इति वा त्रिर्जपेत् । **आयङ्गौ**रित्यस्य प्रजापतिर्ऋषिरग्निः परावररूपो देवता गायत्रीछन्दोऽघमर्षणे विनियोगः । **ॐ आयङ्गौःपृश्निरक्क्रमीदसदन्मातरम्पुरः । पिरञ्चप्प्रयन्त्स्वः ।।** इति मन्त्रं वा त्रिरावर्तयेत् । सशिरसं प्राणायामं वा त्रिःपठेत् । **ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्त्सवितुर्व्वरिण्यभ्भर्गोदेवस्यधीमहि।**

धियोयोनःप्रचोदयात् ।। ॐ आपोज्ज्योतीरसोमृतम्ब्रह्मभूर्भुवःस्वरोम्।। इति । अथवा परमात्मानं शेषशायिनं सायुधं सश्रीकं चतुर्भुजं विष्णुं ध्यायेत् ।।

स्नानाङ्गतर्पणम्- ॐ ब्रह्मादयो देवास्तृप्यन्ताम् । ॐ भूर्देवास्तृप्यन्ताम्। ॐ भुवर्देवास्तृप्यन्ताम् । ॐ स्वर्देवास्तृप्यन्तम् । ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम् । नीवीती उदङ्मुखो भूत्वा-

ॐ सनकादिद्वैपायनादय ऋषयस्तृप्यन्ताम् । ॐ भूर्ऋषयस्तृप्यन्ताम् । ॐ भुवर्ऋषयस्तृप्यन्ताम् । ॐ स्वर्ऋषयस्तृप्यन्ताम् । ॐ भूर्भुवः स्वर्ऋषयस्तृप्यन्ताम् ।

अपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा- **ॐ कव्यवाडनलादयः पितरस्तृप्यन्ताम् । ॐ भूः पितरस्तृप्यन्ताम् । ॐ भुवः पितरस्तृप्यन्ताम्। ॐ स्वः पितरस्तृप्यन्ताम् । ॐ भूर्भुवः स्वः पितरस्तृप्यन्ताम् ।** ततः सव्येनाचम्य यक्ष्मतर्पणं कुर्यात् ।

यक्ष्मतर्पणम्- यन्मया दूषितं तोयं शारीरमलसम्भवात् ।
तस्य पापस्य शुद्ध्यर्थं यक्ष्मै तत्ते तिलोदकम् ।।

इति मन्त्रेण तीर्थतटे तिलमिश्रं जलाञ्जलिं क्षिपेत् । ततः-

लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः ।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः ।।

इति मन्त्रेण स्वदक्षिणभागे शिखाग्रं निष्पीडयेत् ।

स्नानाङ्गतर्पणं कृत्वा जलाद्बहिर्निष्क्रम्य अरजकप्रक्षालिते सदशे शुष्के अनग्निदग्धे अच्छिद्रे अस्यूते गैरिकादिरागेणाविकृते कार्पासनिर्मिते परिधानीयोत्तरीयवाससी परिधाय प्रशस्तदारुनिर्मिते कुशत्रयाच्छन्नासने प्रागास्य उदगास्यो वोपविश्य गङ्गादितीर्थमृत्तिकया गार्हपत्यौपासनाग्निभस्मना वा गोपीचन्दनेन वा यथाधिकारं भाले त्रिपुण्ड्रमूर्ध्वपुण्ड्रं वा तिलकं कुर्यात् । ततः कुशपवित्रोपग्रहपाणिः पादौ जले स्थले च कृत्वा पूर्ववद्द्विराचम्य

भगवन्तं परमात्मरूपं नारायणं स्मृत्वा मध्याह्नसन्ध्योपासनं कृत्वा सूर्योपस्थानं कुर्यात् ।

सूर्योपस्थानम्- आचम्य प्राणानायम्य- ॐ अद्य पूर्वोक्तगुणविशिष्टायां पुण्यतिथौ मम श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीसूर्यनारायणप्रीतये सूर्योपस्थानमहं करिष्ये । **पवित्रेस्थः०** इति मन्त्रेण द्वयोरनामिकयोः पवित्रे धृत्वा **ॐ उदुत्त्यम्०, ॐ उद्वयम्०, ॐ चित्रन्देवानाम्०, ॐ तच्चक्षुः०** इति मन्त्रैः सूर्यं गन्धाक्षतपुष्पैः सम्पूज्य **विभ्राडि**त्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैः सूर्यमुपतिष्ठेत् ।

विनियोगः- ॐ तत्सवितुरित्यस्य विश्वामित्रऋषिः सविता देवता गायत्रीछन्दः सूर्योपस्थाने विनियोगः । **विभ्राडि**त्यस्य सूर्यपुत्रो विभ्राडृषिः सूर्यो देवता जगतीछन्दः, **उदुत्त्यम्०, येनापावक०, दैव्यावध्वर्य्यू०** इति तिसृणां प्रस्कण्व ऋषिः सूर्यो देवता गायत्रीछन्दः, **तम्प्रत्नथे**त्यस्य काश्यपो वत्सारऋषिर्विश्वेदेवा देवता जगतीछन्दः, **अयंव्वेन** इत्यस्य वेनऋषिरधियज्ञमधिदैवञ्च सोमो देवता त्रिष्टुप्छन्दः, **चित्रन्देवानामि**त्यस्य कुत्स आङ्गिरस ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, **आन**इत्यस्यागस्त्य ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, **यदद्ये**त्यस्य श्रुतकक्षसुकक्षावृषी सूर्यो देवता गायत्रीछन्दः, **तरणि**रित्यस्य प्रस्कण्व ऋषिः सूर्यो देवता गायत्रीछन्दः, **तत्सूर्यस्यतन्मित्रस्ये**ति द्वयोः कुत्स ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, **बण्महान् बट्सूर्य** इति द्वयोर्जमदग्निर्ऋषिः सूर्यो देवता क्रमेण बृहतीसतोबृहतीछन्दसी **श्रायन्तइवे**त्यस्य नृमेधा ऋषिः सूर्यो देवता बृहतीछन्दः, **अद्यादेवा**इत्यस्य कुत्स ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, **आकृष्णेने**त्यस्य हिरण्यस्तूप आङ्गिरस ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, सर्वेषां सूर्योपस्थाने विनियोगः ।

पुरुषसूक्तस्य नारायणपुरुषऋषिर्जगद्बीजं पुरुषो देवता अनुष्टुप्छन्दः, अन्त्या त्रिष्टुप् सूर्योपस्थाने विनियोगः । **यज्जाग्रत** इत्यादीनां षण्णां शिवसङ्कल्प ऋषिः आदित्ययाज्ञवल्क्यौ वा ऋषी मनो देवता त्रिष्टुप्छन्दः,

सूर्योपस्थाने विनियोगः । मण्डलब्राह्मणस्य विवस्वानृषिर्वायुर्देवता सूर्योपस्थाने विनियोगः । **ॐ भूर्ब्भुवःस्वः, तत्सवितुः०, ॐ व्विब्भ्राड्बृहत्त्पिबतुसोम्म्यम्मद्ध्वायुर्द्दधद्यज्ञपतावविह्रुतम् । व्वातजूतोयोऽअभिरक्षतित्त्मनाप्प्रजाःपुपोषपुरुधाव्विराजति ।।१।। उदुत्त्यञ्जातवेदसन्देवं व्वहन्तिकेतवः। दृशेव्विश्श्वायसूर्य्यम् ।।२।। येनापावकचक्षसाभुरण्यन्तञ्जनाँ२।।ऽअनु। त्वंव्वरुणपश्यसि ।।३।। दैव्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्यत्त्वचा । मद्ध्वायज्ञꣳसमञ्जाथे । तम्प्रत्क्नथायंव्वेनश्श्चित्रन्देवानाम् ।।४।। तम्प्रत्क्नथापूर्व्वथाव्विश्श्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् । प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ।।५।। अयंव्वेनश्श्चोदयत्त्पृश्श्निगर्ब्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने । इममपाꣳसङ्गमेसूर्य्यस्यशिशुन्नव्विप्प्रामतिभीरिहन्ति ।।६।। चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः । आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्त्माजगतस्तस्थुषश्श्च ।।७।। आनऽइडाभिर्व्विदथेसुशस्तिव्विश्श्वानरःसवितादेवऽएतु । अपियथायुवानोमत्त्सथानोव्विश्श्वञ्जगदभिपित्त्वेमनीषा ।।८।। यदद्यकच्चव्वृत्रहन्नुदगाऽअभिसूर्य्य । सर्व्वन्तदिन्द्रतेव्वशे ।।९।। तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य । व्विश्श्वमाभासिरोचनम् ।।१०।। तत्त्सूर्य्यस्यदेवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तोर्व्विततꣳसञ्जभार । यदेदयुक्तहरितःसधस्त्थादाद्रात्रीव्वासस्तनुतेसिमस्म्मै ।।११।। तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यौरुपस्त्थे । अनन्तमन्न्यद्रुशदस्यपाजःकृष्णमन्न्यद्धरितःसम्भरन्ति ।।१२।। बण्महाँ२।।ऽअसिसूर्य्यबडादित्त्यमहाँ२।।ऽअसि । महस्त्तेसतोमहिमापनस्यतेद्धादेवमहाँ२।।ऽसि ।।१३।। बट्सूर्य्यश्श्रवसामहाँ२।।ऽअसिसत्रादेवमहाँ२।।ऽअसि । महन्नादेवानामसूर्य्यःपुरोहितोव्विभुज्ज्योतिरदाब्भ्यम् ।।१४।। श्श्रायन्तऽइवसूर्य्यंव्विश्श्वेदिन्द्रस्यभक्षत । व्वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ।।१५।। अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसःपिपृतानिरवद्यात् । तन्नोमित्रोव्वरुणो-**

मामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ।।१६।। आकृष्णोनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।१७।।

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिꣳसर्व्वतस्पृत्वात्त्यतिष्ठाद्दशाङ्गुलम् ।।१।। पुरुषएवेदꣳसर्व्वय्यद्भूतंय्यच्चभाव्व्यम्। उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ।।२।। एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः । पादोस्यव्विश्श्वाभूतानित्रिपादस्यामृतन्दिवि ।।३।। त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः । ततोव्विष्ष्वङ्ङ्यक्क्रामत्साशनानशनेऽअभि ।।४।। ततोव्विराडजायतव्विराजोऽअधिपूरुषः । सजातोऽअत्त्यरिच्च्यतपश्श्चाद्भूमिमथोपुरः ।।५।। तस्म्माद्यज्ञात्त्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम् । पशूँस्ताँश्चक्क्रेव्वायव्व्यानारण्याग्ग्राम्म्याश्श्चये ।।६।। तस्म्माद्यज्ञात्त्सर्व्वहुतऽऋचःसामानिजज्ञिरे । छन्दाꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ।।७।। तस्म्मादश्श्वाऽअजायन्तयेकेचोभयादतः । गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः ।।८।। तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः । तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्श्चये ।।९।। यत्पुरुषं-व्व्यदधुःकतिधाव्व्यकल्प्पयन् । मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ।।१०।। ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यःकृतः। ऊरूतदस्ययद्वैश्श्यःपद्भ्याꣳशूद्रोऽअजायत ।।११।। चन्द्रमामनसोजातश्श्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्वायुश्श्चप्राणश्चमुखादग्निरजायत ।।१२।। नाभ्भ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत । पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ२।।ऽअकल्प्पयन् ।।१३।। यत्पुरुषेणहविषादेवायज्ञमतन्वत । व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्म्मऽइध्ध्मःशरद्धविः ।।१४।। सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः । देवायद्यज्ञन्त वानाऽअबध्नन्पुरुषम्पशुम् ।।१५।। यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्यासन् । तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाद्ध्याःसन्तिदेवाः ।।१६।।

ॐ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवेति । दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनःशिवसङ्कल्प्पमस्तु ।।१।। येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिव्विदथेषुधीराः । यदपूर्व्वंय्यक्षमन्तःप्प्रजानान्तन्मेमनःशिवसङ्कल्प्पमस्तु ।।२।। यत्प्रज्ञानमुतचेतोधृतिश्श्चयज्ज्योतिरन्तरमृतम्प्रजासु। यस्म्मान्नऽऋतेकिञ्चनकर्म्मक्क्रियतेतन्मेमनःशिवङ्कल्प्पमस्तु ।।३।। येनेदम्भूतम्भुवनम्भविष्ष्यत्त्परिगृहीतममृतेनसर्व्वम् । येनयज्ञस्तायतेसप्तहोतातन्मेमनःशिवसङ्कल्प्पमस्तु ।।४।। यस्म्मिन्नृचःसामयजूꣳषियस्म्मिन्प्रतिष्ठितारथनाभाविवाराः। यस्म्मिँश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मेमनःशिवसङ्कल्प्पमस्तु ।।५।। सुषारथिरश्श्वानिवयन्मनुष्ष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव । हृत्प्रतिष्ठंय्यदजिरञ्जविष्ठन्तन्मेमनःशिवसङ्कल्प्पमस्तु ।।६।।

मण्डलब्राह्मणम्- ॐ यदेतन्मण्डलन्तपतितन्महदुक्क्थन्ताऽऋचःसऽऋचाँल्लोकोथयदेतदर्च्चिर्द्दीप्प्यतेतन्महाव्व्रतन्तानिसामानिससाम्म्नाँल्लोकोथयऽएषएतस्म्मिन्मण्डलेपुरुषःसोग्निस्तानियजूꣳषिसयजुषाँल्लोकः ।।१।। सैषात्रय्य्येवव्विद्यातपतितद्धैतदप्प्यविद्वाꣳसऽआहुस्त्रयीवाऽएषाव्विद्यातपतीविद्वाग्घैवतत्त्पश्श्यन्तीव्वदति ।।२।। सऽएषऽएवमृत्त्युर्य्यऽएषऽएतस्म्मिन्मण्डलेपुरुषोथैतदमृतंय्यदेतदर्च्चिर्द्दीप्प्यतेतस्म्मान्मृत्त्युर्न्नम्म्रियतेमृतेह्य्र्यन्तस्तस्म्मादुनदृश्श्यतेमृतेह्य्र्यन्तः ।।३।। तदेषश्श्लोकोभवत्त्यन्तरंमृत्त्योरमृतमित्त्यवरꣳह्य्येतन्मृत्त्योरमृतम्मृत्त्यावमृतमाहितमित्त्येतस्म्मिन्न्हिपुरुषऽएतन्मण्डलम्प्रतिष्ठितन्तपतिमृत्त्युर्व्विवस्स्वन्तंव्वस्त्तऽइत्त्यसौवाऽआदित्त्योव्विवस्वानेषह्यहोरात्रेव्विवस्त्तेतमेषव्वस्त्तेसर्व्वतोह्येनेनपरिवृतोमृत्त्योरात्माव्विवस्वतीत्त्येतस्म्मिन्न्हिमण्डलऽएतस्यपुरुषस्यात्मैतदेषश्श्लोकोभवति ।।४।। तयोर्व्वाऽएतयोरुभयोरेतस्यचार्च्चिषऽएतस्यचपुरुषस्यैतन्मण्डलम्प्रतिष्ठातस्म्मान्महदुक्क्थम्परस्म्मैनशꣳसेन्नेदेताम्प्रतिष्ठाञ्छिनदाऽइत्त्येताꣳहसत्प्रतिष्ठाञ्छिन्तेयोमहदुक्क्थम्परस्म्मैशꣳसतितस्म्मादुक्क्थशसम्भूयिष्ठम्परिचक्षतेप्प्रतिष्ठाच्छिन्नोहिभवतीत्त्यधिदैवतम् ।।५।।

अधियज्ञम्- यदेतन्मण्डलन्तपत्ययꣳसरुक्मोथ्ययदेतदर्च्चिर्द्दीप्प्यतऽइदन्तत्पुष्करपर्णमापोह्येताऽआपः पुष्करपर्णमथयऽएषऽएतस्मिन्मण्डलेपुरुषोयमेवसय्योयꣳहिरण्मयपुरुषस्तदेतदेवैतत्त्रयꣳसँस्कृत्त्येहोपधत्तेतद्यज्ञस्यैवानुसꣴस्थामूर्द्ध्वमुत्त्क्रामतितदेतमप्प्येतियऽएषतपतितस्म्मादग्निनन्नाद्रियेतपरिहन्तुममुत्रह्येषतदाभवतीत्त्युऽएवाधियज्ञम् ।।६।।

अध्यात्मम्- यदेतन्मण्डलन्तपतियश्चैषरुक्मऽइदन्तच्छुक्लमक्षन्नथयदेतदर्च्चिर्द्दीप्प्यतेयच्चैतत्त्पुष्करपर्णमिदन्तत्कृष्णमक्षन्नथयऽएषऽएतस्मिन्मण्डलेपुरुषोयश्चैषहिरण्मयः पुरुषोयमेवसयोयन्दक्षिणेक्षन्पुरुषः ।।७।। सऽएषऽएवलोकम्पृणतामेषसर्व्वोग्ग्निरभिसम्पद्यतेतस्यैतन्मिथुनंय्योयꣳसव्येक्षन्पुरुषोर्द्धमुहैतदात्मनोय्यन्मिथुनंयदावैसहमिथुनेनाथसर्व्वोथकृत्त्स्नः कृत्त्स्नतायैतद्यत्तेद्द्वेभवतोद्वन्द्वꣴहिमिथुनम्प्रजननंतस्माद्द्वेद्द्वेलोकम्पृणेऽउपधीयेतेतस्म्मादुद्द्वाभ्यान्द्वाभ्याञ्चितिम्प्रणयन्ति ।।८।। सऽएषऽएवेन्द्रोयोयन्दक्षिणेक्षन्पुरुषोथेयमिन्द्राणीताभ्यान्देवाऽएतांव्विधृतिमकुर्व्वन्नासिकान्तस्माज्जायायाऽअन्तेनाश्नीयाद्द्वीर्य्यवान्ह्यस्माज्जायतेव्वीर्य्यवन्तमुहसाजनयतियस्याऽअन्तेनाश्नाति ।।९।। तदेतद्देवव्व्रतꣳराजन्यबन्धवोमनुष्याणामनुतमाङ्गोपायन्तितस्म्मादुतेषुव्वीर्य्यवाञ्जायतेमृतवाकाव्वयसाꣴसाक्षिप्प्रश्येनञ्जनयति ।।१०।। तौहृदयस्याकाशम्प्रत्त्यवेत्त्यमिथुनीभवतस्तौयदामिथुनस्यान्तङ्गच्छतोथहैतत्त्पुरुषः स्वपितितद्यथाहैवेदम्मानुषस्यमिथुनस्यान्तङ्गत्त्वासंव्विदऽइवभवत्त्येवꣳहैवैतदसंव्विदऽइवभवतिदैवꣳह्येतन्मिथुनम्परमोह्येषऽआनन्दः ।।११।। तस्म्मादेवंव्वित्स्वप्प्याल्लोक्क्यꣳहैतेऽएवतद्देवतेमिथुनेनप्प्रियेणधाम्म्नासमर्द्धयतितस्म्मादुहस्वपन्तन्धुरेवनबोधयेन्नेदेतेदेवतेमिथुनीभवन्त्यौहिनसानीतितस्म्मादुहैतत्सुखजुषः श्लेष्म्मणमिवमुखम्भवत्त्येतेऽएवतद्देवतेरेतःसिञ्चतस्तस्म्माद्द्रेतसऽइदꣳसर्व्वꣳसम्भवतियदिदङ्किञ्च ।।१२।। सऽएषऽएवमृत्त्युर्य्यएषऽएतस्मिन्मण्डलेपुरुषोय्यश्चायन्दक्षिणेक्षन्पुरुषस्तस्यहैतस्यहृदयेपादावतिहतौतौहैतदाच्छिद्योत्क्रामतिसयदोत्क्रामत्त्यथहैतत्त्पुरुषो-

म्म्रियतेतस्म्मादुहैतत्त्प्रेतमाहराच्छेद्यस्येति ।।१३।। एषऽउएवप्प्राणऽएषहीमाः सर्व्वाः प्प्रजाः प्प्रणयतितस्यैतेप्प्राणाः स्वाः सयदास्वपित्त्यथैनमेतेप्प्राणाः स्वाऽअपियन्तितस्म्मात्स्वाप्ययः स्वाप्ययोहवैतꣳस्वप्प्नऽइत्त्याचक्षतेपरोक्षम्परोक्षकामाहिदेवाः ।।१४।। सऽएतैः सुप्तोनकस्यचनव्वेदनमनसासङ्कल्प्पयतिनव्वाचान्नस्यरसंव्विजानातिनप्प्राणेनगन्धंव्विजानातिनचक्षुषापश्यतिनश्श्रोत्रेणशृणोत्येतꣳह्येतेतदापीताभवन्तिसऽएषऽएकः सन्प्रजासबहुधाव्व्याविष्टस्तस्म्मादेकासतीलोकम्पृणासर्व्वमग्ग्निमनुविभवत्त्यथयदेकऽएवतस्म्मादेकः ।।१५।। तदाहरेकोमृत्त्युर्ब्बहवऽइत्त्येकश्श्चबहवश्श्चेतिहब्ब्रूयाद्यइहासावमुत्रतेनैकोथय्यदिहप्प्रजासुबहुधाव्व्याविष्टस्तेनोबहवः ।।१६।। तदाहुरन्तिकेमृत्त्युर्द्दूरा३ऽइत्त्यन्तिकेचदूरेचेतिहब्ब्रूयाद्यदहायमिहाध्यात्मन्तेनान्तिकेथयदसावमुत्रतेनोदूरे ।।१७।। तदेषश्श्लोकोभवत्त्यन्नेभात्त्यपश्श्रितोरसानाꣳसंक्षरेमृतऽइतिय्यदेतन्मण्डलन्तपतितदन्नमथय्यऽएषऽएतस्म्मिन्मण्डलेपुरुषः सोत्तासऽएतस्म्मिन्नन्नेपश्श्रितोभातीत्यधिदेवतम् ।।१८।। अथाध्यात्ममिदमेवशरीरमन्नमथय्योयन्दक्षिणेक्षन्पुरुषः सोत्तासऽएतस्म्मिन्नन्नेपश्श्रितोभाति ।।१९।। तमेतमग्ग्निरित्त्यद्ध्वर्यवऽउपासतेय्यजुरित्त्येषहीदꣳसर्व्वꣳय्युनक्तिसामेतिच्छन्दोगाऽएतस्म्मिन्हीदꣳसर्व्वꣳसमानमुक्त्थमितिबह्वृचाऽएषहीदꣳसर्व्वमुत्त्थापयतिय्यातुरितिय्यातुविदऽएतेनहीदꣳसर्व्वय्यतंव्विषमितिसर्पाः सर्पऽइतिसर्पविदऽऊर्ग्गितिदेवारयिरितिमनुष्ष्यामायेत्त्यसुराः स्वधेतिपितरोदेवजनऽइतिदेवजनविदोरूपमितिगन्धर्व्वागन्धऽइत्त्यप्प्सरसस्तंय्यथायथोपासतेतदेवभवतितद्धैनान्भूत्त्वावतितस्म्मादेनमेवंव्वित्त्सर्व्वैरिवैतैरुपासीतसर्व्वꣳहैतद्भवतिसर्व्वꣳहैनमेतद्भूत्त्वावति ।।२०।। सऽएषत्रीष्टकोग्ग्निर्ऋगेकायजुरेकासामैकातद्याङ्काङ्चात्रर्च्चोपदधातिरुक्क्मऽएवतस्याऽआयतनमथय्यांय्यजुषापुरुषऽएवतस्याऽआयतनमथयाꣳसाम्म्नापुष्करपर्णमेवतस्याऽआयतनमेदन्त्रीष्टकः ।।२१।। तेवाऽएतेऽउभेऽएषचरुक्क्मऽएतच्चपुष्करपर्णमेतम्पुरुषमपीतऽउभेह्यृक्सामेयजुरपीतऽएवम्वेकेष्टकः ।।२२।। सऽएषऽएवमृत्युर्यऽएषऽएतस्म्मि-

न्मण्डलेपुरुषोयश्चायन्दक्षिणेक्षन्पुरुषःसऽएषऽएवंविदऽआत्क्माभवतिसयदेवंविदस्माल्लोकात्प्रेत्यथैतमेवात्मानमभिसम्भवतिसोमृतोभवतिमृत्युर्ह्यस्यात्माभवति ।।२३।। तेनैववाऽइदमग्ग्रेसदासीन्नैवसदासीत् ।। इति मण्डलब्राह्मणम् ।

पाण्योर्गृहीतकुशानां कुशपवित्रयोश्च पूर्वस्यां दिशि त्यागः कर्तव्य। एवं वाङ्मनःशरीरैः सूर्यं नमस्कृत्यासनोपर्युपविशेत् । अनेन यथाशक्तिकृतेन सूर्योपस्थानकर्मणा श्रीभगवान् सविता सूर्यनारायणः प्रीयतां न मम । ॐ तत्सत् ब्रह्मार्पणमस्तु । इति सूर्योपस्थानप्रयोगः ।

ततो ब्रह्मयज्ञं कृत्वा नित्यतर्पणवत्तर्पणञ्च कुर्यात् ।

ऋषिपूजनम्

तत्रादौ [1]**ऋचं वाचमि**ति सूक्तं सर्वैः शिष्यैः सहोपाध्यायेन पठनीयम्।

ऋषिप्रतिष्ठा- ततः **ॐ द्यौः शान्तिः०, ॐ यतोयतः०,** इति

---

[1] तद्यथा- ॐ ऋचंव्वाचम्प्रपद्येमनोयजुःप्प्रपद्येसामप्प्राणम्प्रपद्येचक्षुःश्रोत्रम्प्रपद्ये । व्वागोजःसहौजोमयिप्प्राणापानौ ।।१।। यन्मेच्छिद्रञ्चक्षुषोहृदयस्यमनसोवातितृणम्बृहस्प्पतिर्म्मेतद्दधातु । शन्नोभवतुभुवनस्ययस्पतिः ।।२।। भूर्ब्भुवःस्वःतत्सवितुर्व्वरेण्यम्भर्ग्गोदेवस्यधीमहि । धियोयोनःप्प्रचोदयात् ।।३।। कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयाव्वृता ।।४।। कस्त्वासत्त्योमदानाम्मꣳहिष्ठोमत्त्सदन्धसः । दृढाचिदारुजेव्वसु ।।५।। अभीषुणःसखीनामविताजरितृणाम् । शतम्भवास्यूतिभिः ।।६।। कयात्त्वन्नऽऊत्त्याभिप्प्रमन्दसेव्वृषन् । कयास्तोतृब्भ्यऽआभर ।।७।। इन्द्रोविश्वस्यराजति । शन्नोऽअस्तुद्विपदेशंचतुष्पदे ।।८।। शन्नोमित्रःशंवरुणःशन्नोभवत्त्वर्यमा । शन्नइन्द्रोबृहस्पतिःशन्नोविष्णुरुरुक्क्रमः ।।९।। शन्नोवातःपवताꣳशन्नस्तपतुसूर्यः । शन्नःकनिक्क्रदद्देवःपर्ज्जन्न्योऽअभिवर्षतु ।।१०।। अहानिशंभवन्तुनःशꣳरात्रीःप्प्रतिधीयताम्। शन्नऽइन्द्राग्ग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्व्या । शन्नऽइन्द्रापूषणाव्वाजसातौशामिन्द्रासोमासवितायशंय्योः ।।११।। शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतयें । शंय्योरभिस्स्रवन्तुनः ।।१२।। स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।१३।। आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ।।१४।। योवशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः।।१५।। तस्म्माऽअरङ्गमामवोष्वस्यक्षयायजिन्वथ । आपोजनयथाचनः ।।१६।। द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः । व्वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिः-

शान्तिपाठं पठन्तः अपामार्गमिश्रितैस्त्रिभिस्त्रिभिः कुशैःपृथक् पृथक् गायत्रीं पठित्वा ब्रह्मग्रन्थियुक्तान् सप्तर्षिबटून् कुर्युः । ततः पीठे नवं सदशं धौतं वस्त्रं कदलीपत्रं वा प्रसार्य तस्मिन् प्रागग्रा उदगग्रा वा कुशबटवः स्थापनीयाः। तत आचम्य प्राणानायम्य कुशकुसुमयवजलपाणिर्देशकालौ सङ्कीर्त्य अध्यायोसर्गकर्माङ्गत्वेन ऋषिस्थापनपूजनमहं करिष्ये इति सङ्कल्पं कुर्यात्। ततो गन्धाक्षतपुष्पाणि गृहीत्वा ऋषीन् आवाहयेत् ।

ऋष्यावाहनम् - ॐ भूर्भुवःस्वःकश्यपाय नमः कश्यपमावाहयामि । **भो कश्यप इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।१।। ॐ भूर्भुवः स्वः भरद्वाजाय नमः** भरद्वाजमावाहयामि। **भो भरद्वाज इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।२।। ॐ भूर्ब्भुवःस्वःगौतमाय नमः** गौतममावाहयामि। **भो गौतम इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।३।। ॐ भूर्ब्भुवः स्वः अत्रये नमः** अत्रिमावाहयामि। **भो अत्रे इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।४।। ॐ भूर्ब्भुवः स्वः जमदग्नये नमः** जमदग्निमावाहयामि। **भो जमदग्ने इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।५।। ॐ भूर्ब्भुवः स्वः वसिष्ठाय नमः** वसिष्ठमावाहयामि। **भो वसिष्ठ इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो**

सर्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ।।१७।। दृतेदृꣳहमामित्रस्यमाचक्षुषासर्वाणिभूतानिसमीक्षन्ताम् । मित्रस्याहंचक्षुषासर्वाणिभूतानिसमीक्षे । मित्रस्यचक्षुषासमीक्षामहे ।।१८।। दृतेदृꣳहमा॰ ज्योक्त्रेसन्दृसिजीव्यासञ्ज्योक्त्रेसन्दृशिजीव्यासम् ।।१९।। नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे। अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयपा[illegible]कोऽअस्म्मभ्यꣳशिवोभव ।।२०।। नमस्तेऽअस्तुविद्युतेनमस्तेस्तनयित्क्नवे । नमस्तेभगवन्नस्तुय्यतःस्वःसमीहसे ।।२१।। यतोयतःसमीहसेततोनोऽअभयङ्कुरु। शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः ।।२२।। सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुय्योस्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ।।२३।। तच्चक्षुर्देवहितम्पुरस्तच्छुक्क्रमुच्चरत् । पश्श्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्श्चशरदःशतात् ।।२४।। इति ।

वरदो भव ।।६।। ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रमावाहयामि । **भो विश्वामित्र इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।७।। ॐ भूर्भुवः स्वः अरुन्धत्यै नमः** अरुन्धतीमावाहयामि । **भो अरुन्धति इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखा सुप्रसन्ना वरदा भव ।।८।। ॐ भूर्भुवः स्वः याज्ञवल्क्याय नमः** याज्ञवल्क्यमावाहयामि । **भो याज्ञवल्क्य इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव ।।९।।** (केचित् स्वगोत्रप्रवर्तकप्रवरर्षींश्च पूजयन्ति तदपि युक्तमेव)।

ॐ इमावेवगोतमभरद्वाजावयमेवगोतमोयंभरद्वाजऽइमावेवव्विश्वामित्रजमदग्नीऽअयमेवविश्वामित्रोयंजमदग्निरिमावेवव्वसिष्ठकश्यपावयमेवव्वसिष्ठोयंकश्यपोव्वागेवात्रिर्व्वाचाह्यन्नमद्यतेत्तिर्हवैनामैतद्यदत्रिरितिसर्व्वस्यात्ताभवतिसर्व्वमस्यान्नंभवतिय्यऽएवंव्वेद ।। ततोऽक्षतानादाय **मनोजूतिरि**ति मन्त्रेण ऋषिप्रतिष्ठां कुर्यात् ।

ऋषिप्रतिष्ठा- ॐ मनोजूतिरिति मन्त्रस्याङ्गिरसो बृहस्पतिर्ऋषिर्यजुर्विश्वेदेवा देवता ऋषिप्रतिष्ठापने विनियोगः । **ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु । व्विश्श्वेदेवासऽइहमादयन्तामों३म्प्रतिष्ठ ।।१।। ॐ एषवैप्प्रतिष्ठानामयज्ञोयत्रैतेनय्यज्ञेनयजन्तेसर्व्वमेवप्प्रतिष्ठितम्भवति ।।२।। ॐ प्रतिष्ठा सुप्रतिष्ठितमस्तु ।।३।। ॐ अरुन्धतीसहिताः कश्यपाद्याः सप्तऋषयः सुप्रतिष्ठिता भवन्तु** इत्युच्चार्य ऋषीणामुपर्यक्षतान्प्रक्षिपेत् ।

पूजासङ्कल्पः- आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीतये उत्सर्जनाङ्गत्वेन यथामिलितोपचारैररुन्धतीसहितकश्यपादिसप्तर्षिस्वऋषिपूजनमहं करिष्ये । तदङ्गत्वेन दीपकलशगणेशपूजनं चादौ करिष्ये । इति सङ्कल्प्य स्वकुलाचारानुसारेण दीपं सम्पूज्य कलशस्थापनविधिना कलशं स्थापयित्वा गणेशं सम्पूज्य कलशस्कन्धप्रदेशे गणपत्यादिवनस्पत्यन्तदेवानावाह्य समभ्यर्च्य प्रार्थयेत ।

ऋषिपूजनक्रमः - तत्रादौ न्यासः- **ॐ सप्तऽऋषयः** इति मन्त्रस्यादित्ययाज्ञवल्क्यावृषी सप्तऋषयो देवता जगतीछन्दः, **इदं विष्णुरित्यस्य** मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दः अङ्गन्यासे विनियोगः । **ॐ सप्प्तऽऋषयः- प्प्रतिहिताःशरीरेसप्प्तरक्षन्तिसदमप्प्रमादम् । सप्प्तापःस्वपतोलोकमीयुस्त्तत्रजागृतोऽअस्वप्प्नजौसत्रसदौचदेवौ ।।१।। ॐ इदंव्विष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳫंसुरेस्वाहा ।।२।।** इति मन्त्राभ्यां क्रमेण वामकरे, दक्षिणकरे, वामपादे, दक्षिणपादे, वामजानुनि, दक्षजानुनि, वामकट्याम्, दक्षकट्याम्, नाभौ, हृदये, कण्ठे, वामबाहौ, दक्षबाहौ, मुखे, नेत्रयोः, मूर्ध्नि इति स्वाङ्गेषु न्यासान् विधाय तथैव सप्तर्षिबटुष्वपि न्यासान् कुर्यात् । ततस्ताभ्यामेव मन्त्राभ्यां पुरुषसूक्तमन्त्रैश्च ध्यानावाहनादिषोडशोपचारैः काण्डानुसमयेन अथवा पदार्थानुसमयेन पूजयेत्।

पदार्थानुसमयप्रयोगः- ॐ सप्प्तऽऋषयः०, ॐ इदंव्विष्णुः०,ॐ सहस्त्रशीर्षापुरुषः० ॐ भूर्ब्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यः स्वऋषिभ्यश्च नमः, आवाहनपूर्वकं ध्यानं समर्पयामि ।

आसनम्- सुवर्णघट्टितं दिव्यं नानारत्नसमन्वितम् ।
आसनं रुचिरं यच्च गृह्यतां भो मुनीश्वराः ।।

ॐ सप्तऋ०, इदं विष्णु०, ॐ पुरुषऽएव०, ॐ भूः०, आसनं समर्पयामि ।

पाद्यम्- गङ्गाजलं समानीतं गन्धद्रव्येण संयुतम् ।
पाद्यार्थं प्रतिगृह्णन्तु कश्यपाद्या महर्षयः ।।

ॐ एतावानस्य०, ॐ पाद्यं समर्पयामि ।

अर्घ्यम्- सुवर्णपात्रसंयुक्तं गन्धपुष्पाक्षतैर्युतम् ।
सप्तर्षयः प्रगृह्णन्तु इदमर्घ्यं मयार्पितम् ।।

ॐ त्रिपादूर्ध्व०, ॐ भूः अर्घ्यं समर्पयामि ।

आचमनीयम्- **कर्पूरवासितं तोयं सुवर्णकलशे स्थितम् ।**
दत्तमाचमनीयं च ऋषीणां प्रीतये सदा ।।

ॐ ततोविराट्०, ॐ भूः० आचमनीयं समर्पयामि ।

ॐ भूः० **मधुपर्कं स०। पञ्चामृतमन्त्रैः** ॐ भूः० **पञ्चामृतस्नानं स० ।**

स्नानम्- **सुगन्धद्रव्यसंयुक्तं पवित्रं मङ्गलं जलम् ।**
स्नानार्थं वः समानीतं मुनयः प्रतिगृह्णत ।।

ॐ तस्माद्यज्ञात्०, ॐ भूः स्नानीयं स० । पूर्वपूजां समाप्य **आपोहिष्ठा०** इत्यादिभिः पुरुषसूक्तेन च महास्नानं कारयेत् ।

ॐ भूः० महास्नानं स० ।

वस्त्रम्- **सूक्ष्माण्यतीव शुभ्राणि वस्त्राणि विविधानि च ।**
ऋषयः प्रतिगृह्णन्तु अग्निधौतोत्तरीयकैः ।।

ॐ तस्माद्यज्ञातत्सर्वहुतऽऋचः०, ॐ भूः० वस्त्रं समर्पयामि।

यज्ञोपवीतम्- **नानामन्त्रैः समुद्भूतं कार्पासं ब्रह्मसूत्रकम् ।**
प्रत्येकं दीयते स्वच्छमृषयः प्रतिगृह्यताम् ।।

ॐ तस्मादश्वा०, ॐ भूः० प्रत्येकमिमानि यज्ञोपवीतानि स०।

गन्धम्- **आत्मसन्तापहारञ्च सुगन्धद्रव्यसंयुतम् ।**
चन्दनं तत्प्रयच्छामि ऋषीणां प्रीतिहेतवे ।।

ॐ तय्यज्ञम्०, ॐ भूः० गन्धं स० ।

अक्षताः- **शुभ्रतण्डुलजाः शुभ्राः शङ्खशुभ्रा मनोरमाः ।**
अक्षतान् सम्प्रयच्छामि तान् गृह्णन्तु मुनीश्वराः ।।

ॐ अक्षन्नमीमदन्त०, ॐ भूः अक्षतान् स० ।

सौभाग्यद्रव्यम्- **हरिद्रां कुङ्कुमं चैव कज्जलं भूषणानि च ।**
कङ्कणं कण्ठसूत्रञ्च गृहाण परमेश्वरि ।।

ॐ अहिरिवभोगैःपर्य्येतिबाहूञ्ज्यायाहेतिम्परिबाधमानः । हस्तघ्नो-

विश्श्वावयुनानिविद्वान्पुमान्पुमाꣳसम्परिपातुविश्श्वतः । ॐ भूः, अरुन्धत्यै नमः सौभाग्यद्रव्याणि स० ।

पुष्पम्- **माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमाः ।**
मयार्पितानि पुष्पाणि गृह्णन्तु मुनिपुङ्गवाः ।।

ॐ यत्पुरुषम्०, ॐ भूः० पुष्पाणि स० । ऋतुकालोद्भवानि पुष्पाणि तुलसीदलानि बिल्वपत्राणि कमलानि स० ।

धूपः- **कृष्णागुरुर्गुग्गुलोऽयं सुगन्धश्च दशाङ्गकः ।**
धूपोऽयं कश्यपादिभ्य ऋषिभ्यो दीयतेऽधुना ।।

ॐ ब्राह्मणोस्य०, ॐ भूः० धूपमाघ्रापयामि ।

दीपः- **पञ्चवर्तिसमायुक्तः सर्वमङ्गलशोभनः ।**
मया निवेदितो भक्त्या दीपोऽयं प्रतिगृह्यताम् ।।

ॐ चन्द्रमामनसः०, ॐ भूः० दीपं दर्शयामि ।

नैवेद्यम्- **फलमूलसमायुक्तं नानाशाकसमन्वितम् ।**
शर्कराघृतसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ।।

ॐ नाभ्याऽआसीत्०, ॐ भूः० नैवेद्यं स० । अपोशानार्थे जलं नैवेद्यमध्ये पानीयम् उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनार्थं चन्दनञ्च समर्पयामि ।

फलम्- **नारिकेलं च कूष्माण्डं कदलीकर्कटीफलम् ।**
ऋतुदेशोद्भवं चान्यद्दीयतेऽद्य मुनीश्वराः ।।

ॐ याफलिनीर्याऽअफलाऽअपुष्पाय्याश्श्चपुष्पिणीः । बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः ।। ॐ भूः० फलानि स० ।

ताम्बूलम्- **पूगीफलं सकर्पूरं नागवल्लीदलैर्युतम् ।**
एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

ॐ यत्पुरुषेण०, ॐ भूः० ताम्बूलं स० ।

दक्षिणा- हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।
ॐ हिरण्यगर्भःसम०, ॐ भूः० दक्षिणां स० ।

आरार्तिक्यम्- ब्रह्मिष्ठा ब्रह्मरूपाश्च कश्यपाद्या महर्षयः ।
ब्रह्मप्रज्ञादिदातारः सन्तु मे कीर्तिकर्मणि ।।

ॐ इदꣳहविःप्प्रजननम्मेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये । आत्म्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनि । अग्ग्निःप्प्रजाम्बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्मासुधत्त । ॐ भूः० कर्पूरार्तिक्यं समर्पयामि।

प्रदक्षिणा- यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदे-पदे ।।
ॐ सप्तास्यासन्०, ॐ भूः० प्रदक्षिणां समर्पयामि ।

पुष्पाञ्जलिः- शरणागतदीनार्तपरित्राणपरायणाः ।
रक्षन्तु मुनयः सर्वे मामद्य शणागतम् ।।
सप्तर्षयः शुभाः श्रेष्ठाः सर्वेषाञ्च शुभावहाः ।
पुष्पाञ्जलिं मया दत्तं गृह्णन्तु मुनिसत्तमाः ।।
ॐ य्यज्ञेनय्यज्ञम्०, ॐ भूः० मन्त्रयुक्तपुष्पाञ्जलिं स० ।

प्रार्थना- मन्त्रहीनं क्रियाहीनं भक्तिहीनं मुनीश्वराः ।
यत्पूजितं मया सर्वं परिपूर्णं तदस्तु मे ।।

ॐ भूः० प्रार्थनां स० । अनेन मया वेदोत्सर्जनाङ्गत्वेन कृतेन ध्यानावाहनादिषोडशोपचारपूजनेन अरुन्धतीसहितकश्यादिसप्तर्षिस्वऋषयः प्रीयन्तां न मम । **ॐ तत्सद्ब्रह्मार्पणमस्तु** । इति ऋषिपूजनम् ।

पितृभ्यो यज्ञोपवीतसमर्पणम् - ततः स्वपितृभ्यो यज्ञोपवीतानि दद्यात्। प्राचीनावीतिनो दक्षिणाभिमुखाः सर्वे कुशोदकं गृहीत्वा पुरतो यज्ञोपवीतानि निधाय - ॐ अमुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्यो (द्वितीयगोत्रम्)

अमुकगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽन्येभ्यः कव्यवाडनलादिदिव्यपितृभ्य इमानि यज्ञोपवीतानि स्वधा (स्वाहा) सम्पद्यन्तामिति ऋष्युपरि समर्पयेत् । जीवत्पितृकैरपि पितुः पित्रादिभ्यो मातामहादिभ्यश्च यज्ञोपवीतानि देयानि ।। ततः सव्यं कृत्वा सर्वान् ब्राह्मणान् गन्धादिभिः सम्पूज्य तेभ्यो दक्षिणां दत्वा यज्ञोपवीतानि च दद्युः ।

यज्ञोपवीतधारणम्

अस्मिन्काले यज्ञोपवीतं सर्वैर्धारणीयम् । आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रौतस्मार्तकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नूतनयज्ञोपवीतधारणमहं करिष्ये ।

इदं विष्णुरित्यस्य मेधातिथिर्ऋषिः विष्णुर्देवता गायत्रीछन्दः सूत्रत्रिगुणीकरणे विनियोगः । **ॐ इदंविष्णुर्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा** ।।१।। इति सूत्रं त्रिगुणीकुर्यात् । **आपोहिष्ठे**ति तिसृणां सिन्धुद्वीपऋषिरापो देवता गायत्रीछन्दो यज्ञोपवीतप्रक्षालने विनियोगः।

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ।।२।।

ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ।।३।।

ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः ।।४।।

इति मन्त्रैस्त्रिगुणीकृतं सूत्रं प्रक्षाल्य ऊद्र्ध्ववृत्तं कृत्वा त्रिगुणीकृत्याधोवृत्तं कृत्वा त्रिगुणीकुर्यात् । गायत्र्या अङ्गुलीमूलवेष्टनादौ एकस्मिन् गुणे च्छिन्ने संयोज्यावेष्टयेत् । द्वयोश्छिन्नयोस्तु यावच्छेदं परित्यजेदिति संप्रदायः ।

ततः **ॐ प्राणानांग्रन्थिरसिरुद्रोमाविशान्तकः । तेनान्नेनाप्यायस्वनमोरुद्रायविष्णोवेमृत्योर्मेपाहि** ।। इति शिष्टाचारप्राप्तेन मन्त्रेण यथासम्प्रदायं ब्रह्मग्रन्थियुतं विधाय हरिब्रह्मेश्वरान् नमेत् । ततो दशगायत्रीमन्त्रैरभिमन्त्र्य देशकालौ सङ्कीर्त्य यज्ञोपवीतप्रतिष्ठां करिष्ये । इति सङ्कल्पं कुर्यात् ।

यज्ञोपवीतप्रतिष्ठा- कलशे प्रतिष्ठापनीयानि यज्ञोपवीतानि निधाय प्रणवस्य

ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दः प्रथमतन्तौ **ॐकारा**वाहने विनियोगः । ॐ प्रथमतन्तुदेवतायै **ॐकाराय नमः**, प्रथमतन्तौ **ॐकार**मावाहयामि । **ॐ अग्निन्दूत**मिति मन्त्रस्य विरुपाक्षऋषिरग्निर्देवता गायत्रीच्छन्दो द्वितीयतन्तौ अग्न्यावाहने विनियोगः । **ॐ अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्ब्रुवे । देवाँ२।।ऽआसादयादिह ।।**

ॐ द्वितीयतन्तुदेवतायै अग्नये नमो द्वितीयतन्तौ अग्निमावा०। **नमोऽस्तुसर्पेभ्य** इत्यस्य प्रजापतिर्ऋषिः सर्पा देवता अनुष्टुप्छन्दः तृतीयतन्तौ सर्पावाहने वि० । **ॐ नमोऽस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । य्येऽअन्तरिक्षेय्येदिवितेब्भ्यःसर्प्पेब्भ्योनमः** ।। ॐ तृतीयतन्तुदेवताभ्यः० सर्पेभ्यो नमः तृतीय तन्तौ सर्पानावा०।

वयꣳसोमेत्यस्य बन्धुर्ऋषिः सोमो देवता गायत्रीछन्दश्चतु० तन्तौ सोमावा० वि०। **ॐ व्वयꣳसोमव्व्रतेतवमनस्तनूषुबिब्भ्रतः । प्रजावन्तःसचेमहि** ।।

ॐ चतु० दे० सोमाय नमः चतु०तन्तौ सोममावा० ।। **उदीरता**मित्यस्य शङ्खऋषिः पितरो देवता त्रिष्टुप्छन्दः पञ्चमतन्तौ पित्रावा० वि० । **ॐ उदीरतामवरऽउत्परासऽउन्मद्ध्यमाःपितरःसोम्म्यासः । असुंय्यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ।।**

ॐ पञ्चमतन्तु दे० पितृभ्यो नमः पञ्चमतन्तौ पितृनावा० ।। **प्रजापते**रित्यस्य हिरण्यगर्भ ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः षष्ठतन्तौ प्रजापत्यावा०वि०। ॐ **प्रजापतेनत्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरीताबभूव। यत्त्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् ।।** ॐ षष्ठतन्तुदे० प्रजापतये नमः ष०तन्तौ प्रजापतिमावा० ।

आनोनियुद्भिरित्यस्य वसिष्ठ ऋषिरनिलो देवता त्रिष्टुप्छन्दः सप्तमतन्तौ अनिलावाहने वि०। **ॐ आनोनियुद्भिःशतिनीभिरद्ध्वरꣳसहस्रिणीभिरुपयाहिय्यज्ञम् । व्वायोऽअस्म्मिन्त्सवनेमादयस्वयूयम्पातस्वस्त्तिभिःसदानः।।**

सप्तमतन्तुदे० अनिलाय नमः । सप्तमतन्तौ अनिलमावा० ।

सुगाव इत्यस्यात्रिर्ऋषिर्गृहपतयो देवता आर्षी त्रिष्टुप्छन्दः, अष्टमतन्तौ यमावा०वि० । **ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेदꣳसवनञ्जुषाणाः । भरमाणाव्वहमानाहवीꣳष्यस्म्मेधत्तव्वसवोव्वसूनिस्वाहा ।।** ॐ अष्टमतन्तुदे० यमाय नमः, अष्टमतन्तौ यममावा०।

विश्वेदेवास इत्यस्य मधुच्छन्दा ऋषिर्विश्वेदेवा देवताः त्रिष्टुप्छन्दो नवमतन्तौ विश्वेदेवावा० वि० । **ॐ व्विश्श्वेदेवासऽआगतशृणुतामऽइमꣳहवम् । एदम्बर्हिर्न्निषीदत ।।** ॐ नवमतन्तुदेवतायै विश्वेभ्यो देवेभ्यो नमः, नवमतन्तौ विश्वान् देवानावा०।

ग्रन्थिदेवतावाहनम्- ब्रह्मजज्ञानमित्यस्य प्रजापतिर्ऋषिर्ब्रह्मा देवता त्रिष्टुप्छन्दो ग्रन्थिमध्ये ब्रह्मावा० वि०। **ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः । सबुध्न्याऽउपमाऽअस्याव्विष्ठाःसतश्श्चयोनिमसतश्श्चव्विवः ।।** ॐ प्रथमग्रन्थिदेवतायै ब्रह्मणे नमः प्रथमग्रन्थौ ब्रह्माणमावा०।

इदं व्विष्णुरित्यस्य मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दः द्वितीयग्रन्थौ विष्णवावाहने वि० । **ॐ इदं व्विष्णुः ०** । ॐ द्वितीयग्रन्थिदेवतायै विष्णवे नमः द्वि० ग्रन्थौ विष्णुमावा० ।

त्र्यम्बकमित्यस्य वसिष्ठ ऋषी रुद्रो देवता अनुष्टुप्छन्दः, तृतीयग्रन्थौ रुद्रावा० वि० । **ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ।।** ॐ तृतीयग्रन्थिदेवतायै रुद्राय नमः तृ० ग्रन्थौ रुद्रमावा० ।

ॐ खम्ब्रह्म ० ॐ चतुर्थग्रन्थिदेवतायै परब्रह्मणे नमः चतुर्थग्रन्थौ परब्रह्मावा०, इत्यावाह्य **ॐ प्रणवादिभ्य आवाहितदेवताभ्यो नमः** यथास्थानं न्यसामि । ततस्तन्तुदेवता ग्रन्थिदेवताश्च सम्पूज्य ध्यानं कुर्यात्।

ध्यानम्

प्रजापतेर्यत्सहजं पवित्रम्
कार्पाससूत्रोद्भवब्रह्मसूत्रम् ।
ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं
जपस्य सिद्धिं कुरु ब्रह्मसूत्र(म्) ।।

ॐ युवासुवासाःपरिवीतऽआगात्त्सऽउश्श्रेयान्भवतिजायमानः । तन्धीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः ।। इति ध्यात्वा यज्ञोपवीतानि वक्ष्यमाणमन्त्रैः सूर्याय प्रदर्शयेत् ।

सूर्याय यज्ञोपवीतप्रदर्शनम्- ॐ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।१।। प्रवाव्वृजेसप्प्रयाबर्हिरिषामाविश्प्पतीवव्वीरिटऽइयाते । व्विशामुक्तोरुषसःपूर्व्वहूतौव्वायुःपूषास्वस्तयेनियुत्त्वान् ।।२।। इन्द्रवायूबृहस्प्पतिम्मित्राग्ग्नीपूषणंब्भगम् । आदित्त्यान्मारुतङ्गणम् ।।३।। व्वरुणप्प्राविताभुवन्मित्रोविश्श्वाभिरूतिभिः । करतान्नःसुराधसः ।।४।। इति सूर्याय यज्ञोपवीतानि दर्शयित्वा पुनः कलशे निधाय गायत्र्याभिमन्त्रयेत् । ततो यज्ञोपवीतधारणं कुर्यात् ।

यज्ञोपवीतधारणविनियोगः- एकमुपवीतं गायत्र्या दशकृत्वोऽभिमन्त्रिताभिरद्भिः सिक्त्वा **यज्ञोपवीत**मितिमन्त्रस्य परमेष्ठी ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दः श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थमुपवीतधारणे विनियोगः ।

धारणमन्त्रः - ॐ यज्ञोपवीतम्परमम्पवित्रम्प्रजापतेर्य्यत्त्सहजम्पुरस्तात्। आयुष्ष्यमग्ग्र्यम्प्रतिमुञ्चशुब्भ्रंय्यज्ञोपवीतम्बलमस्तुतेजः ।। ॐ यज्ञोपवीतमसियज्ञस्यत्त्वायज्ञोपवीतेनोपनह्यामि ।। इति मन्त्रं पठित्वा दक्षिणं बाहुमुद्धृत्य वामस्कन्धे निवेशयेत् । एवमेवापरं धारयेत् । तृतीयादिधारणेऽपि सङ्कल्पाद्यावर्त्य तथैव धारयेत् । प्रतियज्ञोपवीतधारणाद्यन्तयोराचमनं कुर्यात्। ततो जीर्णयज्ञोपवीतमनेन मन्त्रेण निष्काशयेत् -

यज्ञोपवीतनिष्काशनम्- **एतावद्दिनपर्यन्तं ब्रह्मत्वं धारितं मया ।**
जीर्णत्वात्तत्परित्यागो गच्छ सूत्र यथासुखम्॥

इति मन्त्रेण शिरोमार्गेण निष्काशयेत् । **"जीर्णयज्ञोपवीतानि शिरोमार्गेण संत्यजेत् ।"** इति सङ्ग्रहोक्तेः । ततो निष्काशितं पुरातनं यज्ञोपवीतं प्रणवव्याहृतिभिरप्सु प्रास्येत् । पश्चाद्यथाशक्ति गायत्रीं जपेत् । अनेन नवयज्ञोपवीतधारणनिमित्तकृतेन यथाशक्ति गायत्रीजपकर्मणा श्रीसविता देवता प्रीयतां न मम । **ॐ तत्सद्ब्रह्मार्पणमस्तु** । **ॐ यस्य स्मृत्या०** इति ।

रक्षाविधानप्रयोगः-

यवान् कुशाँस्तथा दूर्वां सर्षपान् गन्धमक्षतान् ।
गोमयं दधि संयुक्तं कारयेत् ताम्रभाजने ।।

तत्रैव रक्षासूत्रं संस्थाप्य हस्तेनाभिमृश्य पौराणिकमन्त्रान् इमान् पठेत्-

पौराणिकमन्त्राः- **ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।**
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ।।
स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् ।
धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ।।
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् ।
राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ।।
शक्राद्या देवताः सर्वा नमस्कृत्य मुनींस्तथा ।
गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ।।
वसिष्ठं मुनिशार्दूलं विश्वामित्रं महामुनिम् ।
व्यासं कविं नमस्कृत्य सर्वशास्त्रविशारदम् ।।
विद्याधिका ये मुनय आचार्याश्च तपोधनाः ।
सर्वे ते मम यज्ञस्य रक्षां कुर्वन्तु विघ्नतः ।।
प्राचीं रक्षतु गोविन्द आग्नेयीं गरुडध्वजः ।
यामीं रक्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् ।।

केशवो वारुणीं रक्षेद् वायवीं मधुसूदनः ।
उदीचीं श्रीधरो रक्षेद् ऐशानीं तु गदाधरः ।।
ऊर्ध्वं गोवर्धनधरो ह्यधस्ताद् धरणीधरः ।
एवं दश दिशो रक्षेद् वासुदेवो जनार्दनः ।।
यज्ञाग्रे रक्षताच्छङ्खः पृष्ठे पद्मं तथोत्तमम् ।
वामपार्श्वे गदारक्षेद् दक्षिणे तु सुदर्शनः ।।
उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ।
अच्युतः पातु ऋग्वेदं यजुर्वेदमधोक्षजः ।।
कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा ।
उपविष्टाश्च ये विप्रास्ते निरुद्धेन रक्षिताः ।।
यजमानं सपत्नीकं पुण्डरीकविलोचनः ।
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद् हरिः ।।
वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैश्च सर्षपैः ।
कृत्वा पोटलिकां पूर्वं बध्नीयाद् दक्षिणे करे ।।

इति पौराणिकमन्त्रान् पठित्वा वेदमन्त्रान् पठेत् ।

वेदमन्त्राः- तत्रादौ गायत्री ।।१।। ॐ गणानान्त्वा० ।।२।। ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः । सनःपर्षदतिदुर्गाणिविश्वानावेवसिन्धुंदुरितात्यग्निः ।।३।। ॐ सप्तऽऋषयः० ।।४।। ॐ नतद्रक्षाꣳसिनपिशाचास्तरन्ति देवानामोजःप्रथमजꣳह्येतत् । योबिभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुः समनुष्ष्येषुकृणुतेदीर्घमायुः ।।५।। ॐ यदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः । तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्य्यथासम् ।।६।। ॐ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंबलगमुत्त्किरामिय्यम्मेनिष्ट्योय्यममात्त्योनिचखानेदमहन्तंव्वलगमुत्त्किरामिय्यम्मेसमानोयमसमानोनिचखानेदमहन्तंव्वलगमुत्त्किरामिय्यम्मेसबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तंव्वलगमुत्त्किरामिय्यम्मेसजातोयमसजातोनिचखानोत्त्कृत्त्याङ्किरामि ।।७।।

ॐ स्वराडसिसपत्नहासत्रराडस्यभिमातिहा । जनराडसिरक्षोहासर्व्वराडस्यमित्रहा ।।८।। ॐ रक्षोहणोवोव्वलगहनःप्प्रोक्षामिव्वैष्णवान्रक्षोहणोवोव्वलगहनोवनयामिव्वैष्णवान्रक्षोहणोवोव्वलगहनोर्वस्तृणामिव्वैष्णवान्रक्षोहणौवांव्वलगहनाऽउपदधामिव्वैष्णवीरक्षोहणौवांव्वलगहनौपर्य्यूहामिव्वैष्णवमसिव्वैष्णवास्स्थ ।।९।। मानःशꣳसोऽअररुषोधूर्त्तिःप्प्रणङ्ङ्मर्त्त्यस्य । रक्षाणोब्ब्रह्मणस्प्पते ।।१०।। ॐ प्रत्युष्टꣳरक्षःप्प्रत्त्युष्टाऽअरातयोनिष्टप्प्तꣳरक्षोनिष्टप्प्ताऽअरातयः । उर्व्वन्तरिक्षमन्न्वेमि। रक्षोहाव्विश्श्वचर्षणिरभियोनिमयोहते । द्रोणेसधस्स्थमासदत् ।।१२।।
एभिर्वैदिकमन्त्रैः पोटलिकामभिमन्त्र्य कर्मान्ते दक्षिणकरे बध्नीयात् ।

बन्धनमन्त्रौ- येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामभिबध्नामि रक्षे मा चल मा चल ।।१।।

ॐ त्वंयविष्ठदाशुषोनॄँःपाहिश्शृणुधीगिरः। रक्षातोकमुतत्त्मना ।।२।।
रक्षा सुरक्षा भूयात् । इति रक्षाविधानप्रयोगः ।

उत्सर्गतर्पणम्

आचम्य प्राणानायम्य उत्सर्गतर्पणसङ्कल्पं कुर्यात् ।

सङ्कल्पः - देशकालौ सङ्कीर्त्य छन्दसां क्वचिदनध्यायादिषु अशुचित्वेन अनधिकारिभिः शूद्रादिभिः श्रूयमाणत्वेन कृतस्याध्ययनस्य मालिन्योपसर्गनिवृत्तये उत्सर्गाख्यतर्पणं करिष्यामहे इति ।

ऋषितर्पणम्- कश्यपादिऋषीन् स्वगोत्रप्रवरर्षींश्च सम्पूज्य तर्पणं कुर्युः ।

विनियोगः- **विश्वेदेवास** इत्यस्य मधुच्छन्दा ऋषिर्विश्वेदेवा देवता गायत्रीछन्दः;, **विश्वेदेवाःशृणुते**त्यस्य सुहोत्र ऋषिर्विश्वेदेवा देवता जगतीछन्दः, द्वयोर्देवावाहने विनियोगः । **ॐ व्विश्वेदेवासऽआगतशृणुतामऽइमꣳहवम्। एदम्बर्हिर्न्निषीदत ।।१।। ॐ व्विश्श्वेदेवाःशृणुतेमइमꣳहवम्मेयेऽ-**

अन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मि- न्बर्हिषिमादयद्ध्वम् ।।२।। इति मन्त्राभ्यां देवान् आवाह्य तर्पणं कुर्यात्।

देवादितर्पणम्- ॐ देवास्तृप्यन्ताम्, ॐ छन्दाꣳसितृप्यन्ताम्, ॐ वेदास्तृप्यन्ताम्, ॐ ऋषयस्तृप्यन्ताम्, ॐ पुराणाचार्यास्तृप्यन्ताम्, ॐ गन्धर्वास्तृप्यन्ताम्, ॐ इतराचार्य्यास्तृप्यन्ताम्, ॐ अहोरात्रा- स्तृप्यन्ताम्, ॐ अर्द्धमासास्तृप्यन्ताम्, ॐ मासास्तृप्यन्ताम्, ॐ ऋतवस्तृप्यन्ताम्, ॐ संवत्सरः सावयवस्तृप्यताम्, ॐ पितरस्तृप्यन्ताम्, ॐ आचार्य्यास्तृप्यन्ताम् ।

पितृतर्पणम् - ततः प्राचीनावीतिनो भूत्वा वामजानु निपात्य द्विगुणभुग्नान् दक्षिणग्रमूलान् कुशान् गृहीत्वा तिलान् प्रक्षिप्य दक्षिणाभिमुखाः पितृतीर्थेन नामगोत्रोच्चारणपूर्वकं ब्रह्मयज्ञाङ्गतर्पणविधिना पित्रादीँस्तर्पयेयुः । जीवत्पितृकास्तु आप्रकोष्ठात् कृतापसव्यास्तिलमिश्राभिरद्भिराचार्यान्पित्रादीँस्तर्पयेयुः। तत्रैवं प्रकारः अमुकगोत्रा आचार्यपितरस्तृप्यध्वं स्वधा इति प्रयोगः । अमुकगोत्रा अस्मत्पितरोऽमुकशर्माणो वसुस्वरूपास्तृप्यध्वम् इति त्रिः । तथैव पितामहप्रपितामहाभ्यां मात्रादिभ्यो मातामहादिभ्योऽन्येभ्योऽपि पितृभ्यो दद्युः । ततः सव्यं कृत्वा **अयम्पुर** इत्यादिमन्त्रैर्मन्त्रोक्तदेवतास्तर्पयेयुः।

विनियोगः - तद्यथा **अयम्पुर** इत्यादीनां पञ्चानां साध्या ऋषयः, प्राणभृतो देवता, यजूंषि मूर्द्धादिद्वयोर्देवा ऋषयो, लिङ्गोक्ता देवताः, यजूंषि, **एवश्छन्द** इत्यादि षोडाशानां परमेष्ठी ऋषिर्लिङ्गोक्ता देवता यजूंषि **सप्तऽऋषय** इत्यस्यादित्ययाज्ञवक्ल्यावृषी सप्तऋषयो देवता जगतीछन्दः सर्वेषामृषितर्पणे विनियोगः । ततः ऋष्युपरि तर्पणं कुर्युः ।

ऋषितर्पणमन्त्राः- ॐ अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोव्वसन्तःप्प्राणा- यनोगायत्रीव्वासन्तीगायत्र्यैगायत्रङ्गायत्रादुपाꣳशोस्त्रिवृत्त्रिवृतोरथन्तरं- व्वसिष्ठऽऋषिःप्रजापतिगृहीतयात्त्वयाप्प्राणङ्गृह्णामिप्प्रजाब्भ्यः ।।१।।

ॐ मन्त्रोक्ता ऋषयस्तृप्यन्ताम् ।

ॐ अयन्दक्षिणाद्विश्श्वकर्म्मातस्यमनोवैश्श्वकर्म्मणङ्ग्रीष्म्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभः स्वारꣳस्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः प्प्रजापतिगृहीतयात्त्वयामनोगृह्णामिप्प्रजाब्भ्यः ॥२॥ अयम्पश्श्चाद्विश्श्वव्यचास्तस्यचक्षुर्वैश्श्वव्यचसंवर्षाश्श्चाक्षुष्य्योजगतीवार्षीजगत्त्याऽऋक्सममृक्क्समाच्छुक्क्रः शुक्क्रात्सप्प्तदशः सप्प्तदशाद्वैरूपञ्जमदग्ग्निर्ऋषिः प्प्रजापतिगृहीतयात्त्वयाचक्षुर्गृह्णामिप्प्रजाब्भ्यः ॥३॥ इदमुत्तरात्स्वस्तस्यश्श्रोत्रꣳसौवꣳशरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थीमन्थिनऽएकविꣳशएकविꣳशाद्वैराजंविश्श्वामित्रऽऋषिः प्प्रजापतिगृहीतयात्त्वयाश्श्रोत्रङ्गृह्णामिप्प्रजाब्भ्यः ॥४॥ इयमुपरिमतिस्तस्यैवाङ्ङ्मात्त्याहेमन्तोवाच्च्यः पङ्क्क्तिर्हैमन्तीपङ्क्क्त्यैनिधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणात्त्रिणवत्रयस्त्रिꣳशौत्रिणवत्रयस्त्रिꣳशाब्भ्याꣳशाक्करैवतेविश्श्वकर्म्मऽऋषिः प्प्रजापतिगृहीतयात्त्वयावाचङ्गृह्णामिप्प्रजाब्भ्योलोकन्ताऽइन्द्रम् ॥५॥ लोकम्पृणच्छिद्द्रम्पृणाथोसीदध्रुवात्त्वम् । इन्द्राग्ग्नीत्त्वाबृहस्प्पतिरस्मिन्न्योनावसीषदन् ॥६॥ ताऽअस्यसूददोहसः सोमꣳश्श्रीणन्तिपृश्नयः । जन्मन्देवानांविशस्त्रिष्ष्वारोचनेदिवः ॥७॥ इन्द्रंविश्श्वाऽअवीवृधन्त्समुद्द्रव्यचसङ्गिरः । रथीतमꣳरथीनांवाजानाꣳसत्त्पतिम्पतिम् ॥८॥ मूर्द्धावयः प्प्रजापतिश्छन्दः क्षत्त्रंवयोमयन्दञ्छन्दोविष्टम्भोवयोधिपतिश्छन्दोविश्श्वकर्म्मावयः परमेष्ठीच्छन्दोबस्तोवयोविबलञ्छन्दोवृष्णिर्वयोविशालञ्छन्दः पुरुषोवयस्तन्द्रञ्छन्दोव्याघ्रोवयोनाधृष्टञ्छन्दः सिꣳहोवयश्छदिश्छन्दः पष्ठवाड्वयोबृहतीच्छन्दऽउक्षावयककुप्छन्दऽऋषभोवयः सुतोबृहतीच्छन्दोनड्वान्वयः ॥९॥ अनड्वान्वयः पङ्क्क्तिश्छन्दोधेनुर्वयोजगतीच्छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दोदित्त्यवाड्वयोविराड्छन्दः पञ्चाविर्वयोगायत्त्रीच्छन्दस्त्रिवत्सोवयऽउष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम् ॥१०॥(६/७/८) माच्छन्दः प्रमाच्छन्दः-प्प्रतिमाच्छन्दोऽअस्त्रीवयश्छन्दः पङ्क्तिश्छन्दऽउष्णिक्छन्दोबृहती-

च्छन्दोऽनुष्टुप्छन्दोव्विराड्छन्दोगायत्रीच्छन्दस्त्रिष्टुप्छन्दोजगतीच्छन्दः ।।११।।
पृथिवीच्छन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दः समाश्छन्दोनक्षत्राणिच्छन्दोव्वाक्-
छन्दोमनश्छन्दः कृषिश्छन्दोहिरण्यञ्छन्दोगौश्छन्दोजाच्छन्दोश्वच्छन्दः ।।१२।।
अग्निर्द्देवताव्वातोदेवतासूर्य्योदेवताचन्द्रमादेवताव्वसवोदेवतारुद्रादेवता-
दित्त्यादेवतामरुतोदेवताव्विश्श्वेदेवादेवताबृहस्प्पतिर्द्देवतेन्द्रोदेवताव्वरुणो-
देवता ।।१३।। एवश्छन्दोवरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽ-
आच्छच्छन्दोमनश्छन्दोव्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः सरिरञ्छन्दः-
ककुप्छन्दस्त्रिककुप्छन्दः काव्यञ्छन्दोऽअङ्ङ्कुपञ्छन्दोक्षरपङ्ङ्क्तिश्छन्दः-
पदपङ्ङ्क्तिश्छन्दोव्विष्टारपङ्ङ्क्तिश्छन्दः क्षुरोब्भ्रजश्छन्दऽआच्छच्छन्दः प्रच्छ-
च्छन्दः ।।१४।। आच्छच्छन्दः प्रच्छच्छन्दः संय्यच्छन्दोव्वियच्छन्दोबृह-
च्छन्दोरथन्तरञ्छन्दोनिकायश्छन्दोव्विवधश्छन्दोगिरश्छन्दोब्भ्रजश्छन्दः सꣳ-
स्तुप्छन्दोनुष्टुप्छन्दऽएवश्छन्दोव्वरिवश्छन्दोव्वयश्छन्दोव्वयस्कृच्छन्दोव्विष्प-
र्द्धाच्छन्दोव्विशालञ्छन्दश्छदिश्छन्दोदूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअङ्ङ्काङ्ङ्क-
ञ्छन्दः ।।१५।। रश्मिनासत्त्यायसत्त्यञ्जिन्वप्प्रेतिनाधर्म्मणाधर्म्मञ्जिन्वा-
न्वित्त्यादिवादिवञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्रतिधिनापृथिव्व्या-
पृथिवीञ्जिन्वव्विष्टम्भेनव्वृष्ट्याव्वृष्टिञ्जिन्वप्प्रवयाहश्शाहर्ज्जिन्वानु-
यारात्र्यारात्रीञ्जिन्वोशिजाव्वसुब्भ्योव्वसूञ्जिन्वाप्प्रकेतेनादित्त्येब्भ्यऽ
आदित्त्याञ्जिन्वतन्तुनारायः ।।१६।। तन्तुनारायस्प्पोषेणरायस्प्पोषञ्जि-
न्वसꣳसर्प्पेणश्श्रुतायश्श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्ज्जिन्वोत्तमेनतनूभि-
स्तनूर्ज्जिन्वव्वयोधसाधीतेनाधीतञ्जिन्वाभिजितातेजसातेजोजिन्व ।।१७।।
प्रतिपदसिप्प्रतिपदेत्त्वानुपदस्यनुपदेत्त्वासम्पदसिसम्पदेत्त्वातेजोसितेजसे-
त्त्वात्रिवृदसि ।।१८।। त्रिवृदसित्रिवृतेत्त्वाप्प्रवृदसिप्प्रवृतेत्त्वाव्विवृदसिव्विवृते-
त्त्वासवृदसिसवृतेत्त्वाक्क्रमोस्याक्क्रमायत्त्वासङ्ङ्क्रमोसिसङ्ङ्क्रमायत्त्वो-
त्क्रमोस्युक्रमायत्त्वोत्क्रान्तिरस्युत्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्व ।।१९।।
राज्ञ्यसिप्प्राचीदिग्ग्वसवस्तेदेवाऽअधिपतयोग्ग्निर्हेतीनाम्प्रतिधर्त्तात्रिवृत्त्वा-

स्तोमः पृथिव्याꣳश्रयत्त्वाज्ज्यमुक्क्थमव्व्यथायैस्तब्भ्नातुरथन्तरꣳसाम-
प्प्रतिष्ठित्त्याऽ अन्तरिक्षऽ ऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्म्णा-
प्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गे-
लोकेयजमानञ्चसादयन्तु ।।२०।। व्विराडसिदक्षिणादिग्ग्रुद्रास्तेदेवाऽ-
अधिपतयऽ इन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याꣳश्रयतु-
प्रऽउगमुक्क्थमव्व्यथायैस्तब्भ्नातुबृहत्त्सामप्प्रतिष्ठित्त्याऽ अन्तरिक्षऽ ऋषयस्त्वा-
प्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वे-
संव्विदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ।।२१।। सम्म्राडसि-
प्प्रतीचीदिगादित्त्यास्तेदेवाऽ अधिपतयोव्वरुणोहेतीनाम्प्रतिधर्त्तासप्तदशस्त्वा-
स्तोमः पृथिव्याꣳश्रयतुमरुत्त्वतीयमुक्क्थमव्व्यथायैस्तब्भ्नातुव्वैरूपꣳसाम-
प्प्रतिष्ठित्त्याऽ अन्तरिक्षऽ ऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्म्णा-
प्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेलोके-
यजमानञ्चसादयन्तु ।।२२।। स्वराडस्युदीचीदिङ्ङ्मरुतस्तेदेवाऽ अधि-
पतयः सोमोहेतीनाम्प्रतिधर्त्तैकविꣳशस्त्वास्तोमः पृथिव्याꣳश्रयतुनिष्के-
वल्ल्यमुक्क्थमव्व्यथायैस्तब्भ्नातुव्वैराजꣳसामप्प्रतिष्ठित्त्याऽ अन्तरिक्षऽ ऋषय-
स्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्च-
तेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ।।२३।।
अधिपत्न्यसिबृहतीदिग्विश्वेतेदेवाऽ अधिपतयोबृहस्पतिर्हेतीनाम्प्रति-
धर्त्तात्रिणवत्रयस्त्रिꣳशौत्त्वास्तोमौपृथिव्याꣳश्रयतांव्वैश्वदेवाग्निमारुतेऽ-
उक्क्थेऽ अव्व्यथायैस्तब्भ्नीताꣳशाक्क्वररैवतेसामनीप्प्रतिष्ठित्त्याऽ अन्तरिक्षऽ-
ऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपति-
श्चतेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ।।२४।।
अयम्पुरोहरिकेशः सूर्य्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्चसेनानीग्ग्रा-
मण्यौ । पुञ्जिकस्त्थलाचक्रतुस्त्थलाचाप्सरसौदङ्क्ष्णवः पशवोहेतिः-
पौरुषेयोव्वधः प्प्रहेतिस्तेब्भ्योनमोऽ अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मो-

यश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥२५॥ अयन्दक्षिणाविश्श्वकर्म्मातस्यरथस्वनश्श्चरथेचित्रश्श्चसेनानीग्ग्रामण्यौ । मेनकाचसहजन्न्याचाप्प्सरसौय्यातुधानाहेतीरक्षाꣳसिप्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेय्यन्द्विष्म्मोयश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥२६॥ अयम्पश्श्चाविश्श्वव्व्यचास्तस्यरथप्प्रोतश्श्चासमरथश्श्चसेनानीग्ग्रामण्यौ । प्रम्म्लोचन्तीचानुम्म्लोचन्तीचाप्प्सरसौव्व्याग्घ्राहेतिःसर्प्पाःप्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेय्यन्द्विष्म्मोयश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥२७॥ अयमुत्तरात्त्संय्यद्वसुस्तस्यतार्क्ष्यश्श्चारिष्टनेमिश्श्चसेनानीग्ग्रामण्यौ । व्विश्श्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोय्यश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥२८॥ अयमुपर्य्यर्व्वाग्ग्वसुस्तस्यसेनजिच्चसुषेणश्श्चसेनानीग्ग्रामण्यौ । उर्व्वशीचपूर्व्वचित्तिश्श्चाप्प्सरसाववस्स्फूर्ज्जन्हेतिर्व्विद्युत्त्प्रहेतिस्तेब्भ्योन्नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोय्यश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥२९॥

ॐ मन्त्रोक्ता ऋषयस्तृप्यन्ताम् ।

वंशब्रुवणम्

ॐ अथवꣳशः समानमासाञ्जीवीपुत्त्रात्त्साञ्जीवीपुत्त्रोमाण्डूकायनेर्म्माण्डूकायनिर्म्माण्डव्यान्माण्डव्यःकौत्त्सात्त्कौत्त्सोमाहित्त्थेर्म्माहित्त्थिर्व्वामकक्षायणाद्वामकक्षायणोव्वात्त्स्याद्वात्त्स्यःशाण्डिल्ल्याच्छाण्डिल्ल्यःकुश्श्रेकुश्श्रिर्य्यज्ञवचसोराजस्तम्बायनाद्यज्ञवचाराजस्तम्बायनस्तुरात्त्कावषेयात्तुरःकावषेयःप्प्रजापतेःप्प्रजापतिर्ब्ब्रह्मणोब्ब्रह्मस्वयम्भुब्ब्रह्मणेनमः ॥१॥

ॐ वꣳशोक्ता ऋषयस्तृप्यन्ताम् ।

ॐ अथवꣳशस्तदिदंवयꣳशौर्प्पणाय्याच्छौर्प्पणाय्योगौतमाद्गौतमोव्वात्स्याद्वात्स्योव्वात्त्स्याच्चपाराशर्य्याच्चपाराशर्य्यःसाङ्कृत्त्याच्चभारद्वाजाच्चभारद्वाजऽऔदवाहेश्श्चशाण्डिल्ल्याच्चशाण्डिल्ल्योबैजवापाच्चगौत-

माच्चगौतमोबैजवापायनाच्चवैष्टपुरेयाच्चवैष्टपुरेयःशाण्डिल्ल्याच्चरौहिणायनाच्चरौहिणायनःशौनकाच्चात्रेयाच्चरैब्भ्याच्चरैब्भ्यःपौतिमाष्ष्यायणाच्चकौण्डिन्न्यायनाच्चकौण्डिन्न्यायनःकौण्डिन्न्यात्त्कौण्डिन्न्यःकौण्डिन्न्यात्त्कौण्डिन्न्यःकौण्डिन्न्याच्चाग्ग्निवेश्याच्च ।।२।। आग्ग्निवेश्श्यसैतवात्सैतवःपाराशर्य्यात्त्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्द्वाजाद्भारद्वाजोभारद्द्वाजाच्चासुरायणाच्चगौतमाच्चगौतमोभारद्द्वाजाद्भारद्द्वाजोबैजवापायनाद्बैजवापायनःकौशिकायनेःकौशिकायनिर्घृतकौशिकाद्घृतकौशिकःपाराशर्य्यायणात्त्पाराशर्य्यायणःपाराशार्य्यात्त्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्द्वाजाद्भारद्वाजोभारद्द्वाजाच्चासुरायणाच्चयास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्ब्भारद्द्वाजाद्भारद्द्वाजऽआत्रेयात् ।।३।। आत्रेयोमाण्टेर्म्माण्टिर्ग्गौतमाद्गौतमगोतमाद्गौतमोव्वात्त्स्याद्वात्त्स्यःशाण्डिल्ल्याच्छाण्डिल्ल्यःकैशोर्य्यात्त्काप्प्यात्त्कैशोर्य्यःकाप्प्यःकुमारहारितात्त्कुमारहारितोगालवाद्गालवोव्विदर्ब्भीकौण्डिन्न्याद्विदर्ब्भीकौण्डिन्न्योव्वत्त्सनपातोबाब्भ्रवाद्वत्त्सनपाद्बाब्भ्रवःपथःसौभरात्पन्थाःसौभरोयास्यादाङ्गिरसाद यास्यऽआङ्गिरसऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रोव्विश्श्वरूपात्त्वाष्ट्राद्विश्श्वरूपस्त्वाष्ट्रोश्श्विब्भ्यामश्श्विनौदधीचऽआथर्व्वणाद्दध्यङ्ङाथर्व्वणोदैवादथर्वादैवोमृत्त्योःप्प्राद्ध्वꣳसनान्मृत्त्युःप्प्राद्ध्वꣳसनःप्प्राद्ध्वꣳसनात्त्प्राद्ध्वꣳसनऽएकर्षेरेकर्षिर्व्विप्प्रजित्तेर्व्विप्प्रजित्तिर्व्यष्टेर्व्यष्टिःसनारोःसनारुःसनातनात्त्सनातनःसनगात्त्सनगःपरमेष्ठिनःपरमेष्ठीब्ब्रह्मणोब्रह्मस्वयम्भुब्ब्रह्मणेनमः ।।४।। ॐ वꣳशोक्ता ऋषयस्तृप्यन्ताम्।

ॐ अथवꣳशस्त्तदिदंवयꣳशौर्प्पणाय्याच्छौर्प्पणाय्योगौतमाद्गौतमोव्वात्स्याद्वात्त्स्योव्वात्त्स्याच्चपाराशर्य्याच्चपाराशर्य्यःसाङ्कृत्त्याच्चभारद्द्वाजाच्चभारद्द्वाजऽऔदवाहेश्श्चशाण्डिल्ल्याच्चशाण्डिल्ल्योब्बैजवापाच्चगौतमाच्चगौतमोवैजवापायनाच्चवैष्टपुरेयाच्चवैष्टपुरेयःशाण्डिल्ल्याच्चरौहिणायनाच्चरौहिणायनःशौनकाच्चजैवन्तायनाच्चरैब्भ्याच्चरैब्भ्यःपौतिमाष्ष्या-

यणाच्चकौण्डिन्न्यायनाच्चकौण्डिन्न्यायनःकौण्डिन्न्याभ्याङ्कौडिन्न्यऽऔर्णवाभेभ्यऽऔर्णवाभाःकौण्डिन्न्यात्त्कौण्डिन्न्यःकौण्डिन्न्यात्कौण्डिन्यःत्त्कौण्डिन्न्याच्चाग्निवेश्याच्च ।।५।। आग्निवेश्यःसैतवात्त्सैतवःपाराशर्य्यात्त्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्वाजाद्भारद्वाजोभारद्वाजाच्चासुरायणाच्चगौतमाच्चगौतमोभारद्वाजाद्भारद्वाजोबलाकाकौशिकाद्बलाकाकौशिकःकाषायणात्त्काषायणःसौकरायणात्त्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिःसायकायनात्त्सायकायनःकौशिकायनेःकौशिकायनिर्घृतकौशिकाद्घृतकौशिकःपाराशर्य्यायणात्पाराशर्यायणःपाराशर्यात्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्वाजाद्भारद्वाजोभारद्वाजाच्चासुरायणाच्चयास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भाजऽआत्रेयात् ।।६।। आत्रेयादात्रेयोमाण्टेर्म्माण्टिर्गौतमाद्गौतमोगौतमाद्गौतमोवात्स्याद्वात्स्यःशाण्डिल्ल्याच्छाण्डिल्ल्यःकैशोर्य्यात्त्काप्यात्त्कैशोर्यःकाप्यःकुमारहारितात्त्कुमारहारितोगालवाद्गालवोविदर्भीकौण्डिन्न्याद्विदर्भीकौण्डिन्न्योवत्सनपातोबाभ्रवाद्वत्सनपाद्बाभ्रवःपथःसौभरात्पन्थाःसौभरोयास्यादाङ्गिरसाद्यास्यऽआङ्गिरसऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रोविश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोश्विभ्यामश्विनौदधीचऽआथर्वणाद्दध्यङ्ङाथर्वणोदैवादथर्वादैवोमृत्योःप्राध्वꣳसनान्मृत्युःप्राध्वꣳसनःप्रध्वꣳसनात्प्रध्वꣳसनऽएकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्यष्टिःसनारोःसनारुःसनातनात्सनातनःसनगात्सनगःपरमेष्ठिनःपरमेष्ठीब्रह्मणोब्रह्मस्वयम्भुब्रह्मणेनमः ।।७।। ॐ वꣳशोक्ता ऋषयस्तृप्यन्ताम् ।

ॐअथवꣳशस्तदिदंवयम्भारद्वाजीपुत्राद्भारद्वाजीपुत्रोवात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रःपाराशरीपुत्रात्त्पाराशरीपुत्रोगार्ग्गीपुत्राद्गार्ग्गीपुत्रःपाराशरीकौण्डिनीपुत्रात्त्पाराशरीकौण्डिनीपुत्रोगार्ग्गीपुत्राद्गार्ग्गीपुत्रोगार्ग्गीपुत्राद्गार्ग्गीपुत्रोबाडवेयीपुत्राद्बाडवेयीपुत्रोमौषिकी-

पुत्रान्मौषिकीपुत्रोहारिकर्णीपुत्राद्धारिकर्णीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः ।।८।। काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रोबौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रोव्वार्षगणीपुत्राद्वार्षगणीपुत्रोगौतमीपुत्राद्गौतमीपुत्रऽ आत्रेयीपुत्रादात्रेयीपुत्रोगौतमीपुत्राद्गौतमीपुत्रोव्वात्सीपुत्राद्वात्सीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रोव्वार्कारुणीपुत्राद्वार्कारुणीपुत्रऽ आर्त्तभागीपुत्रादार्त्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः साङ्कृतीपुत्रात्साङ्कृतीपुत्रः ।।९।। आलम्बीपुत्रादालम्बीपुत्रऽ आलम्बायनीपुत्रादालम्बायनीपुत्रोजायन्तीपुत्राज्जायन्तीपुत्रोमाण्डूकायनीपुत्रान्माण्डूकायनीपुत्रोमाण्डूकीपुत्रान्माण्डुकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रोराथीतरीपुत्राद्राथीतरीपुत्रः क्क्रौञ्चिकीपुत्राभ्याङ्क्रौञ्चिकीपुत्रौबैदभृतीपुत्राद्बैदभृतीपुत्रोभालुकीपुत्राद्भालुकीपुत्रः प्प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्साञ्जीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ।।१०।। प्राश्नीपुत्रादासुरिवासिनः प्प्राश्नीपुत्रऽ आसुरायणादासुरायणऽ आसुरेरासुरिर्य्याज्ञवल्क्याद्याज्ञवल्क्यऽ उद्दालकादुद्दालकोरुणादरुणऽ उपवेशेरूपवेशिः कुश्श्रेः कुश्श्रिर्व्वाजश्रवसोव्वाजश्श्रवाजिह्वावतोबाध्योगाज्जिह्वावान्बाध्योगोसिताद्वार्षगणादसितोव्वार्षगणोहरितात्कश्यपाद्धरितः कश्यपः शिल्प्यात्कश्यपाच्छिल्प्यः कश्यपः कश्यपान्नैर्ध्रुवेः कश्यपोनैर्ध्रुविर्व्वाचोव्वागम्भिण्याऽ अम्भिण्यादित्त्यादादित्त्यानीमानिशुक्लानियजूꣳषिव्वाजसनेयेनय्याज्ञवल्क्येनाक्ख्यायन्ते ।।११।। ॐ वृहःशोक्ता ऋषयस्तृप्यन्ताम् ।

ॐ इमावेवगोतमभरद्वाजावयमेवगोतमोयम्भरद्वाजऽ इमावेवविश्श्वामित्रजमदग्नीऽ अयमेवविश्श्वामित्रोयञ्जमदग्निरिमावेवव्वसिष्ठकश्यपावयमेवव्वसिष्ठोयङ्कश्यपोव्वागेवात्रिर्व्वाचाह्यन्नमद्यतेत्तिर्हवैनामैतद्यदत्रिरितिसर्व्वस्यात्ताभवतिसर्व्वस्यान्नम्भवतियऽ एवंव्वेद ।।१।। ॐ ब्राह्मणोक्ता ऋषयस्तृप्यन्ताम् ।

एवमृषितर्पणं विधाय आचार्यः शिष्याश्च **ॐकार**व्याहृतिपूर्वां सावित्रीञ्चतुः पठेयुः । तथाहि- प्राङ्मुख उपविष्टो गुरुः **ॐकार**व्याहृतिं पूर्वां सावित्रीं चतुः पठित्वा, प्रत्यङ्मुखोपविष्टान् शिष्यान् मन्त्रब्राह्मणयोरध्यायादीन् पाठयेत् ।

ॐ भूर्भुवःस्वःतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि । धियोयोनःप्प्रचोदयात् ।।

अध्यायादिमन्त्राः

हरिः ॐ इषेत्त्वा । इषेत्त्वोर्ज्जेत्त्वाव्वायवस्त्थदेवोवःसवितापप्रार्प्पयतुश्श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोद्ध्रुवाऽअस्म्मिन्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि ।।१।। कृष्णोस्याखरेष्ठोग्ग्नयेत्त्वाजुष्टंम्प्रोक्षामिव्वेदिरसिबर्हिषेत्त्वाजुष्टाम्प्रोक्षामिबर्हिरसिस्रुग्ग्भ्यस्त्वाजुष्टम्प्रोक्षाम्म्यदित्त्यैव्युन्दनम् ।।२।। समिधाग्ग्निन्दुवस्यतघृतैब्बोधयतातिथिम् । आस्म्मिन्हव्याजुहोतन ।।३।। एदमगन्मदेवयजनम्पृथिव्याय्यत्रदेवासोऽअजुषन्तव्विश्श्वे । ऋक्क्सामाब्भ्याꣳसन्तरन्तोयजुर्ब्भीरायस्पोषेणसमिषामदेम । इमाऽआपःशमुमेसन्तुदेवीरोषधेत्रायस्वस्वधितेमैनꣳहिꣳसीः ।।४।। अग्ग्नेस्तनूरसिव्विष्णवेत्त्वासोमस्यतनूरसिव्विष्णवेत्त्वातिथेरातित्थ्यमसिव्विष्णवेत्त्वाश्श्येनायत्त्वासोमभृतेव्विष्णवेत्त्वाग्ग्नयेत्त्वारायस्पोषदेव्विष्णवेत्त्वा ।।५।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि । यवोसिय्यवयास्म्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाःपितृषदनाःपितृषदनमसि ।।६।। व्वाचस्पतयेपवस्वव्वृष्णोऽअꣳशुब्भ्याङ्गभस्तिपूतः । देवोदेवेब्भ्यःपवस्वयेषाम्भागोसि ।।७।। उपयामगृहीतोस्यादित्त्येब्भ्यस्त्वा । विष्णऽउरुगायैषतेसोमस्तꣳरक्षस्वमात्त्वादभन् ।।८।। देवसवितःप्प्रसुव-

यज्ञम्प्रसुवयज्ञपतिम्भगाय । दिव्योगन्धर्व्वःकेतपूःकेतन्नःपुनातुव्वाचस्प्पतिर्व्वाजन्नःस्वदतुस्वाहा ।।९।। अपोदेवामधुमतीरमगृब्भ्णन्नूर्ज्जस्वतीराजस्वश्चितानः । याभिर्म्मित्रावरुणावब्भ्यषिञ्चन्न्याभिरिन्द्रमनयन्नत्त्यरातीः ।।१०।। युञ्जानःप्प्रथमम्मनस्तत्त्वायसविताधियः । अग्ग्नेज्ज्योतिर्न्निचाय्यपृथिव्व्याऽअद्ध्याभरत् ।।११।। दृशानोरुक्क्मऽउर्व्व्याव्व्यद्यौदुर्म्मर्षमायुःश्श्रियेरुचानः । अग्ग्निरमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्त्सुरेताः ।।१२।। मयिगृह्णाम्म्यग्ग्नेऽअग्ग्निꣳरायस्प्पोषायसुप्प्रजास्त्त्वायसुबीर्य्याय ।। मामुदेवताःसचन्ताम् ।।१३।। ध्रुवक्षितिद्ध्रुवयोनिद्ध्रुवासिद्ध्रुवंय्योनिमासीदसाधुया । उक्ख्यस्यकेतुम्प्रथमञ्जुषाणाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वा ।।१४।। अग्ग्नेजाताम्प्प्रणुदानःसपत्नान्प्प्रत्त्यजातान्नुदजादवेदः । अधिनोब्ब्रूहिसुमनाऽअहेडँस्तवस्यामशर्म्मस्त्त्रिवरुथऽउद्भौ ।।१५।। नमस्तेरुद्द्रमन्न्यवऽउतोतऽइषवेनमः । बाहुब्भ्यामुततेनमः ।।१६।। अश्म्मन्नूर्ज्जम्प्पर्व्वतेशिश्श्रियाणामद्भ्यऽओषधीब्भ्योव्वनस्प्पतिब्भ्योऽअधिसम्भृतम्प्पयः । तान्नऽइषमूर्ज्जन्धत्तमरुतःसꣳरराणाऽअश्म्मँस्तेक्षन्मयितऽऊर्ग्ग्यन्द्विष्म्मस्तन्तेशुगृच्छतु ।।१७।। व्वाजश्श्चमेप्प्रसवश्श्चमेप्प्रयतिश्श्चमेप्प्रसितिश्श्चमेधीतिश्श्चमेक्क्रतुश्श्चमेस्वरश्श्चमेश्श्लोकश्श्चमेश्श्रवश्श्चमेश्श्रुतिश्चमेज्ज्योतिश्श्चमेस्वश्श्चमेयज्ञेनकल्प्पन्ताम् ।।१८।। स्वाद्द्वीन्त्वास्वादुनातीव्व्रान्तीव्व्रेणामृतममृतेन । मधुमतीम्मधुमतासृजामिसꣳसोमेन । सोमोस्यश्श्विब्भ्याम्पच्च्यस्वसरस्वत्त्यैपच्च्यस्वेन्द्द्रायसुत्राम्म्णेपच्च्यस्व ।।१९।। क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि । मात्त्वाहिꣳसीन्मामाहिꣳसीः ।।२०।। इमम्मेव्वरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।।२१।। तेजोसिशुक्क्रममृतमायुष्प्पाऽआयुर्म्मेपाहिदेवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्यामाददे ।।२२।। हिरण्ण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत्। सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ।।२३।। अश्श्वस्तू-

परोगोमृगस्तेप्प्रजापत्त्योः कृष्णग्ग्रीवऽआग्नेयोरराटेपुरस्तात्सारस्वतीमेष्य-
धस्त्वाद्धन्न्वोराश्श्विनावधोरामौबाह्वोः सौमापौष्णः श्यामोनाब्भ्याꣳसौर्य्य-
यामौश्श्वेतश्श्चकृष्णश्श्चपार्श्श्वयोस्त्वाष्ट्रौलोमशसक्क्थौसक्क्थ्योर्व्वायव्यः श्वेतः-
पुच्छऽइन्द्रयस्वपस्यायव्वेहद्द्वैष्णवोव्वामनः ।।२४।। शादन्दद्भिरवका-
न्दन्तमूलैर्मृदम्बस्वैस्तेगान्दꣳष्ट्राब्भ्याꣳसरस्वत्त्याऽअग्ग्रजिह्वञ्जिह्वायाऽ-
उत्त्सादमवक्क्रन्देनतालुव्वाजꣳहनुब्भ्यामपऽआस्येनव्वृषणमाण्डाब्भ्यामादि-
त्त्याञ्श्मश्श्रुभिः पन्थानम्भ्रूब्भ्यान्द्यावापृथिवीव्वर्त्तोब्भ्यांव्विद्युतङ्कनीनकाब्भ्या-
ꣳशुक्क्लायस्वाहाकृष्णायस्वाहापार्य्याणिपक्ष्माण्यवार्य्याऽइक्षवोव्वार्य्याणि-
पक्ष्माणिपार्य्याऽइक्षवः ।।२५।। अग्ग्निश्श्चपृथिवीचसन्नतेतेमेसन्नमता-
मदोव्वायुश्श्चान्तरिक्षञ्चसन्नतेतेमेसन्नमतामदऽआदित्त्यश्श्चद्यौश्श्चसन्नतेतेमेस-
न्नमतामदऽआपश्श्चव्वरुणश्श्चसन्नतेतेमेसन्नमतामदः । सप्प्तसꣳसदोऽअष्ट-
मीभूतसाधनी । सकामाँ२।।ऽअद्ध्वनस्कुरुसञ्ज्ञानमस्तुमेमुना ।।२६।।
समास्त्वाग्ग्नऽऋतवोव्वर्द्धयन्तुसंव्वत्सराऽऋषयोयानिसत्त्या । सन्दिव्येनदी-
दिहिरोचनेनव्विश्श्वाऽआभाहिप्प्रदिशश्श्चतस्रः ।।२७।। होतायक्षत्त्समि-
धेन्द्रमिडस्प्पदेनाभापृथिव्याऽअधि । दिवोव्वर्ष्मन्त्समिद्ध्यतऽओजिष्ठश्श्च-
र्षणीसहांव्वेत्त्वाज्ज्यस्यहोतर्य्यज ।।२८।। समिद्धोऽअञ्जन्कृदरम्मतीना-
ङ्घृतमग्ग्नेमधुमत्त्पिन्न्वमानः । व्वाजीव्वहन्व्वाजिनञ्जातवेदोदेवानांव्वक्षिप्प्रि-
यमासधस्त्थम् ।।२९।। देवसवितःप्प्रसुवय्यज्ञम्प्रसुवयज्ञपतिम्भगाय-
दिव्व्योगन्धर्व्वः केतपूः केतन्नः पुनातुव्वाचस्प्पतिर्व्वाचन्नः स्वदतु ।।३०।।
सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳसर्व्वतस्पृत्त्वात्त्यतिष्ठद्द-
शाङ्गुलम् ।।३१।। तदेवाग्ग्निस्तदादित्त्यस्तद्वायुस्तदुचन्द्रमाः । तदेव-
शुक्क्रन्तद्ब्रह्मताऽआपः सप्प्रजापतिः ।।३२।। अस्याजरासोदमाम-
रित्राऽअर्च्चद्धूमासोऽअग्ग्नयः पावकाः। श्श्वितीचयः श्श्वात्रासोभुरण्यवोव्वनर्ष-
दौव्वायवोनसोमाः ।।३३।। य्यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्प्तस्यतथैवैति।
दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनःशिवसङ्कल्प्पमस्तु ।।३४।। अपेतो-

यन्तुपणायोसुम्म्रादेववपीयवःअस्यलोकःसुतावतःद्युभिरहोभिरक्तुभिर्व्यक्तंय्यमोददात्त्ववसानमस्म्मै ।।३५।। ऋचंव्वाचम्प्रपद्येमनोयजुःप्प्रपद्येसामप्प्राणम्प्रपद्येचक्षुःश्रोत्रम्प्रपद्ये । व्वागोजःसहौजोमयिप्प्राणापानौ ।।३६।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । आददेनारिरसि ।।३७।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । आददेदित्त्यैरास्न्नासि ।।३८।। स्वाहाप्प्राणेब्भ्यः-साधिपतिकेब्भ्यः । पृथिव्व्यैस्वाहाग्ग्नयेस्वाहान्तरिक्षायस्वाहाव्वायवेस्वाहा। दिवेस्वाहासूर्य्यायस्वाहा ।।३९।। ईशाव्वास्यमिदꣳसर्व्वंय्यत्त्किञ्चजगत्त्याञ्जगत् । तेनत्त्यक्तेनभुञ्जीथामागृधः कस्यस्विद्धनम् ।।४०।। इति संहिताध्यायादिकण्डिका: क्वचिदध्यायोक्ता ऋषयस्तृप्यन्तामिति पाठोऽपि दृश्यते ।

शतादिकण्डिका:

ॐ इषेत्त्वा० ।।१।। परितेदूडभोरथोस्म्माँ२।।ऽअश्न्नोतुव्विश्श्वतःयेनरक्षसिदाशुषः ।।२।। अग्ग्नेनयसुपथारायेऽअस्म्मान्विश्श्वानिदेवव्वयुनानिव्विद्द्वान् । युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंव्विधेम ।।३।। उपयामगृहीतोसिसुशर्म्मासिसुप्प्रतिष्ठानोबृहदुक्षायनमः। व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः ।।४।। सोमस्यत्त्विषिरसितवेवमेत्त्विषिर्ब्भूयात् । अग्ग्नयेस्वाहासोमायस्वाहासवित्रेस्वाहासरस्वत्त्यैस्वाहापूष्ष्णेस्वाहाबृहस्प्पतयेस्वाहेन्द्रयास्वाहाघोषायस्वाहाश्श्लोकायस्वाहाद्द्रशायस्वाहाभगायस्वाहार्य्यम्म्णेस्वाहा ।।५।। परस्याऽअधि-संव्वतोव्वराँ२।।ऽअब्भ्यातरा । यत्राहमस्म्मिताँ२।।ऽअव ।।६।। अन्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत । ताःसर्व्वाःसंव्विदानाऽइदम्मेप्प्रावताव्वचः ।।७।। राज्ञ्यसिप्प्राचीदिग्ग्विराडसिदक्षिणादिक्क्सम्म्राडसिप्प्रतीचीदिक्क्स्वराडस्युदीचीदिगधिपत्त्न्यसिबृहतीदिक् ।।८।। नमो-

हिरण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमोनमोवृक्षेब्भ्योहरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्प्पिञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशाय ।।९।। इन्द्रेमम्प्रतरान्नयसज्ञातानामसद्वसी । समेनवर्च्चसासृजदेवानाम्भागदाऽअसत् ।।१०।। इमौतेपक्षावजरौपतत्रिणौयाब्भ्याद्ररक्षाद्रस्यपहष्टस्यग्ग्ने । ताब्भ्याम्पतेमसुकृतामुलोकंय्यत्रऽऋषयोजग्ग्मुःप्प्रथमजाःपुराणाः ।।११।। अन्नात्त्परिस्स्रुतोरसम्ब्रह्मणाव्यपिबत्त्क्षत्रम्प्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंव्विपानष्टशुक्क्रमन्ध्यसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।।१२।। अश्श्विनातेजसाचक्षुःप्प्राणेषुसरस्वतीव्वीर्य्यम् । व्वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ।।१३।। पृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्षत्रेब्भ्यःस्वाहाद्भ्यःस्वाहौषधीब्भ्यःस्वाहाव्वनस्प्पतिब्भ्यःस्वाहापरिप्प्लवेब्भ्यस्वाहाचराचरेब्भ्यःस्वाहासरीसृपेब्भ्यःस्वाहा ।।१४।। प्रजापतयेचव्वायवेचगोमृगोव्वरुणायारण्योमेषोयमायकृष्णोमनुष्ष्यराजायमर्कटःशार्दूलायरोहिदृषभायगवयीक्षिप्प्रश्श्येनायव्वर्त्तिकानीलङ्गोःकृमिःसमुद्रायशिशुमारोहिमवतेहस्ती ।।१५।। तेऽअस्ययोषणेदिव्यैनयोनाऽउषासानक्ता । इमंय्यज्ञमवतामद्ध्वरन्नः ।।१६।। तनूनपात्त्पथऽऋतस्ययानान्मद्ध्वासमञ्जत्स्वदयासुजिह्वा । मन्मानिधिभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यद्ध्वरन्नः ।।१७।। अयमिहप्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्वीड्यः । यमप्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विब्भ्वंव्विशेविशे ।।१८।। अनुनोद्यामनुमतिर्य्यज्ञन्देवेषुमन्न्यताम् । अग्ग्निश्श्चहव्यवाहनोभवतन्दाशुषेमयः ।।१९।। इयत्त्यग्ग्रऽआसीन्मखस्यतेद्यशिरोराक्ष्यासन्देवयजनेपृथिव्याः। मखायत्त्वामखस्यत्त्वाशीर्ष्णे ।।२०।। हिरण्मयेनपात्रेणसत्त्यस्यापिहितम्मुखम् । य्योसावादित्त्येपुरुषःसोसावहम् ।।२१।।

ॐ ३ खम्ब्रह्म ।

ॐ शतोक्ता ऋषयस्तृप्यन्तामिति क्वचित् पाठोऽपि दृश्यते ।

सतिसम्भवे ब्राह्मणाध्यायशतप्रपाठकानामप्यादीन् पठेयुः ।

ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् । होतारंरत्नधातमम् ।।१।। इषेत्त्वोर्ज्जेत्त्वा० । पशून्पाहि ।।२।। अग्नआयाहिवीतयेगृणानोहव्यदातये । निहोतासत्सिबर्हिषि ।।३।। शन्नोदेवीरभिष्टयआपोभवन्तुपीतये । शँयोरभिस्रवन्तुनः ।।४।। इत्यध्ययनं समाप्तम् ।

अथ ऋषिश्राद्धम्

आचान्तः कृतप्राणायामः सङ्कल्पं कुर्यात् ।

सङ्कल्पः - देशकालौ संकीर्त्य उत्सर्गाङ्गभूतमृषिश्राद्धमहं करिष्ये ।

ॐ इदंविष्णुः ० इति मन्त्रेण दिग्बन्धनं कुर्यात् । ऋषिश्राद्धोपहाराः शुचयो भवन्तु इत्युपहारप्रोक्षणम् । देशकालपात्रद्रव्यसम्पदस्तु कश्यपादिसप्तऋषीणामिदमासनं यथाभागं वः स्वाहा गन्धादिदानं कुर्यात् । ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं सप्तसङ्ख्याकान्ब्राह्मणान् यथा सम्पन्नेनान्नेन तर्पयिष्ये, तेन कश्यपादिसप्तऋषयः प्रीयन्ताम् । ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं हिरण्यनिष्क्रयीभूतां दक्षिणां मनसोद्दिष्टामाचार्याय संप्रददे । आचार्यः **कोदा**दिति कामस्तुतिं पठेत् ।

उपविष्टेषु ब्राह्मणेषूदकादिदानम्- **ॐ शिवा आपः सन्तु, ॐ सौमनस्यमस्तु, ॐ अक्षतं चारिष्टमस्तु, ॐ अघोरा ऋषयः सन्तु सर्वत्र सन्तु** इति प्रतिवचनं विप्राणाम् । तत उत्सर्गकर्मणः साङ्गतायै भूयसीं दक्षिणां दद्यात् ।

भूयसीदक्षिणासङ्कल्पः- उत्सर्गकर्मणोन्यूनातिरिक्तदोषपरिहारार्थं नानागोत्रनामभ्यो ब्राह्मणेभ्य इमां भूयसीं दक्षिणां यथाभागं विभज्य युष्मभ्यमहं संप्रददे । **अद्येह छन्दसामुत्सर्गाङ्गभूतमृषिश्राद्धं परिपूर्णमस्तु, अस्तु** इति प्रतिवचनम् ।

ततः **ॐ सहनोस्तुसहनोवतुसहनइदंवीर्यवदस्तुब्रह्म । इन्द्रस्तद्वेदयेनयथानविद्विषामहे ।।** इति पठेयुः । **उभाकवी**त्यस्य प्रजापतिर्ऋषिरश्विनौ देवते जपे विनियोगः। **ॐ उभाकवीयुवायोनोधर्मःपरापतत् । परिसख्यस्यधर्मिणोविसख्यानिविसृजामहे ।।** इति च सर्वे जपेयुः । **विरताः स्म** इति प्रब्रूयुः । तत ऋषीन् विसर्जयेत् ।

ऋषिविसर्जनम्- उत्तिष्ठेति घोरः कण्वऋषिर्बृहती छन्दो ब्रह्मणस्पतिर्देवता सप्तऋषिविसर्जने विनियोगः । **ॐ उत्तिष्ठब्ब्रह्मणस्प्पतेदेवयन्तस्त्वेमहे। उपप्प्रयन्तुमरुतःसुदानवऽइन्द्रप्प्राशूर्ब्भवासचा ।।१।।**

ततः **समुद्रङ्गच्छे**ति मन्त्रेण सप्तऋषीन् जले प्लावयेत् ।

ॐ समुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाच्छन्दाꣳसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वाहाग्निंवैश्श्वानरङ्गच्छस्वाहामनोमेहार्द्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्ज्योतिःपृथिवीम्भस्म्मनापृणस्वाहा ।। इति ततः स्वस्वगोत्रप्रवरर्षींश्च विसर्जयेयुः ।

अर्पणम्- अनेनाध्यायोत्सर्गाङ्गतया कृतेन ऋषिपूजनतर्पणादिकर्मणा श्रीभगवान् वेदपुरुषः प्रीयताम् । ॐ तत्सन्न मम ।

अच्छिद्रवाचनम्- अस्मिन् कर्मणि विधिहीनम्, देशहीनम्, क्रियाहीनम्, कालहीनम्, यत्कृतं तत्सुकृतमस्तु । यन्न कृतं तच्छ्रीविष्णोः प्रसादाद् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु । अस्तु इति प्रतिवचनम् ।

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।
ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।।

मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः ।
सर्वं भवति निश्छिद्रं नामसङ्कीर्तनाद् हरेः ।।
हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

ॐ अच्युताय नमः ३ ।

ॐ कायेन वाचा मनसेन्द्रियैर्वा,
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै,
नारायणायैव समर्पयामि ।।

ॐ तत्सद् ब्रह्मार्पणमस्तु । एवमुत्सर्गं विधाय त्रिरात्रं गुरुगृहे सर्वे शिष्या निवसेयुः । उत्सर्गोत्तरं त्रिरात्रमध्ययनं न कुर्युः । ततो नखलोम्नां वपनम् । एके प्रागुत्सर्गात् ।

— इति श्रावणीप्रयोगः —

◆

९. जन्माष्टमीव्रतपूजाविधिः

प्रयोगः - व्रतात् पूर्वेह्नि दन्तधावनपूर्वकं कृतैकभक्तो जितेन्द्रियो भूयात्। व्रतदिने कृतनित्यक्रियोऽर्घ्यस्थापनपूर्वकं संकल्पं कुर्यात् ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि मासतिथ्याद्युल्लिख्य अमुकोऽहं सकलैनसो मोक्षकामः श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीकृष्णदेवप्रीत्यर्थं जन्माष्टमीव्रतं करिष्ये, इति संकल्प्य प्रार्थयेत् ।

श्रीकृष्णप्रार्थना- **इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।**
निर्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि केशव ।।

ततो देवतानां प्रार्थनां कुर्यात् ।

अन्यदेवताप्रार्थना- **सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा।**
पवनो दिक्पतिर्भूमिराकाशं खचरा नराः ।।
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ।

निराहारपक्षे कृष्णप्रार्थना-
अद्य स्थित्वा निराहारः श्वोभूते परमेश्वर ।
भोक्ष्यामि देवकीपुत्र ह्यस्मिञ्जन्माष्टमीव्रते ।।

देवकीप्रसूतिमण्डपे श्रीकृष्णादिप्रतिमास्थापना-

ततो देवकीप्रसूतिमण्डपं सपुष्पजलैर्नवकलशैर्विचित्रवासोभिर्दीपावलीभिः पुष्पमालादिभिश्च रमणीयं चन्दनागुरुधूपितं नृत्यगीतवादित्रवीणावेणुवाद्याकुलं दधिहरिद्रामङ्गलद्रव्योपेतं रक्षामणिविभूषितमगिखड्गकृष्णाच्छागनागमुसलयुतद्वारं षष्ठ्या देव्याधिष्ठितं विधाय तन्मध्ये सर्वतोभद्रोपरि श्वेतपटावृतमञ्चके प्रसुप्तदेवकीस्तनपायिनीं श्रीकृष्णप्रतिमां निधाय देवकीचरणौ संवाहयन्तीं पङ्कजासनसंस्थितां श्रीप्रतिमाञ्च स्थापयेत् ।

भित्तिषु खड्गचर्मधरं वसुदेवं नन्दगर्गगोपीगोपान् सकुसुमाञ्जलीन् देवगन्धर्वादीन् कंसनियुक्तान् कुञ्जरादींश्च यमुनाह्रदस्थकालीयमपरमपि यथासंवभं तत्कालीनं श्रीकृष्णचरितं लिखित्वा तत्रैव प्रदेशान्तरे प्रसूतकन्यया सह यशोदाप्रतिमाञ्च स्थापयेत्। तथा प्रदेशान्तरे पीठोपरि वसुदेवदेवकीनन्द-यशोदाश्रीकृष्णचण्डिकाप्रतिमाः स्थापयेत् । अशक्तौ भित्तिस्थचित्राण्येव पूज्यानि ।

जन्माष्टमीव्रते जयन्तीयोगे सति विशेषः- जन्माष्टमीव्रते पर्यङ्कस्थितयोर्देवकी-श्रीकृष्णयोः पूजनम्। जयन्तीव्रते तु देवक्यास्तस्य उत्सङ्गस्थितस्य पूजनम्। जयन्तीयोगे संकल्पेऽपि विशेषः। तदित्थम्- जन्माष्टमीव्रतं जयन्तीव्रतञ्च तन्त्रेण करिष्ये इति। प्रतिमापक्षे **ॐ हिमस्यत्त्वाजरायुणाग्ग्रेपरिव्ययामसि। पावकोऽअस्मभ्यꣳशिवोभव ।।** इत्यग्न्युत्तारणपूर्वकं पञ्चामृतेन प्रतिमाः स्नापयेत्। **पयः पृथिव्यामिति** पयसा संस्थाप्य **देवस्यत्त्वेति** तप्तोदकेन **आपोहिष्ठेति** शीतोदकेन च यथाक्रमं स्नापयेत्।

एवं दधिघृतमधुशर्कराभिस्तत्तन्मन्त्रैः स्नापनमुष्णशीतोदकाभ्यां तत्तदनन्तरं पूर्वोक्तमन्त्राभ्यां स्नापनं च कार्यम्। ततः पीठे संस्थाप्य पूजारम्भं कुर्यात्। रात्रौ प्राङ्मुखः शुद्धासने उपविश्य दीपं प्रज्वलय्य आचम्य **सुमुखश्चे**ति गणेशं नत्वा **शुक्लाम्बरधरमि**ति विष्णुञ्च नत्वा अर्घ्यं संस्थाप्य सूर्यायार्घ्यं दत्त्वा पुनरर्घ्यं संस्थाप्य संकल्पं कुर्यात्।

श्रीकृष्णपूजासङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकनाम-संवत्सरे दक्षिणायने वर्षर्तौ भाद्रपद्मासे कृष्णपक्षेऽष्टम्यां तिथौ अमुकगोत्रोऽमुकशर्माहं सकलपापक्षयद्वारा श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीकृष्णदेव-प्रीत्यर्थं मम सपरिवारस्य ज्ञाताज्ञातमनोवाक्कायसंभूतकोटिपातकमहापात-कक्षयपूर्वकं गर्भपतनमृत्युनिष्क्रान्त्यादिभयरोगशोकदारिद्र्यदौर्भाग्य-दुःस्वप्नभूतोत्पातवैकृत्यबाधाल्पमृत्युवैधव्यपरिहारपूर्वकसकलमनोरथप्राप्ति-पूर्वकाक्षयहरिलोकप्राप्तिकामो जन्माष्टमीव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं

यथामिलितोपचारैः (पट्टलिखितप्रतिमासु सुवर्णप्रतिमासु वा) सपरिवारस्य श्रीकृष्णदेवस्य प्राणप्रतिष्ठापूर्वकं पूजनं करिष्ये, इति संकल्प्य दीपकलशगणेशपूजां विधाय द्वारपूजां कुर्यात् ।

द्वारपूजा- यवान् गृहीत्वा पूर्वे- **ॐ नन्दाय नमः, ॐ सुनन्दाय नमः,** दक्षिणे- **ॐ चण्डाय नमः, ॐ प्रचण्डाय नमः,** पश्चिमे- **ॐ बलाय नमः, ॐ प्रबलाय नमः,** उत्तरे- **ॐ भद्राय नमः, ॐ सुभद्राय नमः,** इति द्वारपूजां कृत्वाङ्गन्यासँ कुर्यात् ।

अङ्गन्यासः - ॐ अस्य श्रीनारायणाष्टाक्षरमन्त्रस्य साध्यनारायणऋषिर्गायत्रीच्छन्दः श्रीकृष्णपरमात्मा देवता वं बीजं मायेति शक्तिः नम इति कीलकं न्यासे विनियोगः । इति जलमुत्सृज्याङ्गेषु न्यसेत् ।

शिरसि- **साध्यनारायणऋषये नमः,** मुखे- **गायत्रीच्छन्दसे नमः,** हृदि- **परमात्मदेवतायै नमः,** गुह्ये- **वं बीजाय नमः,** पादयोः- **मायेतिशक्तये नमः,** सर्वाङ्गे- **नमः कीलकाय नमः, ॐ नं क्रुद्धोल्कायाङ्गुष्ठाभ्यां नमः, ॐ मों महोल्काय तर्जनीभ्यां नमः, ॐ नां वीरोल्काय मध्यमाभ्यां नमः, ॐ रां विद्युदुल्कायानामिकाभ्यां नमः, ॐ यं सहस्रोल्काय कनिष्ठिकाभ्यां नमः, ॐ णायं करतलकरपृष्ठाभ्यां नमः ।** एवं हृदयादिन्यासांश्च कुर्यात् ।

आवाहनम् - ॐ मनोजूतिः० इति मन्त्रपाठान्ते ॐ भूर्भुवः स्वः सुवर्णनिर्मितमूर्तौ (भित्तिलिखितमूर्त्तौ) **श्रीकृष्णदेव साङ्गसपरिवार इहागच्छेह तिष्ठ सुप्रतिष्ठितो वरदो भव ।** तथा पट्टलिखितान्यदेवताश्चेहागच्छन्त्विह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु इति प्रतिष्ठाप्य पीठपूजनं कुर्यात् ।

पीठपूजा- ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानायै नमः, ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ प्रह्वै नमः, ॐ सत्यायै नमः, ॐ ईशानायै नमः, मध्ये ॐ अनुग्रहायै नमः, ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मयोगपीठात्मने नमः ।

देवकीध्यानम्-

गायद्भिः किन्नराद्यैः सततपरिवृतावेणुवीणानिनादैः
शृङ्गारादर्शकुन्तप्रवरकृतकरैः किङ्करैः सेव्यमाना ।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते
सा देवी देवमाता जयति सुवदना देवकी दिव्यरूपा ।।

श्रीकृष्णध्यानम्-

अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराजत्-
केयूरं कौस्तुभेनोल्लसितरुचिरहारञ्च पीताम्बरञ्च ।
नानारत्नांशुभिन्नाभरणशतयुतं श्रीधराश्लिष्टदेहं
वन्दे दोःसक्तनीलाम्बुरुहदरगदं विश्ववन्द्यं मुकुन्दम् ।।
नवनीलघनश्यामं नलिनायतलोचनम् ।
शङ्खचक्रगदापद्मधरं पीताम्बरावृतम् ।।
कौस्तुभेन विराजन्तं वनमालाविभूषितम् ।
उल्लसत्कुण्डलज्योतिःकपोलवदनश्रियम् ।।
किरीटेन विराजन्तं वलयाङ्गदनूपुरैः ।
प्रसन्नवदनाम्भोजं चतुर्बाहुं श्रियान्वितम् ।।
मत्वापि बालकं ध्यात्वा पर्य्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम् ।।

लक्ष्मीञ्च देवकीचरणान्तिके पङ्कजे निषण्णां तस्याश्चरणौ संवाहयन्तीं ध्यायेत् ।

लक्ष्मीध्यानम्-

बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरभासोज्ज्वलां
रत्नाकल्पविभूषणां कुचनतां शालैः करैर्मञ्जरीः ।
पद्मे कौस्तुभरत्नमप्यविरतं संविभ्रतीं सुस्मितां
फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत् परां देवताम् ।।

लक्ष्म्यै नमः इति ।

ॐ सहस्रशीर्षापुरुषः ०। देवक्यै नमः इति देवकीमावाह्य श्रीकृष्णमावाहयेत्।

श्रीकृष्णावाहनम् -

सदेवगणगन्धर्वैर्देवैर्नागैश्च बन्धुभिः ।
आगच्छ देव देवेश मातृपितृसमन्वितः ।। इति ।

विभिन्नदेवताध्यानम्-

नमो देव्यै श्रियै इति श्रियमावाह्य **वसुदेवाय नमः, यशोदायै नमः, नन्दाय नमः, वासुदेवाय नमः, बलदेवाय नमः, चण्डिकायै नमः,** इति चावाह्य भित्तिस्थचित्रेषु समस्तपरिवारदेवताभ्यो नमः, इति सामान्येनावाह्य आसनं दद्यात् ।

आसनम्- ॐ पुरुषऽएव० । देवक्यै नमः ।

श्रीधराय भूधराय गोवर्द्धनधराय च ।
आसनं च तथा दद्यात् कृष्णाय च नमो नमः ।।

आवाहितेभ्यः **सर्वेभ्यो देवेभ्यो नमः ।**

पाद्यम्- ॐ एतावानस्य० देवक्यै नमः ।

सर्वभूतहितार्थाय जगदाधारहेतवे ।
सर्गस्थित्यन्तरूपाय कृष्णाय च नमो नमः ।।

आवाहितेभ्यः **सर्वेभ्यो देवेभ्यो नमः** पाद्यं समर्पयामि ।

अर्घ्यम् - ॐ त्रिपादूर्ध्व० देवक्यै नमः ।

देवकीगर्भसंभूत दैत्यसैन्यविनाशन ।
गृहाणार्घ्यमिमं देव मातुरुत्सङ्गसंस्थित ।।

आवाहितेभ्यः **सर्वेभ्यो देवेभ्यो नमः** अर्घ्यं समर्पयामि ।

आचमनम्- ॐ ततोविराट्० देवक्यै नमः ।

सुरासुराणामीशाय क्षीराब्धिशयनाय च ।
दद्यादाचमनं तस्मै कृष्णाय च नमो नमः ।।

आवाहितेभ्यो **देवेभ्यो नमः** आचमनं स० ।

स्नानम् - ॐ तस्माद्यज्ञात्सर्वहुतः० देवक्यै नमः ।
योगेश्वरदेवाय योगानां पतये नमः ।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः ।।

आवाहितेभ्यो **देवेभ्यो नमः** स्नानं स० ।

पञ्चामृतस्नानम् - ॐ पञ्चनद्यः सरस्वती० पयोदधिघृतं० पञ्चामृतस्नानं स० । तत आचमनं समर्पयेत् ।

वस्त्रम् - ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० देवक्यै नमः ।
नारायण नमस्तेस्तु नमो गरुडवाहन ।
त्रैलोक्यव्यापकं देव वस्त्रं मे प्रतिगृह्यताम् ।।

आवाहितेभ्यो **देवेभ्यो नमः** वस्त्रं स० । आचमनम् ।

यज्ञोपवीतम्- ॐ तस्मादश्वाऽअजायन्त० देवक्यै नमः ।
नारायण नमस्तेऽस्तु त्राहि मां भक्तवत्सल ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण परमेश्वर ।।

आवाहितेभ्यो **देवेभ्यो नमः** यज्ञोपवीतं स० । ततः पुनराचमनम्-

गन्धः - ॐ तंय्यज्ञम्० देवक्यै नमः ।
योगेश्वराय देवाय योगानां पतये विभो ।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः ।।

आवाहितेभ्यो **देवेभ्यो नमः** गन्धं स० ।

ततः **श्रीकृष्णाय नमः** इति यवान् समर्प्य आवाहितेभ्यो **देवेभ्यो नमः** इत्यक्षतान् समर्पयेत् ।

अलङ्करणम्- देवक्यै नमः ।
सर्वेश्वराय सर्वाय विश्वरूपधराय च ।
दद्यात् सर्वमलङ्कारं कृष्णाय च नमो नमः ।।

आवाहितेभ्यो **देवेभ्यो नमः** अलङ्कारं स० ।

पुष्पाणि- ॐ यत्पुरुषम्० देवक्यै नमः ।
योगेश्वराय देवाय योगानां पतये नमः ।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः ।।
सुगन्धीनि सुपुष्पाणि मालत्यादीनि वै प्रभो ।
मयानीतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ।।

आवाहितेभ्यो **देवेभ्यो नमः** पुष्पाणि स० ।

आवरणपूजा

पूर्वे- **वक्रतुण्डाय नमः**, दक्षिणे- **श्रीगणेशाय नमः**, पश्चिमे- **लम्बोदराय नमः**, उत्तरे- **श्रीगुरवे नमः**, आग्नेये- **हृदयाय नमः**, ईशाने- **शिरसे स्वाहा**, नैर्ऋत्ये- **शिखायै वषट्**, वायव्ये- **कवचाय हुम्**, मध्ये- **नेत्रत्रयाय वौषट्** पूर्वादिदिक्प्राधान्येनास्त्राय फट् ।

प्रथमतोऽष्टमन्त्रवर्णान् केसरेषु प्रागादिप्रादक्षिण्येन- **ॐ नमः, ॐ नं नमः, ॐ मों नमः, ॐ नां नमः, ॐ रां नमः, ॐ णां नमः, ॐ यं नमः** । पूर्वे- **वासुदेवाय नमः**, दक्षिणे- **सङ्कर्षणाय नमः**, पश्चिमे- **प्रद्युम्नाय नमः**, उत्तरे- **अनिरुद्धाय नमः**, आग्नेये- **शान्त्यै नमः**, नैर्ऋत्ये- **श्रियै नमः**, वायव्ये- **सरस्वत्यै नमः**, ईशाने- **रेवत्यै नमः**, प्रागादिदलाग्रेषु- **चक्राय नमः, शङ्खाय नमः, गदायै नमः, पद्माय नमः, कौस्तुभाय नमः, मुसलाय नमः, खड्गाय नमः, वनमालायै नमः** ।

पूर्वे- **गरुडाय नमः**, दक्षिणे- **शङ्खनिधये नमः**, उत्तरे- **पद्मनिधये नमः**, पश्चिमे- **ध्वजाय नमः**, आग्नेये- **गणेशाय नमः**, नैर्ऋत्ये- **आर्यायै नमः**, वायव्ये- **दुर्गायै नमः**, ईशाने- **स्कन्दाय नमः** ।

पूर्वादिक्रमेण इन्द्रादीन् वज्रादींश्च पूजयेत् । **इन्द्राय नमः, अग्नये नमः, यमाय नमः, निर्ऋतये नमः, वरुणाय नमः, वायवे नमः, सोमाय नमः, ईशानाय नमः, अनन्ताय नमः, ब्रह्मणे नमः, वज्राय नमः, शक्तये नमः, दण्डाय नमः, खड्गाय नमः, पाशाय नमः,**

अङ्कुशाय नमः, गदायै नमः, त्रिशूलाय नमः, चक्राय नमः, पद्माय नमः, इति सम्पूजयेत् ।

अङ्गपूजा- गोविन्दाय नमः पादौ पूजयामि, **माधवाय नमः** जङ्घे पू०, **मधुसूदनाय नमः** कटिं पू०, **पद्मनाभाय०** नाभिं पू०, **हृषीकेशाय०** हृदयं पू०, **सङ्कर्षणाय०** स्तनौ पू०, **वामनाय०** बाहू पू०, **दैत्यसूदनाय०** हस्तौ पू०, **श्रीकण्ठाय०** कण्ठं पू०, **सुमुखाय०** मुखं पू०, **त्रिविक्रमाय०** नासिकां पू०, **पुण्डरीकाक्षाय०** नेत्रे पू०, **नृसिंहाय०** श्रोत्रे पू०, **उपेन्द्राय०** ललाटं पू०, **हरये०** शिरः पू०, **श्रीकृष्णाय०** सर्वाङ्गं पूजयामि ।

धूपः- ॐ ब्रह्मणोऽस्य० देवक्यै नमः ।

यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः ।।

आवाहितेभ्यो **देवेभ्यो नमः** धूपं स० ।

दीपः- ॐ चन्द्रमामनसः० देवक्यै नमः ।

आज्यं सद्वर्तिसंयुक्तं वह्निना दीपितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।।

आवाहितेभ्यो **देवेभ्यो नमः** दीपं स० ।

नैवेद्यम्- ॐ नाभ्याऽआसीत्० देवक्यै नमः ।

विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः ।।

आवाहितेभ्यो **देवेभ्यो नमः** नैवेद्यं स० ।

ततो नैवेद्याङ्गमाचमनं दत्त्वा **श्रीकृष्णाय नमः,** आवाहितेभ्यो **देवेभ्यो नमः** इति जपं विधाय समर्पयेत् -

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादात् सुरेश्वर ।।

ततो गन्धाक्षतपुष्पैः केवलं पुष्पैर्वा पृथक् पृथङ्नामभिः पूजयेत्। ओङ्कारः सर्वत्र प्रयोक्तव्यः।

नामपूजा- ॐ अनघाय नमः१, वामनाय नमः२, शौरये नमः३, वैकुण्ठाय नमः४, पुरुषोत्तमाय नमः५, वासुदेवाय नमः६, हृषीकेशाय नमः७, माधवाय नमः८, मधुसूदनाय नमः९, वाराहाय नमः१०, पुण्डरीकाक्षाय नमः११, नृसिंहाय नमः१२, ब्राह्मणप्रियाय नमः१३, धरणीधराय नमः१४, दैत्यसूदनाय नमः१५, दामोदराय नमः१६, पद्मनाभाय नमः१७, केशवाय नमः१८, गरुडध्वजाय नमः१९, गोविन्दाय नमः२०, अच्युताय नमः२१, कृष्णाय नमः२२, अनन्ताय नमः२३, अपराजिताय नमः२४, अधोक्षजाय नमः२५, जगद्बीजाय नमः२६, सर्गस्थित्यन्तकारिणे नमः२७, अनादिनिधनाय नमः२८, विष्णवे नमः२९, त्रैलोक्येशाय नमः३०, त्रिविक्रमाय नमः३१, नारायणाय नमः३२, चतुर्बाहवे नमः३३, शङ्खचक्रगदाधराय नमः३४, पीताम्बराय नमः३५, नित्याय नमः३६, वनमालाविभूषिताय नमः३७, श्रीवत्साङ्काय नमः३८, जगत्सेतवे नमः३९, श्रीधराय नमः४०, श्रीपतये नमः४१, हरये नमः४२।

एवं श्रीकृष्णं संपूज्य इतरदेवाँश्च संपूजयेत्।

अन्यदेवपूजा - देवक्यै नमः, वसुदेवाय नमः, कश्यपाय नमः, अदित्यै नमः, गणेशाय नमः, बलभद्राय नमः, दुर्गायै नमः, यशोदायै नमः, शेषनागाय नमः, महादेवाय नमः, दित्यै नमः, नन्दाय नमः, प्रजापतये नमः, दक्षाय नमः, आदित्याय नमः, सोमाय नमः, दुर्गायै नमः, यमुनायै नमः, कालियाय नमः, चतुर्मुखाय नमः, कालनेमिने नमः, धन्वन्तरये नमः, (ज्वराय नम इत्यपि पाठः) **विश्वाय नमः, गजेभ्यो नमः, अश्वेभ्यो नमः, गङ्गायै नमः, यमुनायै नमः, दानवेभ्यो नमः, इन्द्राय नमः, शस्त्रपाणिभ्यो नमः, गन्धर्वेभ्यो नमः, यक्षेभ्यो नमः, किन्नरेभ्यो नमः, कंसाय नमः, चित्रगुप्ताय नमः, स्वर्गाय**

नमः, ग्रहेभ्यो नमः, विद्याधरेभ्यो नमः, अप्सरोभ्यो नमः, नागेभ्यो नमः, पर्वतेभ्यो नमः, गोभ्यो नमः, पक्षिभ्यो नमः, नरनारीभ्यो नमः, सर्वेभ्यो गोकुलवासिभ्यो नमः । इति सम्पूज्य ताम्बूलं समर्पयेत्।

ताम्बूलम् - ॐ यत्पुरुषेण० ।

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

फलम्- इदं फलं मया० सर्वेभ्यो गोकुलवासिभ्यो नमः इति समर्पयेत्।

द्रव्यम्- हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

नीराजनम्- अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।
आरार्तिक्यमिदं देव गृहाण मदनुग्रहात् ।।
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि ह्यारार्तिः प्रतिगृह्यताम् ।।

पुष्पाणि- अवतारसहस्राणि करोषि मधुसूदन ।
न ते संख्याऽवताराणां केऽपि जानन्ति वै प्रभो ।।
देवा ब्रह्मादयो वापि स्वरूपं न विदुस्तव ।
अतस्त्वां पूजयिष्यामि मातुरुत्सङ्गसंस्थितम् ।।

प्रार्थना- नमस्ते देवदेवेश नमस्ते धरणीधर ।
नमस्ते सर्वनागेश नमस्ते पुरुषोत्तम ।।
प्रसीद भगवन् मह्यमज्ञानात्कुण्ठितात्मने ।
तवाङ्घ्रिपङ्कजरजोरागिणीं भक्तिमुत्तमाम् ।।
अतः प्रसीद भगवन्नमितद्युतिपञ्जर ।
सुप्रसीद प्रसीदास्मद्दुःखहन् पुरुषोत्तम ।।
स्वसंवेद्यस्वरूपात्मन्नानन्दात्मन्ननामय ।
अचिन्त्यसारविश्वात्मन् प्रसीदेश निरञ्जन ।।

प्रसीद तुङ्गतुङ्गानां प्रसीद परमेश्वर ।
प्रसीद स्पष्टं गम्भीर गम्भीराणां महाद्युते ।।
प्रसीद विश्वविस्तीर्ण विस्तीर्णानामणोरणो ।
प्रसीद त्वं द्विजातीनां प्रसीदान्त्यावसायिनाम् ।।
गुरोर्गरीयस्सर्वेषां प्रसीदानन्यदेहिनाम् ।
जय माधव मायात्मञ्जय केशव केशिहन् ।।
जय सुन्दरसौम्यात्मञ्जय शाश्वतशङ्खभृत् ।
जय शार्ङ्गधर श्रीमञ्जय नन्दकनन्दन ।।
जय चक्रगदापाणे जयाजेय जनार्दन ।
जय रत्नाकराबद्धकिरीटाक्रान्तमस्तक ।।
जय पक्षिपतिच्छायानिरुद्धार्ककराकर ।
नमस्ते नरकाराते नमस्ते मधुसूदन ।।
नमस्ते नलिनापाङ्ग नमस्ते नयनाञ्जन ।
नमः पापहरेशान नमः सर्वभयापह ।।
नमः संभृतसर्वात्मन्नमः संभृतकौस्तुभ ।
नमस्ते नयनातीत नमोऽतिक्रान्तवाक्पथ ।।
विष्णवे त्रिदिवारातिजिष्णवे त्रिदिवात्मने ।
चक्रभिन्नाय चक्राय चक्रिणे शक्रबन्धवे ।।
नमो विभिन्नज्ञेयाय नमः स्मृतिपथातिग ।
नमस्ते मूर्तिभेदेन सर्गस्थित्यन्तहेतवे ।।
विश्वाय विश्वनन्दाय विश्वभूतात्मने नमः ।
नमोऽस्तु योगज्ञेयाय नमोऽस्तु ध्यानरूपिणे ।।
भूतिप्रदाय भक्तानां नमस्ते मुक्तिदायिने ।
मनोवाक्कायचेष्टाः स्युर्ध्यानस्तुतिनमस्क्रियाः ।।
देवेश कर्म सर्वं मे भवेदाराधनं तव ।

प्रदक्षिणाः- ॐ सप्तास्यासन्० ।

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

पुष्पाञ्जलिः - ॐ यज्ञेनयज्ञमयजन्त० राजाधिराजाय० इति मन्त्रपुष्पाञ्जलिं समर्पयेत् । ततः स्थण्डिले रोहिणीसहितं शशाङ्कं पूजयेत् ।

सङ्कल्पः- ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि मासपक्षाद्युल्लिख्यामुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीकृष्णदेवस्य पूजनोत्तराङ्गत्वेन स्थण्डिले श्रीरोहिणीसहितस्य चन्द्रदेवस्य पूजनमहं करिष्ये इति संकल्पं कुर्यात् ।

चन्द्रस्यप्रतिष्ठावाहनञ्च- ॐ मनोजूतिः० इति मन्त्रपाठान्ते । **ॐ भूर्भुवः स्वः चन्द्रदेव इहागच्छेह तिष्ठ सुप्रतिष्ठितो वरदो भव** इत्यावाह्य **चन्द्रमसे नमः** इति ध्यात्वाऽनेनैव पाद्यादिनीराजनान्तं संपूज्य शङ्खे तोयं समादाय तस्मिँश्चन्दनपुष्पादिकं प्रक्षिप्य जानुभ्यां धरणीं गत्वाऽर्घ्यं दद्यात् ।

अर्घ्यम् - क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहित प्रभो ।।
ज्योत्स्नापते नमस्तेऽस्तु ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त ह्यर्घ्यं नः प्रतिगृह्यताम् ।।

इत्यर्घ्यं दत्त्वा चन्द्रं प्रणमेत् ।

चन्द्रप्रणामः - ज्योत्स्नापते नमस्तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते ।।
नमो मण्डलदीपाय शिरोरत्नाय धूर्जटे ।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे ।।

इति चन्द्रं प्रणम्य श्रीकृष्णं प्रणमेत् ।

श्रीकृष्णप्रणामः

अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ।।
वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ।।
गोविन्दमच्युतं कृष्णमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम् ।।
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ।।
पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ।।
प्रपद्येऽहं सदा देवं सर्वकामार्थसिद्धये ।
प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ।।

इति श्रीकृष्णं प्रार्थ्य कृष्णायार्घ्यं दद्यात् ।

श्रीकृष्णार्घ्यप्रदानम्

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
देवतानां हितार्थाय धर्मसंस्थापनाय च ।।
पाण्डवानां हितार्थाय दैत्यानां निधनाय च ।
गृहणार्घ्यं मया दत्तं देवक्या सहितो हरे ।।

श्रीकृष्णप्रार्थना -

त्राहि मां सर्वलोकेश हरे संसारसागरात् ।
त्राहि मां सर्वपापघ्न दुःखशोकार्णवाद्धरे ।।
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत्सकृत् ।
सोऽहं देवातिदुःखार्त्तस्त्राहि मां शोकसागरात् ।।

पुष्कराक्ष निमाग्नोऽहं मायाविज्ञानसागरे ।
त्राहि मां देव देवेश त्वत्तो नान्योऽस्ति रक्षिता ।।
यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके ।
तत्पुण्यं वृद्धिमायातु पापं हर हलायुध ।।

इति संप्रार्थ्य सङ्क्षिप्तप्रकारेण जातकर्मषष्ठीमहोत्सवनामकर्माणि कुर्यात् ।

जातकर्मादिसंस्कारसंकल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि देशकालौ स्मृत्वाऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकश्रीकृष्णदेवप्रीतये श्रीकृष्णदेवस्य जातकर्मषष्ठीमहोत्सवनामकर्माणि सङ्क्षिप्तप्रकारेण करिष्ये, तथोत्तराङ्गत्वेन जीवमातृणां पूजनञ्च करिष्ये, इति संकल्प्य सङ्क्षिप्तप्रकारेण पूर्वं जातकर्माख्यं संस्कारं कुर्यात् ।

अन्नप्राशनम् - तत्र घृतमादाय सुवर्णान्तर्हितयानामिकया श्रीकृष्णं सकृत्प्राशयेत् - **ॐ भूस्त्वयि दधामि, ॐ भुवस्त्वयि दधामि, ॐ स्वस्त्वयि दधामि, ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि** इति घृतं प्राश्य नालच्छेदनं कुर्यात् ।

षष्ठीपूजा- ॐ मनोजूति० इति मन्त्रं पठित्वा **ॐ भूर्भुवः स्वः षड्कृत्तिका इहागच्छन्त्विह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु,** तथा **ॐ भूर्भुवः स्वः स्कन्दप्रद्युम्नौ सुप्रतिष्ठितौ वरदौ भवतम्,** तथा **षष्ठि देवि साङ्गे सपरिवारे सायुधे सवाहने भगवति इहागच्छेह तिष्ठ सुप्रतिष्ठिता वरदा भव** इति प्रतिष्ठाप्य ध्यायेत्- **ॐ षट्कृत्तिकाभ्यो नमः**, इति ।

प्रद्युम्नध्यानम्-

प्रद्युम्नस्तु चतुर्बाहुः शङ्खचक्रगदाधरः ।
चक्रं दक्षिणहस्तेऽस्य वामहस्ते धनुस्तथा ।।
शङ्खञ्च दक्षिणे दद्यात् गदां वामे प्रदापयेत् ।

स्कन्दध्यानम्- मयूरवरमारूढो द्विभुजो बालरूपधृक् ।
मुद्गरं वामहस्ते तु शक्तिं दक्षिणतो न्यसेत् ।।

षष्ठीध्यानम्- चतुर्भुजां महादेवीं तुङ्गपीनस्तनीं शिवाम् ।
मयूरवाहनारूढां रक्तवस्त्रधरां शुभाम् ।।
शूलशक्तिवराभीतिहस्तां ध्यायेन् महेश्वरीम् ।

इति ध्यात्वा **षट्कृत्तिकाभ्यो नमः, प्रद्युम्नस्कन्दाभ्यां नमः, षष्ठीदेव्यै नमः**, इति नाममन्त्रैरावाहनं कृत्वा तैरेव पाद्यार्घ्यस्नानाचमनवस्त्राचमनगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलभूषणानि दत्त्वा क्षणं ध्यात्वा नीराजयेत्।

नीराजनम्- अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।
आरार्तिक्यमिदं देव गृहाण मदनुग्रहात् ।।
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्व-ज्योतींषि ह्यारार्तिः प्रतिगृह्यताम् ।।

स्कन्दप्रार्थना-

नमः कुमाराय महाप्रभाय
स्कन्दाय ते स्कन्दितदानवाय ।
नवार्कबिम्बद्युतये नमोऽस्तु
नमोऽस्त्वमोघोद्यतशक्तिपाणये ।।

प्रद्युम्नप्रार्थना- भोः प्रद्युम्न महाबाहो लक्ष्मीहृदयनन्दन ।
कुमारं रक्ष मे भीतेः प्रद्युम्नाय नमो नमः ।

सप्तकृत्तिकाप्रार्थना- शिवायै नमः, संभूत्यै नमः, प्रीत्यै नमः, रत्यै नमः, अनुसूयायै नमः, क्षमायै नमः ।

जगन्मातर्जगत्धात्रिजगदानन्दकारिणि ।
नमस्ते देवि कल्याणि प्रसीद मम कृत्तिके ।।

कार्त्तिकेयप्रार्थना- कार्त्तिकेय महाबाहो गौरीहृदयनन्दन ।
रक्ष भीतेस्त्वमेवैनं कार्त्तिकेय नमोऽस्तु ते ।।

षष्ठीप्रार्थना- जय देवि जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि महाषष्ठि नमोऽस्तु ते ।।
पुरा देवैः पूजितासि ब्रह्मविष्णुशिवादिभिः ।
आवाभ्यामपि देवि त्वं पूज्यसे भक्तिपूर्वकम् ।।
देवस्य बालकस्यायुर्दीर्घं तुभ्यं नमो नमः ।

इति षष्ठीं प्रार्थ्य सङ्क्षिप्तप्रकारेण नामकर्माख्यं संस्कारं कुर्यात् ।
श्रीकृष्णनामकर्मसंस्कारः - तत्र श्वेतपटे श्रीकृष्णस्य नामाक्षराणि विलिख्य प्रतिष्ठापयेत्- **ॐ मनोजूतिः०** इति मन्त्रपाठान्ते **ॐ भूर्भुवः स्वः श्रीकृष्णदेवस्य नामानि सुप्रतिष्ठितानि भवन्तु** इति प्रतिष्ठाप्य स्वस्तिवाचनं पठित्वा श्रीकृष्णनामबालकोदीर्घायुर्भूयादिति शङ्खेन श्रावयेत् । केषाञ्चित् पुस्तकेषु हन्तहन्तेत्यन्नप्राशनमप्यस्ति ।

जीवमातृपूजनम्

अथ जीवमातृणां पूजनं कुर्यात् तत्र **ॐ मनोजूतिः०** इति मन्त्रपाठान्ते ॐ भूर्भुवः स्वः कल्याणदिजीवमातर इहागच्छन्त्विह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु इति प्रतिष्ठाप्य ध्यायेत् ।

ध्यानम्- कल्याणी मङ्गला भद्रा पुण्यापुण्यमुखी तथा ।
जया च विजया चैव सप्तैता जीवमातरः ।।
कल्याण्यादिजीवमातृभ्यो नमः ।

इति नाममन्त्रेण पाद्यादिभिः संपूज्य धूपदीपादिकं समर्प्य क्षणं ध्यात्वा जपं कृत्वा निवेद्य च वसोर्धारार्थं संकल्पं कुर्यात् ।
सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्याद्युल्लिख्यामुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकं कल्याणादिजीवमातृणां प्रीतये

सकलमङ्गलाभिवृद्ध्यर्थं जीवमातृणामुपरि गुडसर्पिषा वसोर्धाराः पातयिष्ये इति संकल्प्य केनचित् पात्रेण विलीनं घृतमादाय जीवमातृणामुपरि पञ्च सप्त वा धाराः उत्तरवृद्ध्या पातयेत् ।

वसुधारा- ॐ वसोःपवित्रमसिशतधारमंवसोःपवित्रमसिसहस्रधारम्। देवस्त्वासवितापुनातुवसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः ।। इति वसोर्धाराः पातयित्वा **अन्तस्तेज०** इति नीराज्य **कल्याणी मङ्गले**त्यादिना पुष्पाञ्जलिं समर्पयेत्।

दक्षिणासंकल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येत्यादि मासपक्षाद्युल्लिख्यामुकशर्माऽहं जन्माष्टमीव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं सपरिवारश्रीकृष्णदेवपूजनकर्मणस्तथा श्रीकृष्णदेवस्य जातकर्मषष्ठीमहोत्सवनामकर्मणां तथोत्तराङ्गत्वेन जीवमातृणां पूजनकर्मणाञ्च साङ्गतासिद्ध्यर्थमिमां दक्षिणां ब्राह्मणाय दास्ये । (ब्राह्मणबाहुल्ये ब्राह्मणेभ्यो विभज्य दास्ये) ॐ तत्सन्न मम इति संकल्प्य ब्राह्मणं संपूज्य दक्षिणां दद्यात् । ब्राह्मणश्च दक्षिणां गृहीत्वा यजमानायाशिषं दद्यात्, स आशिषं गृहीत्वा कथाश्रवणपूर्वकं रात्रौ स्मरञ्जागरणं कुर्यात् ।

नवमीदिनकृत्यम्

ततो नवमीदिने प्रातरुत्थाय नित्यकर्म समाप्य श्रीकृष्णमण्डपसमीपमागत्याचम्य गणेशं नत्वार्घ्यं संस्थाप्य सूर्यायार्घ्यं दत्त्वा पुनरर्घ्यं संस्थाप्य संकल्पं कुर्यात् ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादिदेशकालाद्युल्लिख्यामुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीभगवत्याः पूजनं तथोत्तराङ्गत्वेन सपरिवारस्य श्रीकृष्णदेवस्य च पूजनं करिष्ये, इति संकल्प्य **श्रीभगवत्यै नमः सपरिवाराय श्रीकृष्णदेवाय नमः**। इति नाममन्त्राभ्यां पाद्यादिनीराजनान्तं संपूज्य देवकीं प्रार्थयेत् । (केचिद्रात्रावेव जीवमातृप्रार्थनासमये देवकीञ्च प्रार्थयन्ति) ।

देवकीप्रार्थना- प्रणमे देवजननि त्वया जातस्तु वामनः ।
वसुदेवात्तथा कृष्णो नमस्तुभ्यं नमो नमः ।।
सपुत्रार्थं प्रदत्तं मे गृहाणेमं नमोस्तु ते ।
अदितिर्देवमाता त्वं वसुदेवस्तु कश्यपः ।।
अजीजनस्त्वमीड्येव वासुदेवं सनातनम् ।
श्रीकृष्णाय नमः, सर्वेभ्यो गोकुलवासिभ्यो नमः ।।

दक्षिणासङ्कल्पः - अद्येहेत्यादिदेशकालाकीर्तनान्तेऽमुकशर्माऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीकृष्णदेवप्रीतिपूर्वकजन्मजन्मान्तरीयानेकपापक्षयार्थं जन्माष्टमीव्रतकर्मणः साङ्गफलप्राप्त्यर्थं तथैहिकामुष्मिकसकलध्वान्तनिवृत्यर्थमिमां दक्षिणां ब्राह्मणाय (ब्राह्मणेभ्यो विभज्य) दास्ये । ॐ तत्सन्नमम। **प्रतिमापक्षे** (सौवर्णीं प्रतिमां) तथा यथोपपन्नेनान्नेन ब्राह्मणं (ब्राह्मणान्) भोजयिष्ये इति संकल्प्य ब्राह्मणं (ब्राह्मणान्वा) संपूज्य दक्षिणां दत्त्वा तुलसीदलसहितं विष्णुपादोदकं ताम्रपात्रे कृत्वा हस्तौ संहतौ कृत्वाऽच्छिद्रमन्त्रान् पठेत् (लोकेऽयमेव पारणाविधिरुच्यते)।

अच्छिद्रमन्त्रपाठः- व्रतानां व्रतराजेन्द्रं व्रतानां व्रतमुत्तमम् ।
व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ।।
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणा भवतां गिरा ।
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ।।
सर्वधर्ममयो विप्रो नतद्वचनमन्यथा ।
उपवासो व्रतं चैव स्नानं तीर्थं फलं तपः ।।
विप्रैः संभाषितं यच्च संपूर्णं भवतु व्रतम् ।
ब्राह्मणा जङ्गमं तीर्थं त्रिषुलोकेषु विश्रुतम् ।।
तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ।
अन्नव्यञ्जनपानेषु शय्यायां ताम्रभाजने ।।
यच्च भुक्तमभुक्तं वा स्वप्नान्तरमथापि वा ।
दन्तान्तरविलग्नं वा क्षम्यतां मधुसूदन ।।

व्यासवाल्मीकिवचनात्पराशरवशिष्ठयोः ।
गर्गगौतमधौम्यात्रिकश्यपाङ्गिरसां तथा ।।
वचनान्नारदादीनां संपूर्णं भवतु व्रतम् ।

कृतैतन्मया जन्माष्टमीनिराहारव्रतं विधिहीनं देशहीनं कालहीनं वाक्यहीनं श्रद्धाहीनं दक्षिणाहीनं यत्कृतं तत्सुकृतमस्तु । प्रमादाद्भयाल्लोभान्मोहाद्यन्नकृतं तच्छ्रीभगवद्विष्णोः प्रसादाद्ब्राह्मणवचनात् **सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्** इति प्रत्युक्तिः ।

ॐ व्व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् । दक्षिणाश्श्रद्धामाप्नोतिश्श्रद्धयासत्त्यमाप्प्यते ।। ॐ अक्क्रन्न्कर्म्मकर्म्मकृतःसहव्वाचामयोभुवा । देवेब्भ्यःकर्म्मकृत्त्वास्तम्प्रेतसचाभुवः ।। इति पठित्वा ताम्रपत्रस्थितं पूर्वोक्तं विष्णुपादोदकम् पिबेत् ।

विष्णुपादोदकपानम्-

अकालमत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ।।

प्रार्थना- अद्य वै नवमी पुण्या पवित्रा पापनाशिनी ।
पारणं च करिष्यामि प्रसीद गरुडध्वज ।।
अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव ।।
कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वाऽनुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणयेति समर्पयामि ।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

इति प्राध्यर्घ्यं भ्रमयित्वा विसृज्य ब्राह्मणान् भोजयित्वा स्वयं भुञ्जीत ।

— इति जन्माष्टमीव्रतपूजाप्रयोगः —

◆

१०. हरितालिकाव्रतपूजाविधिः

प्रयोगः - भाद्रशुक्लतृतीयायां व्रतवती प्रातर्नद्यादौ जलाशये तिलामलकल्केन स्नात्वा पट्टवस्त्रं परिधाय गृहमागत्य स्वासने उपविश्याचम्य सङ्कल्पं कुर्यात् ।

व्रतसङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकसंवत्सरे वर्षर्तौ भाद्रपदे मासि शुक्लपक्षे हरितालिकातृतीयायां शुभपुण्यतिथौ अमुकगोत्राऽमुकीदेव्यहं मम समस्तपापक्षयपूर्वकं सप्तजन्मसु अनवच्छिन्न-सौभाग्यादिवृद्धये श्रीउमामहेश्वरप्रीत्यर्थं हरितालिकाव्रतं करिष्ये । इति सजलं ताम्रपात्रं करयोः कृत्वा प्रार्थनां कुर्यात् ।

प्रार्थना- **अद्य स्थित्वा निराहारा श्वोभूते परमेश्वरि ।**
करिष्ये पारणं गौरि व्रतं मे सफलंकुरु ।।

इति जलं भूमौ क्षिपेत् ।

अनन्तरकरणीयविधिनिर्देशः - ततः शुभे देशे सुलिप्तायां भूमौ वर्तुले मण्डले सर्वतोभद्रं विलिख्य पूजामण्डपं कदलीस्तंभतोरणवितानादिशोभितं पट्टवस्त्राच्छादितं पुष्पमालापञ्चपल्लवादिविभूषितं विधाय यथासंभवं पूजासामग्रीं देशकालोद्भवफलपुष्पाणि हरिद्राकुङ्कुमादिसर्वसौभाग्यवस्तुयुतं वैणवपात्रञ्च संपादयेत् ।

ततः सायंकाले (मध्याह्ने) दन्तधावनपूर्वकं नद्यां तडागे कूपे वा यथाविधि स्नात्वा शुभ्रवस्त्रं परिधाय पूजास्थानमागत्य मण्डपान्तःसर्वतोभद्रे ताम्रकलशोपरि लिखिताष्टदलताम्रपात्रे सौवर्णं बालुकामयं मृण्मयं वा गौरीसहितं शिवलिङ्गं निर्माय स्थापयित्वा स्वगृह्योक्तविधिना प्राणप्रतिष्ठां विधाय दीपं प्रज्वलय्याचम्य गणेशाय पुष्पाञ्जलिं समर्प्य सामान्यार्घ्यस्थापन-

सूर्यार्घ्यदानभूतोत्सादनासनविधिविशेषार्घ्यस्थापनान्तं विधाय पूजा संकल्पं कुर्यात् ।

पूजासङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकसंवत्सरे दक्षिणायने वर्षर्तौ भाद्रपदे मासे शुक्लपक्षे हरितालिकातृतीयायां शुभपुण्यतिथौ अमुकगोत्राऽमुकदेव्यहं मम सकलजन्मसञ्चितानेकमहापातकोपपातकक्षयपूर्वकं सप्तजन्मसु राज्याखण्डितसौभाग्यादिविवृद्धये श्रीउमामहेश्वरप्रीत्यर्थं हरितालिकाव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं यथामिलितोपचारैरस्यां प्रतिमायां श्रीउमामहेश्वरस्य पूजनमहं करिष्ये । इति संकल्प्य दीपकलशगणेशपूजां कुर्यात् ।

प्रतिष्ठावाहनदिकम् - ॐ मनोजूतिः० ॐ भूर्भुवः स्वः अस्यां मूर्तौ उमामहेश्वर इहागच्छेह तिष्ठ सुप्रतिष्ठितो वरदो भव इति प्रतिष्ठाप्य ध्यायेत् ।

ध्यानम्- पीतकौशेयवसनां हेमाभां कमलासनाम् ।
भक्तानां वरदां नित्यं पार्वतीं चिन्तयाम्यहम् ।।
मन्दारमालाकुलितालकायै
कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय ।
ॐ श्रीउमामहेश्वराभ्यां नमः ।

आवाहनम्- मन्दारमाला० ।
देव देवि समागच्छ प्रार्थयेऽहं जगन्मये ।
इमां मया कृतां पूजां गृहाण सुरसत्तमे ।।
देव देव समागच्छ प्रार्थयेऽहं जगत्पते ।
तावत्त्वं प्रीतिभावेन मूर्त्तौ सन्निहितो भव ।।
श्रीउमामहेश्वराभ्यां नमः ।

आसनम्- मन्दारमाला० ।

भवानि त्वं महादेवि सर्व सौभाग्यदायिके ।
अनेकरत्नसंपृक्तमासनं प्रतिगृह्यताम् ।।
देव देव नमस्तुभ्यं सहस्रशिरसे नमः ।
नमस्ते कृत्तिवासाय स्वासनं प्रतिगृह्यताम् ।।

ॐ श्रीउमामहेश्वराभ्यां नमः ।

पाद्यम्- मन्दारमाला० ।

सुचारु शीतलं दिव्यं तोयं गन्धसमन्वितम् ।
पाद्यं गृहाण देवेशि महादेवि नमोस्तु ते ।।
शंभो गङ्गादितीर्थेभ्यो मया प्रार्थनया हृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ।।

ॐ श्रीउमामहेश्वराभ्यां नमः पाद्यं स० ।

अर्घ्यम्- मन्दारमाला० ।

श्रीपार्वति महाभागे शङ्करप्रियवादिनि ।
अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते ।।
वरेण्य यज्ञपुरुष प्रजापालनतत्पर ।
नमो माहात्म्यदेवाय गृहाणार्घ्यं नमोऽस्तु ते ।।

ॐ श्री उमाम० अर्घ्यं स० ।

आचमनीयम्- मन्दारमाला० ।

गङ्गाजलं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां महाभागे रुद्रेण सहितेऽनघे ।।
पाटलोशीरकर्पूरसुरभिस्वादु शीतलम् ।
तोयमाचमनीयार्थं शङ्कर प्रतिगृह्यताम् ।।

ॐ श्रीउमाम० आचमनीयं स० ।

स्नानम्- गङ्गासरस्वतीरेवाकावेरीनर्मदाजलैः ।
स्नापितासि मया देवि तथा शान्तिं कुरुष्व मे ।।
मन्दाकिन्याः समानीतं हेमाम्भोरुहवासितम् ।
स्नानाय ते मया भक्त्या नीरं स्वीक्रियतां प्रभो ।।
ॐ श्रीउमाम० स्नानं स० ।

पञ्चामृतस्नानम्- मन्दारमाला० ।
पयो दधि घृतञ्चैव मधु शर्करयान्वितम् ।
पञ्चामृतेन स्नपनं प्रीत्यर्थं प्रतिगृह्यताम् ।।
ॐ श्रीउमाम० पञ्चामृतस्नानं स० ।
ततः ॐ श्रीउमामहेश्वराभ्यां नमः इति नाममन्त्रेण अङ्गोद्वर्तनम् ।

शुद्धोदकस्नानम्- मन्दारमाला० ।
किरणा धूतपापा च पुण्यतोया सरस्वती ।
मणिकर्णीजलं शुद्धं स्नानार्थं प्रतिगृह्यताम् ।।
ॐ श्रीउमाम० नाममन्त्रेण आचमनीयं स० ।

वस्त्रम्- मन्दारमाला० ।
कञ्चुकीमुपवस्त्रञ्च नानारत्नसमन्वितम् ।
गृहाण त्वं मयादत्तं पार्वत्यै ते नमो नमः ।।
सर्वभूषाधिके सौम्ये लोकलज्जानिवारिके ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ।।
ॐ श्रीउमा० वस्त्रं स० ।

यज्ञोपवीतम्- मन्दारमाला० ।
महादेव नमस्तेस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तमम् ।।
ॐ श्रीउमा० यज्ञोपवीतं स० नाममन्त्रेणाचमनीयम् ।

गन्धः- मन्दारमाला० ।

कुङ्कुमागरुकर्पूरकस्तूरीचन्दनान्वितम् ।
विलेपनं महादेवि गन्धं दास्यामि भक्तितः ।।
मलयाचलसंभूतं घनसारं मनोहरम् ।
हृदयानन्दनं चारु चन्दनं प्रतिगृह्यताम् ।।

ॐ श्रीउमाम० गन्धं स० ।।

अक्षताः- मन्दारमाला० ।

रञ्जिताः कुङ्कुमौघेन अक्षताश्चातिशोभनाः ।
ममैषां देवि दानेन प्रसन्ना भव पार्वति ।।
अखण्डानक्षतान् शुक्लान् शोभनान् शालितण्डुलान् ।
त्राहि मां सर्वपापेभ्यो गृहाण वृषभध्वज ।।

ॐ श्रीउमा० अक्षतान् स० ।

सौभाग्यद्रव्याणि-

हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलान्वितम् ।
सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि ।।

ॐ श्रीउमायै० सौभाग्यद्रव्यं स० ।

पुष्पाणि- मन्दारमाला० ।

सेवन्तिकाबकुलचम्पकपाटलाब्ज-
पुन्नागजातिकरवीररसालपुष्पैः ।
बिल्वप्रवालतुलसीदलमालतीभि-
स्त्वां पूजयामि जगदीश्वरि मे प्रसीद ।।
मल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ।।

अङ्गपूजा

ॐ उमायै नमः पादौ पूजयामि, **ॐ गौर्यै नमः** जङ्घे पू०, **ॐ पार्वत्यै०** जानूनी पू०, **ॐ जगद्धात्र्यै०** उरू पू०, **ॐ जगत्प्रतिष्ठायै** कटिं पू०, **ॐ शान्तिरूपिण्यै०** नाभिं पू०, **ॐ देव्यै०** उदरं पू०, **ॐ लोकबन्धायै०** स्तनौ पू०, **ॐ काल्यै०** कण्ठं पू०, **ॐ शिवायै०** मुखं पू०, **ॐ भवान्यै०** नेत्रे पू०, **ॐ रुद्राण्यै०** कर्णौ पू०, **ॐ शर्वाण्यै०** ललाटं पू०, **ॐ मङ्गलदात्र्यै०** शिरः पूज०, **ॐ भक्ताभीष्टप्रदायै०** सर्वाङ्गं पू०, **ॐ अर्धनारीश्वराय श्रीगौरीशङ्कराय०** सर्वाङ्गं पूजयामि ।

धूपः- मन्दारमाला० ।

देवद्रुमरसोद्भूतकृष्णागरुसमन्वितः ।
आनीतोऽयं मया धूपो भवानि प्रतिगृह्यताम् ।।
दशाङ्गं गुग्गुलं धूपं सुगन्धि सुमनोहरम् ।
अर्पयामि महादेव प्रसीद सुमुखो भव ।

ॐ श्रीउमा० धूपं स० ।

दीपः- मन्दारमाला० ।

त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् ।
आत्मज्योतिः परं धाम दीपोऽयं प्रतिगृह्यताम् ।।
स्वप्रकाशो महान् दीपः सर्वतस्तिमिरापहः ।
आत्मज्योतिः परं धाम हे देव प्रतिगृह्यताम् ।।

ॐ श्रीउमा० दीपं स० ।

नैवेद्यम्- मन्दारमाला० ।

अन्नं च विविधं स्वादु रसैः षड्भिः समन्वितम् ।
भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ।।
सत्पात्र-सिद्धं सुहविर्विविधानन्दलक्षणम् ।
निवेदयामि भवते सानुगाय जुषाण तत् ।।

श्रीउमा० नैवेद्यं स० ।

क्षणं ध्यात्वा- ॐ श्रीउमामहेश्वराभ्यां नम इति यथाशक्ति जपं विधाय **गुह्यातीति** समर्प्य नैवेद्यमुद्वास्य नैवेद्याङ्गमाचमनीयं नाममन्त्रेण दत्त्वा करोद्वर्तनं दद्यात् ।

करोद्वर्तनम्- मलयाचलसंभूतं कर्पूरेण समन्वितम् ।
करोद्वर्तनकं चारु गृहाण जगतः पते ।।

ॐ श्रीउमा० करोद्वर्तनं स० ।

फलम्- मन्दारमाला० ।
इदं फलं मया देवि स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।

ॐ श्रीउमा० फलं स० ।

ताम्बूलम्- मन्दारमाला० ।
कर्पूरैलालवङ्गादिताम्बूलीदलसंयुतम् ।
क्रमुकस्य फलं चैव ताम्बूलं प्रतिगृह्यताम् ।।

ॐ श्रीउमा० ताम्बूलं स० ।

दक्षिणा- मन्दारमाला० ।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

ॐ श्रीउमा० दक्षिणां स० ।

भूषणम्- मन्दारमाला० ।
व्रजमाणिक्यवैदूर्यमुक्ताविद्रुममण्डितम् ।
पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ।।

ॐ श्रीउमा० भूषणं स० ।

आरार्तिक्यम्- मन्दारमाला० अन्तस्तेजो० ॐ उमा० आरार्तिक्यं स० ।

पुष्पाञ्जलि- **ॐ उमायै नमः १, ॐ गौर्यै० २, ॐ पार्वत्यै० ३, ॐ जगद्धात्र्यै० ४, ॐ जगत्प्रतिष्ठायै० ५, ॐ शान्तिरूपिण्यै० ६, ॐ हराय० ७, ॐ महेश्वराय० ८, ॐ शम्भवे० ९, ॐ शूलपाणये० १०, ॐ पिनाकधृषे० ११, ॐ शिवाय० १२, ॐ पशुपतये० १३, ॐ महादेवाय० १४,** इति पुष्पाञ्जलिं समर्पयेत् ।

प्रदक्षिणा- **मन्दारमाला० ।**

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

ॐ श्रीउमा० प्रदक्षिणाः स० ।

नमस्कारः - **शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे ।**
शिवायै सर्वमाङ्गल्यै शिवरूपे जगन्मये ।।
शिवे कल्याणदे नित्यं शिवरूपे नमोऽस्तु ते ।
शिवप्रिये नमस्तुभ्यं शिवायै सततं नमः ।।
नमस्ते ब्रह्मचारिण्यै जगद्धात्र्यै नमो नमः ।
संसारभयसंतापात् त्राहि मां सिंहवाहिनि ।।
नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने ।
नन्दिभृङ्गिमहाकालगणयुक्ताय शम्भवे ।।
नमस्ते सर्वदीपात्मन् निमेषत्रुटिसंभव ।
जन्ममृत्युजराव्याधिसंसारभयनाशन ।।
नमस्ते देव देवेश नमस्ते धरणीधर ।
नमस्ते विश्वरूपाय नमस्ते पुरुषोत्तम ।।
संसारार्णवमग्नं च त्राहि मां वृषभध्वज ।
हराय च नमस्तुभ्यं त्रैलोक्यव्यापिने नमः ।।

मन्दारमालाकुलितालकायै
कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय ।।

ॐ श्रीउमा० नमस्कारान् समर्पयामि ।

पुष्पाञ्जलिः- मन्दारमाला० ।
पुष्पाण्यनेकरूपाणि मालाश्चैव सुशोभनाः ।
गृहाण सह पार्वत्या छत्रचामरदर्पणान् ।।

ॐ श्रीउमा० पुष्पाञ्जलिं स० ।

विशेषार्घ्यः - गौरीहरमहेशानव्रतसंपूर्तिहितवे ।
गृहाणार्घ्यं मया दत्तं फलपुष्पाम्बुसंभृतम् ।।

ॐ श्रीउमा० विशेषार्घ्यं स० ।

प्रार्थना- पुत्रान् देहि धनं देहि सौभाग्यं देहि सुव्रते ।
अन्यांश्च सर्वकामान् मे देहि देवि नमोऽस्तु ते ।।
येन कामेन देवि त्वं पूजितासि महेश्वरि ।
राज्यसौभाग्यसम्पत्तिं मह्यं देह्यम्ब पार्वति ।।

एवं गौरीं महेश्वरञ्च संपूज्य कथाश्रवणगानकीर्तनादिभिर्निशामतिवाहयेत्।

ततः प्रभाते स्नानादि विधाय नूतनोपचारैः पूजनोक्ताङ्गत्वेन देवीं देवञ्च संपूज्य प्रार्थनां कृत्वा वायनदानं कुर्यात् । सौभाग्यद्रव्यसहितानि वैणवपात्राणि संस्थाप्य **हिरण्यगर्भेति** गन्धाक्षतपुष्पैः संपूज्य संकल्पं कुर्यात् ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्राऽमुकीदेव्यहं सौभाग्यारोग्यकामा सर्वसम्पत्समृद्धये श्री उमामहेश्वर-प्रीतिद्वारा व्रतसम्पूर्तिहितवे इदं यथाकल्पितसौभाग्यद्रव्यं वस्त्रान्नफलसुवर्ण-पुष्पोपेतं वेणुपात्रं ब्राह्मणाय दास्ये, इति संकल्प्य ब्राह्मणं संपूज्य दद्यात्।

ब्राह्मणप्रार्थना- **अन्नं सुवंशपात्रस्थं सवस्त्रफलदक्षिणम् ।**
वायनं गौरि विप्राय ददामि प्रीतये तव ।।
सौभाग्यारोग्यकामाय सर्वसम्पत्समृद्धये ।
गौरीगौरीशतुष्ट्यर्थं ददामि प्रीतये तव ।।

ब्राह्मणश्च **देवस्यत्त्वेति** अहं प्रतिगृह्णामि इति प्रतिगृह्याशिषो दद्यात्। ततो **मन्दारमाला०** इति मन्त्रेण प्रणम्य विसर्जयेत् ।

विसर्जनम्- **शङ्करेण समायुक्ते गच्छ देवि यथा सुखम् ।**
मम दौर्भाग्यनाशाय पुनरागमनाय च ।।

इति विसृज्य दक्षिणाभोजनसंकल्पं कुर्यात् ।

दक्षिणाभोजनसंकल्पः - अद्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्राऽमुकीदेव्यहं यथोक्तफलावाप्तये कृतैतत्सोपवासहरितालिकातृतीयाव्रतस्य साद्गुण्यपूर्वकसाङ्गफलप्राप्तये इमां भूयसीं दक्षिणां ब्राह्मणेभ्यो दास्ये तथा सिद्धान्नेन यथासंख्याकान् ब्राह्मणान् सुवासिनींश्च भोजयिष्ये ।

अच्छिद्रवाचनादिकम् - ततोऽच्छिद्रं वाचयेत्- कृतमेतत् सोपवासहरितालिकाव्रतं **सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्**इति प्रत्युक्तिः । **अकालमृत्युहरणम्**इत्यादिना तीर्थोदकं सबिल्व (तुलसी) दलं पीत्वा शिरसा च धारयित्वा ब्राह्मणान् सुवासिनींश्च भोजयित्वा तदनुज्ञया परिवारेण सह स्वयमपि भुक्त्वा यथासुखं विहरेत् ।

— इति हरितालिकाव्रतपूजाप्रयोगः —

❖

११. सिद्धिविनायकपूजाविधिः

प्रयोगः - भाद्रशुक्लचतुर्थीयं मध्याह्नव्यापिनी कार्या- "**प्रातः शुक्ततिलैः स्नात्वा मध्याह्ने देवमर्चयेत्**" इति वचनात्। तत्र व्रती प्रातस्तिलयुतजलैः स्नात्वा **शुक्लाम्बरमि**ति विष्णुं प्रार्थ्य व्रतग्रहणं कुर्यात्।

व्रतसङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ ॐ अद्येहेत्यादि अमुकशर्माहं श्रुतिस्मृतिपुराणेक्तफलप्राप्त्यर्थं सकलमनोरथप्राप्तिपूर्वकश्रीसिद्धिविनायकप्रीत्यर्थमेतावत्कालपर्यन्तं सिद्धिविनायकव्रतं करिष्ये। **इदं व्रतम्०** इति जलं देवाग्रे भूमौ क्षिपेत्।

ततो मध्याह्नस्नानादि कृत्वा संभृतपूजासंभारः स्वासने उपविश्य दीपं प्रज्वलय्याचम्य प्राणानायम्य सुमुखश्चेत्यादिविशेषार्घ्यस्थापनान्तं विधाय सङ्कल्पं कुर्यात्।

पूजासङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादिवर्षर्तौ भाद्रपदमासे शुक्लपक्षे सिद्धिविनायकचतुर्थ्यां शुभपुण्यतिथौ अमुकगोत्रोऽमुकशर्माहं ममेह जन्मनि जन्मान्तरेषु च पुत्रपौत्रधनविद्याजययशःस्त्रीकामायुष्याभिवृद्ध्यर्थ विशेषतः श्रीसिद्धिविनायकप्रीतये सिद्धिविनायकव्रतं करिष्ये, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकमस्यां मूर्तौ यथाज्ञानेन पुरुषसूक्तमन्त्रैः पुराणोक्तमन्त्रैश्च ध्यानावाहनादिषोडशोपचारैः श्रीसिद्धिविनायकस्य पूजनमहं करिष्ये इति संकल्प्य दीपकलशगणेशपूजां विधाय देवं पूजयेत्। तत्र सिद्धमूर्तिपूजनपक्षे प्राणप्रतिष्ठादिकं न भवति, पार्थिवमूर्तिपूजनपक्षे प्राणप्रतिष्ठादिकं कर्तव्यम्।

प्राणप्रतिष्ठा- पार्थिवमूर्तौ देवस्थापनं यथा- **ॐ हेरम्बाय नम** इति शुद्धमृदाहरणम्, **ॐ सुमुखाय नम** इति सङ्घट्टनम्, **ॐ गौरीसुताय नम**

इति क्रमेण संस्थाप्य प्राणप्रतिष्ठां कुर्यात् । ॐ प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि जगत्सृष्टिः प्राणशक्तिर्देवता **ॐ बीजं ह्रीं शक्तिः क्रौं कीलकम्** अस्यां मूर्तौ प्राणप्रतिष्ठापने विनियोगः। प्रतिमायाः शिरसि हृदये च दक्षिणं करं दत्त्वा जपेत् । **ॐ आं ह्रीं क्रौं यँ रँ लँ वँ शँ सँ षँ हँसः सोऽहं** अस्यां मूर्तौ प्राणास्तिष्ठन्तु पुनःपूर्ववत्- **आं ह्रीं क्रौं** इत्यादि अस्यां मूर्तौ जीव इह स्थितः पुनः पूर्ववत्- **ॐ आं ह्रीं क्रौं** अस्यां मूर्तौ सर्वेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां कृत्वा पीठपूजां कुर्यात् ।

पीठपूजा- ॐ तीव्रायै नमः, ॐ ज्वालिन्यै नमः, ॐ नन्दायै नमः, ॐ भोगदायै नमः, ॐ कामरूपिण्यै नमः, ॐ सत्यायै नमः, ॐ उग्रायै नमः, ॐ तेजोवत्यै नमः, मध्ये ॐ विघ्नविनाशिन्यै नमः, ॐ सर्वशक्तिकमलासनाय नमः ।

प्रधानदेवपूजा

ध्यानम्- **एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।**
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ।।
ध्यायेद्देवं महाकायं तप्तकाञ्चनसन्निभम् ।
दन्ताक्षमालापरशुपूर्णमोदकहस्तकम् ।।
मोदकासक्तशूण्डाग्रमेकदन्तं विनायकम् ।

आवाहनम्- **ॐ सहस्रशीर्षा० ।**
ॐ आवाहयामि विघ्नेश सुरराजार्चितेश्वर ।
अनाथनाथसर्वज्ञ पूजार्थं गणनायक ।।

आसनम्- **ॐ पुरुषऽएव० ।**
ॐ विचित्ररत्नरचितं दिव्यास्तरणसंयुतम् ।
स्वर्णसिंहासनं चारु गृहाण सुरपूजित ।।

पाद्यम्- ॐ एतावानस्य० ।

ॐ सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिसंयुतम् ।
विघ्नराज गृहाणेदं भगवन् भक्तवत्सल ।।

अर्घ्यम्- ॐ त्रिपादूर्ध्व० ।

ॐ अर्घ्यं च फलसंयुक्तं गन्धपुष्पाक्षतैर्युतम् ।
गणाध्यक्ष नमस्तेऽस्तु गृहाण करुणानिधे ।।

मधुपर्कः- ॐ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाहृतम् ।
गृहाण सर्वलोकेश गणनाथ नमोऽस्तु ते ।।

आचमनीयम्- ॐ ततोविराट्० ।

ॐ विनायक नमस्तुभ्यं त्रिदशैरभिवन्दित ।
गङ्गोदकेन शीतेन सुखमाचमनं कुरु ।।

पञ्चामृतस्नानम्- ॐ पयो दधि घृतं चैव मधु शर्करया युतम् ।
पञ्चामृतेन स्नपनात् प्रीयतां गणनायकः ।।

'ॐ सिद्धि-विनायकाय नमः' इति नाममन्त्रेण गन्धोदकस्नानम् ।

शुद्धोदकस्नानम्- ॐ तस्मादद्यज्ञात्सर्वहुतःसम्भृतम्० ।

ॐ गङ्गादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् ।
भक्त्या समर्पितं तुभ्यं स्नानाय प्रतिगृह्यताम् ।।

नाममन्त्रेण स्नानाङ्गमाचमनीयम् ।

वस्त्रम्- ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० ।

रक्तवस्त्रयुगं देव देवाङ्गसदृशं प्रभो ।
सर्वप्रद गृहाणेदं लम्बोदर हरात्मज ।।

नाममन्त्रेण वस्त्राङ्गमाचमनीयम् ।

यज्ञोपवीतम्- ॐ तस्मादश्वा० ।

ॐ राजतं ब्रह्मसूत्रञ्च काञ्चनञ्चोत्तरीयकम् ।
गृहाण चारु सर्वज्ञ भक्तानां वरदायक ।।

नाममन्त्रेण यज्ञोपवीताङ्गमाचमनीयम् ।

गन्धः- ॐ तंय्यज्ञम्० ।

ॐ कस्तूरी चन्दनञ्चैव कुङ्कुमेन समन्वितम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ।।

श्रीगणाध्यक्षाय नमः ।

सिन्दूरम्- ॐ उद्यद्भास्करसंकाशं सन्ध्यावदरुणं प्रभो ।
वीरालङ्करणं दिव्यं सिन्दूरं प्रतिगृह्यताम् ।।

रक्ताक्षताः- रक्ताक्षताँश्च देवेश गृहाण द्विरदानन ।
ललाटपटले चन्द्रस्तस्योपर्युपधार्यताम् ।।

आभरणानि- नानाविधानि दिव्यानि नानारत्नोज्ज्वलानि च ।
भूषणानि गृहाणेश पार्वतीप्रियनन्दन ।।

पुष्पाणि- ॐ यत्पुरुषम्० ।

ॐ करवीरैर्जातिपुष्पैश्चम्पकैर्बकुलैः शुभैः ।
शतपत्रैश्च कह्लारैः पूजयामि विनायकम् ।।
सुगन्धीनि च पुष्पाणि जातीकुन्दमुखानि च ।
त्रिविधानि च पत्राणि गृहाण गणनायक ।।

अङ्गपूजा

ॐ गणेश्वराय नमः पादौ पूजयामि, **ॐ विघ्नराजाय नमः** जानुनी पू०, **ॐ आखुवाहनाय नमः** ऊरू पू०, **ॐ हेरम्बाय नमः** कटी पू०, **ॐ कामारिसूनवे नमः** नाभिं पू०, **ॐ लम्बोदराय नमः** उदरं पू०, **ॐ गौरीसुताय नमः** स्तनौ पू०, **ॐ गणनायकाय नमः** हृदयं पू०, **ॐ स्थूलकण्ठाय नमः** कण्ठं पू०, **ॐ स्कन्दाग्रजाय नमः** स्कन्धौ पू०, **ॐ पाशहस्ताय नमः** हस्तान् पू०, **ॐ गजवक्त्राय नमः** वक्त्रं पू०, **ॐ विघ्नहर्त्रे नमः** ललाटं पू०, **ॐ सर्वेश्वराय नमः** शिरः पूजयामि ।

एकविंशतिपत्रैः पूजनम्- **ॐ सुमुखाय नमः** मालतीपत्रं समर्पयमि, **ॐ गणाधिपाय०** भृङ्गराजपत्रं स०, **ॐ उमापुत्राय०** विल्वपत्रं स०, **ॐ गजाननाय०** श्वेतदूर्वापत्रं स०, **ॐ लम्बोदराय०** बदरीपत्रं स०, **ॐ हरसूनवे०** धत्तूरपत्रं स०, **ॐ गजकर्णाय०** तुलसीपत्रं स०, **ॐ वक्रतुण्डाय०** शमीपत्रं स०, **ॐ गुहाग्रजाय०** अपामार्गपत्रं स०, **ॐ एकदन्ताय०** बृहतीपत्रं स०, **ॐ विकटाय०** करवीरपत्रं स०, **ॐ कपिलाय०** अर्कपत्रं स०, **ॐ गजदन्ताय०** अर्जुनपत्रं स०, **ॐ विघ्नराजाय०** विष्णुकान्तापत्रं स०, **ॐ बटवे०** दाडिमीपत्रं स०, **ॐ सुराग्रजाय०** देवदारुकपत्रं स०, **ॐ भालचन्द्राय०** मरुबकपत्रं स०, **ॐ हेरम्बाय०** अश्वत्थ (सिन्दुवार) पत्रं स०, **ॐ चतुर्भुजाय०** जातीपत्रं स०, **ॐ विनायकाय०** केतकी (अश्मन्तक) पत्रं स०, **ॐ सर्वेश्वराय नमः** अगस्तिपत्रं समर्पयामि ।

धूपः- ॐ ब्राह्मणोस्य० ।

ॐ दशाङ्गं गुग्गुलं धूपं सुगन्धं च मनोहरम् ।
गृहाण सर्वदेवेश उमापुत्र नमोऽस्तु ते ।।

दीपः - ॐ चन्द्रमामनसः० ।

ॐ सर्वज्ञ सर्वलोकेश त्रैलोक्यतिमिरापह ।
गृहाण मङ्गलं दीपं रुद्रप्रिय नमोऽस्तु ते ।।

एकविंशतिमोदकनैवेद्यम्- ॐ नाभ्याऽआसीत्० ।

शालितण्डुलचूर्णोत्थान् सगुडान् घृतपाचितान् ।
मोदकान् दद्मि नैवेद्यं नमस्ते विघ्ननाशिने ।।
नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ।
ईप्सितं च वरं देहि परत्र च परां गतिम् ।।
नानाखाद्यमयं दिव्यं तुष्ट्यर्थं ते निवेदितम् ।
मया भक्त्या शिवापुत्र गृहाण गणनायक ।।

अपोशानार्थे जलं समर्पयामि ।

नैवेद्यमध्ये पानीयम्- ॐ एलोशीरलवङ्गादिकर्पूरपरिवासितम् ।
प्राशनार्थं कृतं तोयं गृहाण गणनायक ।।
प्राणादिमुद्राः प्रदश्र्य अमृतं भुज्यतां विभो ।

इति नैवेद्यं निवेद्य क्षणं ध्यात्वा यथाशक्ति मूलमन्त्रं प्रजप्य **गुह्यातीति** समर्प्य, नैवेद्यपात्रमुत्थाप्य एकं मोदकम् **ॐ उच्छिष्टभागिने लम्बोदराय नमः** इति दत्त्वा उत्तरापोशानं० हस्तप्रक्षालनं० मुखप्रक्षालनम्० **ॐ लम्बोदराय नमः** ।

करोद्वर्तनम्- मलयाचलसम्भूतं कपूरिण समन्वितम् ।
करोद्वर्तनकं चारु गृह्यतां जगतःपते ।।

फलम्- ॐ इदं फलं० ।
बीजपूराम्रपनसखर्जुरीकदलीफलम् ।
नारिकेलफलं दिव्यं गृहाण गणनायक ।।

ताम्बूलम्- पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

दक्षिणा- ॐ हिरण्यगर्भ० । ततो नाममन्त्रेण छत्रचामरपादुकादर्पणं समर्पयेत् ।

दूर्वाङ्कुरैः पूजा- ॐ गणाधिप नमस्तेऽस्तु दूर्वायुग्मं समर्पयामि, **ॐ उमापुत्र नमस्तेऽस्तु** दूर्वायु०, **ॐ अघनाशन नमस्तेऽस्तु** दूर्वायु०, **ॐ एकदन्त नमस्तेऽस्तु** दूर्वायु०, **इभवक्र नमस्तेऽस्तु** दूर्वायु०, **ॐ मूषकवाहन नमस्तेऽस्तु** दूर्वायु०, **ॐ विनायक नमस्तेऽस्तु** दूर्वायु०, **ॐ ईशपुत्र नमस्तेऽस्तु** दूर्वायु०, **ॐ सर्वसिद्धिप्रदायक नमस्तेऽस्तु** दूर्वायु०, **ॐ कुमारगुरो नमस्तेऽस्तु** दूर्वायुग्मं समर्पयामि ।

ततो गन्धपुष्पाक्षतयुतमेकं दूर्वाङ्कुरं सर्वनामभिरर्पयेत् ।

प्रार्थना- गणाधिप नमस्तेऽस्तु उमापुत्राघनाशन ।
एकदन्तेभवक्त्रेति तथा मूषकवाहन ।।
विनायकेशपुत्रेति सर्वसिद्धिप्रदायक ।
कुमारगुरवे तुभ्यमिमां दूर्वां निवेदये ।।

नीराजनम्- ॐ चन्द्रादित्यौ च धरणीविद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतिंषि आरार्तिः प्रतिगृह्यताम् ।।

प्रदक्षिणाः- ॐ यत्पुरुषेण० ।
विघ्नेश्वर विशालाक्ष सर्वाभीष्टफलप्रद ।
प्रदक्षिणां करोमि त्वां सर्वान् कामान् प्रयच्छ मे ।।

नमस्कारः- ॐ सप्प्तास्यासन्० ।
गजाननं भूतगणाधिसेवितम्
कपित्थजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारणम्
नमामि विघ्नेश्वरपादपङ्कजम् ।।
नमस्ते विघ्नसंहर्त्रे नमस्तेऽभीप्सितप्रद ।
नमस्ते देव देवेश नमस्ते गणनायक ।।

मन्त्रपुष्पाञ्जलिः- ॐ यज्ञेनयज्ञम० ।
विनायकेशतनय गजराजसुरोत्तम ।
देहि मे सकलान् कामान् सर्वसिद्धिप्रदायक ।।

प्रार्थना- विनायक गणेशान सर्वदेवनमस्कृत ।
प्रार्वतीप्रिय विघ्नेश मम विघ्नान्निवारय ।।
यन्मयाचरितं देव व्रतमेतत्सुदुर्लभम् ।
त्वत्प्रसादाद्गणेश त्वं सफलं कुरु सर्वदा ।।

आवाहनं न जानामि० इति देवं विसर्जयेत् ।

वायनदानम्- सफलान् सदक्षिणान् दशमोदकान् संस्थाप्य **ॐ हिरण्यगर्भेति** ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकगोत्रोऽमुकशर्माहं सिद्धिविनायकचतुर्थीव्रताङ्गत्वेन कृतायाः श्रीसिद्धिविनायकपूजायाः साद्गुण्यार्थं श्रीसिद्धिविनायकप्रीतये फलदक्षिणायुतान् इमान् दशमोदकान् ब्रह्मणाय दास्ये इति संकल्प्य ब्राह्मणं संपूज्य दद्यादनेण मन्त्रेण -

दशकं मोदकानाञ्च फलदक्षिणया युतम् ।
वायनं देव तुष्ट्यर्थं विप्राय प्रददाम्यहम् ।।

ब्राह्मणश्च **देवस्यत्वे**ति मन्त्रेण प्रतिगृह्य कोदात् इति कामस्तुतिं पठेदाशिषञ्च दद्यात् । सुर्वणादिप्रतिमापक्षे पूर्वोक्तविधिना तां प्रदाय यथाशक्ति भूयसीं दत्त्वा **ॐ यस्य स्मृत्या०** इत्यादिना कर्मेश्वरार्पणं विधाय बाह्मणान् भोजयेत् स्वयं च दशमोदकान् भुञ्जीत ।

— इति सिद्धिविनायकचतुर्थीव्रतपूजाविधिः —

*

१२. ऋषिपञ्चमीव्रतविधिः

प्रयोगः - 'सा च पञ्चमी मध्याह्नव्यापिनी ग्राह्या' इति माघवीये हारीतः। 'दिनद्वये मध्याह्नव्याप्तौ परा सितापरयुता स्यात् पञ्चमी' इति दीपिकोक्तेः। ऋषिपञ्चमी षष्ठीयुतैव इति दिवोदासोक्तेश्च पूर्वविद्धा ग्राह्या **''युग्माग्नियुगभूतानाम्''** इति युग्मवाक्यादिति केचित् । तत्र व्रतवती नारी भाद्रशुक्लपञ्चम्यां नित्यकर्म विधाय नद्यादौ व्रतं सङ्कल्पयेत् ।

व्रतसङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ इत्यादि देशकालौ स्मृत्वा अमुकगोत्राऽमुकी देव्यहं प्रथमऋतुदर्शनादारभ्य शरीरावसानपर्यन्तमार्तवसंसर्गजनितदोषपरिहाराय शास्त्रोक्तफलावाप्तये ऋतुदर्शनपूर्वत आरभ्य यावज्जीवं सप्तवर्षं वा ऋषिपञ्चमीव्रतं करिष्ये । प्रमादादिना ऋतुदर्शनात् पूर्वं व्रताग्रहणे ऋतुदर्शननिवृत्त्यनन्तरं सप्तवर्षपर्यन्तमृषिपञ्चमीव्रतं करिष्ये इति संकल्पयेत् । जलपूर्णं ताम्रपात्रं करयोः कृत्वा-

अद्यैव ऋषिपञ्चम्यां करिष्येऽहं व्रतं शुभम् ।
ऋषीणाञ्च प्रसादेन निर्विघ्नं जायतां मम ।।

इति शिरसा संयोज्य तज्जलं तीर्थजले क्षिपेत्- **ऋषिभ्यो नमः** इति नमस्कुर्याच्च । ततो गृहमागत्य मध्याह्नस्नानोपकरणानि संपादयेत् ।

आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ।।

इत्यपामार्गमुधृत्याष्टोत्तरशतसंख्याकानि (षष्ट्यधिकशतत्रयसंख्याकानि) सप्तसंख्याकानि वा चतुरङ्गुलप्रमाणानि दन्तधावनानि निर्माय पवित्राणि पञ्चगव्यानि च समानीय मध्याह्ने नद्यादौ विमले जले गत्वा प्राङ्मुखो दन्तधावनं कुर्यात् ।

दन्तधावनम्- मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ।।

इति दन्तान् विशोध्य मुखं प्रक्षाल्याचम्य पञ्चगव्यं साधयेत् ।

पञ्चगव्यसाधनम्- ॐ तत्सत्३ इत्यादि अमुकी देव्यहं मम कायवाङ्मनोदोषशुद्धये पञ्चगव्यं करिष्ये इति संकल्प्य ताम्रपात्रे **केशवाय नमः** गोमूत्रम्, **नारायणाय नमः** गोमयम्, **माधवाय नमः** गोदुग्धम्, **गोविन्दाय नमः** दधि, **विष्णवे नमः** घृतम्, **मधुसूदनाय नमः** कुशोदकं संस्थाप्य, **त्रिविक्रमाय नमः** इति मन्थयेत् ।

ततः सिद्धस्य पञ्चगव्यस्य सप्तपर्णैः शुभैः साग्रैर्हरितकुशैरुद्धृत्य षडाहुतीर्जले जुहुयात् **अग्नये नमः १, सोमाय नमः २, ब्रह्मणे नमः ३, विष्णवे नमः ४, रुद्राय नमः ५, सूर्याय नमः ६** शेषमश्नीयात् ।

पञ्चगव्यप्राशनमन्त्रः - यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
ब्रह्मकूर्चो दहेत् सर्वं तत्तदग्निरिवेन्धनम् ।।

मृत्स्नानम्- अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।।

इति शिरः प्रभृत्यङ्गेषु मृत्तिकां विलिप्य स्नायात् ।

स्नानसङ्कल्पः - ॐ अद्येत्यादि देशकालौ संकीर्त्य यथोक्तफलावाप्तये ऋषिपञ्चमीव्रताङ्गत्वेन ऋषिपूजनाधिकारसिद्धये मध्याह्नस्नानं करिष्ये इति संकल्प्य तिलामलककल्केन केशान् संशोध्य गङ्गादितीर्थस्मरणपूर्वकं स्नात्वा शुद्धे नवे वाससी परिधाय आचम्य जले देवान् नमस्कृत्य गृहमागच्छेत्।

सारुन्धतीकसप्तर्षिस्थापना- गृहस्य शुभे देशे वेदीं निर्माय गोमयेनोपलिप्य रङ्गवल्ल्यादिभिः सुशोभितां कृत्वा मध्ये सर्वतोभद्रं विलिख्य तत्र सुलक्षणं सुपूजितं ताम्रं मृन्मयं वा कुम्भं जलपूर्णं वस्त्रपञ्चरत्नहिरण्यपञ्चपल्लवाद्युपेतं कलशं विधिना संस्थाप्य तदुपरि यथासंभवं रौप्यं ताम्रं मृन्मयं वा पूर्णपात्रं

संस्थाप्य वस्त्रेणाच्छादयेत् । तत्र चन्दनादिनाष्टदलं विलिख्य तस्मिन् सौवर्णान् राजतान् ब्रह्मगन्थियुतान् दर्भमयान् वा पट्टे लिखितान् वा सारुन्धतीकान् सप्तर्षीन् संस्थाप्य पूजयेत् ।

सप्तर्षिपूजनम्

प्रयोगः - प्राङ्मुखी उदङ्मुखी वा स्वासने उपविश्य दीपं प्रज्वलय्य आचम्य सुमुखश्चेत्यादिना गणेशाय पुष्पाञ्जलिं समर्प्य सामान्यार्घ्यादि-विशेषार्घ्यान्तं सामान्यवद् विधाय पूजासङ्कल्पं कुर्यात् ।

पूजासङ्कल्पः- अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्राऽमुकी देव्यहं मम प्रथमर्तुदर्शनादारभ्य शरीरावसानपर्यन्तं ज्ञानतोऽज्ञानतो वा रजस्वलावस्थाकृतसंपर्कजनितदोषपरिहारार्थं यथोक्तफलावाप्तये अरुन्धतीसहित-कश्यपादिसप्तर्षिप्रीतये ऋषिपञ्चमीव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं यथामिलितोपचारै र्ऋषीणां पूजनं करिष्ये इति संकल्प्य दीपकलशगणेशपूजनं विधाय अग्न्युत्तारणपूर्वकं सौर्वणादिप्रतिमासु प्रतिष्ठापनम् । कुशप्रतिमासु पट्टलिखितासु वा सामान्यतः प्रतिष्ठापनम् ।

प्रतिष्ठावाहनादिकम्- ॐ मनोजूतिः० ॐ भूर्भुवः स्वः सारुन्धतीकाः सप्तर्षयः इहागच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु इति प्रतिष्ठाप्य ध्यायेत् ।

ध्यानम्- ॐ सप्तऽऋषयःप्रतिहिताःशरीरेसप्तरक्षन्तिसदमप्रमादम् ।
सप्तापःस्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ।।

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च अरुन्धत्या सहाष्टकाः ।।
मूर्तिर्ब्रह्मण्यदेवर्षेर्ब्रह्मण्यं तेज उत्तमम् ।
सूर्यकोटिप्रतीकाशमृषिवृन्दं विचिन्तये ।।

आवाहनम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
आवाहयाम्यहं सप्तमुनीन् ज्ञानविशारदान् ।
पूज्यान् सर्वस्य लोकस्य व्रतसाद्गुण्यकारणात् ।।

आसनम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
ऋग्यजुः-सामवेदानां स्वरूपेभ्यो नमो नमः ।
पुराणपुरुषेभ्यो हि देवर्षिभ्योऽस्तु स्वासनम् ।।

पाद्यम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
गन्धपुष्पाक्षतैर्युक्तं सुगन्धिविमलं जलम् ।
पाद्यं तत्प्रतिगृह्णन्तु कश्यपाद्या महर्षयः ।।

अर्घ्यम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
तापत्रयहरं दिव्यं गन्धपुष्पाक्षतैः सह ।
सप्तर्षयः प्रगृह्णन्तु दत्तमर्घ्यं मया तु यत् ।।

आचमनीयम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
कर्पूरवासितं तोयं सुवर्णकलशे स्थितम् ।
ददाम्याचमनं भक्त्या ऋषीणां प्रीतये सदा ।।

पञ्चामृतस्नानम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
पयो दधि घृतं चैव शर्करा-मधुसंयुतम् ।
पञ्चामृतेन स्नपनं गृह्यताम् ऋषिसत्तमाः ।।

स्नानम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
गङ्गादि सर्वतीर्थेभ्य आनीतमृषिसत्तमाः ।
शुद्धं गन्धोदकं दिव्यं स्नानार्थं प्रति गृह्यताम् ।।
अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः ।

इति मन्त्रेण स्नानाङ्गमाचमनीयम् ।

वस्त्रम्- ॐ सप्तऽऋषय० कश्यपोऽत्रि० ।

सूक्ष्माण्यतीव शुभ्राणि वस्त्राणि विविधानि च ।
ऋषयः प्रतिगृह्णन्तु मुक्तिदाः सन्तु मे सदा ।।

इति मन्त्रेण वस्त्राङ्गमाचमनीयम् ।

यज्ञोपवीतम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।

नानामन्त्रैः समुद्धूतं त्रिवृन्तब्रह्मसूत्रकम् ।
प्रत्येकञ्च प्रयच्छामि ऋषीणां भावितात्मनाम् ।।

इति नाममन्त्रेण यज्ञोपवीताङ्गमाचमनीयम् ।

गन्धः- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।

मलयोत्थं तापहरं सुगन्धि सुमनोहरम् ।
चन्दनञ्च प्रयच्छामि ऋषीणां भावितात्मनाम् ।।

अक्षताः- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।

सुगन्धास्तण्डुलाः शुभ्राः प्रक्षाल्य च नियोजिताः ।
अक्षताश्च मया दत्तास्तान् गृह्णन्तु मुनीश्वराः ।।

पुष्पाणि- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।

पुष्पाणि चम्पकादीनि मालत्यादीनि सर्वतः ।
मयाहृत्य कृता पूजा ऋषयः प्रतिगृह्यताम् ।।

प्रत्येकं नामपूजा- कश्यपाय नमः १, अत्रये नमः २, भरद्वाजाय नमः ३, विश्वामित्राय नमः ४, गौतमाय नमः ५, जमदग्नये नमः ६, वसिष्ठाय नमः ७, अरुन्धत्यै नमः ८ ।

धूपः - ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।

कृष्णागरुर्गुग्गुलुश्च सर्वसौगन्ध्यमिश्रितः ।
कश्यपादिमुनीनाञ्च धूपार्थं दीयते मया ।।

दीपः- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
सुवर्त्तिघृतसंयुक्तमन्धकारविनाशनम् ।
नीराजनं कृतं सम्यगृषयस्तन्निरीक्ष्यताम् ।।

नैवेद्यम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितम् ।
गृह्णन्तु ऋषयः सर्वे नैवेद्यं मन्निवेदितम् ।।

मध्ये पानीयम्०, प्राणादिमुद्राभिर्नैवेद्यं निवेद्य क्षणं ध्यात्वा कश्यपाद्यष्टनामजपं विधाय **गुह्याती**ति समर्प्य नैवेद्यमुत्थाप्य नैवेद्याङ्गमाचमनीयं दत्वा करोद्वर्त्तनार्थे चन्दनं दद्यात् ।

चन्दनम् - ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
उष्णोदकं शुद्धिकरं शीतलं चन्दनान्वितम् ।
गह्णन्तु मुनयः सर्वे करोद्वर्त्तनकाङ्क्षिणः ।।

फलम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
नमो वेदविदां श्रेष्ठा ऋषयः सूर्यसन्निभाः ।
गृह्णन्त्विदं फलं तुष्टा मया दत्तं हि भक्तितः ।।

ताम्बूलम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
पूगीफलं सकर्पूरं नागवल्लीदलैर्युतम् ।
त्रयोदशगुणोपेतं ताम्बूलं प्रतिगृह्यताम् ।।

दक्षिणा- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० हिरण्यगर्भ० ।

नीराजनम्- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
सुवर्त्तिघृतसंयुक्तमन्धकारविनाशनम् ।
नीराजनं कृत्तं सम्यगृषयस्तन्निरीक्ष्यताम् ।।

प्रदक्षिणा - ॐ सप्तऽऋषयः कश्यपोऽत्रि० ।
यानि कानि हि पापानि ब्रह्महत्यासमानि च ।
तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे ।।

नमस्कारः- ॐ सप्तऽऋषयः० कश्यपोऽत्रि० ।
ब्रह्मर्षिभ्यो नमश्चास्तु देवर्षिभ्यो नमो नमः ।
सर्वपापहरेभ्यो हि वेदविद्भ्यो नमो नमः ।।

मन्त्रपुष्पाञ्जलिः- ॐ सप्तऽऋषयः० ।
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वशिष्ठश्च अरुन्धत्या सहाष्टकाः ।
पूजां गृह्णीत मद्भक्त्या तुष्टा भवत सर्वदा ।।

विशेषार्घ्यः- सुवर्णादिपात्रे फलगन्धाक्षतपुष्पयुताम्बूलपूर्णमर्घ्यं संपाद्य जानुभ्यामवनीं गत्वा शिरसाभिप्रणम्य वक्ष्यमाणमन्त्राभ्यां द्विर्दद्यात्-

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वशिष्ठश्च अरुन्धत्या सहाष्टकाः ।
पूजां गृह्णीत मद्भक्त्या तुष्टा भवत सर्वदा ।।१।।
नमस्ये शुक्लपञ्चम्यामर्चिता ऋषिसत्तमाः ।
दहन्तु पापं मे सर्वं गृह्णन्त्वर्घ्यं नमो नमः ।।२।।

प्रार्थना- एते सप्तर्षयः सर्वे भक्त्या संपूजिता मया ।
सर्वं पापं व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ।।
इमे ते ऋषयः सप्त सर्वपापप्रणाशनाः ।
अस्माकं सन्तु सततं समीहितफलप्रदाः ।।

वायनदानम्- घृतपक्वान्नफलपुष्पहिरण्यवस्त्रदक्षिणादिवैणवादिपात्रे निधाय, **हिरण्यगर्भ** इत्यादिना संपूज्य सङ्कल्पं कुर्यात् ।

वायनदानसङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुक्यहं यथोक्ताफलावाप्तये ऋषिपञ्चमीव्रताङ्गत्वेन कृताया दीपकलशगणेशपूजनपूर्वकमृषिपूजायाः साङ्गुण्यार्थं सप्तर्षीणां प्रीतये ब्राह्मणाय वायनदानं करिष्ये इति सङ्कल्प्य ब्राह्मणं संपूज्य दद्यात् । हस्ते वायनं गृहीत्वा-

वायनं फलसंयुक्तं सघृतं दक्षिणान्वितम् ।
द्विजवर्याय दास्यामि व्रतसम्पूर्तिहेतवे ।।
भवन्तः प्रतिगृह्णन्तु ज्योतीरूपास्तपोधनाः ।
उभयोस्तारकाः सन्तु वायनस्य प्रदानतः ।।

कोदात्० इत्यादिना प्रतिगृह्याशिषो दद्यात् ।

क्षमापनम् - न्यूनातिरिक्तकर्माणि मया यानि कृतानि च ।
क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः ।।

विसर्जनम्- न्यूनातिरिक्तानि परिस्फुटानि
यानीह कर्माणि मया कृतानि ।
क्षम्याणि चैतानि मम क्षमध्वम्
प्रयात तुष्टाः पुनरागमाय ।।
यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ।।

घटदानम्- घटस्थापनप्रतिमापूजनपक्षे सप्तर्षियुतघटदानसङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुक्यहमृषिपञ्चमीव्रतस्य ऋषिपूजायाश्च साङ्गतासिद्ध्यर्थमृषिसहितं सहिरण्यवस्त्रकुम्भं ब्राह्मणाय दास्ये इति ब्राह्मणं संपूज्य दद्यात् ।

साक्षतं सहिरण्यञ्च कुम्भमृषिसमन्वितम् ।
ऋषीणां प्रीतये दास्ये ब्राह्मणाय महात्मने ।।

यस्य स्मृत्या०, अच्युताय नमः, विष्णवे नमः, कायेन वाचा० इति कर्मेश्वरार्पणं कुर्यात् ।

— इति ऋषिपञ्चमीव्रतपूजाविधिः —

◆

१३. अगस्त्यार्घदानविधिः

प्रयोगः - भाद्रपदमासे सौराद् द्वाविंशतितमदिनापररात्रेऽगस्त्यार्घदानं कर्तव्यम्। तस्मिन् दिने पूर्वं प्रत्यूषसमये शुक्लतिलैः स्नात्वा शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः पूजको गोमयोपलिप्ते प्राङ्गणे स्वासने उपविश्य दीपं प्रज्वलय्याचम्य प्राणानायम्य संकल्पं कुर्यात् ।

प्रतिज्ञासङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकगोत्रोऽमुकशर्माहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये लोपामुद्रासहितागस्त्यमुनिप्रीत्यर्थं दीपकलशगणेशपूजनपूर्वकं यथामिलितोपचारैः सपत्नीकस्यागस्त्यस्य पूजनमर्घ्यदानञ्च करिष्ये इति संकल्प्य, दीपकलशगणेशपूजां विधाय, वस्त्रमाल्यपञ्चपल्लवादिसमायुतदध्यक्षतादिभूषिताव्रणकुम्भमुखे पुरुषाकारां प्रशान्तां जटामण्डलधारिणीं कमण्डलुकरां दर्भाक्षस्रग्धरां शिष्यैर्मृगैश्च परिवारितां काञ्चनमयीं काशपुष्पमयीं वाऽगस्त्यप्रतिमां संस्थाप्य, **ॐ मनोजूतिः०** इति प्रतिष्ठाप्य ध्यायेत् ।

ध्यानम्- **पुरुषाकृतिं प्रशान्तञ्च जटामण्डलधारिणम् ।**
कमण्डलुकरं शिष्यैर्मृगैश्च परिवारितम् ।।
ध्यायेऽगस्त्याभिधं पुण्यं शक्तिमन्तं तपोनिधिम् ।
मृत्यूग्रविषहन्तारं दर्भाक्षस्रग्धरं मुनिम् ।।

पूजनम्- **ॐ अगस्त्यःखनमानःखनित्रैःप्रजामपत्यंबलमिच्छमानः । उभौवर्णावृषिरुग्रःपुपोषसत्यादेवेष्वाशिषोजगाम ।।** इति वैदिकमन्त्रेण,

काशपुष्पप्रतीकाश अग्निमारुतसंभव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ।।

इत्यनेन मन्त्रेण च आवाहनासनपाद्यार्घ्याचमनीयपञ्चामृतस्नानपुनराचमनीय-

वस्त्रयज्ञोपवीतगन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलफलद्रव्यप्रदक्षिणानीराजननमस्कारमन्त्रपुष्पाञ्जलिभिरुपचारैः समभ्यर्च्य पुष्पफूलगन्धसुगन्धधूपद्राक्षाखर्जूरवरनारिकेलादिफलपञ्चरत्नहेमरूप्यादिभिः सप्तधान्यैश्चन्दनेन च युक्तं ताम्रपात्रं शङ्खं वा सजलं पाणिभ्यामादायागस्त्यायार्घ्यं दद्यात् ।

अर्घ्यम्- ॐ अगस्त्यःखनमानः० ।

विन्ध्यवृद्धिक्षयकरं मेघतोयविषापह ।
रत्नवल्लभदेवेश लङ्कावास नमोस्तु ते ।।
वातापिर्भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान्योऽसौ तस्मै नमो नमः ।।
येनोदितेन पापानि प्रलयं यान्ति व्याधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ।।
लङ्कावास नमस्तुभ्यमृषीणां प्रवरोत्तम ।
उदितो द्वारि लङ्काया अर्घ्यं मे प्रतिगृह्यताम् ।।
वंशपात्रस्थितं चार्घ्यं सप्तधान्यसमन्वितम् ।।
फलपुष्पसमायुक्तं देवेश प्रतिगृह्यताम् ।
शङ्खं पुष्पं फलं तोयं रत्नानि विविधानि च ।
सुरासुरमुनिश्रेष्ठ अर्घ्यं मे प्रतिगृह्यताम् ।।
राजपुत्रि नमस्तुभ्यमृषिपत्नि नमोस्तु ते ।
गृहाणार्घ्यं मया दत्तं लोपामुद्रे शुभानने ।।

ततः शक्तौ सत्यां होमं कृत्वा फलत्यागं कुर्यात् । ततः सौवर्णपुरुषदानं संपत्तौ धेनुदानञ्च ।

विसर्जनम् - दत्त्वैवमर्घ्यं कौन्तेय प्रणिपत्य विसर्जयेत् ।
अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये ।।
ऐहिकामुष्मिकीं दत्त्वा कार्यसिद्धिं व्रजस्व मे ।
विसर्जयित्वागस्त्यं तं विप्राय प्रतिपादयेत् ।।
दैवज्ञव्यासरूपाय वेदवेदाङ्गवादिने ।

दानमन्त्रः -

अगस्त्यो मे मनःस्थोऽस्तु अगस्त्योऽस्मिन् घटे स्थितः ।
अगस्त्यो द्विजरूपेण प्रतिगृह्णाति सत्कृतः ।।

प्रतिग्रहमन्त्रः - अगस्त्यः सप्तजन्मोत्थं नाशयत्यावयोरघम् ।
अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने ।। इति ।
एवं यः कुरुते भक्त्या ह्यगस्त्यव्रतमादरात् ।
फलमेकं तथा धान्यं रसञ्चैकं परित्यजेत् ।।
संपूर्णे च तथा वर्षे पुनरन्यमुपक्रमेत् ।

अन्यम् = फलादित्यागम् । सप्तवर्षाणि व्रतं कर्तव्यम् ।

— इत्यगस्त्यार्घ्यदानविधिः —

◆

१४. शारदनवरात्रमहोत्सवः

प्रयोगः - तत्र प्रतिपदि प्रातरभ्यङ्गस्नानं कृत्वा सपत्नीको यजमानः पूर्वं संपादिते कदलीस्तंभवितानादिशोभिते सुरम्ये मण्डपे गत्वा स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य पवित्रपाणिराचम्य प्राणानायम्य सुमुखश्चेति गणेशाय पुष्पाञ्जलिं समर्प्य आत्माग्रे भूमौ चन्दनेन लिखित्वा- **ॐ आधारशक्तये नमः** इत्याधारशक्तिं संपूज्य तत्रार्घ्यपात्रं संस्थाप्य शुद्धजलेन पूरयेत् ।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धो काबेरि जलेऽस्मिन्सन्निधिं कुरु ।।

ततो गन्धपुष्पादि तूष्णीं निक्षिप्य सूर्यायार्घ्यं दत्वा पुनरर्घ्यं संस्थाप्य तेन जलेनात्मानं पूजासामग्रीञ्च संप्रोक्ष्य पूजासंकल्पं कुर्यात् ।

सङ्कल्पः- ॐ तत्सदित्यादि देशकालकीर्तनान्ते अमुकगोत्रोऽमुकशर्माहं समत्नीकः सकुटुम्बस्य ममेह जन्मनि श्रीदुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीशत्रुपराजयकीर्तिलाभप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थमद्यप्रभृतिमहानवमीपर्यन्तं प्रत्यहं त्रिकालं द्विकालमेककालं वा श्रीदुर्गापूजनमुपवासनक्तैकभक्तान्यतमनियमसहितमखण्डदीपप्रज्वालनं प्रत्यहमेकोत्तरवृद्ध्या प्रत्यहमेकावृत्त्या वा चण्डीसप्तशतीपाठमन्ते बलिदानहोमादियावत्कुलाचारप्राप्तं शारदनवरात्रमहोत्सवं करिष्ये, तत्पूर्वाङ्गत्वेन दीपकलशगणेशपूजनं शारदनवरात्रप्रतिपदि विहितं घटस्थापनञ्च करिष्ये । चन्दनेन त्रिकोणं दीपाधारं यन्त्रं लिखित्वा तत्र दीपं स्थापयित्वाऽऽवाहनं कुर्यात् ।

आवाहनम्- **भो दीप देवीरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् ।**
यावत्कर्मसमाप्तिः स्यात् तावत्त्वं सुस्थिरो भव ।।

इत्यावाह्य संपूज्य गणेशं चावाह्य संपूज्य प्रार्थयेत्।

प्रार्थना- **सुमुखश्चैकदन्तश्चेत्यादिभिः** ।

घटस्थापना

सर्वताभद्रनिर्माणम्- ॐ महीद्यौःपृथिवीचनऽइमंय्यज्ञम्मिमिक्षताम् । पिपृतान्नोभरीमभिः।। इति भूमिं स्पृष्ट्वा सर्वतोभद्रं विलिखेत् ।

यवार्पणम्- ॐ ओषधयः समवदन्तसोमेनसहराज्ञा । यस्मैकृणोतिब्ब्राह्मणस्तक्षराजन्न्पारयामसि ।। इति यवान्निक्षिपेत् ।

सर्वतोभद्रोपरि कलशस्थापनम् - ॐ आजिघ्रकलशंमह्यात्त्वाविशन्त्विन्दवः । पुनरूर्ज्जानिवर्त्तस्वसानःसहस्त्रन्धुक्क्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्द्रयिः।। इत्यव्रणं सौवर्णं राजतं ताम्रं मृन्मयं वा दध्यक्षतचन्दनमालाचर्चितं घटं संस्थापयेत् ।

घटे तीर्थजलपूरणम् - ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽऋतसदन्न्यसि । व्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽ-ऋतसदनमासीद ।। इति घटं तीर्थादिजलेनापूरयेत् ।

गन्धार्पणम्- ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ।। इति गन्धं दद्यात् ।

सर्वौषधिनिक्षेपः- ॐ याऽओषधीःपूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा । मनैनुबब्भ्रूणामहक्ष्शतन्धामानिसप्प्तच ।। इति सर्वौषधीर्हरिद्रां वा निक्षिपेत्।

दूर्वानिक्षेपः - ॐ काण्डात्त्काण्डत्त्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्व्वेप्प्रतनुसहस्त्रेणशतेन ।। च इति दूर्वाङ्कुरान् निक्षिपेत् ।

पञ्चपल्लवनिक्षेपः - ॐ अश्श्वत्त्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता । गोभाजऽइत्त्किलासथ्कत्त्सनवथपूरूषम् ।। इति पञ्चपल्लवान् निक्षिपेत् ।

सप्तमृत्तिकानिक्षेपः - ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानः-

शर्म्मसप्प्रथाः ।। इति सप्तमृदो निक्षिपेत् ।

फलापर्णम्- ॐ याः फलिनीर्य्याऽअफलाऽअपुष्प्पायाश्श्चपुष्प्पिणीः। बृहस्प्पतिप्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः।। इति फलमर्पयेत् ।

पञ्चरत्नहिरण्यनिक्षेपः - ॐ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम।। इति पञ्चरत्नानि हिरण्यञ्च क्षिपेत् ।

वस्त्रावेष्टनम्- ॐ युवासुवासाःपरिवीतऽआगात्त्सऽउश्श्रेयान्भवतिजायमानः। तन्धीरासःकवयऽउन्नयन्तिस्वाद्ध्योमनसादेवयन्तः ।। इति कलशं वस्त्रयुग्मेनावेष्टयेत् ।

कलशोपरि पूर्णपात्रस्थापनम्- ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्न्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ।। इति कलशोपरि पूर्णपात्रं निदध्यात् ।

वरुणस्यावाहनं पूजनञ्च - ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्त्तेयजमानोहविर्ब्भिः। अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः॥ इति वरुणमावाह्य पूजयेत् ।

कलशे तीर्थावाहनम्-

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।।

कलशाभिमन्त्रणम्-

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ।।
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।

कलशप्रार्थना-

देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं कर्तुमीहे जलोद्भव ।।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।

ततः कलशस्कन्धप्रदेशे गणपत्यादिवनस्पत्यन्तदेवानावाह्य संपूजयेत्।

नवदुर्गाप्रतिष्ठा

प्रयोगः - ततस्तत्र कलशोपरि स्थापितायां नूतनायां जीर्णायां वान्यत्र स्थितायां प्रतिमायां दुर्गामावाह्य (पूगीफलेषु वा नवदुर्गां प्रतिष्ठाप्य स्वस्थाने एव वा संस्थाप्य पूजयेत् अथवा नवां सौवर्णीं कुलदेवताप्रतिमामग्न्युत्तारण-पूर्वकं **ॐ मनोजूतिः० ॐ भूर्भुवः स्वः** इति प्रतिष्ठाप्य) पूजयेत् ।

आवाहनम्- ॐ भगवति दुर्गे इहागच्छेह तिष्ठेह सन्निधेहि स्थिरा सुप्रसन्ना सुप्रतिष्ठिता भव ।

ध्यानम्- या माया मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथनी या रक्तबीजाशनी ।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धिलक्ष्मीः परा
सा दुर्गा नवकोटिमूर्तिसहिता मां पातु विश्वेश्वरी ।।

दुर्गापूजनम्- आगच्छ वरदे देवि दैत्यगर्वनिषूदिनि ।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ।।१।।
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ।
इमं घटं समागच्छ तिष्ठ देव गणैः सह ।।२।।

दुर्गे देवि समागच्छ तिष्ठ देवगणैः सह ।
बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ।।३।।
जयन्ती मङ्गला काली भद्रकाली कपालिनी
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ।।४।।

इति मन्त्रैः **ॐ दुर्गे दुर्गे रक्षिणि स्वाहा** इति नवाक्षरमन्त्रेण पुरुषसूक्तमन्त्रैश्च दुर्गां देवीं पूजयित्वा माषभक्तबलिं कूष्माण्डादिबलिं वा निवेदयेत् । तत इशानकोणे शुभाभिर्मृत्तिकाभिर्वेदीं रचयित्वा **जयन्ती मङ्गला कालीति** मन्त्रेण गोधूमसहितान् यवान् वापयेत् । ततः अखण्डदीपकं देव्याः प्रीतये नवरात्रकम्, उज्ज्वालयेदहोरात्रमेकचित्तो **धृतव्रतः०** इति मन्त्रेण अखण्डदीपं प्रतिष्ठाप्य प्रज्वलय्य पूजयेत् ।

कूष्माण्डबलिदानम् - तण्डुलपिष्टकेन त्रिकोणं यन्त्रं निर्माय विशेषेण ब्राह्मणो दुर्गाप्रीतिकामः नाममन्त्रेण परमेश्वरीं ध्यात्वा कूष्माण्डं सम्पूज्य- अद्येह सशैलवनकाननदानजन्यफलप्राप्तिकामः इदं कूष्माण्डफलं वनस्पतिदैवतं भगवत्यै दुर्गादेव्यै मया दत्तम् इति संकल्प्य कूष्माण्डफलं देवीप्रीतये महिषत्वेन दद्यात्।

ब्राह्मणवरणम्- अद्याहं दुर्गाप्रीतये मन्त्रजपदेवीसूक्तरहस्यत्रयपाठसहितस्य सप्तशतीस्तोत्रस्य प्रदिपदमारभ्यनवमीपर्यन्तं प्रतिदिनमेकोत्तरवृद्ध्या एकैकावृत्तिक्रमेण वा पाठकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतपूगीफलवस्त्रद्रव्यादिभिः पाठकत्वेन **त्वामहं वृणे, ॐ वृतोस्मी**ति प्रतिवचनम्। ततो ब्राह्मणो यजमानश्च संकल्पवाक्योक्तरीत्या सप्तशतीस्तोत्रपाठं कुर्याताम्। यजमानस्याशक्तत्वे ब्राह्मण एव कुर्यात्, ततः सर्वं कृतं कर्मेश्वरार्पणं कुर्वीत इति प्रतिपत्कृत्यम् ।

द्वितीयाकृत्यम्- द्वितीयायां तु दीपं गणेशं कलशं भगवतीं दुर्गाञ्च संपूज्य स्तोत्रपाठं बलिदानञ्च पूर्ववत्कुर्यात् ।

कुमारीपूजनपद्यम्- सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ।।

कुमारीपूजनपक्षे उक्तपद्येन व्यवहारः । इति द्वितीयाकृत्यम् ।

तृतीयाकृत्यम् - दीपं गणेशं कलशं भगवतीञ्च संपूज्य स्तोत्रपाठं बलिदानञ्च पूर्ववत्कुर्यात् ।

कुमारीपूजनपद्यम्- त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीम् ।
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ।।

कुमारीपूजनपक्षे उक्तपद्येन व्यवहारः । इति तृतीयाकृत्यम् ।

चतुर्थीकृत्यम्- दीपं गणेशं कलशं भगवतीं दुर्गाञ्च संपूज्य स्तोत्रपाठं बलिदानञ्च पूर्ववत् ।

कुमारीपूजनपद्यम्- कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ।।

कुमारीपूजनपक्षे उक्तपद्येन व्यवहारः । इति चतुर्थीकृत्यम् ।

पञ्चमीकृत्यम्- दीपादीन् दुर्गाञ्च संपूज्य स्तोत्रपाठं बलिदानञ्च पूर्ववत् ।

कुमारीपूजनपद्यम्- अणिमादिगणाधारामकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ।।

कुमारीपूजनपक्षे उक्तपद्येन व्यवहारः । इति पञ्चमीकृत्यम् ।

षष्ठीकृत्यम्- प्रातर्दीपादीन् दुर्गाञ्च संपूज्य स्तोत्रपाठं बलिदानञ्च पूर्ववत्।

कुमारीपूजनपद्यम्- कामचारां शुभां कान्तां कालचक्रस्वरूपिणीम् ।
कामदां करुणोदारां कालिकां पूजयाम्यहम् ।।

बिल्वपूजनम्- षष्ठ्यां सायङ्काले बिल्ववृक्षे देवीबोधनं बिल्वनिमन्त्रणञ्च बिल्वसमीपं गत्वा यथाविधि अर्घ्यं संस्थाप्य पूजासंकल्पं कुर्यात्- ॐ अद्येहेत्यादि अमुकोऽहं श्रीदेवीबोधनाङ्गत्वेन श्रीवृक्षस्य पूजनं निमन्त्रणञ्च करिष्ये । **ॐ बिल्ववृक्षाय नमः** इति नाममन्त्रेण बिल्ववृक्षं संपूज्य **ॐ जयन्ती**त्यादि पठित्वा श्रीदुर्गे इहागच्छ इत्यादिना दुर्गामावाह्य संपूज्य गीतवाद्यघोषपुरःसरं देवीं बोधयेत् ।

देवीबोधनमन्त्रः - रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणाबोधो देव्यास्त्वयि कृतः पुरा ।।

इषे मासि सितेपक्षे षष्ठ्यां ज्येष्ठानुयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहम् ।।
अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयाम्यतः ।

बिल्वतरोरामन्त्रणम्-

मेरुमन्दरकैलासहिमवच्छिखरे तथा ।
जातः श्रीफलवृक्षस्त्वमम्बिकायाः सदा प्रियः ।।
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतव्योऽसि समा(मया)गच्छ(वृक्ष)पूज्यो दुर्गास्वरूपतः ।।

इति निमन्त्र्य गृहमागच्छेत् इति षष्ठीकृत्यम् ।

सप्तमीकृत्यम्- प्रातर्दीपादीन्संपूज्य स्तोत्रपाठं बलिदानं पूर्ववत्कुर्यात् ।

कुमारीपूजनपद्यम्- चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ।।

कुमारीपूजनपक्षे उक्तपद्येन व्यवहारः ।

नवपत्रिकाप्रवेशनम्- सायङ्काले प्रतिपद्युक्तविधिना फलसंकीर्तनान्ते नवपत्रिकाप्रवेशनार्थं पूजनबलिदानादिकर्माहं करिष्ये इति संकल्पयेत् ।

नवपत्रिकास्तु- कदली दाडिमी धान्यं हरिद्रा मानकङ्कचुः ।
बिल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिकाः ।।

पूर्वदिननिमन्त्रितबिल्वसमीपं गत्वा पुनः संपूज्य -

आगच्छ सर्वकल्याणि दैत्यदर्पनिषूदिनि ।
पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये ।।

इति मन्त्रं पठित्वा बिल्वप्रार्थना -

बिल्ववृक्षमहाभाग सर्वदा शङ्करप्रिय ।
गृहीत्वा तव शाखां तु देवीपूजां करोम्यहम् ।।
शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो ।
गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः ।।

उत्तिष्ठ पत्रिके देवि सर्वकल्याणहेतवे ।
पूजां गृहाण सकलामस्माकं वरदा भव ।।
मेरुमन्दरकैलास-हिमवच्छिखरे तथा ।
जातः श्रीफलवृक्षस्त्वमम्बिकाया सदा प्रियः ।।

इति संप्रार्थ्य **ॐ हुँ छिन्धि फट्फट् ॐ फट् स्वाहा** इति मन्त्रेण फलद्वययुतामपराजितादिग्गतामेकां शाखां छित्वा तत्र मृन्मयप्रतिमायां शाखायां च देवीमावाहनपुरःसरं संपूज्य **ॐ चामुण्डे चल चल** इति वाद्याघोषेण दोलादिना गृहं प्रवेश्य भूतोत्सादनं विधाय देवस्थाने कलशादिसन्निधौ स्थापयेत् ।

नवपत्रिकासु दुर्गास्थापना-

आरोपितासि दुर्गे त्वं मृन्मय्यां श्रीफलेऽपि च ।
स्थिरा नितान्तं भूत्वा मे गृहे त्वं कामदा भव ।।

इति स्थिरीकृत्य कदल्यादिपत्रिकाः पञ्चगव्येन पञ्चामृतेन च स्नपयित्वा वस्त्रेण संवेष्ट्य देवीगृहे स्थापयेत् । ततः पूर्ववत्संकल्पं कृत्वा प्राणप्रतिष्ठां विधाय **ॐ दुर्गायै नमः** इति ध्यात्वा देवीमावाहयेत् ।

आवाहनम् - **आवाहयाम्यहं देवीं मृन्मये श्रीफलेऽपि च ।**
कैलाशशिखराद्देवि विन्ध्यादेर्हिमपर्वतात् ।
आगत्य बिल्वशाखायां चण्डिके कुरु सन्निधिम् ।।
भगवति दुर्गे इहागच्छेत्युभयोरावाहनम् ।

स्थापनम्- **स्थापितासि मया दुर्गे विजये त्वं प्रसीद मे ।**
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ।।

भगवति दुर्गे इह तिष्ठेति संस्थापनम् ।

प्रार्थना- **दुर्गे दुर्गस्वरूपासि सुरतेजो महाबले ।**
सदानन्दकरे देवि प्रसीद मम सिद्धये ।।

एह्येहि भगवत्यम्ब शत्रुक्षयजयप्रदे ।
भक्तितः पूजयामि त्वां दुर्गे देवि नमोऽस्तु ते ।।
पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः ।
पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे ।।
दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय ।
यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सह ।।

ततो मूलमन्त्रेण पाद्यादिभिः संपूज्य बिल्वपत्रं समर्पयेत् ।

बिल्वपत्रसमर्पणम्- **अमृतोद्भववृक्षोत्थं शङ्करस्य सदा प्रियम् ।**
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ।।

द्रोणपुष्पार्पणमन्त्रः-

ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ।।

ततो धूपादिनैवेद्यान्तां पूजां मूलमन्त्रेण कृत्वा प्रार्थयेत् ।

प्रार्थना- **महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।**
आयुरारोग्यविजयं देहि देवि नमोऽस्तु ते ।।
कुङ्कुमेनसमालब्धे चन्दनेन विलेपिते ।
बिल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः ।।
रूपं देहि जयं देहि भद्रं भवति देहि मे ।
पुत्रान् देहि धनं देहि सर्वकामाँश्च देहि मे ।।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ।।

इति संप्रार्थ्य पत्रिकाः पूजयेत् ।

पत्रिकापूजनम्

कदल्याम्- **ॐ ब्रह्माण्यै नमः**, दाडीमे- **ॐ रक्तदन्तिकायै नमः**, धान्ये- **ॐलक्ष्म्यै नमः**, हरिद्रायाम्- **ॐ दुर्गायै नमः**, माने- **ॐ चामुण्डायै नमः**, कचौ- **ॐ कालिकायै नमः**, बिल्वे- **ॐ शिवायै**

नमः, अशोके- **ॐ शोकरहितायै नमः**, जयन्त्याम्- **ॐ कार्तिक्यै नमः**, इत्यावाह्य संपूज्य दुर्गायै बलिं दद्यात् ।

शस्त्रादिपूजनम्

ॐ छत्राय नमः, ॐ ध्वजाय नमः, ॐ पताकायै नमः, ॐ अस्त्राय नमः, ॐ छुरिकायै नमः, ॐ कट्टारकाय नमः, ॐ कुन्ताय नमः, ॐ चर्मणे नमः, ॐ कनकदण्डाय नमः, ॐ दुन्दुभये नमः, ॐ शङ्खाय नमः, ॐ सिंहासनाय नमः । एतानि राजोपकरणादीनि शस्त्रास्त्राणि संपूज्य देवीगृहे धारणीयानि ।

सरस्वतीस्थापनम्

प्रयोगः - आश्विनशुक्लपक्षे मूलनक्षत्रे पुस्तकेषु सरस्वतीं स्थापयेत् श्रवणाद्यपादे विसर्जयेदित्युक्तम् ।

विधिर्निर्णयामृते देवीपुराणे च -

मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम् ।
उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत् ।।

रुद्रयामलयेऽपि- **मूलऋक्षे सुराधीश पूजनीया सरस्वती ।**
पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम् ।।
नाध्यापयेन्नचलिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देव विद्याकामो द्विजोत्तमः ।। इति।

प्रतिष्ठावाहनादिकम्- तत्र प्रातः कृतनित्यक्रियो मूलनक्षत्रे पुस्तकानि संस्थाप्य अद्येत्यादि अमुकोऽहं मूलनक्षत्रे पुस्तकेषु सरस्वत्या आवाहनं पूजनञ्च करिष्ये। **ॐ मनोजूतिः० ॐ भूर्भुवः स्वः सरस्वति देवि इहागच्छ इह तिष्ठ सुप्रतिष्ठिता वरदा भव ।**

ध्यानम्- **या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता**
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।

या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।

श्रीसरस्वत्यै नमः ।

आवाहनम्- ॐ भूर्भुवः स्वः भुवनमातः सरस्वति सर्ववाङ्मयरूपेणागच्छेह तिष्ठ पूजां गृहाण **ॐ श्रीसरस्वत्यै नमः** इति मन्त्रेण आसनादि नीराजनान्तं संपूज्य प्रार्थयेत् ।

प्रार्थना- **दोर्भिर्युक्ता चतुर्भिःस्फटिकमणिमयीमक्षमालां दधाना**
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
या सा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमाना समाना
सा मे वाग्देवतेयं निवसतु वदने शारदा शुभ्रवर्णा ।।

यस्य स्मृत्या० ततः कर्मेश्वरार्पणम् । ततः पूर्वाषाढोत्तराषाढायुक्त-द्वितीयतृतीयदिनयोरपि आवाहनरहितं सर्वं पूर्वत्पूजनं कुर्यात् । ततः श्रवणदिने- अद्येहेत्यादि अमुकोऽहं श्रवणेन विसर्जनं कर्तुं तदङ्गभूतां पूजां करिष्ये इति संकल्प्य पूर्ववत्संपूज्य विसर्जयेत् इति ।

महाष्टमीकृत्यम् - महाष्टम्यां तु दीपं गणेशं कलशं दुर्गां च संपूज्य स्तोत्रपाठं बलिदानञ्च पूर्ववत् कृत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः - अद्येत्यादि अमुकोऽहमतिदुःखनिवृत्तिदीर्घायुष्यप्राप्तिपरमपद-गमनदशाश्वमेधध्वजमालाकुलविमानवरारोहणपूर्वकशाश्वतकालावच्छिन्न-विजयकामः श्रीदुर्गास्थापनं पूजनञ्च करिष्ये । इति संकल्प्य अक्षतपुञ्जेषु पूगीफलेषु वा नवदुर्गाः स्थापयेत्पूजयेच्च शिष्टाचारात् ।

नवदुर्गापूजनम् - ॐ शैलपुत्र्यै नमः १, ॐ ब्रह्मचारिण्यै नमः २, ॐ चन्द्रघण्टायै नमः ३, ॐ कूष्माण्डायै नमः ४, ॐ स्कन्दमात्रे नमः ५, ॐ कात्यायन्यै नमः ६, ॐ कालरात्र्यै नमः ७, ॐ महोगौर्यै नमः ८, ॐ सिद्धिदात्र्यै नमः ९ ।

देवीसन्निधाने गणेशभैरवचतुःषष्टियोगिन्यादिपूजनम्-

ॐ गणेशाय नमः, ॐ भैरवाय नमः, ॐ चतुःषष्टियोगिनीभ्यो नमः, ॐ कोटियोगिनीभ्यो नमः, ॐ जयन्त्यै नमः, ॐ मङ्गलायै नमः, ॐ काल्यै नमः, ॐ भद्रकाल्यै नमः, ॐ कपालिन्यै नमः, ॐ दुर्गायै नमः, ॐ क्षमायै नमः, ॐ शिवायै नमः, ॐ धात्र्यै नमः, ॐ स्वाहायै नमः, ॐ स्वधायै नमः, ॐ भद्रकाल्यै नमः, ॐ ब्राह्म्यै नमः, ॐ माहेश्वर्यै नमः, ॐ कौमार्यै नमः, ॐ वैष्णव्यै नमः, ॐ बाराह्यै नमः, ॐ इन्द्राण्यै नमः, ॐ चामुण्डायै नमः, ॐ शिवदूत्यै नमः, ॐ ईशानकोणमारभ्य ॐ पूतनायै नमः, ॐ चरक्यै नमः, ॐ विदार्यै नमः, ॐ पापराक्षस्यै नमः । एताः संपूज्य कूष्माण्डबलिं दत्त्वा **छागबलिच्छेदनपक्षे** छागबलिञ्च दद्यात् । विधिस्तु नवम्यां द्रष्टव्यः ।

कुमारीपूजनपद्यम्- **सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।**
सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ॥

कुमारीपूजनपक्षे उक्तपद्येन व्यवहारः ।

कालरात्रीकरणपक्षे- अर्धरात्रसमये पूर्वोक्तसंकल्पं कृत्वा पूजिता देवीः सर्वाः संपूज्य अग्निं संस्थाप्य चतुःस्वस्तिपर्यन्तं होमं कृत्वा सप्तशतीस्तोत्रस्य प्रथमाध्यायमारभ्य सप्तमाध्यायान्तश्लोकमन्त्राङ्कक्रमेण मन्त्रपुटितेन पायसान्नद्राक्षारम्भाफलमातुलिङ्गेक्षुखण्डनारिकेलतिलतण्डुलाज्यादिहोमं कृत्वा अष्टमाध्यायारम्भवेलायां बलिदानं कृत्वा अष्टमाध्यायस्य श्लोकैर्मन्त्रपुटितैः रुधिरमांसाभ्यां पूर्वोक्तद्रव्यैश्च होमं कृत्वा नवमाध्यायमारभ्य त्रयोदशाध्यायान्तश्लोकैर्मन्त्रपुटितैर्होमं कृत्वा समापयेत् । गोदानं भूयसीदानञ्च कृत्वा ब्राह्मणान् भोजयित्वा सुहृद्युतः स्वयमपि भुञ्जीत । इति कालरात्रीकृत्यम्, इत्यष्टमीकृत्यञ्च।

नवमीकृत्यम्- अद्येत्यादि सर्वापच्छान्तिपूर्वकाश्वमेधसहस्रराजसूयशतयज्ञ-

जन्यफलसमफलप्राप्तिकामो महानवम्यां त्रिशूलिन्या यथामिलितोपचारैः पूजनमहं करिष्ये । इति सङ्कल्प्य दीपं गणेशं कलशं दुर्गां नवपत्रिकावासिनीं दुर्गाञ्च संपूज्य ॐ त्रिशूलिन्यै नमः (इति त्रिशूलिनीं संपूज्य) स्तोत्रपाठं बलिदानञ्च पूर्ववत् कुर्यात् ।

कुमारीपूजनपद्यम् - दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ।।

बलिदानविधिः- प्राङ्गणे यजमान उत्तराभिमुखः पूर्वाभिमुखं छागं संस्थाप्य छागं पूर्वाभिमुखं पुष्पमाल्यादिभिः पूजयेत् छागमूर्ध्नि पुष्पं दत्त्वा मन्त्रं पठेत् -

पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ।।
चण्डिकाप्रीतिदानेन दातुरापद्विनाशिने ।
चामुण्डाबलिरूपाय बले तुभ्यं नमो(नमः)स्तु ते ।।
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ।।

ॐ ऐं ह्रीं श्रीं इति मन्त्रेण प्रार्थयेत् ।

खड्गपूजा- रसन त्वं चण्डिकायाः सुरलोकप्रसाधकः । ऐं श्रीं क्रीं इति मन्त्रेण ध्यात्वा खड्गं प्रपूजयेत् **ॐ कालि कालि यज्ञेश्वरि लोहदण्डायै नमः** इति संपूज्य अद्य मम सर्वापच्छान्तिपूर्वकदीर्घायुष्यनैरुज्यातुलसुखभोगपूर्वकसर्वकल्याणोत्पत्तिदारुणग्रहपीडोपशमनदशवर्षावच्छिन्नदुर्गाप्रीतिकामश्छागबलिं वह्निदैवतमहं घातयिष्ये । इति सङ्कल्प्य खड्गं गृहीत्वा **ॐ हुँ फट्** इति मन्त्रं पठित्वा बलिं छेदयेत् । **ॐ ह्रीं ऐं ह्रीं कौशिकी रुधिरेणाप्याय्यताम्** इत्युक्त्वा देवीसन्निधाने समर्प्य ईशानकोणमारभ्य **ॐ पूतनायै नमः, ॐ चरक्यै नमः, ॐ विदार्यै नमः, ॐ पापराक्षस्यै नमः** इति विभज्य रुधिरं दद्यात् ।

एवं कृते भवेत्सिद्धिः शिरश्च सप्रदीपकम् ।
इत्युक्तक्त्वाद्वलिमूर्ध्नि दीपं प्रज्वालयेन्नरः ।।

ततोऽश्वं गजञ्च संपूज्य पूजां समापयेत् । ततो दुर्गां प्रार्थयेत् ।

दुर्गाप्रार्थना

दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवाम् ।।१।।
ॐ मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम् ।
विश्वेशीं विश्वजननीं चण्डिकां प्रणमाम्यहम् ।।२।।
सर्वदेवमयीं देवीं सर्वरोगभयापहाम् ।
ब्रह्मेशविष्णुनमितां प्रणमामि सदा ह्युमाम् ।।३।।
विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम् ।
योगिनीं योगजननीं चण्डिकां प्रणमाम्यहम् ।।४।।
ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ।।५।।
य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापैस्तु दुर्गया सह मोदते ।।६।।

इति स्तुतिं पठेत् । इति नवमीकृत्यम् ।

दशमीकृत्यम्- प्रातर्दीपं गणेशं कलशं दुर्गां पूजिताः सर्वा देवीँश्च संपूज्य पीतवस्त्रे पोटलिकां बध्वा तत्र दुर्गां संपूज्य गोमयोपलिप्तायां शुचि भूमौ चन्दनेनाष्टदलं विलिख्य मम सकुटुम्बस्य क्षेमसिद्धिपूर्वकनवदुर्गाव्रतपूजान्यूनातिरिक्तपरिपूर्त्यर्थमपराजितादेवीपूजनपूर्वकं विसर्जनमहं करिष्ये इति संकल्प्य- मध्ये **ॐ अपराजितायै नमः**, इत्यपराजितामावाह्य तद् दक्षिणे **ॐ क्रियाशक्त्यै नमः**, इति जयाम्, वामतः **ॐ उमायै नमः**, इति विजयाञ्चावाह्य नाममन्त्रैरेव प्रतिष्ठाप्य- चतुर्भुजां पीतवस्त्रां सर्वाभरण-

भूषितां खड्गचर्मधरां वराभयहस्तामीषत्प्रहसितवदनां सर्वाङ्गसुन्दरीमपराजितां श्रीभगवतीं ध्यात्वा- **ॐ अपराजितायै नमः, ॐ जयायै नमः, ॐ विजयायै नमः**, इति नाममन्त्रैः षोडशोपचारपूजां विधाय मूलदेवीञ्च पुनः संपूज्य प्रार्थयेत् ।

प्रार्थना- **रूपं देहि यशो देहि भगं भवति देहि मे ।**
पुत्रान्देहि धनं देहि सर्वान्कामाँश्च देहि मे ।।
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यविजयं देहि देवि नमोस्तु ते ।।

देव्युत्थापनम्- **इति संप्रार्थ्य देवीं तु तत उत्थापयेद्बुधः ।**
गोदानं भूयसीञ्चैव दत्त्वा देवीं विसर्जयेत् ।
उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च ।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ।
व्रज स्रोतोजलं वृद्ध्यै स्थीयताञ्च जले त्विह ।।

इति पूर्वस्थापितनवपत्रिकामृन्मयप्रतिमाञ्चोत्थाप्य शिबिकादिशुभयानोपरि सन्निवेश्य गीतवादित्रनिःस्वनैर्जलसमीपं नीत्वा देवीं प्रार्थयेत् ।

प्रार्थना- **दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।**
संवत्सरे व्यतीते तु पुनरागमनाय वै ।।
इमां पूजां मया देवि यथाशक्त्योपपादिताम् ।
रक्षार्थं त्वं ममादाय व्रज स्वस्थानमुत्तमम् ।।

इति संप्रार्थ्य जले प्रवाहयेत् । इति ।

श्रवणे सरस्वतीविसर्जनम्- तद्विधिः - सङ्ग्रहे ।

आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम् ।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ।।

श्रवणाद्यपादे विसर्जयेदिति । ॐ अद्येत्यादि अमुकोऽहं श्रवणे पुस्तकेष्वा-वाहितसरस्वतीविसर्जनं कर्तुं तदङ्गभूतां पूजां करिष्ये । इति सङ्कल्प्य संपूज्य विसर्जयेत् ।

सीमोल्लङ्घनं शमीपूजनञ्च -

श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो जनाः ।।

इति हेमाद्रौ स्कान्दे ।

शमीयुक्तं जगन्नाथं भक्तानामभयङ्करम् ।
अर्चयित्वा शमीवृक्षमर्चयेच्च ततः पुनः ।। इति भविष्ये ।

ततः सीमामुल्लङ्घ्य सर्वे जना ग्रामाद्बहिरीशानदिगवस्थितां शमीं गत्वा पूजयेयुः । तत्र मम दुष्कृतामङ्गलनिरासार्थं क्षेमार्थञ्च शमीपूजनं करिष्ये । इति संकल्प्य षोडशोपचारैः शमीं पूजयेत् ।

शमीपूजनमन्त्रः- अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ।
दुःखप्रणाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ।।

प्रार्थना- शमी शमयते पापं शमी लोहितकण्टका ।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ।।
करिष्यमाणयात्रायां यथाकालं सुखं मया ।
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ।। इति ।

शमीवृक्षालाभे अश्मन्तकपूजा- तत्र **ॐ अश्मन्तकाय नमः**, इति नाममन्त्रेण संपूज्य प्रार्थयेत् ।

अश्मन्तकप्रार्थना- अश्मन्तकमहावृक्ष महादोषनिवारण ।
इष्टानां दर्शनं देहि शत्रूणाञ्च निवारणम् ।।

ततःसाक्षतामार्द्रां शमीं तन्मूलगतां मृदञ्च गृहीत्वा शिबिकादियानोपरि

सन्निवेश्य गीतवादित्रघोषपुरःसरं स्वगृहं प्रत्यानयेत् । ततः स्वजनैः सह वेदोक्तपुराणोक्तमन्त्रैरभिषेकं गृहीत्वा वस्त्रभूषणतिलकादिधारणं नीराजनादि च कार्यम् । ततो जलसमीपे गोष्ठे नद्यां वा खञ्जनं विलोक्य प्रणमेत् ।

मन्त्रः- **नीलग्रीव शुभग्रीव सर्वकामफलप्रद ।**
पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते ।।

इति प्रणम्य ब्राह्मणेभ्यो दक्षिणां दत्त्वा आशिषो गृहीत्वा यथासुखं विहरेत्।

— इति शारदनवरात्रव्रतपूजादिप्रयोगः —

◆

१५. कोजागरव्रतपूजाविधिः

प्रयोगः - तत्र व्रती प्रदोषकाले कृतनित्यक्रियः पूजासामग्रीं संपाद्य संकल्पं कुर्यात् ।

सङ्कल्पः - ॐ अद्येत्यादि अमुकोऽहं सकुटुम्बस्य ममालक्ष्मीपरिहाराय श्रीमहालक्ष्मीप्रसादसिद्धये कोजागरपूर्णिमायां (आश्विनशुक्लपूर्णिमायां) दीपकलशगणेशपूजनपूर्वकं महालक्ष्म्या ऐरावतस्थितेन्द्रस्य च पूजनं करिष्ये। इति संकल्पयेत् ।

प्रतिमास्थापनम्- दीपकलशगणेशपूजां विधाय चन्दनेन स्थाल्यादौ अष्टदलं कमलं विलिख्य सकेसरेषु पत्रेषु इन्द्रादिशक्तीः पूर्वादिक्रमेण मध्ये कर्णिकायां लक्ष्मीप्रतिमाञ्च स्थापयेत् । ततः पीठपूजां विधाय मध्ये कर्णिकायाम् **ॐ नमो भगवत्यै सकलशक्तियुतायै योगपीठात्मकायै श्रीपरमदेवतायै नमः** इति पीठे पुष्पाञ्जलिं समर्पयेत् ।

महालक्ष्मीप्रतिष्ठा - ततः **ॐ मनोजूतिः०, ॐ भूर्भुवः स्वः महालक्ष्मि इहागच्छेह तिष्ठ सुप्रतिष्ठिता वरदा भव** ।

प्राणप्रतिष्ठा- देवताया हृदि दक्षिणं करं दत्त्वा **ॐ आँ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं श्रीमहालक्ष्म्याः प्राणाः सर्वेन्द्रियाणि च इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा** इति ।

आवरणपूजा

प्रथमावरणपूजनम्- पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य तदाग्नेयादिक्रमेण तत्कुर्यादिति सर्वत्र, तत्र प्रथमं कर्णिकायां देव्या **ॐ हिरणमय्यै नमः, हृदयाय नमः**, आग्नेये । **ॐ चन्द्रायै नमः, शिरसे स्वाहा**, इतीशाने।

ॐ रजतस्त्रजायै नमः, नैर्ऋत्ये । **शिखायै वषट्,** वायव्ये । **ॐ हिरण्यस्त्रजायै नमः कँवचाय हुम्,** देव्या अग्रतः। **ॐ हिरण्यायै नमः, नेत्रत्रयाय वौषट्,** पुरत आरभ्य चतुर्दिक्षु । **ॐ हिरण्यवर्णायै अस्त्राय फट्,** इति मन्त्रमावर्तयेत् मध्ये । **ॐ श्रीमहालक्ष्म्यै श्रियै नमः,** दक्षिणपार्श्वे। **ॐ शङ्करनन्दनाय नमः, ॐ शङ्खनिधये नमः,** वामपार्श्वे । **ॐ पुष्पाञ्जलिपुटाय नमः, ॐ पुष्पधन्वने नमः, ॐ पद्मनिधये नमः,** पुरतः । दक्षिणपादप्रक्षालनोद्यतायै **ॐ जह्नुसुतायै नमः,** वामपादप्रक्षालनोद्यतायै **ॐ सूर्यसुतायै नमः,** धृतातपत्रायै **ॐ वरुणायै नमः** पृष्ठतः ।

पुष्पाञ्जलिः- अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ।।

द्वितीयावरणपूजनम् - ततः पुरत आरभ्य प्रादक्षिण्यक्रमेणाष्टदलाग्रेषु **ॐ पद्मायै नमः १, ॐ पद्मवर्णायै नमः २, ॐ पद्मस्थायै० ३, ॐ आर्द्रायै० ४, ॐ तर्पयन्त्यै० ५, ॐ तृप्तायै० ६, ॐ ज्वलन्त्यै० ७, ॐ स्वर्णप्राकारायै० ८ ।**

पुष्पाञ्जलिः- अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ।।

तृतीयावरणपूजनम् - ततोऽष्टदलाग्रेषु **ॐ इन्द्राय नमः १, ॐ अग्नये० २, ॐ यमाय० ३, ॐ निर्ऋतये० ४, ॐ वरुणाय० ५, ॐ वायवे० ६, ॐ कुबेराय० ७, ॐ ईशानाय० ८,** निर्ऋतिवरुणमध्ये **ॐ अनन्ताय० ९,** पूर्वेशानमध्ये **ॐ ब्रह्मणे० १०, ॐ आदित्यादिनवग्रहेभ्यो०, ॐ मेषादिराशिभ्यो०, ॐ ज्योतिश्चक्राय०।**

पुष्पाञ्जलिः- अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ।।

चतुर्थावरणपूजनम्- ततोऽष्टदलाद्बहिः इन्द्रादिसमीपे तत्क्रमेण **ॐ वज्राय०, ॐ शक्तये०, ॐ दण्डाय०, ॐ खड्गाय०, ॐ पाशाय०, ॐ अङ्कुशाय०, ॐ गदायै०, ॐत्रिशूलाय०, ॐ चक्राय०, ॐ पद्माय०,** अष्टदलमूलेषु- **ॐ ऐरावताय०, ॐ पुण्डरीकाय०, ॐ वामनाय०, ॐ कुमुदाय०, ॐ अञ्जनाय०, ॐ पुष्पदन्ताय०, ॐ सार्वभौमाय०, ॐ सुप्रतीकाय०।**

पुष्पाञ्जलिः- अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ।।

ॐ श्रीं ह्रीं क्लीं श्रीमहालक्ष्म्यै श्रियै नमः ।

पुष्पाञ्जलिः- अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं सम्पूर्णावरणार्चनम् ।।

इति देवतायां पुष्पाञ्जलिं समर्पयेत् ।

ध्यानम्- बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरभासोज्ज्वलां
रत्नाकल्पविभूषणां कुचनतां शालैः करैर्मञ्जरीः ।
पद्मे कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सुस्मितां
फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत्परां देवताम् ।।
शुभवस्त्रपरीधानां मुक्ताभरणभूषिताम् ।
पङ्कजासनसंस्थानां स्पर्शाननसरोरुहाम् ।।
शारदेन्दुकान्तिधरां स्निग्धनेत्रां चतुर्भुजाम् ।
पद्मयुग्मामभयदां वरव्यग्रकराम्बुजाम् ।।
अभितो हस्तियुग्मेन सिच्यमानां कराम्बुभिः ।
सञ्चिन्त्यैवं यजेद्देवीं कर्पूरागुरुचन्दनैः ।।
अमलकमलसंस्था तद्रजःपुञ्जवर्णा
करकमलधृतेष्टा भीतियुग्माम्बुजा च ।
मणिमुकुटविचित्रालङ्कृता कल्पजालै-
र्भवतु भुवनमाता सन्ततं श्रीः श्रियै नः।।

आवाहनम्- ॐ महालक्ष्मि समागच्छ पद्मनाभपदादिह ।
पञ्चोपचारपूजेयं त्वदर्थं देवि संभृता ।।

आसनम्- ॐ आलयं ते निगदितं कमलं कमलालये ।
अमले कमले ह्यस्मिन् स्थितिं मत्कृपया कुरु ।।

पाद्यम्- ॐ गङ्गादिसलिलाधारतीर्थतोयादिपूरितम् ।
दूरयात्राश्रमहरं पाद्यं मे प्रतिगृह्यताम् ।।

अर्घ्यम्- न मे जन्मनि दौर्भाग्यं न मे जन्मदरिद्रता ।
महालक्ष्मि नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ।।

आचमनीयम्- ॐ महालक्ष्म्यै श्रियै नमः ।

स्नानम्- ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।

स्नानाङ्गमाचमनीयम्- ॐ स्नानादिकं विधायापि यतः शुद्धिरवाप्यते।
तद्देव्याचमनीयं ते महालक्ष्मि विधीयताम् ।।

वस्त्रम्- तन्तुसन्तानसंसक्तं कलाकौशेयकल्पितम् ।
सर्वाङ्गाभरणं दिव्यं वसनं परिधीयताम् ।।

इति सौभाग्यद्रव्यं च समर्पयेत् ।

वस्त्राङ्गमाचमनीयम्- ॐ श्रीमहालक्ष्म्यै श्रियै नमः इति ।

गन्धः - मलयाचलसम्भूतं नानापत्रगरक्षितम् ।
शीतलं बहुलामोदं चन्दनं प्रतिगृह्यताम् ।

अक्षताः- ॐ अक्षनन्नमीमदन्तह्यवप्रिंयाऽअधूषत । अस्तोषतस्वभानवोविप्प्रानवीष्ठयामतीयोजान्विन्द्रतेहरी ।।

पुष्पाणि- चञ्चत्परिमलामोदं मत्तालिकुलसङ्कुलम् ।
आनन्दिनन्दनोद्भूतं पद्मायै कुसुमं नमः ।।

अङ्गपूजा

चपलायै नमः पादौ चञ्चलायै च जानुनी ।
कटिं कमलवासिन्यै नाभिं क्षान्त्यै नमो नमः ।।
स्तनौ मन्मथवासिन्यै ललितायै भुजद्वयम् ।
उत्कण्ठिन्यै नमः कण्ठं मायायै मुखमण्डलम् ।।
श्रियै नमः शिरःपश्चात्पद्मायै कुसुमं नमः ।

नामपूजा

ॐ श्रियै नमः, ॐ लक्ष्म्यै नमः, ॐ वरदायै०, ॐ विष्णुपत्न्यै०, ॐ क्षीरसागरवासिन्यै०, ॐ हिरण्यरूपायै०, ॐ सुवर्णमालिन्यै०, ॐ पद्मवासिन्यै०, ॐ मुक्तालङ्कारायै०, ॐ तुर्यायै०, ॐ चन्द्राननायै०, ॐ विश्वमूर्त्यै०, ॐ मुक्त्यै०, ॐ मुक्तिदात्र्यै०, ॐ ऋद्ध्यै०, ॐ समृद्ध्यै०, ॐ तुष्ट्यै०, ॐ पुष्ट्यै०, ॐ धनेश्वर्यै०, ॐ श्रद्धायै०, ॐ भोगिन्यै०, ॐ भोगदायै०, ॐ धात्र्यै० इति नामपूजां विधाय **ऐरावतम् इन्द्रं कुबेरं चन्द्रञ्च** स्वस्वनाममन्त्रैः पञ्चोपचारैः संपूजयेत् ।

धूपः- **गन्धसंभारसन्नद्धं पृथुवस्तुसमन्वितम् ।**
सुरासुरनरानन्दं धूपं देवि गृहाण मे ।।

दीपः- **ॐ मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजसम् ।**
गृहाण देवि दीपं मे निर्मितं श्वेतवर्तिभिः ।।

ततो नैवेद्यं पुरतःसंस्थाप्य मूलमन्त्रेण संप्रोक्ष्य संपूज्य जलपात्रञ्च संस्थाप्य प्राणादिमुद्राः प्रदर्श्य निवेदयेत् ।

नैवेद्यम्- **ॐ देवतालयपातालभूतलाधारधान्यजम् ।**
षोडशाकारसंभारं नैवेद्यं प्रतिगृह्यताम् ।।

क्षणं ध्यात्वा **ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा** इति मूलमन्त्रजपं दशवारं विधाय **गुह्यातीति** समर्प्य नैवेद्यपात्राण्युत्थाप्य

मुख्यादीशापात्रान्नैवेद्यांशमुद्धृत्य **उच्छिष्टचाण्डाल्यै नमः** इत्युत्तरतो दत्त्वा नैवेद्याङ्गमाचमनीयं करोद्वर्तनार्थे गन्धं समर्पयामि ।

फलम्- **ॐ पातालतलसंभूतं वदनाम्भोजभूषणम् ।**
नानागुणगणाकीर्णं ताम्बूलं प्रतिगृह्यताम् ।।

दक्षिणा- **ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।**
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

छत्रचामरपादुकाव्यजनदर्पणं साङ्गायै सपरिवारायै श्रीमहालक्ष्म्यै समर्पयामि मूलेन **ॐ श्रीश्चते०** इति च पुष्पाञ्जलिं समर्पयेत् ।

नीराजनम्- **ॐ अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।**
आरार्तिक्यं मया दत्तं गृहाण परमेश्वरि ।।

विशेषार्घ्यः- **शङ्खे तोयं समादाय सपुष्पकुशचन्दनम् ।**
जानुभ्यामवनीं गत्वा त्रिरर्घ्यं सन्निवेदयेत् ।।

मन्त्रः- **न मे जन्मनि दौर्भाग्यं न मे जन्मदरिद्रता ।**
महालक्ष्मि नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ।

इति मन्त्रावृत्त्या त्रिवारं षोडशवारं वा दद्यात् ।

नमस्कारः- **ॐ नमस्ते सर्वदेवानां वरदासि हरिप्रिये ।**
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ।।

प्रार्थना- **ॐ विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथाम्बरे ।**
लक्ष्मि नित्या यथासि त्वं मयि नित्या तथा भव ।।
विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः ।।

दक्षिणासंकल्पः- अद्येत्यादि अमुकोऽहं कृताया महालक्ष्मीपूजाया इन्द्रादिपूजायाश्च साङ्गफलप्राप्त्यर्थमिमां दक्षिणां महालक्ष्मीन्द्रादिदेवप्रीतये ब्राह्मणाय

दास्ये तथामहालक्ष्मीन्द्रादिदेवप्रीतये सिद्धान्नं ब्राह्मणान् भोजयिष्ये तथा इमां भूयसीं दक्षिणाञ्च ब्राह्मणेभ्यो विभज्य दास्ये इति संकल्प्य दद्यात् । ते चाशिषं दद्युः। स्वर्णतन्तुनिर्मितान् षोडशदीपाँश्च ब्राह्मणाय दद्यात् । ततोऽर्धरात्रे जलचन्दनफलदूर्वासमन्वितमर्घ्यं शङ्खेन चन्द्रमसे दद्यात् ।

चन्द्रार्घ्यदानम्- **नमोऽस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु ते ।**
व्रतं संपूर्णतां यातु गृहाणार्घ्यं नमोऽस्तु ते ।।

ततो नारिकेलजलपानपूर्वकं बन्धुवर्गादीन् भोजयित्त्वा स्वयं च भुञ्जीत । ततः कथाश्रवणपूर्वकं नानाकौतुकमङ्गलनृत्यगीततूर्यभेरीवादनद्यूतक्रीडनादिभी रात्रौ जागणं कुर्यात् । प्रातःकाले स्नानसन्ध्यादिकं विधाय विसर्जनं कुर्याद् ।

विसर्जनमन्त्रः- ॐ पङ्कजं देवि संत्यज्य मम वेश्मनि संविश ।
यथा सपुत्रभृत्योऽहं सुखी स्यां त्वत्प्रसादतः ।।

— इति कोजागरपूर्णिमाव्रतपूजाप्रयोगः —

◆

१६. कार्तिके आकाशदीपदानम्

प्रयोगः - अथ कार्तिके आकाशदीपदानमुक्तं पुष्करपुराणे-

तुलायां तिलतैलेन सायँकाले समागते ।
आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति ।।
महतीं श्रियमाप्नोति रूपसौभाग्यसंपदम् ।

तद्विधिरादित्यपुराणे-

दिवाकरेऽस्ताचलमौलिभूते गृहाददूरे पुरुषप्रमाणम्
यूपाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावथ तस्य मूर्ध्नि ।
यवाङ्गुलच्छिद्रयुतास्तु मध्ये द्विहस्तदीर्घा अथ पट्टिकास्तु
कृत्वा चतस्रोऽष्टदलाकृतीस्तु याभिर्भवेदष्टदिशानुसारी ।।
तत्कर्णिकायां तु महाप्रकाशो
दीपः प्रदेयो दलगास्तथाष्टौ
निवेद्य धर्माय हराय भूम्यै
दामोदरायाप्यथ धर्मराज ।।
प्रजापतिभ्यस्त्वथ सत्पितृभ्यः
प्रेतेभ्य एवाथ तमः स्थितेभ्यः ।

अपरार्के तु- **दामोदराय नभसि तुलायां दोलया सह ।**
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ।। इति मन्त्रः ।

आकाशदीपदानसङ्कल्पः- अद्याश्विनपूर्णिमायाममुकोऽहं मम सकलपापक्षयपूर्वकं श्रीराधादामोदरप्रीतये अद्यारभ्य कार्तिकपौर्णमासीपर्यन्तं यथाशक्ति आकाशदीपदानं करिष्ये इति संकल्पयेत् । ततः प्रत्यहं सायङ्काले पूर्वोक्तविधिना **दामोदराय नभसि०** इति मन्त्रेण दीपदानं कुर्यात् ।

— इत्याकाशदीपदानम् —

◆

१७. गोवत्सपूजाविधिः

प्रयोगः - कार्तिककृष्णद्वादशी गोवत्ससंज्ञा अत्र विशेषो भविष्ये-

सवत्सां तुल्यवर्णाञ्च शीलिनीं गां पयस्विनीम् ।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत् ।।
अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः ।
पादमूले तु दद्याद्वै मन्त्रेणानेन पाण्डव ।।
क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते ।
सर्वदेवमये मातर्गृहाणार्घ्यं नमो नमः ।। इति ।

ततो माषादिसंसिद्धान् वटकान् निवेदयेत् ।

वटकनिवेदनम्

सुरभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता ।
सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस ।।

प्रार्थना

सर्वदेवमये देवि सर्वदेवैरलङ्कृते ।
मातर्ममाभिलषितं सफलं कुरु नन्दिनि ।।

इति प्रार्थयेत् ।

— इति गोवत्सद्वादशी —

✿

१८. कार्तिककृष्णत्रयोदशीकृत्यम्

प्रयोगः - प्रातःकाले काकबलिदानम् । तत्र क्रमः मत्स्यमांससमन्वितं भक्तबलिं गृहीत्वाङ्गणे काकं संपूजयेत् ।

काकपूजनमन्त्रः- **काकोऽसि यमदूतोऽसि वायसोऽसि महामते ।**
इमं बलिं गृहाण त्वं त्रायस्व यमसंकटात् ।।इति ।

तस्यामेव सन्ध्यायां यमदीपदानं कुर्यात् ।

स्कान्दे यमदीपदानविधिः -

कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ।। इति ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्यामुकोऽहं मम सपरिवारस्यायुरारोग्यैश्वर्यो-दयप्राप्तिपूर्वकमपमृत्युनिवारणाय यमराजप्रीत्यर्थं दीपदानं करिष्ये । ततो **यमाय पाशहस्ताय महिषारूढाय कृष्णवर्णाय नमः** इति ध्यात्वा यथाकुलाचारमाधारे दीपं परिवारसंरव्याकान्दीपान् वा संस्थाप्य अञ्जलिं बध्वा प्रार्थयेत् ।

प्रार्थना- **मृत्युः पाशधरः कृष्णः कालदण्डधरो महान् ।**
तुष्टोऽस्तु दीपदानेन त्रयोदश्यां स धर्मराट् ।।
मृत्युना पाशदण्डाभ्यां कालेन श्यामया सह ।
त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम ।।
धर्मराज नमस्तुभ्यं भवानुद्धरणक्षमः ।
अज्ञातज्ञातदोषान्मे क्षमस्व त्वं कृपाकर ।।

दक्षिणादानसङ्कल्पः - ॐ तत्सत्३ विष्णुः३ अद्येत्यादि मया यमप्रीतये कृतैतद्दीपदानकर्मणः साङ्गतासिध्यर्थमिमां दक्षिणां दास्ये ॐ तत्सन्न मम।

— इति यमदीपदानविधानम् —

◆

१९. अभ्यङ्गस्नानम्

प्रयोगः - कार्तिककृष्णचतुर्दश्यां प्रभाते चन्द्रोदयेऽभ्यङ्गस्नानमुक्तं भविष्योत्तरे-

कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये ।
अवश्यमेवकर्तव्यं स्नानं नरकभीरुभिः ।। इनः=चन्द्रः।
अपामार्गस्य पल्लवान् भ्रामयेच्छिरसोपरि ।
ततो वै तर्पणं कार्यं धर्मराजस्य नामभिः ।।
तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशी ।
प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति ।। इति ।

तत्रादौ स्नानसंकल्पः - अद्येत्यादि अमुकोऽहं मम सकलपापक्षयपूर्वकश्रुतिस्मृतिपुराणोक्तफलावाप्तये नरकचतुर्दश्यां तैलाभ्यङ्गपूर्वकमलापकर्षणस्नानं करिष्ये इति ।

अथाभ्यङ्गस्नानसमये अपामार्गादिभ्रामणमन्त्रः-

सीतालोष्टसमायुक्त सकण्टकदलान्वित ।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ।।
अपामार्गमथो तुम्बीं प्रपुन्नाडमथापरम् ।
भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ।।

तर्पणं जीवत्पितृकैरपिकर्तव्यम् । सव्येन तर्पणं कुर्यात् ।

तर्पणम्- **यमाय धर्मराजाय मृत्यवे चान्तकाय च ।**
वैवस्वताय कालाय सर्वभूतक्षयाय च ।।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।। इति ।

ततस्तिलतैलेन दीपद्वयं प्रज्वलय्य संपूज्य निवेदयेत् ।

दीपदानम्- **शुनकौ श्यामशबलौ भ्रातरौ यमसेवकौ ।**
तुष्येतां च चतुर्दश्यां दीपदानेन मृत्युजौ ।।

इति मन्त्रेण नद्यां प्रवाहयेत् । तस्मिन्नेव दिने प्रातःकाले शुनकाय मांसौदनबलिमपि दित्सन्ति स्वाचारात् । कार्तिककृष्णामायां प्रातरभ्यङ्गस्नानं कुर्यात् । प्रदोषे लक्ष्मीपूजनं, तत्प्रीतये दीपदानञ्च कुर्यात् । तदुक्तं कालादर्शे-

प्रत्यूषे आश्वयुग्दर्शे कृत्वाभ्यङ्गादिमङ्गलम् ।
भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये ।। इति हेमाद्रौ भविष्ये ।

दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् ।
प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात् ।
दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च ।। इति ।

— इति कार्तिककृष्णचतुर्दश्यां प्रभाते चन्द्रोदयेऽभ्यङ्गस्नानम् —

◆

२०. लक्ष्मीपूजाविधिः

प्रयोगः - कार्तिककृष्णामावास्यायामुपोष्य सायंकाले स्नात्वा धौते वाससी परिधायं गृहाट्टालकाङ्गनकोष्ठगोष्ठेषु सर्वत्र दीपान् प्रज्वलय्य पूजास्थानमागत्याचम्य प्राणानायम्य अर्घ्यं संस्थाप्य संकल्पं कुर्यात् ।

सङ्कल्पः- ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा महालक्ष्मीप्रसादसिद्ध्यर्थं सुखरात्र्यां महालक्ष्म्या इन्द्रकुबेरयोश्च पूजनं करिष्ये तदङ्गत्वेनादौ दीपकलशगणेशपूजां करिष्ये इति संकल्प्य प्रथमं दीपकलशगणेशपूजां विधाय कोजागरपूर्णिमोक्तप्रकारेण महालक्ष्मीं ध्यात्वा इन्द्रम् ध्यायेत् ।

इन्द्रध्यानम्- चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः ।
शचीपतिश्च ध्यातव्यो नानाभरणभूषितः ।।

ॐ इन्द्राय नमः इति ।

कुबेरध्यानम्- मनुजवाह्यविमानवरस्थितम्
गरुडरत्ननिभं निधिनायकम् ।
शिवसखं मुकुटादिविभूषितम्
वरगदे दधतं भज तुन्दिलम् ।।

ॐ क्लीं कुबेराय नम इति ।

तदन्तरकृत्यम्- ततः स्वर्णप्रतिमां संस्थाप्य **ॐ भूर्भुवः स्वः**, इति प्रतिष्ठांप्य कोजागरपूर्णिमोक्तप्रकारेण श्रीसूक्तमन्त्रैश्च षोडशोपचारैर्महालक्ष्मीं संपूज्य तथा इन्द्रकुबेरौ च संपूज्य लक्ष्मीं प्रार्थयेत् । सुखरात्र्यां प्रार्थनामन्त्रे विशेषः ।

प्रार्थना- ॐ विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे ।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ।।
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् ।
सुखरात्रि प्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु ।।
या रात्रिः सर्वभूतानां देवानां सृष्टिसंभवा ।
आख्याता भूतले देवी सुखरात्रि नमोऽस्तु ते ।।
नमस्ते सर्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ।।

इन्द्रप्रार्थना- ॐ विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः ।।

कुबेरप्रार्थना- ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ।।

इतीन्द्रकुबेरौ संप्राथ्य दक्षिणादानादिकं कोजागरपूर्णिमोक्तप्रकारेणैव कुर्यात् ।

अस्यामेव मसीपात्रे महाकालीपूजनमायव्ययप्रदर्शनन्नवपत्रिकायां सरस्वतीपूजनञ्च महालक्ष्मीपूजनेन सह व्यावहारिका अनुतिष्ठन्ति । तद्यथाचारमनुष्ठेयम् । अस्यामेवापररात्रे अलक्ष्मीनिःसारणमुक्तं भविष्ये ।

अलक्ष्मीनिःसारणम्- एवं गते निशीथे तु जने निद्रार्धलोचने ।
तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः ।।
निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् ।

उषःकालकृत्यम् - सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये ।
सर्वान् बन्धून् वधूँश्चैव वाचा कुशलयार्चयेत्।।
प्रदीपवन्दनं कार्यं लक्ष्मीमङ्गलहेतवे ।
गोरोचनाक्षतं चैव दद्यादङ्गेषु सर्वतः ।।

— इति लक्ष्मीपूजाप्रयोगः —

◆

२१. गोवर्धनादिपूजाविधिः

प्रयोगः - स्कान्दे-

प्रातर्गोवर्धनं पूज्यं द्यूतं चापि समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्चावाहदोहनाः ।।

वाहः= वाहनं बलीवर्दानाम्, दोहनम् = स्त्रीगवी साधारणम्, उभयमपि त्याज्यम् । **त्याज्ये वाहनदोहने** इति ब्राह्मात् । गोवर्धनश्च गोमयेन चित्रेण वा कार्यः । गोमयगोवर्धनपर्वतं निर्माय नानाविधफलपल्लवकुसुमपीतहरितरक्तध्वजादिभिरलङ्कृत्य पूजयेत् ।

सङ्कल्पः- ॐ तत्सत्३ ॐ विष्णुः३ अद्य कार्तिकशुक्लप्रतिपद्यमुकोऽहं मम सकलपापक्षयपूर्वकश्रीकृष्णप्रीत्यर्थं गोपालगोवर्धनपूजामहोत्सवं करिष्ये तदङ्गत्वेनादौ दीपकलशगणेशपूजनञ्च करिष्ये इति संकल्पयेत् ।

गोपालगोवर्धनप्रतिष्ठा - ततो दीपकलशगणेशपूजां विधाय गोपालमूर्तिं विधाय पञ्चामृतेन स्नापयित्वा **ॐ मनोजूतिः० ॐ भूर्भुवः स्वः गोपालगोवर्द्धनौ इहागच्छतमिह तिष्ठतं सुप्रतिष्ठितौ वरदौ भवतम्** इति प्रतिष्ठाप्य ध्यायेत् ।

गोपालध्यानम्- बले राज्ञो द्वारपालो भवानद्य जगत्पते ।
निजवाक्यार्थनाथाय सगोवर्धनगोपते ।।

पूजनम् - ततो गोपालमावाहनादिषोडशोपचारैः संपूज्य बलरामम्, नन्दम्, यशोदाम्, गोपान्, गोपीः, गोकुलञ्च सर्वान् पञ्चोपचारैः पूजयेत् । ततः पुष्पाञ्जलिं गृहीत्वा प्रार्थयेत् ।

प्रार्थना- ॐ गोपालमूर्त्ते विश्वेश शक्रगर्वविभेदक ।
गोवर्धनकृतच्छत्र पूजां मे गृह्ण गोपते ।।
गोवर्धनधराधार गोकुलत्राणकारक ।
विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव ।।

इति गोपालगोवर्धनपूजा

गोपूजनम्

गोपूजनसङ्कल्पः - अद्य कार्तिकशुक्लप्रतिपदीत्यादि अमुकोऽहं मम सकलपापक्षयपूर्वकं गोकुलवृद्ध्यर्थं श्रीपरमेश्वरप्रीतये सवत्सानां गवां पूजनमहं करिष्ये इति ।

पूजनम्- ततस्तिलतैलयुक्तगैरिकहरिद्रादिभिः गवां शृङ्गाणि अङ्गानि च संभूष्य **ॐ सवत्साभ्यो गोभ्यो नमः** इति मन्त्रेण षोडशोपचारैः संपूज्य अङ्गानि पूजयेत् ।

अङ्गपूजा

ॐ अग्रपादाभ्यां नमः, ॐ आस्याय नमः, ॐ शृङ्गाभ्यां नमः, ॐ स्कन्धाभ्यां नमः, ॐ पृष्ठाय नमः, ॐ पुच्छाय नमः, ॐ चरमपादाभ्यां नमः, ॐ वत्साय नमः ।

गवां प्रार्थना- ॐ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मेऽस्तु इह लोके परत्र च ।।

इति संप्रार्थ्य गोग्रासं दद्यात्

गोग्रासदानम्- ॐ सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः।
प्रतिगृह्णन्त्विमं ग्रासं गावस्त्रैलोक्यमातरः ।।

महानीराजनम्- ॐ लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतंवहा च यज्ञार्थे मम पापं व्यपोहतु ।।

प्रदक्षिणा- ॐ अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ।। इति ।

गोमतीश्रावणम् -

ॐ गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिकाः ।
गावः प्रतिष्ठा भूतानां गावः सर्वफलप्रदाः ।।
अन्नमेव परं गावो देवानां हविरुत्तमम् ।
पावनं सर्वभूतानां रक्षन्ति च वहन्ति च ।।
हविषा मन्त्रपूतेन तर्पयन्त्यमरान् दिवि ।
ऋषीणामग्निहोत्राणां गावो होमे प्रतिष्ठिताः ।।
सर्वेषामेव देवानां गावः शरणमुत्तमम् ।
गावः सर्वस्य लोकस्य गावो धन्याः सदोहनाः ।।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ।।
गावो मामुपतिष्ठन्तु हेमशृङ्ग्यः पयोमुचः ।
सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा ।।
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ।।
एवं रात्रौ दिवा वापि समेषु विषमेषु च ।
महाभयेषु च नरः कीर्तयन्मुच्यते भयात् ।।
घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्त्तास्ता मे सन्तु सदा गृहे ।।
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ।
घृतं मे सर्वतश्चापि घृतं मे मनसि स्थितम् ।।

गावो ममाग्रतो नित्यं गावः पृष्ठत एव च ।
गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम् ।।
इत्याचम्य जपन् सायं प्रातश्च पुरुषः सदा ।
यदह्ना कुरुते पापं तत्सर्वं परिमुच्यते ।।
यत्प्रातः कुरुते पापं तस्माच्चापि विमुच्यते । इति ।

अवसानकृत्यम्- गोमतीं श्रावयित्वा ब्राह्मणेभ्यो दक्षिणां दत्त्वा विसर्जनं विधाय कर्मेश्वरार्पणं कुर्यात् । ततो गा वने विसृज्य कुलपालिकां कृत्वा ब्राह्मणान् भोजयित्वा रात्रौ गोष्ठे दीपान् ज्वलयित्वा यथासुखं विहरेत् । गोक्रीडादिने रात्रौ चन्द्रदर्शने दोषः-

गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून् हन्ति सुरभिः पूजकाँस्तथा ।।

इति पुराणसमुच्चयोक्तेः ।

अन्यच्च- **प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् ।**
परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः ।।
या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृपः ।
पूजनात् त्रीणि वर्द्धन्ते प्रजा गावो महीपतिः ।।
प्रतिपद्यग्निकरणं द्वितीयायां गवार्चनम् ।
क्षेत्रच्छेदं करिष्ये ते वित्तनाशं कुलक्षयम् ।। इति निर्णयामृते।

गोवर्धनपूजनञ्च मुख्यगोवर्द्धनसन्निधौ तस्यैव कार्यम् । तदसन्निधौ तु गोमयेन गोवर्द्धनाकारं कृत्वा सर्वं कार्यं कर्तव्यम् ।

ततो बलेर्गृहद्वारि स्थाप्यो गोमयमूर्तिमान् ।
मुने श्रीबालगोपालः स्थाप्यो गोवर्द्धनो महान् ।। इति पाद्मोक्तेः।

इति गोपूजा ।

— इति गोवर्धनादिपूजाविधिः —

✿

२२. बलिपूजाविधिः

प्रयोगः - निर्णयामृते स्कान्दे उक्तम् -

कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ।
पूजां कुर्यान्नरः साक्षाद्भूमौ मण्डलके शुभे ।।
बलिनामाख्यदैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।।

इति बलिं पञ्चवर्णचूर्णादिभिः सपरिवारं वराभयकरं भूमण्डले संलिख्य, सूर्यायार्घ्यं दत्त्वा, भूतोत्सादनादिकं विधाय पुनरर्घ्यं संस्थाप्य, प्राणानायम्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येहामुकोऽहं संवत्सरावच्छिन्न-सुखप्राप्तिकामः सपरिवारस्य बलेर्यथामिलितोपचारैः पूजनं करिष्ये इति ।

प्रतिष्ठावाहानादिकम्- ॐ मनोजूतिः० ॐ भूर्भुवः स्वः सपरिवारबले इहागच्छ इह तिष्ठ सुप्रतिष्ठितो भव। इत्यावाह्य ध्यानं कुर्यात् ।

ध्यानम्- सर्वाभरणसंपूर्णं विन्ध्यावल्या समन्वितम् ।
कुम्भाण्डबाणजंभोरुमयदानवसंयुतम् ।।
संपूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ।
द्विभुजं दैत्यराजानं ध्यायेद्वैरोचनं बलिम् ।। इति ।

बल्यादिपूजनम्- ततः पाद्यादिभिरुपचारैः बल्यादीन् पूजयेत्- **ॐ बलये नमः, ॐ विन्ध्यावल्यै नमः, ॐ कुम्भाण्डाय नमः, ॐ बाणाय नमः, ॐ जंभाय नमः, ॐ उरवे नमः, ॐ मयाय नमः,** इति

प्रत्येकं पूजयेत् । आवाहनादिनीराजनान्तां पूजां प्रधानस्य बलेर्विधाय प्रार्थयेत् । अर्चनविधिस्तु मदनरत्ने -

गन्धपुष्पान्ननैवेद्यैफलैश्च गुडपूपकैः ।
मधुमांससुरालेह्यदीपबल्युपहारकैः ।।
मन्त्रेणानेन राजेन्द्रः समन्त्रिसपुरोहितः ।।

पूज्य इत्यग्रिमेणान्वयो भविता ।

मन्त्रः - **ॐ बलिराज नमस्तुभ्यं विरोचनसुत प्रभो ।**
भविष्येन्द्र सुराराते विष्णुसान्निध्यदो भव ।। इति ।

सुरास्थाने सैन्धवमिश्रितं दुग्धं समर्पयेत् । अनेन विधिना संपूज्य ब्राह्मणेभ्यो दक्षिणां दत्त्वा विसर्जनं कुर्यात् ।

— इति बलिपूजाविधिः —

◆

२३. यमपूजाविधिः

प्रयोगः - शुद्धासने उपविश्यार्घ्यं संस्थाप्य प्राणानायम्य दीपं ज्वलयित्वा आचम्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - अद्येहेत्यादि कार्तिकशुक्लद्वितीयायाम् (यमद्वितीयायाम्) अमुकोऽहं ममायुरारोग्यैश्वर्योदयप्राप्त्यर्थं (भ्रातृभगिन्योः परस्परपूजनं तदङ्गत्वेन) दीपकलश-गणेशपूजनपूर्वकं यमयमुनायमदूतानां सूर्यादिनवग्रहाणां मार्कण्डेयाद्यष्ट-चिरजीविनां च यथामिलितोपचारैः पूजनं करिष्ये इति संकल्पः ।

दीपगणेशपूजनम् - **ॐ नमोस्त्वनन्ताये**ति दीपं पूजयेत् । **ॐ गणानान्त्वे**ति गणेशं संपूज्य **वक्रतुण्डे**ति प्रार्थयेत् ।

कलशपूजनम् - ततः कलशविधिना कलशं संस्थाप्य तत्र वरुणमावाह्य संपूजयेत् ।

यमपूजनम् - कलशोपरि ताम्रादिनिर्मितां स्थालीं संस्थाप्य तत्र चन्दनादिना षड्दलाष्टपत्रभूपुरात्मकं यन्त्रं निर्माय तन्मध्ये स्वर्णप्रतिमायामक्षतपुञ्जे वा यममावाह्य पूजयेत् ।

आवाहनम् - **ॐ मनोजूतिः० ॐ भूर्भुवः स्वः यम इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भव** इति यमस्यावाहनम् ।

ध्यानम्-
मेघश्यामं प्रसन्नास्यं नानालङ्कारसंयुतम् ।
महिषस्थं दण्डधरं संस्तुतं पितृभिर्वृतम् ।।
नानारूपधरैर्दूतैः श्वेतवस्त्रं भजेद्यमम् ।।

आसनम्-
नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।
आसनं देव देवेश प्रीत्यर्थं प्रतिगृह्यताम् ।।

पाद्यम्- पाद्यं गृहाण देवेश सर्वक्षेमसमर्थ भोः ।
भक्त्या समर्पितं देव लोकनाथ नमोस्तु ते ।।

अर्घ्यम्- एह्येहि मार्तण्डज पाशहस्त
यमान्तकृल्लोकधरामरेश ।
भ्रातृद्वितीयाकृतदेवपूजाम्
गृहाण चार्घ्यं भगवन् नमस्ते ।।
त्वं कर्मसाक्षी भूतानां शुभाशुभविवेचकः ।
गृहाणार्घ्यं धर्मराज वैवस्वत नमोऽस्तु ते ।।

आचमनीयम्- कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।।

स्नानम्- गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः ।
स्नापितोऽसि मया देव अतः शान्तिं कुरुष्व मे ।।

पञ्चामृतस्नानम्

पयः कामधेनुसमुद्भूतं देवर्षिपितृतृप्तिदम् ।
पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ।।

दधि- चन्द्रमण्डलसंकाशं सर्वदेवप्रियं दधि ।
स्नानार्थं ते मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ।।

घृतम्- रसानामुत्तमं त्वाज्यं देवानां च सदाप्रियम् ।
तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ।।

मधु- यस्य धारणमात्रेण तृप्तिं यान्ति पितामहाः ।
मधुना स्नापितो देव नित्यं शोकहरो भव ।।

शर्करा- यमलोकभयात् त्रस्तः शरणं त्वां गतः प्रभो ।
खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम् ।।

जलस्नानम्- कर्पूरैलासमायुक्तं सुगन्धिद्रव्यसंयुतम् ।
गन्धोदकेन स्नपनं प्रीत्यर्थं प्रतिगृह्यताम् ।।

आचमनीयम्- कर्पूरवासितं तोयं मन्दाकिन्या समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।।

वस्त्रम्- सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ।।

वस्त्राङ्गमाचमनीयं नाममन्त्रेण ।

यज्ञोपवीतम्- देव देव नमस्तेऽस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ।।

यज्ञोपवीताङ्गमाचमनीयं नाममन्त्रेण ।

गन्धः - श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुश्रेष्ठ गृहाण परमेश्वर ।।

अक्षताः - तण्डुलाश्च तथा शुभ्राः कुङ्कुमाक्ताः सुशोभनाः ।
मया निवेदिता भक्त्या गृह्यतां परमेश्वर ।।

पुष्पाणि- सेवन्तिकाबकुलचम्पकपाटलाब्जैः
पुन्नागनागकरवीररसालपुष्पैः ।
बिल्वप्रवालतुसीदलमालतीभि-
स्त्वां पूजयामि जगदीश्वर मे प्रसीद ।।

ततो यमदूतान् पूजयेत् नाममन्त्रेण ।

प्रार्थना- नमोऽस्तु यमदूतेभ्यो बलिनो ये महावलाः ।
मनोनिलाक्रान्तवेगाः पाशमुद्गरधारिणः ।।
मम सौख्यकराः सन्तु पीडयन्तु न मां क्वचित् ।
ममापचरितं सर्वं विस्मरन्तु दयालवः ।।

यमुनापूजनम् - ततो नाममन्त्रेण यमुनां पूजयित्वा प्रार्थयेत् ।

प्रार्थना- यमस्वसर्नमस्तेऽस्तु सूर्यपुत्रि नमोस्तु ते ।
लोकमातर्नमस्तेस्तु नमो नमस्ते विष्णुवल्लभे ।
वरदा भव मे नित्यं यमुने लोकपूजिते ।।

यमुनापरिचारिकापूजनम्- ततो नाममन्त्रेण यमुनापरिचारिकां पूजयित्वा प्रार्थयेत् ।

प्रार्थना- पूजयामि नमस्तुभ्यं यमुनापरिचारिकाम् ।
क्षमस्व मम कल्याणि यमुनापरिचारिके ।। इति ।

नानादेवपूजनम् - तत **आकृष्णेनेत्यादि** स्वस्वमन्त्रैः सूर्यादिनवग्रहान्, **गणनान्त्वेति** गणेशम्, **तद्विष्णोरिति** विष्णुम् **नमः शम्भवायेति** शिवम्, **ब्रह्मजज्ञानमिति** ब्रह्माणम् स्वस्वनाममन्त्रैर्मार्किण्डेयादीनष्टचिरजीविनश्च यथामिलितोपचारैः पूजयेत् ।

धूपः- वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धउत्तमः ।
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ।।

दीपः - आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।

नैवेद्यम्- ॐ नाब्भ्याऽआसीत्०।। नाममन्त्रेणापोशानं नैवेद्यमध्ये पानीयमुत्तरापोशानं हस्तप्रक्षालनमुखप्रक्षालन जलं ताम्बूलञ्च दद्यात् **ॐ याःफलिनीः०** इति फलम् । **हिरण्यगर्भगर्भस्थम्०** इति दक्षिणाम नाममन्त्रेण प्रदक्षिणां नमस्कारं नीराजनं पुष्पाञ्जलिञ्च समर्प्य प्रार्थयेत् ।

प्रार्थना- धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्धं सूर्यपुत्र नमोऽस्तु ते ।।
सौम्यानां सौम्यरूपाय क्रूराणां क्रूररूपिणे ।
अखर्वगर्वशमन कालकाल नमोऽस्तु ते ।।

अष्टचिरजीविपूजनम् - ततो मार्कण्डेयाद्यष्टश्चिरजीविनः पूजयित्वा प्रार्थयेत्।

प्रार्थना- **मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।**
चिरजीवी यथासि त्वं तथा मां कुरु सुव्रत ।।
बलिराज नमस्तुभ्यं नमस्ते विष्णुवल्लभ ।
भविष्येन्द्र सुराराते वरदो भव सर्वदा ।।
अज्ञानतिमिरे मग्नं जगज्ज्ञानैकचक्षुषा ।
उद्धृतं येन मुनिना तस्मै व्यासाय ते नमः ।।
रामभक्तैकमुकुटरत्नज्योतिःस्वरूपिणे ।
भविष्यद्ब्रह्मणे नित्यं तुभ्यं हनुमते नमः ।।
विभीषण नमस्तुभ्यं नमस्तेऽसुरसत्तम ।
रामभक्त नमस्तुभ्यं पाहि मां सर्वदाऽनघ ।।
महर्षिप्रवरं देवं वीरविप्रस्वरूपिणम् ।
कृपं नमामि सततं वरदो भव सुव्रत ।।
सर्वोपकरणे शक्तं रामं शस्त्रभृतां वरम् ।
पितृचित्तानुगं विप्रं पूजयामि नमोऽस्तु ते ।।
मार्कण्डेयो बलिर्व्यासो हनुमाँश्च विभीषणः ।
कृपो द्रौणिः पर्शुरामश्चाष्टौ वै चिरजीविनः ।। इति ।

ततः पुष्पाञ्जलिं दद्यात् ।

लोमशपूजनम् - ततो नाममन्त्रेण लोमशं पूजयित्वा प्रार्थयेत् ।

प्रार्थना- **लोमशं सततं नौमि पूजयामि पुनः पुनः ।**
हृल्लोमदर्शनाद्यस्य ब्रह्मसंख्यानुमीयते ।।

वकदाल्भ्यपूजनम् - अनेनैव प्रकारेण वकदाल्भ्यं मुनिं पूजयित्वा प्रार्थनां कुर्यात् ।

प्रार्थना - वकदाल्भ्यं मुनिं नौमि शान्तं सङ्गतमानसम्० इत्यादि । एवं रीत्या सर्वान् संपूज्य प्रार्थयेत् ।

प्रार्थना- जटिलाः श्मश्रुला दक्षास्त्वग्धमन्यस्थिरूपिणः ।
मम पापहराः सन्तु सोमसूर्याग्निवर्चसः ।।

एवं पूजां विधाय भ्राता भगिनीहस्तात् यथाचारं तिलकपुष्पमालाविविध-मिष्टान्नादिकं गृह्णीयात् । तत्र भगिन्योऽष्टचिरजीविनां प्रार्थनां कुर्युः ।

भगिनीकर्त्रीकप्रार्थना

यथास्ति यमुनादेवी यमेन भ्रातृशालिनी ।
तथा मे भ्रातरः सन्तु प्रतिजन्मसु सुव्रताः ।।
मार्कण्डेय नमस्तेऽस्तु नमस्तेऽस्तु महायुषे ।
चिरायुस्त्वं यथालोके तथा भ्राता भवेन्मम ।।
आयुःप्रद महाभाग सोमवंशसमुद्भव ।
महामते मुनिश्रेष्ठ मार्कण्डेय नमोऽस्तु ते ।। इत्यादि ।

भगिनीकर्त्रीकभ्रातृभोज्यदाने मन्त्राः

भ्रातस्तवानुजाताऽहं भुङ्क्ष्व भोज्यमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ।।
यत्प्राप्तञ्च यमुनया यमराजस्य पूजनात् ।
तथा ममापि सकलं भवेज्जन्मनि जन्मनि ।।
आर्युलक्ष्मीर्यशो धैर्यं निर्भयत्वमरोगिता ।
वाक्पटुत्वमजाड्यञ्च जायतां तव सर्वदा ।। इति ।

भातृद्वाराभगिनीपूजनम्- ततो भ्राता **"सर्वा भगिन्यः संपूज्या ज्येष्ठानुक्रमतः सदा"** इति वचनात् गन्धमाल्यवस्त्रालङ्कारादिभिर्भगिनीं पूजयेत् । तासां बहुत्वे पूर्वोक्तवचनात्सर्वाः पूजयेत् ज्येष्ठानुक्रमेण एवं संपूज्य प्रार्थयेत् ।

प्रार्थना- त्वं लक्ष्मीस्त्वमपर्णासि ब्रह्माणी त्वं सरस्वती ।
त्वत्पूजनाद्भवेयुस्ताः पूजिता मम सर्वदा ।।

आयुर्लक्ष्मीर्धनं धान्यं पश्वादिकमरोगिता ।
सर्वं त्वदर्चनादाप्तं भंवेज्जन्मनि जन्मनि ।।
इदं फलं मया देवि स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।
पतिपुत्रधनैश्वर्यं सौभ्रात्रं जन्मजन्मनि ।
अक्षय्यं जायतां देवि धर्मराजप्रसादतः ।।

कन्याभगिनीपूजने त्वयं प्रार्थनाविशेषः

दयानिधिः स्तुल्यवयाः सुरूपो गुणौघपूर्णः कुशलः शतायुः ।
क्षितीन्द्रनाथो निजधर्मबुद्धिश्चित्तानुगस्ते पतिरस्तु कन्ये ।।

यमस्तुतिः

त्वमेव वैवस्वत विश्वमूर्तिस्त्वमेवकालः कलनोऽन्तरात्मा ।
त्वमेव मृत्युः पुरुषस्त्वमेवप्रसीद देवेश नमो नमोऽस्ते ।।
संसारसागरे मग्नं सदाचारविवर्जितम् ।
अज्ञानपङ्के सीदन्तं मामुद्धर दयानिधे ।।
मत्समो नास्ति पापिष्ठस्त्वत्समो नास्ति पापहा ।
इति विज्ञप्तिरेवात्र त्वदग्रे स्फुटते मुखात् ।।
दयैव तव लोकानां सेतुभूता भवार्णवे ।
मामुद्धर दयासिन्धो निरयार्णवतारण ।।
यथा तवार्चनाद्देवी यमुना भ्रातृशालिनी ।
तथा तवार्चनाद्देव भ्रातरः सन्तु मे सदा ।। इति ।

क्षमाप्रार्थना- अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोयमिति मां मत्वा क्षमस्व परमेश्वर ।। इति ।

विसर्जनम्- यस्य स्मृत्या०, कायेन वाचा० इति कर्मेश्वरार्पणं विधाय **यान्तु देवगणाः०** इत्यादिना देवविसर्जनं कुर्यात् ।

— इति यमपूजाविधिः —

२४. कार्तिकशुक्लनवमी युगादिः

प्रयोगः - तत्र पिण्डरहितं श्राद्धं कार्यम् । तत्र कूष्माण्डदानं कार्यम् ।

कार्तिके मासि कूष्माण्डं सहिरण्यं सरत्नकम् ।
गुप्तदानेन सहितं दीयते मुनिपुङ्गव ।।
ते धन्याः कृतकृत्यास्ते तैरात्मा तारितोमुने ।

इति पाद्मात्प्राप्तं कूष्माण्डदानं समाचारात्कार्तिकशुक्लनवम्यामनुष्ठीयते।

संकल्पः- ॐ तत्सत्३ ॐ विष्णुः३ अद्येहेत्यादि अमुकोऽहं कार्तिकशुक्लनवम्यां सशैलभूदानजन्यफलसमफलावाप्तये श्रीपरमेश्वरप्रीत्यर्थं घृताक्तं वज्रवैदूर्यमणिमुक्ताप्रबालहाटकादिभिर्युक्तमिदं कूष्माण्डं विष्णुदैवत्यं ब्राह्मणाय दास्ये ॐ तत्सन्न मम ।

मन्त्रः- **ब्रह्महत्यादिपापानां ब्रह्मणा निर्मितं पुरा ।**
कूष्माण्डं बहुबीजाढ्यमतः शान्तिं प्रयच्छ मे ।।

पापानामित्यत्र क्षयार्थमिति विशेषः । ततो दानप्रतिष्ठां कुर्यादिति कूष्माण्डदानम् ।

— इति कार्तिकशुक्लनवमी कृत्यम् —

२५. विष्णुत्रिरात्रव्रतम्

प्रयोगः - कार्तिकशुक्लनवम्यामेव विष्णुत्रिरात्रव्रतमुक्तं पाद्मे-

कार्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः ।
हरिं विधाय सौवर्णं तुलस्या सहितं विभुम् ।।
पूजयेद्विधिवद् भक्त्या व्रती तत्र दिनत्रयम् ।
एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिम् ।। इति ।

वैवाहिकविधिश्चैकादश्यां सायङ्काल इक्षुमण्डपिकां विधाय तत्र श्रीकृष्णं तुलसीञ्च प्रतिष्ठाप्य पूजनादिकं कृत्वा सङ्क्षेपेणानुष्ठीयते मङ्गलपाठादिभिः शिष्टैः ।

— इति विष्णुत्रिरात्रव्रतम् —

२६. हरिबोधिनीपूजाविधानम्

प्रयोगः- **इक्षुदण्डैर्गृहं कृत्वा देशकालोद्भवैः फलैः ।**
संपूर्णं दीपबलिभिः कारयेद्धरिमन्दिरम् ।।
रात्रौ जागरणं कुर्याद्गीतवादित्रनिःस्वनैः ।
एवं यः कुरुते मर्त्यें विष्णुलोकं स गच्छति ।।

इति हरिबोधिनीमाहात्म्यम् । अस्यामेकादश्यां प्रातः स्नानसन्ध्यावन्दनादि नित्यकर्म समाप्य **ॐ शुक्लाम्बरधरमिति** विष्णुं संप्रार्थ्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येत्यादि अमुकोऽहं मम सकलपापक्षयपूर्वकं श्रीपरमेश्वरप्रीतये अस्यामेकादश्यां यथाशक्ति नियमानुष्ठानसहितनिराहारोपवासव्रतं करिष्ये इति संकल्प्य नियममन्त्रं पठेत् ।

मन्त्रः- **एकादश्यां निराहारः सर्वभोगविवर्जितः ।**
श्वो भोक्ष्ये पुण्डरीकाक्ष शरणं मे भवाच्युत ।।

अन्यच्च- **एकादश्यां निराहारो वर्जयिष्यामि वै जलम् ।**
केशवप्रीणनार्थाय अन्यदाचमनादृते ।। इति ब्रह्मवैवर्ते ।

ततस्ताम्रपात्रस्थमाचमनपर्याप्तं जलमष्टाक्षरमन्त्रेण त्रिरभिमन्त्र्य पिबेत्-

अष्टाक्षरेण मन्त्रेण त्रिर्जप्तेनाभिमन्त्रितम् ।
उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलम् ।। इति ।

लक्ष्मीनारायणपूजासङ्कल्पः- ततो मध्याह्नस्नानं विधाय कृतनित्यक्रियो यथाशक्ति मण्डपमलङ्कृत्य पूजामारभेत- अद्येहामुकोऽहं मम सकलदुरितक्षयार्थं श्रीपरमेश्वरप्रीतये अद्यैकादश्यां दीपकलशगणेशपूजनपूर्वकं लक्ष्मीसहितस्य श्रीविष्णोः पुरुषसूक्तमन्त्रैर्यथामिलितोपचारैः पूजनं करिष्ये इति सङ्कल्प्य दीपादीन् संपूज्य **शान्ताकारमिति** ध्यात्वा पुरुषसूक्तेनावाहनादिषोडशोपचारैः संपूजयेत् । ततोऽङ्गपूजां कुर्यात् ।

अङ्गपूजा

ॐ मत्स्यदेवाय नमः पादौ पूजयामि, **ॐ कूर्मदेवाय०** जंघे पू०, **ॐ वराहदेवाय०** जानुनी पू०, **ॐ नृसिंहदेवाय०** कटिं पू०, **ॐ वामनदेवाय०** उदरं पू०, **ॐ परशुरामदेवाय०** बाहू पू०, **ॐ रामचन्द्रदेवाय०** कण्ठं पू०, **ॐ कृष्णदेवाय०** मुखं पू०, **ॐ बुद्धदेवाय०** नेत्रे पू०, **ॐ कल्किदेवाय०** ललाटं पू०, **ॐ केशवदेवाय०** शिरः पू०, **ॐ सर्वात्मने नमः** सर्वाङ्गं पूजयामि।

ततोऽष्टाक्षरमन्त्रं यथाशक्ति जपित्वा अर्घ्यं दद्यात्।

अर्घ्यदानमन्त्रः- जन्मान्तरसहस्रेषु यन्मया पातकं कृतम्।
तत्सर्वं नाशमायातु प्रसादात्तव केशव ।। इति।

ततो गीतनृत्यकथाश्रवणादिभिरहर्निशाञ्च नीत्वा द्वादश्यां प्रभाते स्नानसन्ध्यादिकं विधाय विष्णोः प्रबोधनं कुर्यात्।

विष्णुप्रबोधनमन्त्राः-

ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दित (वन्दनीय) पादपद्म।
बुद्ध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ।।
इयं च द्वादशी देव प्रबोधार्थं विनिर्मिता।
त्वयैव सर्वलोकानां हितार्थं शेषशायिना ।।
उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते।
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् ।।
उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव।
गता मेघा वियच्चैव निर्मलं निर्मला दिशः ।।
शारदानि च पुष्पाणि गृहाण मम केशव।
इदं विष्णुरिति प्रोक्तो मन्त्र उत्थापने हरेः ।।

इति शरत्कालोद्भवैः पुष्पैः पुष्पाञ्जलिं दद्यात्। दन्तधावनार्थमिक्षुदण्डान् विष्णवे समर्पयेत्।

— इति हरिबोधिनीपूजाविधानम् —

२७. भीष्मपञ्चकव्रतम्

प्रयोगः - तच्च कार्तिकशुक्लैकादश्यां गृहीत्वा पूर्णिमायां समापयेत् । प्रातः स्नानसन्ध्यादि कर्म कृत्वा वारिपूर्णं ताम्रपात्रमादाय प्राङ्मुख उदङ्मुखो वा पवित्रपाणिराचम्य विष्णुं संप्रार्थ्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - ॐ अद्येहामुकोऽहं मम सकलपापक्षयपूर्वकं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीपरमेश्वरप्रीत्यर्थं यथोक्तविधिना भीष्मपञ्चकव्रतं करिष्ये इति।

ततो मध्याह्ने नद्यां गोमयेन स्नात्वा (यव) तिलदर्भैः पितॄन्संतर्प्य पुनः स्नात्वा पूजासमाप्तिपर्यन्तं मौनी भवेत् । धौते वाससी परिधाय तिलकं कृत्वा गन्धपुष्पतिलादियुतमर्घ्यं संपाद्य यज्ञोपवीती सन् वक्ष्यमाणमन्त्रेण पञ्चकृत्वः पितृतीर्थेन भीष्मं तर्पयेत् ।

भीष्मतर्पणम्- **ॐ भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।**
आभिरद्भिः समाप्नोतु पुत्रपौत्रोचितां क्रियाम् ।।
वैयाघ्रपद्मगोत्राय साङ्कृत्यप्रवराय च ।
अपुत्राय ददाम्येतत्सतिलं भीष्मवर्मणे ।।
वसूनामवताराय शन्तनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे ।।

इति तर्पणं विधाय भीष्मलक्ष्मीसहितं वासुदेवं यथामिलितोपचारैर्जले संपूज्य पञ्चरत्नानि ब्राह्मणाय दद्यात् । ततो गृहं गत्वा समाहितो भूत्वा आवाहनादि षोडशोपचारैर्विष्णुं संपूज्य पञ्चसु दिनेष्वनवच्छिन्नव्रतो भवेत्। पायसं निवेद्य पूजाशेषं समापयेत् ।

विष्णुपूजनम् - ततः **ॐ हरये नमः** इति मन्त्रेण कमलैर्विष्णोः पादौ पूजयेत् । ततः सहस्रनामस्तोत्रपाठादिना स्तुत्वा प्रणम्य अष्टाक्षरमन्त्रमष्टो-

त्तरशतं जपित्वा स्वगृह्योक्तविधिनाग्निं संस्थाप्य घृताक्ततिलव्रीहियवान् **ॐ विष्णवे नमः स्वाहा** इत्यष्टोत्तरशतं हुत्वा स्वर्णं दद्यात् । ततो **गन्धद्वारामिति** मन्त्रेण गोमयमादाय त्रि:प्राश्योपवसेत्, अशक्तौ: मुन्यन्नादि हविष्यान्नं वा भक्षयेत्। सायं सन्ध्यामुपास्य विष्णुं प्रणम्याष्टाक्षरमन्त्रं पुनर्जपित्वा भूमिशायी भवेत्। एवं पञ्चस्वपि दिनेषु कुर्यात् ।

विशेषकर्म- द्वितीयेऽह्नि बिल्वपत्रैः श्रीविष्णोः कटिदेशं पूजयेत्, गायत्र्या गोमूत्रं प्राश्नीयात् । तृतीयेऽह्नि भृङ्गारकेण नाभिं पूजयेत्- **आप्यायस्वेति** क्षीरं प्राश्नीयात् । चतुर्थेऽह्नि बाणबिल्वजयाभिः स्कन्धावर्चयेत् **दधिक्राब्ण** इति दधि प्राश्नीयात् । पञ्चमेऽह्नि मालत्या शीर्षं पूजयेत् **घृतवतीति** घृतं प्राश्नीयात् ।

पापपुरुषदानम्- सुवर्णप्रतिमां विधाय **यमायत्वेति** मन्त्रेण प्रतिमां पाद्यादिभिः संपूज्य पुष्पाञ्जलिं गृहीत्वा यमं प्रार्थयेत् ।

यमप्रार्थना- यदन्यजन्मनि कृतमिहजन्मनि वा कृतम् ।
पापं प्रशममायातु तव पादप्रसादतः ।।

इति संप्रार्थ्य **धर्मो मे प्रीयतामिति** समर्प्य वाचकायान्यस्मै वा ब्राह्मणाय प्रतिमां दत्त्वा ब्राह्मणान् पूजयित्वा यथाशक्ति गोहिरण्यादिकं तेभ्यो दद्यात्। उक्तदानाभावपक्षे- वस्त्रं गोघृतं पायसं दद्यात् । तत उक्तरीत्या प्रणवेन पञ्चगव्यं प्राश्य ताम्बूलवर्जनसत्यभाषणसत्कथालापादिना दिनानि गमयेत् ।

— इति भीष्मपञ्चकव्रतम् —

❂

२८. कार्तिकशुक्लद्वादश्यां चातुर्मास्यव्रतसमाप्तिः

(महाभारतानुसारेण)

प्रयोगः - कार्तिकशुक्लद्वादश्यां चातुर्मास्यव्रतसमाप्तिं कुर्यात् । तदुक्तं भारते-

चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः ।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ।।

मन्त्रस्तु सनत्कुमारोक्तः-

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ।। इति ।

❂

२९. चतुर्मास्यव्रतकार्तिकस्नानव्रतोद्यापन-(तुलसीविवाह) विधिः

प्रयोगः - पूर्वदिने रात्रौ मासचतुष्टयवर्द्धितायास्तुलस्या उपरि मण्डपं विधाय सर्वतोभद्रमण्डलं विलिख्य कदलीस्तम्भानारोप्य नानाविधनीलहरितरक्तकर्बुरश्वेतपीतधवलमेचकवर्णैस्तोरणादिभिरलङ्कृत्य पुनः कालोद्भवैः शतपत्रजातीमालतीकुमुदिनीप्रवालमल्लिकाकोविदारपाटलीकुन्दबकुलचम्पकपारिजातदूर्वादमनकादिभिः पुष्पैः समलङ्कृत्य पुनः कालोद्भवैर्जम्बीरामलकमातुलिङ्गेक्षुबदरकदलीनारिकेलादिभिः फलैः संभूष्य कर्पूरकस्तूरीकङ्कोल-

कुङ्कुमादिसुगन्धद्रव्यैः सुगन्धीकृत्य गुग्गुलुकृष्णागुरुकालिङ्गादिधूपैः संधूप्य पञ्चरत्नयुतं कलशं संस्थाप्य तत्र सुवर्णप्रतिमायां दामोदरं पूजयेत् । मण्डपस्य चतुर्षु द्वारेषु पुण्यशीलसुशीलजयविजयसंज्ञकान् द्वारपालान् पञ्चोपचारैः पूजयेत्- सर्वतोभद्रमण्डले यथोक्तरीत्या ब्रह्मादिदेवान् पूजयेत्। अर्घ्यं संस्थाप्य प्राणानायम्य संकल्पं कुर्यात् ।

सङ्कल्पः - ॐ तत्सत्३ ॐ विष्णुः३ अद्येत्यादि अमुकोऽहं सकलपापक्षयपूर्वकं श्रीविष्णुप्रीतये यथामिलितोपचारैः श्रीराधादामोदरपूजनं करिष्ये । इति सङ्कल्प्य प्राणप्रतिष्ठां विधाय ध्यानं कुर्यात् ।

ध्यानम्- दक्षिणाधस्तनकरादारभ्य तु प्रदक्षिणम् ।
दामोदरः शङ्खचक्रगदापद्मैरुदीर्यते ।।

द्वारपालपूजा

ॐ पुण्यशीलाय नमः, ॐ सुशीलाय नमः, ॐ जयाय नमः, ॐ विजयाय नमः। ततो दिक्पालान् पूर्वादिक्रमेण- **ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुबेराय नमः, ॐ ईशानाय नमः, ॐ ब्रह्मणे नमः, ॐ अनन्ताय नमः ।**

दामोदरपूजनम् - ततो दामोदरं पूरुषसूक्तेन आवाहनादिषोडशोपचारैः पूजयेत् ।

अर्घ्यम्- ॐ नमः सहस्रशीर्षाय सहस्राक्षाय ते नमः ।
नमः सहस्रपादाय पुरुषाय नमो नमः ।।
सहस्रनाम्ने देवेश प्रसीद त्वं ममाच्युत ।
अर्घ्यं गृहाण देवेश सर्वकामप्रदो भव ।।
अक्षया सन्ततिर्मेऽस्तु दामोदर नमोऽस्तु ते । इति ।

अनन्तरकृत्यम् - इत्यर्घ्यं दत्वाऽष्टदिक्षु अष्टौ दीपान् प्रज्वलय्य सत्कथालापगीतवाद्यादिमङ्गलै रात्रौ जागरणं कृत्वाऽधिवासयेत् । ततः प्रातः कृतनित्य-

क्रियस्त्रिंशत्संख्याकान् ब्राह्मणान् निमन्त्र्य स्वगृह्योक्तविधिनाग्निं संस्थाप्य होमसंकल्पं कुर्यात् ।

होमसङ्कल्पः- अद्येहामुकोऽहं चातुर्मास्यव्रतकार्तिकस्नानव्रतोद्यापन(तुलसी-विवाह)होमकर्मणि आघाराज्यभागदेवताभ्य इदमाज्यं (गणापत्यादि-वनस्पत्यन्तदेवताभ्य इदं यवतिलचर्वाज्यं) विष्णवे (राधादामोदराभ्यां) इदं तिलपायसद्रव्यं (चतुःस्वस्त्यादिभ्य इदं यवतिलचर्वाज्यं) मया परित्यक्तं यथादैवतमस्तु न मम । ततः चतुःस्वस्तिपर्यन्तं होमं कृत्वा **ॐ राधा-दामोदराभ्यां स्वाहा** इदं राधादामोदराभ्याम् इति जुहुयात् ।

विशेषहोमः- ॐ अतोदेवाअवन्तुनोयतोविष्णुर्विचक्क्रमेपृथिव्यासप्तधा-मभिःस्वाहा ।।१।। ॐ इदंविष्णुर्विचक्क्रमेत्रेधानिदधेपदम् । समूढ-मस्यपाꣳसुरेस्वाहा ।।२।। इति मन्त्राभ्यां लक्षं सहस्रमष्टोत्तरशतं वा हुत्वा चतुः स्वस्त्यादि होमं विधाय पूर्णपात्रदानं कृत्वा उत्तराङ्गपूजाञ्च विधाय दक्षिणां दत्त्वा प्रतिमादानं कुर्यात् ।

प्रतिमादानसङ्कल्पः- अद्येहामुकोऽहं चातुर्मास्यकार्तिकव्रतोद्यापनकर्मणि श्रीविष्णोः प्रीतये (आश्विनशुक्लैकादशीमारभ्य कार्तिकपौर्णमासीपर्यन्तं कृतस्य व्रतनियमस्य) साङ्गतासिद्ध्यर्थमिमां सुपूजितां सौवर्णीं राधादामोदर-प्रतिमां सपरिच्छदाममुकगोत्रायाचार्याय तुभ्यं संप्रददे ।

दानप्रतिष्ठा- अद्य कृतैतद्राधादामोदरप्रतिमादानप्रतिष्ठासिद्ध्यर्थमिदं सुवर्णं तत्प्रत्याम्नायद्रव्यं वा ब्राह्मणाय दास्ये इति । शक्तश्चेत्समलङ्कृतां गां दद्यात् । त्रिंशत्संख्याकान् ब्राह्मणान्संपूज्य प्रार्थयेत् ।

प्रार्थना- **युष्मत्प्रसादाद्देवेशः प्रसन्नो भवतात्सदा ।**
अस्माद्व्रताच्च यत्पापं सप्तजन्मकृतं मया ।।
तत्सर्वं नाशमायातु स्थिरा मे चास्तु सन्ततिः ।

मनोरथाश्च सफलाः सन्तु नित्यं ममार्चनात् ।।
देहान्ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभम् ।।

भूयसीदक्षिणासङ्कल्पः- ॐ अद्येह कृतस्यैतत्कर्मणो न्यूनातिरिक्ततापरिपूर्णतासिद्ध्यर्थमिमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये इति संकल्प्य दद्यात् । ततः कलशोदकेनाभिषेकमन्त्रपाठतिलकरक्षाबन्धनत्र्यायुषकरणघृतच्छायानिरीक्षणादीनि कुर्युः । ततः कर्ता ब्राह्मणान् भोजयित्वा दक्षिणादिना संतोष्य अच्छिद्रवाक्यानि पठित्वा पारणं कृत्वा बन्धुभिः सह भुञ्जीत ।

— इति चतुर्मास्यव्रतकार्तिकस्नानव्रतोद्यापनप्रयोगः —

◆

३०. धात्रीच्छायायां भोजनम्

प्रयोगः- **धात्रीच्छायायां यः कुर्यात्पित्रर्थं विप्रभोजनम् ।**
मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु ।।
धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः ।
धात्रीफलकृताहारो नरो नारायणो भवेत् ।।
धात्रीच्छायां समाश्रित्य योऽर्चयेच्चक्रधारिणम् ।
पुष्ये पुष्येऽश्वमेधस्य फलमाप्नोति मानवः ।। इति ।

अतो धात्रीपूजा कार्तिकेऽवश्यं कर्तव्या । धात्रीच्छायायां ब्राह्मणभोजनञ्चावश्यं कर्तव्यम् ।

— इति कार्तिकव्रतोद्यापनम् —

◆

३१. शिवरात्रिव्रतपूजाप्रयोगः

प्रयोगः - फाल्गुनकृष्णत्रयोदश्यां कृतैकभक्तश्चतुर्दश्यां कृतनित्यक्रियः प्रातर्मन्त्रेण संकल्पं कुर्यात् । स्वासने उपविश्य आचम्य जलपूर्णताम्रपात्रं करयोः कृत्वा निम्नलिखितौ मन्त्रौ पठित्वा जलमुत्सृजेत्-

ॐ शिवरात्रिव्रतं ह्येतत्करिष्येऽहं महाफलम् ।
निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते ।।
चतुर्दश्यां निराहारो भूत्वा शम्भो परेऽहनि ।
भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वर ।।

अनन्तरकृत्यम् - ततः सायाह्ने कृष्णातिलैः स्नात्वा धृतभस्मत्रिपुण्ड्रो निशामुखे शिवायतनं गत्वा प्रक्षालितपादः स्वाचान्त उदङ्मुखो देशकालौ संकीर्त्य सङ्कल्पं कुर्यात् ।

पूजासङ्कल्पः - अद्येह शुभपुण्यतिथौ महाशिवरात्र्यां श्रीशिवप्रीत्यर्थं श्रीशिवपूजां करिष्ये तदङ्गत्वेनादौ दीपकलशगणेशपूजनञ्च करिष्ये इति ।

पूजनादिकम् - ततो दीपकलशगणेशपूजां विधाय विनियोगं न्यासं पूजनं जपञ्च कुर्यात् । **ॐ** अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेवऋषिः अनुष्टुप्छन्दः श्रीसदाशिवो देवता न्यासे पूजने जपे च विनियोगः ।

न्यासः- वामदेवाय ऋषये नमः शिरसि, **अनुष्टुप्छन्दसे नमो** मुखे, **श्रीसदाशिवदेवतायै नमो** हृदि, **ॐ नं तत्पुरुषाय नमो** हृदये, **ॐ मं अघोराय नमः** पादयोः,**ॐ शिं सद्योजाताय नमो** गुह्ये, **ॐ वां वामदेवाय नमो** मूर्ध्नि, **ॐ यं ईशानाय नमो** मुखे, **ॐ हृदयाय नमः, ॐ नं शिरसे स्वाहा, ॐ मं शिखायै वषट्, ॐशिं कवचाय हुम्, ॐ वां नेत्रत्रयाय वौषट्, ॐ यं अस्त्राय फट् ।**

शिवपूजनम्- ततः पूजामण्डपे लिङ्गतोभद्रमण्डलं सर्वतोभद्रमण्डलं वा लिखित्वा तदुपरि तण्डुलराशिना कैलासं निर्माय तदुपरि कलशस्थापनविधिना कुम्भं संस्थाप्य सम्पूज्य यथाशक्ति निर्मापितां सौवर्णीं राजतीं वा प्रतिमामग्न्युत्तारणपूर्वकं "**ॐ मनोजूतिः०**" इति पाठान्ते **ॐ भूर्भुवः स्वः भो साम्ब सदाशिव इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भव** इति प्रतिष्ठाप्य ध्यायेत्। नार्मदवाणशिवनामपक्षे प्राणप्रतिष्ठाऽवश्यकता नास्ति किन्तु केवलं पीठे निधाय ध्यायेत्। ध्यायेन्नित्यं **महेशं०** इति।

ततो लिङ्गं स्पृशन् आवाहनं कुर्यात् पुष्पाञ्जलिञ्च दद्यात्- **ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि, ॐ भुवः पुरुषं सां०, ॐ स्वः पुरुषं सां०, ॐ भुर्भुवः स्वः पुरुषं सां०** इत्यावाह्य-

स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधौ भव॥

इति पुष्पाञ्जलिं दद्यात्।

आसनम्- ॐ सद्योजातंप्रपद्यामिसद्योजातायवै नमो नमः ॐ नमः शिवाय, स्त्री शूद्रश्चेत् **ॐ नमः शिवाये**ति षडक्षरीस्थाने **श्रीशिवाय नमः** इति मन्त्रेण पूजयेत्।

पाद्यम् - ॐ भवेभवेनातिभवेभवस्वमाम् ॐ नमः०।

अर्घ्यम्- ॐ भवोद्भवाय नमः ॐ नमः०।

आचमनीयम्- ॐ वामदेवाय नमः ॐ नमः०।

स्नानम्- ॐ ज्येष्ठाय नमः ॐ नमः०।

ततो मूलमन्त्रेण **पयःपृथिव्यामित्यादि**मन्त्रैश्च पञ्चामृतैः संस्नाप्य **आपोहिष्ठेति** तिसृभिः शुद्धोदकेन प्रक्षाल्य एकादशावृत्त्यैकावृत्या वा रुद्रेण पुरुषसूक्तेन च चन्दनकुङ्कुमकर्पूरवासितजलेनाभिषेकं कृत्वा मूलमन्त्रेण आचमनं दत्त्वा साक्षतजलेन तर्पणं कुर्यात्।

तर्पणम्- ॐ भवो देवस्तृप्यताम्, ॐ शर्वो देवस्तृप्यताम्, ॐ ईशानो देव०, ॐ पशुपतिर्दे०, ॐ उग्रो दे०, ॐ रुद्रो दे०, ॐ भीमो दे०, ॐ महादे०, ॐ भवस्य देवस्य पत्नी तृप्यताम्, ॐ शर्वस्य दे०, ॐ ईशानस्य दे०, ॐ पशुपतेर्दे०, ॐ उग्रस्य दे०, ॐ रुद्रस्य दे०, ॐ भीमस्य दे०, ॐ महतो दे० ।

वस्त्रम्- ॐ श्रेष्ठाय नमः, ॐ नमः० ।

आचमनम्- ॐ नमः० ।

यज्ञोपवीतम्- ॐ रुद्राय नमः, ॐ नमः०।

यज्ञोपवीताङ्गमाचमनम् - ॐ नमः० ।

चन्दनम् - ॐ कालाय नमः, ॐ नमः० ।

अक्षताः- ॐ कलविकरणाय नमः, ॐ नमः० ।

पुष्पाणि - ॐ बलविकरणाय नमः, ॐ नमः०, सहस्रमष्टोत्तरशतं वा शिवसहस्रनामभिः **ॐ नमः शिवाय** इति मन्त्रेण वा विल्वपत्राणि अधोमुखानि दद्यात् ।

अङ्गपूजा

ॐ विश्वपतये नमः पादौ पूजयामि, **ॐ शिवाय नमः** जानुनी०, **शूलपाणये०** गुल्फौ०, **शम्भवे०** कटिं०, **स्वयंभुवे०** गुह्यं०, **महादेवाय०** नाभिम्पू०, **विश्वकर्त्रे०** उदरं०, **सर्वतोमुखाय०** पार्श्वौ०, **स्थाणवे०** स्तनौ०, **नीलकण्ठाय०** कण्ठं०, **श्रीकण्ठाय०** मुखं०, **शशिभूषणाय०** मुकुटं०, **देवाधिदेवाय०** सर्वाङ्गं पूजयामि ।

धूपः- ॐ बलाय नमः, ॐ नमः०।

दीपः- ॐ बलप्रमथनाय नमः, ॐ नमः० ।

नैवेद्यम्- ॐ सर्वभूतदमनाय नमः, ॐ नमः० । मध्ये पानीयम्, **ॐ नमः०** । ततो मूलमन्त्रजपं विधाय गुह्यातीति समर्प्य किञ्चित्पार्षदेभ्यो दद्यात् ।

ताम्बूलम् - ॐ मनोन्मनाय नमः, ॐ नमः० ।

दक्षिणां- ॐ नमः० ।

नीराजनम्- ॐ अग्निर्ज्योतिः० ॐ नमः० ।

मन्त्रपुष्पाञ्जलिः- ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ।। **ॐ नमः० भवाय देवाय नमः शर्वाय देवाये**त्यादिनाऽष्टौभवस्य देवस्य पत्न्यै इत्यादिनाऽष्टौ च नमस्कारान्कृत्वा **ॐ नमः शिवाय** इति पुष्पाञ्जलिं दद्यात् ।

प्रदक्षिणानमस्काराः- रुद्राय नमः, पशुपतये०, नीलकण्ठाय०, महेश्वराय०, हरिकेशाय०, विरूपाक्षाय०, पिनाकिने०, त्रिपुरान्तकाय०, शम्भवे०, शूलिने०, महादेवाय० इति प्रदक्षिणानमस्कारान् कुर्यात् । **ॐ नमः शिवाय** इति मन्त्रमष्टोत्तरशतं जपित्वा क्षमापयित्वाऽनेन पूजनेन साम्बसदाशिवः प्रीयतां न मम ।

प्रथमप्रहरपूजा- प्रथमप्रहरपूजायां विशेषः । **ॐ ह्रां ह्रीं ह्रौं उमया सहपूजनं गृह्ण नमोऽस्तु ते** इति सर्वोपचारान्समर्प्य अर्घ्यं दद्यात् ।

अर्घ्यम्- ॐ नमस्ते देव देवेश चन्द्रसूर्याग्निलोचन ।
गृहाणार्घ्यं मया दत्तमुमया सहित प्रभो ।।
यो मामेवं महादेवं विल्वपत्राक्षतैः सह ।
पूजयेत्प्रथमे यामे स्वर्गलोके स गच्छति ।।

द्वितीयप्रहरपूजा- ॐ ह्रां ह्रीं ह्रां पार्वत्या सह पूजनं गृह्ण नमोऽस्तु ते इति सर्वोपचारान्समर्प्यार्घ्यं दद्यात् ।

अर्घ्यम्- ॐ वामदेव नमस्तेऽस्तु नरकार्णवतारक ।
अर्घ्यं गृहाण देवेश गङ्गाजलसमन्वितम् ।।
द्वितीये प्रहरे प्राप्ते शिवभक्तिसमन्वितः ।
संपूज्य बिल्वपत्रैस्तु जीवन्मुक्तो न संशयः ।।

तृतीयप्रहरपूजा - ॐ ह्रीं ह्रूं ह्रां गौर्या सह पूजां गृह्ण नमोऽस्तु ते इति सर्वोपचारान्समर्प्यार्घ्यं दद्यात् ।

अर्घ्यम्- **ॐ नमोऽस्तु गिरिजानाथ प्रणतार्तिविनाशन ।**
गृहाणार्घ्यं मया दत्तं कामान्तक नमोऽस्तु ते ।।
तृतीये प्रहरे प्राप्ते भक्तियुक्तश्च यो नरः ।
बिल्वपत्राक्षतैः पूज्यः सर्वलोके महीयते ।।

चतुर्थप्रहरपूजा- ॐ ह्रीं ह्रौं ह्रां नीललोहित गौर्या सह पूजां गृह्ण नमोऽस्तु ते इति सर्वोपचारान्समर्प्य अर्घ्यं दद्यात् ।

अर्घ्यम्- **ॐ सफलं साक्षतं चैव सुदुर्वाङ्कुरशोभितम् ।**
अर्घ्यं गृह्ण मया दत्तं भीमरूप नमोऽस्तु ते ।।
चतुर्थे प्रहरे प्राप्ते भक्त्या तु वृषभध्वजम् ।
बिल्वपत्राक्षतैः पूज्य रुद्रलोके महीयते ।।

सर्वपूजान्ते प्रार्थना- **नित्यं नैमित्तिकं काम्यं यत्कृतं तु मया शिव ।**
तत्सर्वं परमेशान मया तुभ्यं समर्पितम् ।।

कुम्भदानम् - एवं पूजनजपकथादिना जागरणेन रात्रिं निनीय प्रभाते स्नात्वा पुनः शिवं सम्पूज्य तिलपक्कान्नफलदक्षिणासमेतं कुम्भं सम्पूज्य अद्येहेत्यादि अमुकोऽहं कृतस्य शिवरात्रिनिराहारव्रतस्य साङ्गतासिद्धये श्रीशिवप्रीतये तिलपक्कान्नफलवस्त्रदक्षिणासमेतमिमं कुम्भं ब्राह्मणाय दास्ये इति संकल्प्य विप्रं संपूज्य दत्त्वा व्रतं समर्पयेत् ।

व्रतसमर्पणम्- **यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितम् ।**
त्वत्प्रसादान्महादेव व्रतमद्य समर्पितम् ।।
प्रसन्नो भव मे श्रीमन्सद्गतिः प्रतिपाद्यताम् ।
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः ।।

अच्छिद्रवाचनम्- ततो ब्राह्मणान्भोजयित्वाऽच्छिद्रं वाचयित्वा (पूर्वनिर्णीते काले) स्वजनैः सह पारणं कुर्यात् ।

पारणमन्त्रः- **संसारक्लेशदग्धस्य व्रतेनानेन शंकर ।**
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ।।

— इति महाशिवरात्रिव्रतपूजाविधिः —

◆

इति श्रीविद्वन्मण्डलमार्तण्डपरःसहस्रशिष्यमण्डलीलालितचरण-
युगलदधिराममरासिनिलिखिते कर्मकाण्डभास्करे
वर्षकृत्यखण्डः सम्पूर्णः ।

◆

श्राद्धखण्डः

१. एकोद्दिष्टश्राद्धविधिः

श्राद्धविधिः- श्राद्धकालो मध्याह्नः । एकं पवित्रमेकोऽर्घ एकः पिण्डो नावाहनाग्नौकरणे नात्र विश्वेदेवाः । तद्यथा-

एकोद्दिष्टं देवहीनमेकार्घैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् । इति स्मृतिवचनम्।

श्राद्धप्रयोगः- आचम्य प्राणानायम्य गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वलय्य **नमोऽस्त्वनन्ताय० नमो ब्रह्मण्यदेवाय०** इति मन्त्राभ्यां दीपं संपूजयेत्।

गणेशादिस्मरणम्-

ॐ यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ।।१।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यःसुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ।।२।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।३।।

कुशबटुप्रतिष्ठा - इति गणेशादीन्नत्वा तैलाभ्यङ्गपूर्वकं कुशबटुं स्नपयित्वा **ॐ मनोजूति**रिति मन्त्रेण प्राणप्रतिष्ठां कुर्यात् । अपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्त्वा दक्षिणाभिमुखो भूत्वा, उदङ्मुखस्य पितृब्राह्मणस्य वामजानु स्ववामहस्तेन स्पृष्ट्वा स्ववामजानु च पातयित्वा निमन्त्रयेत् ।

ब्राह्मणनिमन्त्रणम् - तत्र सङ्कल्पः- ॐ अद्येहत्यादिअमुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्याद्यकर्तव्यसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे

अनेन ताम्बूलगन्धपुष्पाक्षतेन (कुशबटो) त्वं मया निमन्त्रितः । **ॐ निमन्त्रितोऽस्मि** इति प्रतिवचनम् ।

ब्राह्मणप्रार्थना- **ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ।**
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ।।
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ।।

ॐ भवितव्यम् इति प्रतिवचनम् । ततो ब्राह्मणचरणौ प्रक्षालयेत्- अनेन मन्त्रेण **ॐ नमोस्त्वनन्ताय०** ।

पादार्घः- **ॐ यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ।**
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ।।

ततो मोटकादिकमादाय सङ्कल्पयेत्- ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीक वसुस्वरूपाद्यकर्तव्यसांवत्सरीकैकोद्दिष्टक्षयाहश्राद्धे एष पादार्घस्तेऽस्तु इति मोटकादिमुत्सृजेत् । ततः सव्येनाचम्य गृहं प्रवेशयेत्। अपसव्येन **ॐ आगता यूयम् । ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम् । ॐ आस्यते** इति प्रतिवचनम् । **ॐ भूर्भुवः स्वः** इति मन्त्रेण ब्राह्मणमुदङ्मुखमुपवेशयेत् ।

कर्मपात्रविधानम्- ततः ॐ कर्मपात्रमहं करिष्ये इति ब्राह्मणं पृच्छेत् । **ॐ कुरुष्व** इत्यनुज्ञातः सन् **यद्देवा** इति कण्डिकात्रयेण स्ववामभागे कर्मपात्रं कुर्यात् । **ॐ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम् । अग्निर्म्मातस्मादेनसोव्विश्श्वान्मुञ्चत्त्वꣳहसः ।।१।। ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमाव्वयम् । व्वायुर्म्मातस्मादेनसोव्विश्श्वान्मुञ्चत्त्वꣳहसः ।।२।। ॐ यदिजाग्ग्रद्यदिस्वप्नऽएनाꣳसिचकृमाव्वयम् । सूर्य्योमातस्मादेनसोव्विश्श्वान्मुञ्चत्वꣳहसः।।३।।** इति मन्त्रैरक्षतपुञ्जोपरि पात्रं स्थापयित्वा **ॐ पवित्रेस्त्थोव्वैष्णव्व्यौ०** इति मन्त्रेण तत्र पवित्रं क्षिपेत् । **ॐ शन्नोदेवी**रिति

जलम् । **ॐ तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः । प्रत्नमद्भिःपृक्तः-स्वधयापितॄँल्लोकान्पृणाहिनःस्वाहा ।।** इति तिलान् । **ॐ श्रीश्चते०** इति पुष्पम् । **ॐ गन्धद्वारा**मिति गन्धम् । **ॐ अक्षन्नमी**त्यक्षतान् क्षिपेत्। ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय -

ॐ अपवित्रःपवित्रो वा सर्वावस्थां गतोपि वा ।
यःस्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशद्रव्याणि आत्मानञ्च सिञ्चेत् ।

प्रतिज्ञासङ्कल्पः - ततः कुशादिकमादाय ॐ अद्येत्यादिदेशकालादिकीर्तनान्ते अमुकसगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्याद्यकर्तव्य-सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धं श्रीमत्परमेश्वरप्रीत्यर्थमेभिर्द्रव्यैरहं करिष्ये । इति संकल्प्यः त्रिर्गायत्री जपेत् ।

पितृदेवस्मरणम्- ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

इति त्रिःपठेत् । पुनः पितृस्मरणम् -

सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ।।
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ।।
ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च ।
कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ।।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गया शिरः ।
यत्र यत्र स्मरेद्विद्वान् पितृणां दत्तमक्षयम् ।।

श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा स्वपितॄन् ध्यात्वा ततः श्राद्धं समारभेत् ।।
गयागजो गयाऽऽदित्यो गायत्री च गदाधरः ।
गया गयाशिरश्चैव षड्गया मुक्तिदायकाः ।।
ईशानविष्णुकमलासनकार्तिकेय-
वह्नित्रयार्करजनीशगणेश्वराणाम् ।
क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां
पादान्नमामि सततं पितृमुक्तिहेतोः ।।

ॐ गङ्गायै नमः, ॐ गदाधराय नमः । इति पठेत् ।

दिग्बन्धनम्- ततोऽपसव्येन दिग्बन्धनं कुर्यात् । तिलसहितमोटकमादाय तिलान्वक्ष्यमाणमन्त्रैः पूर्वादिक्रमेण विकिरेत् । **ॐ अग्निष्वात्ताःपितृगणाः-प्राचींरक्षन्तुमेदिशम् ।।१।। ॐ अपहताऽअसुरारक्षाꣳसिवेदिषदः। ॐ तथाबर्हिषदःपान्तुयाम्यांयेपितरःस्थिताः ।।२।। ॐ अप० । ॐ प्रतीचीमाज्यपास्तद्वत् ।।३।। ॐ अप० । ॐ उदीचीमपिसोमपाः।।४।। ॐ अप० । ॐ ऊर्ध्वतस्त्वर्यमारक्षेत्कव्यवाडनलोप्यधः। ॐ अप०।।५।।**

ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।।६।।
तिला रक्षन्तु दितिजाद्दर्भा रक्षन्तु राक्षसात् ।
पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ।।७।।

नीवीबन्धनम्- मोटकं नीव्यां धारयेदनेन मन्त्रेण-

ॐ त्वमग्ग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्प्परि । त्वंव्वनेब्भ्यस्त्वमोषधीब्भ्यस्त्वन्नृणान्नृपतेजायसेशुचिः ।।

ॐ निहन्मि सर्वं यदमेध्यवद्भवेद्धताश्च सर्वे सुरदानवा मया ।
रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे ।।

इति मन्त्रेण वा । इति नीवीबन्धनम् ।

रक्षणम्- तिलसहितकुशखण्डत्रयं गृहीत्वा-

प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथा ।
सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान् ।।

इति मन्त्रेण दक्षिणस्यां दिशि क्षिपेत् । ततः सव्येन-

विष्णुस्मरणम्-

नमो नमस्ते गोविन्दपुराणपुरुषोत्तम ।
इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः ।।

आसनम्- अपसव्येन मोटकमादाय ॐ अद्येहामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्याद्यकर्तव्यसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे इदं मोटकरूपमासनं तेऽस्तु इति ब्राह्मणाय मोटकरूपमासनं दद्यात् ।

हस्तार्घपात्रविधानम्- ततः ॐ हस्तार्घपात्रमहं करिष्ये इति ब्राह्मणं पृच्छेत्- ॐ कुरुष्व इत्यनुज्ञातः सन् पुटकमेकमग्रे कृत्वा तत्र **ॐ पवित्रेस्थ्योवैष्णव्यौ०** इति मन्त्रेण उत्तराग्रं पवित्रं धारयेत् । **ॐ शन्नोदेवी**रिति जलम् **ॐ तिलोसी**ति तिलान् **ॐ श्रीश्चते०** इति पुष्पम् **ॐ गन्धद्वारा**मिति गन्धं क्षिपेत् ।

ततः ॐ हस्तार्घपात्रं सम्पन्नम् इति ब्राह्मणं पृच्छेत् । **ॐ सुसम्पन्न**मिति तेनोक्ते **ॐ हस्तार्घपात्रमुत्थापयामि, ॐ उत्थापयस्व** इत्यनुज्ञातः सन् हस्तार्घपात्रं वामहस्ते कृत्वा- **ॐ नमो नारायणाय** इति मन्त्रेण पुष्पसहितं पवित्रमुत्तराग्रं विप्रकरे धृत्वा वामहस्तस्थहस्तार्घपात्रमुखमुत्तानेन दक्षिणकरेण पिधाय- **ॐ यादिव्याऽआपःपयसासंबभूवुर्य्याऽआन्तरिक्षाऽउतपार्त्थिवीर्य्याः। हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशꣳस्योनाःसुहवाभवन्तु।।** इति मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य जलतिलमोटकमादाय- ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीकवसुस्वरूपाद्यकर्तव्यसांवत्सरिकैकोद्दिष्ट-

क्षयाहश्राद्धे एष हस्तार्घस्तेऽस्तु इति ब्राह्मणकरेऽर्घं दद्यात् ।

ॐ अर्घे पुनः प्रत्यर्घमस्तु इति मन्त्रेण तदर्घपात्रं भूमौ धृत्वा सव्यं कृत्वा तत्रत्यजलेन चक्षुः स्पर्शः कर्तव्योऽनेन मन्त्रेण- **ॐ तच्चक्षुः०**। ततोऽपसव्येनार्घपात्रं गृहीत्वा ब्राह्मणस्य वामपार्श्वे **ॐ पित्रेस्थानमसि०** इति हस्तार्घपात्रं न्युब्जं कृत्वा तदुपरि कुशत्रयं दद्यात् ।

ब्राह्मणपूजनम्- ततः **ॐ अर्चयिष्ये** इति ब्राह्मणं पृच्छेत् । **ॐ अर्चय** इत्युक्ते, जलचन्दनपुष्पाक्षतताम्बूलयज्ञोपवीतवस्त्रद्रव्यादिभिः समभ्यर्च्य धूपदीपौ च कारयेत् । मोटकादिकमादाय ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीक वसुस्वरूपाद्यकर्तव्यसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे एतान्यर्चनान्यत्र गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतधूपदीपद्रव्यवासांसि ते स्वधा । **ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु** । इति विप्रकरे जलं दद्यात् । **ॐ अस्तु** इति प्रतिवचनम् ।

भूस्वामिनेऽन्नप्रदानम्- ततः सव्येनाचम्य अपसव्येन

ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।
एवं भूमण्डलं चैतत्सर्वभूतानि रक्षतु ।।

इति मन्त्रेण वामावर्तेन चतुष्कोणमण्डलं कुर्यात् । ततस्तिलजलघृतमधुयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखो भूत्वा **ॐ इदमामान्नं सजलमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत् ।

अन्नसंकल्पः- सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य **ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा** । इत्यालभ्य **ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳪंसुरे स्वाहा ।।** ॐ विष्णो कव्यमिदं रक्ष मदीयम् इति च पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ **इदमन्नम्** इत्यन्ने

ॐ इमा आपः इति जले **ॐ इदमाज्यम्** इति घृते **ॐ इदं हवि**रितिपुनरन्ने ॐ एतान्युपकरणानि इत्यन्नजलघृतादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य **ॐ अपहता:असुरारक्षाꣳसिवेदिषदः** इति पठित्वा वामावर्तेन श्राद्धदेशे तिलान्विकीर्य मोटकादिकमादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा ॐ अद्येहामुकसगोत्रायास्मत्पित्रेऽमुकशर्मणे सपत्नीकाय वसुस्वरूपायाद्यकर्त्तव्यसांवत्सरीकैकोद्दिष्टक्षयाहश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोस्ते स्वधा इति ब्राह्मणसमीपे भूमावेव मोटकादिकमुत्सृजेत् । **ॐ अन्नसंकल्पसिद्धिरस्तु** इति विप्रकरे जलं दत्त्वा **ॐ भवान्प्राशयतु** इत्यपोशानं दद्यात् ।

ततः श्राद्धकर्ता कुशोपरि विशन्सव्येन सव्याहृतिकां गायत्रीं जपित्वा मधुव्वातेत्यादि तृचं पठेत् **ॐ मधु३** ।

प्रार्थना- **ॐ अन्नहीनं क्रियाहीनं विधिहीनञ्च यद्भवेत् ।**
तत्सर्वमच्छिद्रमस्तु श्रीभास्करप्रसादतः ।।
ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ।। इति पठित्वा ।

यथासुखं जुषस्व इति वचनानन्तरम्। ब्राह्मणो मौनी भूत्वा भुञ्जीत। संज्ञया च भक्ष्यं प्रार्थयेत् ।

पितृसूक्तपाठः- ततः **पितृसूक्त**ञ्च कर्ता स्वयं पठेत् ब्राह्मणद्वारा पाठयेद् वा,तच्च- **ॐ अग्नये कव्यवाहनाय०** इत्यादि षट् (६) मन्त्राः, **कृणुष्वपाजः०** इत्यादि पञ्च (५) मन्त्राः, **तदेव०** इत्यादि षोडश (१६) मन्त्राः, **सुरावन्तम्०** इत्यादि **अपाम्फेनेन०** इत्यन्तम् एकोनचत्वारिंशत् (३९) मन्त्राः, **सहस्रशीर्षा०** इत्यादि षोडश (१६) मन्त्राः, **नमस्ते०** इत्यादि षट्षष्टिः (६६) मन्त्राः, **आशुः शिशानः०** इत्यादि द्वादश (१२) मन्त्राश्च पितृसूक्तमित्युच्यते ।

विकिरासनम्- ततोऽन्नपात्रसन्निधौ गत्वा आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिरासनमपसव्येन आसनम् उत्सृजेत् । अनेन मन्त्रेण-

असँस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ।
उच्छिष्टभागधेयानां दर्भेषुविकिरासनम् ।।

इति मोटकरूपमासनमास्तृतकुशोपरि उत्सृजेत् । तिलघृतमधुयुतमन्नमादाय जलेनाप्लाव्य मोटकादिकञ्चादाय-

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ।।

इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत् । अत्रोंकारो नोच्चारणीयः। ततः कुशान्परित्यज्य सव्येन हस्तौ पादौ प्रक्षाल्य द्विराचम्य गायत्रीं जपित्वा **मधुवाता०** इत्यादि पठेत् । हरिं स्मरेत् ।

जलगण्डूषदानम्- ततो ब्राह्मणं तृप्तं ज्ञात्वा अपसव्येन **ॐ जलगण्डूषमिदं ते** इति ब्राह्मणाय प्रत्यपोशानं दद्यात् । अत्र वाग्विसर्गः सर्वेषाम् ।

प्रतिप्रश्नः प्रतिवचनञ्च- ततोऽञ्जलिं बध्वा ब्राह्मणं पृच्छेत्- **ॐ स्वदितम्।** **ॐ सुस्वदितम्** इति प्रतिवचनम् । **ॐ शेषमन्नं किं क्रियताम् । ॐ इष्टैः सह भुज्यताम् ।** इति प्रतिवचनम् । **ॐ पिण्डदानमहं करिष्ये । ॐ कुरुष्व ।** इति प्रतिवचनम् ।

पिण्डदानम्

वेदीसंस्कारः- ततः पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय तदुपरि **ॐ येरूपाणिप्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति । परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्त्यस्म्मात् ।** इति मन्त्रेणाङ्गारं भ्रमयित्वा दक्षिणस्यां क्षिपेत् ।

ततः पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वासव्योपगृहीतदक्षिणपाणिना **ॐ अपहताऽअसुरारक्षाꣳसिवेदिषदः**

इति मन्त्रेण दक्षिणाग्रं रेखां कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् ।

वेदीसेचनम्- ततो जलेन शन्नोदेवीरिति मन्त्रेण पिण्डिकासेचनम् । तदनुच्छिन्नमूलकुशान्पिण्डिकायां दद्यात् ।

देवपितृस्मरणम्- ततः सव्येन देवपितृस्मरणं कुर्यात् । तच्च यथा -

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

इति त्रिःपठेत् ।

अवनेजनम्- अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीकाद्यकर्तव्यसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे पिण्डस्थानेऽत्रावनेनिक्ष्व ते स्वधा इति छिन्नमूलकुशोपर्यवनेजनं दद्यात् ।

पिण्डदानम्- ततो मोटकादीनि पिण्डञ्चादाय वामहस्ते पुटकादिस्थजलमादाय- ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीकवसुस्वरूपाद्यकर्तव्यसांवतरिकैकोद्दष्टक्षयाहश्राद्धे एषोन्नपिण्डो मृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा इत्यवनेजनोपरि पिण्डं दद्यात् । अत्र लेपभागनिषेधः । करं प्रोक्ष्य कुशान् परित्यज्य सव्येन द्विराचम्य हरिं स्मरेत् ।

पितृध्यानं गन्धपुष्पार्पणञ्च- ततः सव्येनैव गन्धपुष्पादीन्यादाय पितरमुद्दिश्य **ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वम् ।।** इति मन्त्रं पठित्वा दक्षिणावर्तेनोत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तिं पितरं ध्यायन्नपसव्यं कृत्वा दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा **ॐ अमीमदन्तपितरोयथाभागमावृषायिषत।।** इति मन्त्रेण गन्धपुष्पादीनि पिण्डोपरि क्षिपेत् ।

प्रत्यवनेजनम्- ततोऽवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय- ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीकवसुस्वरूपाद्यकर्तव्यसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा इति पिण्डे

प्रत्यवनेजनं दद्यात् । ततो नीवीं विस्त्रस्य सव्येनाचम्य हरिं स्मरेत् ।

सूत्रार्पणम् - अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय - **ॐ नमोव:पितरोरसायनमोव:पितर:शोषायनमोव:पितरोजीवायनमोव:-पितर:स्वधायैनमोव:पितरोघोरायनमोव:पितरोमन्न्यवेनमोव:पितर:पितरो-नमोवोगृहान्न:पितरोदत्तसतोव:पितरोदेष्मैतद्व:पितरोव्वास: ।।** इति मन्त्रेण पिण्डोपरि सूत्रं दद्यात् ।

पिण्डपूजनम्- तत: पिण्डं गन्धादिभि: संपूज्य धूपदीपौ च कारयेत् । मोटकादिकमादाय ॐ अद्यामुकसगोत्रास्मत्पितरमुकशर्मन्सपत्नीक वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे एतानि पिण्डार्चनानि अत्र सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि ते स्वधा इति गन्धादिकमुत्सृजेत् ।

ब्राह्मणकरे जलपुष्पाक्षतदानम् - ततो विप्रकरे **ॐशिवा आप: सन्तु** इति जलम्, **ॐ सौमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतं चारिष्टमस्तु** तण्डुलान् दद्यात् । तत: सव्येन पूर्वाभिमुखो भूत्वा वक्ष्यमाणमन्त्रान् पठेत् ।

प्रार्थना- **ॐ अपां मध्ये स्थिता देवा: सर्वमप्सु प्रतिष्ठितम् ।**
ब्राह्मणस्य करे न्यस्ता: शिवा आपो भवन्तु मे ।।१।।
लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ।।२।।
अक्षतञ्चास्तु मे पुण्यं शान्ति: पुष्टिर्धृतिस्तथा ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ।।३।।

अभिषेक: - तत: कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्- **ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु, ॐ यत्पापं तत्प्रतिहतमस्तु** इति भूमौ ।

ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु ।

ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ।

अक्षय्योदकदानम् - वामहस्ते पुटकादिस्थजलं गृहीत्वा मोटकादिकमादाय ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्याद्यकृत-सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठताम्, इति पिण्डे क्षय्योदकं दद्यात् ।

जलधारादानम् - ततः सव्येन कृताञ्जलिः **ॐ अघोरःपितास्तु** इति प्रार्थयेत् । **ॐ अस्तु** इति प्रत्युक्ते । दक्षिणां दिशमवलोकयन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ।

आशीःप्रार्थना - ततः प्राङ्मुखो भूत्वाञ्जलिं बध्वाशिषः प्रार्थयेत् - **ॐ गोत्रं नो वर्धताम्।** **ॐ वर्धताम्** इति प्रतिवचनम् । **ॐ दातारो नोऽभि-वर्द्धन्ताम् । ॐ वर्द्धन्ताम्। ॐ वेदा वर्धन्ताम्, ॐ सन्ततिर्वर्धताम् । ॐ वर्धताम् । ॐ श्रद्धाच नो माव्यगमत्, ॐ मा गात् । ॐ बहुदेयं च नोऽस्तु । ॐ अस्तु । ॐ अन्नं च नो बहु भवेत्, ॐ भवतु । ॐ अतिर्थींश्च लभेमहि, ॐ लभध्वम् । ॐ याचितारश्च नः सन्तु, ॐ सन्तु । ॐ मा याचिष्म कञ्चन, ॐ मा याचेथाः । ॐ एता आशिषःसत्याः सन्तु, ॐ सन्तु ।** इति प्रतिवचनम् ।

तिलककरणम्- ततो ब्राह्मणहस्तेन तिलकं कुर्यात्- **ॐ यं कामं कामयते सोस्मै कामः समृद्ध्यताम्** इति मन्त्रेण ।

स्वधावाचनम्- ततोऽपसव्येन सपवित्रान्कुशान्न्युब्जपात्रात्समादाय पिण्डोपरि निक्षिप्य **ॐ स्वधां वाचयिष्ये, ॐ वाच्यताम्** । इति प्रतिवचनानन्तरं रिक्ताञ्जलिना ॐ अद्येहसगोत्रायास्मत्पित्रेऽमुकशर्मणे सपत्नीकाय वसुस्वरूपा-याद्यकृतसांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे **स्वधोच्यताम्, ॐ अस्तु स्वधा** इति प्रतिवचनम् ।

दुग्धधारादानम्- ततः पय आदिसहितं पुटकं वामहस्ते कृत्वा-

ॐ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पयःकीलालम्परिस्रुतम् । स्वधास्स्थत-र्पयतमेपितॄन् ।। इति मन्त्रं पठित्वा सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ।

पिण्डोत्थापनम्- ततः **ॐ पिण्डःसम्पन्नः, ॐ सुसम्पन्नः। ॐ पिण्ड-मुत्थापयामि, ॐ उत्थापयस्व** इति अनुज्ञातःसन्नम्रीभूय सव्येन पिण्डमाघ्राय अपसव्येन उत्थापयेत् । पिण्डाधारकुशानुल्मूकञ्च वह्नौ क्षिपेत् ।

वेद्यां शङ्खचक्रपूजनम् - सव्येन पिण्डिकायां शङ्खं चक्रञ्च विलिख्य - **ॐ शङ्खाय नमः, ॐ चक्राय नमः,** इति यवैः शङ्खचक्रपूजां कुर्यात् ।

(अत्र कर्पूरदीपदानमप्याचरन्ति ।)

वेद्यां पुनः पिण्डस्थापनम् - अपसव्यं कृत्वा -

ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ।
तं दृष्ट्वा पुण्डरीकाक्षमुच्यते च ऋणत्रयात् ।। इति मन्त्रेण

पिण्डं पिण्डिकोपरि निदध्यात् ।

वसन्तादिपूजनम्- सव्येन पूजयेदेभिर्मन्त्रैः-

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ।
वर्षाभ्यश्च शरत्संज्ञऋतवे च नमो नमः ।।
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ।।

दक्षिणा - ततोऽपसव्येन अर्घपात्रमुत्तानीकृत्य सव्येन दक्षिणां दद्यात् । कुशतिलजलसहितं दक्षिणाद्रव्यमादाय- ॐ अद्येहेत्यादिअमुकसगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्याद्यकृतैतत्सांवत्सरिकैकोद्दिष्ट-क्षयाहश्राद्धपिण्डदानप्रतिष्ठासिध्यर्थं दक्षिणां रजतं चन्द्र दैवतं तन्मूल्योप-कल्पितं द्रव्यं वाऽमुकदैवतं काश्यपगोत्राय कुशबटुस्वरूपिणे ब्राह्मणाय तुभ्यमहं संप्रददे इति विप्रकरे दद्यात् । पुनः कुशादिसहितं दक्षिणाद्रव्यमादाय

ॐ अद्येहेत्यादिअमुकसगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्याद्यकृतैतत्सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धन्यूनातिरिक्तपरिपूरणार्थं यद्देयमन्नपानादिकं द्रव्यं यथानामदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे ।

पितृब्राह्मणविसर्जनम् - ततः सव्येनैव **ॐ अभिरम्यताम्, ॐ अभिरमताः स्मः ।** इति प्रतिवचनान्ते ब्राह्मणं विसृजेत् । ततो ब्राह्मणस्य दक्षिणाङ्गुष्ठं गृहीत्वोत्थाप्य त्रिर्वारिधारयावेष्टयेत् अनेन मन्त्रेण- **ॐ आमावाजस्यप्रसवोजगम्म्यादेमेद्यावापृथिवीविश्श्वरूपे । आमागन्ताम्पितरामातराचामासोमोऽअमृतत्त्वेनगमम्यात् ।।** इति ।

कुशबटुग्रन्थिमोचनम्- ततः (**ॐ त्रीन्त्समुद्रान्त्समसृपत्स्वर्गानपाम्पतिर्वृषभऽइष्टकानाम् । पुरीषंवसानःसुकृतस्यलोकेतत्रगच्छयत्रपूर्वेपरेताः**)। **ॐ मुञ्चन्तुमाशपत्थ्यादथोवरुण्यादुत । अथोयमस्यपड्वीशात्सर्वस्मादेवकिल्विषात्।।** इति मन्त्राभ्यां कुशबटुग्रन्थिमोचनं कुर्यात् । ततः **ॐ देवताभ्य** इति त्रिःपठेत् ।

अपसव्येन **त्रीन्समुद्रान्** इति मन्त्रेण दीपमाच्छादयेत् ।

अच्छिद्रवाचनम्- सव्येन हस्तौ पादौ प्रक्षाल्याचम्य इति पठेत् -

ॐ यत्कृतं तत्सुकृतमस्तु यन्न कृतं तच्छ्रीविष्णोः प्रसादाद् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु । ॐ अस्तु परिपूर्णम् । इति प्रतिवचनम्।

अच्युतप्रार्थना- ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।
आयुः प्रजां धनं विद्यां स्वर्गमोक्षमुखानि च ।
प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः ।।
ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

ॐ अच्युताय नमः ३ ।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।।

कर्मसमर्पणम्-

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायैव समर्पयामि ।।

इति कर्मेश्वरार्पणं कुर्यात् ।

चन्द्राङ्कनवभूवर्षे मार्गेमास्यसितेऽदले ।
दधिरामोऽलिखदिदं द्वितीयायां भृगोर्दिने ।

— इति सांवत्सरिकैकोद्दिष्टश्राद्धविधिः —

◆

२. पार्वणश्राद्धविधिः

प्रयोगः- तत्र प्रथमं कर्ता शुचिराचान्तो गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वलय्य **ॐ नमोऽस्त्वनन्ताय०, ॐ नमो ब्रह्मण्यदेवाय०** इति मन्त्राभ्यां दीपं संपूजयेत् ।

गणेशादिवन्दना -

ॐ यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथाऽन्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनाशनाय ।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्याये सर्वविघ्नोपशान्तये ।।

इति गणेशादीन् प्रणमेत् ।

कुशबटूनां प्राणप्रतिष्ठा- तैलाभ्यङ्गपूर्वकं कुशबटून्स्नपयित्वा- **ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु। विश्श्वेदेवासऽइहमादयन्तामों३म्प्रतिष्ठ ।।** इति मन्त्रेणाक्षतैस्तेषां प्राणप्रतिष्ठां कुर्यात् ।

ब्राह्मणनिमन्त्रणम्- ततः पूर्वाभिमुखो भूत्वा प्रथमं विश्वान्देवान्निमन्त्रयेत्। ताम्बूलादिकं विप्रहस्ते दत्त्वा स्ववामपाणिना विप्रदक्षिणजानु स्पृष्ट्वा स्वदक्षिणजानु च पातयित्वा, अधोमुखेन स्वदक्षिणहस्तेन सताम्बूलादिकमुत्तानं

विप्रहस्तं गृहीत्वा सङ्कल्पं पठेत्- ॐ अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बधिनां विश्वेषान्देवानां पुरूरवोमाद्रवोनाम्नाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन(कुशबटो !) **त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि** इति प्रतिवचनम् ।

पुनस्तत्सर्वं पूर्ववद्विधाय ॐ अद्येत्यादि अमुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बधिनां विश्वेषान्देवानां पुरूरवोमाद्रवोनाम्नाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन (कुशबटो!) **त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि** इति प्रतिवचनम् ।

ततोऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्वा दक्षिणाभिमुखो भूत्वा वामहस्तेन पितृब्राह्मणस्य दक्षिणजानु स्पृष्ट्वा, स्ववामजानु च पातयित्वा, स्वदक्षिणकरेणाधोमुखेन ताम्बूलादिसहितमुत्तानं विप्रकरं गृहीत्वा निमन्त्रयेत्- ॐ अद्येत्यादि अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन (कुशबटो !) **त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि** इति प्रतिवचनम् ।

पुनस्तत्सर्वं पूर्ववद्विधाय ॐ अद्येत्यादि अमुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलगन्धपुष्पाक्षतेन (कुशबटो!) **त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मि** इति प्रतिवचनम् ।

ब्राह्मणप्रार्थना- ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ।।१।।

सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ।।२।।

ॐ भवितव्यम् इति प्रतिवचनम् ।

पादार्घः- ततःसव्येन देवब्राह्मणयोश्चरणान् प्रक्षालयेत्-

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ।।
ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।

ततः पाद्यपात्रं वामहस्ते कृत्वा **ॐ शन्नोदेवी**रिति मन्त्रं पठित्वा कुशादिकमादाय ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरुरवोमाद्रवोनामान एष पादार्घो वो नमः ।

पुनः सर्वं पूर्ववत्कृत्वा कुशादिकमादाय ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरुरवोमाद्रवोनामान एष पादार्घो वो नमः ।

ततोऽपसव्येन पितृब्राह्मणयोश्चरणान् प्रक्षालयेत्-

ॐ नमो ब्रह्मण्यदेवाय० । ॐ नमोऽस्त्वनन्ताय० ।

ॐ यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ।
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ।। इति मन्त्रं पठेत् ।

ॐ शन्नोदेवीरिति मन्त्रं पठित्वा मोटकादिकमादाय ॐ अद्येहामुक-

सगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पादार्घस्त्रेधा विभज्य वोऽस्तु ।

पुनः सर्वं पूर्ववत्कृत्वा मोटकादिकमादाय ॐ अद्येहामुकसगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष पादार्घस्त्रेधा विभज्य वोऽस्तु ।

ततः सव्येनाचम्य गृहं प्रवेशयेत्। **ॐ आगता यूयम्, ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम्, ॐ आस्यते ।** इति प्रतिवचनम् । **ॐ भूर्भुवःस्वः** इति मन्त्रेण विश्वेदेवब्राह्मणौ पूर्वाभिमुखौ उपवेशयेत् । ततोऽपसव्येन **ॐ आगता यूयम्, ॐ सुस्वागता वयम् । ॐ इदमासनमास्यताम्, ॐ आस्यते ।** इति प्रतिवचनम् । **ॐ भूर्भुवः स्वः** इति मन्त्रेण पितृब्राह्मणौ उदङ्मुखौ उपवेशयेत् । सर्वत्र प्रश्नेषु पङ्क्तिमूर्द्धन्य पृच्छेत् ।

कर्मपात्रसम्पादनम्- ततः सव्येन ॐ कर्मपात्रमहं करिष्ये, ॐ कुरुष्व इत्यनुज्ञातः सन् **यद्देवा** इति मन्त्रत्रयेण देवकर्मपात्रं कुर्यात् ।

ॐ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम् । अग्निर्म्मातस्मादेनसोविश्वान्मुञ्चत्त्वꣳहसः ।।१।। ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमाव्वयम्। व्वायुर्म्मातस्म्मादेनसोविश्वान्मुञ्चत्त्वꣳहसः ।।२।। ॐ यदिजाग्रद्यदिस्वप्नऽएनाꣳसिचकृमाव्वयम् । सूर्य्योमातस्म्मादेनसोविश्वान्मुञ्चत्त्वꣳहसः ।।३।। इति मन्त्रान् पठित्वा अक्षतपुञ्जोपरि कर्मपात्रं स्थापयेत् ।

ततः **ॐ पवित्रेस्त्थोव्वैष्णव्यौ०** इति मन्त्रेण कर्मपात्रे पवित्रं क्षिपेत्। **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः।।** इति जलम् । **ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्वि-**

नौव्यात्तम्। इष्ष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।। इति पुष्पम्। **ॐ यवोसियवयास्मद्द्वेषोयवयारातीः ।।** इति यवान् क्षिपेत् । **ॐ गन्धद्वारा**मिति गन्धं क्षिपेत् ।

ततोऽपसव्यं कृत्वा **ॐ कर्मपात्रमहं करिष्ये** इति पितृब्राह्मणं पृच्छेत् । **ॐ कुरुष्व** इत्यनुज्ञातः सन् **यद्देवा** इत्यादिमन्त्रैः पूर्वोक्तैरेव पितृकर्मपात्रं कुर्यात् । तत्र यवप्रक्षेपस्थाने **ॐ तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः । प्रत्नमद्भिःपृक्तःस्वधयापितॄँल्लोकान्पृणाहिनः-स्वाहा ।।** इति मन्त्रेण तिलप्रक्षेपणं विशेषः ।

ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय-

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मानञ्च सिञ्चेत् ।

प्रतिज्ञासङ्कल्पः - ततस्तिलकुशादिकमादाय- ॐ तत्सत्३ अद्येत्यादिदेशकालादिसङ्कीर्तनान्ते अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रवोनामविश्वेदेवपूर्वकाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धं श्रीमत्परमेश्वरप्रीत्यर्थम् एभिर्द्रव्यैरहं करिष्ये। इति प्रतिज्ञां कुर्यात् । ततः त्रिर्गायत्रीजपः कर्तव्यः ।

देवपितृनमस्कारः -

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

इति त्रिःपठित्वा पुनः देवपितृस्मरणम् -

ॐ सप्तव्याधादशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ।।१।।
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ।।२।।
ये विप्रमुख्याः कुरुजाङ्गलेषु
जातास्तथा दासकुले मृगाश्च ।
कालञ्जरे सप्त च चक्रवाका
ये मानसे ते वयमत्र सिद्धाः ।।३।।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
यत्र यत्र स्मरेद्विद्वान्पितृणां दत्तमक्षयम् ।।४।।
श्राद्धारम्भे गयां ध्वात्वा ध्यात्वा देवं गदाधरम् ।
उभाभ्यां च नमस्कृत्य ततः श्राद्धं समारभेत् ।।
गयागजो गयादित्यो गायत्री च गदाधरः ।
गया गयाशिरश्चैव षड्गया मुक्तिदायकाः ।।५।।
ईशानविष्णुकमलासनकार्तिकेय-
वह्नित्रयार्करजनीशगणेश्वराणाम् ।
क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां
पादान्नमामि सततं पितृमुक्तिहेतोः ।।६।।

ॐ गयायै नमः, ॐ गङ्गायै नमः, ॐ गदाधराय नमः इति पठेत् ।

दिग्बन्धनम्- ततोऽपसव्येन तिलसहितमोटकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्विकिरेत्- **ॐ अग्निष्वात्ताःपितृगणाःप्राचींरक्षन्तुमेदिशम्। ॐ अपहताअसुरारक्षाᳪंसिवेदिषदः ।। ॐ तथाबर्हिषदःपान्तुयाम्यांये पितरःस्थिताः । ॐ अपहताअ० ।। ॐ प्रतीचीमाज्यपास्तद्वत् ।**

ॐ अपहताअ० ।। ॐ उदीचीमपिसोमपाः । ॐ अप० ।। ॐ ऊर्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडनलोप्यधः । ॐ अप० ।।

रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।।
तिला रक्षन्तु दितिजाद्दर्भा रक्षन्तु राक्षसात् ।
पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ।।

नीवीबन्धनम् - अपसव्येनैव पुष्पसहितं मोटकं वामकट्यां धारयेत्- **ॐ त्वमग्ग्रेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्म्मनस्प्परि । त्वंवनेब्भ्यस्त्वमोषधीब्भ्यस्त्वन्नृणान्नृपतेजायसेशुचिः ।।** इति मन्त्रेण ।

ॐ निहन्मि सर्वं यदमेध्यवद्भवेद्
हताश्च सर्वेऽसुरदान वा मया ।
रक्षांसि यक्षाः सपिशाचगुह्यका
हता मया यातुधानाश्च सर्वे ।।

इति मन्त्रेण वा ।

रक्षणम्- ततस्तिलसहितकुशखण्डत्रयं गृहीत्वा -

ॐ प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथा ।
सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान् ।।

इति दक्षिणस्यां दिशि क्षिपेत् ।

विष्णुस्मरणम्- ततः सव्येन विष्णुस्मरणं कुर्यात् अनेन मन्त्रेण -

ॐ नमो नमस्ते गोविन्द पुराणपुरुषोत्तम ।
इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः ।। इति विष्णुस्मरणम्।

आसनम्- सव्येनैव कुशमादाय ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां

श्राद्धसम्बन्धिनां विश्वेषाम् देवानां पुरूरवोमाद्रवोनाम्नामिदं कौशमासनं वो नमः । पुनः कुशमादाय ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषाम् देवानां पुरूरवोमाद्रवोनाम्नामिदं कौशमासनं वो नमः ।

ततोऽपसव्येन मोटकमादाय ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य वोऽस्तु । ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य वोऽस्तु।

विश्वदेवानामावाहनम्- ततः सव्येनाञ्जलिं बध्वा विश्वान्देवानावाहयेत्- ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वान्देवान्पुरूरवोमाद्रवोनाम्न आवाहयिष्ये । **ॐ आवाहय** इति प्रतिवचनम् । **ॐ व्विश्श्वेदेवासऽआगतशृणुताऽइमꣳहवम् । एदम्बर्हिर्न्निषीदत ।।** इति मन्त्रेणावाह्य **ॐ यवोसियवयास्म्मद्द्वेषोयवयारातीः ।।** इति मन्त्रेण श्राद्धदेशे यवान्विकीर्य । **ॐ व्विश्श्वेदेवाःशृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठयेऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्म्मिन्न्बर्हिषिमादयद्ध्वम् ।।** इति मन्त्रं पठेत् ।

पितृणामावाहनम्- ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ।।

ततोऽपसव्येनाञ्जलिं बध्वा पितृनावाहयेत् । ॐ अद्येहामुकसगोत्रानस्मत्पितृपितामहप्रपितामहानमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्य-

स्वरूपान् तथामुकसगोत्रानस्मन्मातामहप्रमातामहवृद्धप्रमातामहान् अमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे आवाहयिष्ये । **ॐ आवाहय** इति प्रतिवचनम् । **ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि । उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे ।।** इति मन्त्रेणावाह्य **ॐ अपहताऽअसुरारक्षाᳪँसिव्वेदिषदः।।** इति मन्त्रेण श्राद्धदेशे तिलान्विकीर्य **ॐ आयन्तुनःपितरःसोम्म्यासोग्निष्ष्वात्ताःपथिभिर्द्देवयानैः । अस्म्मिन्न्यज्ञेस्वधयामदन्तोधिव्ब्रुवन्तुतेवन्त्वस्म्मान् ।।** इति मन्त्रं पठेत् ।

विश्वेदेवब्राह्मणहस्तार्घः - ततः सव्येन विश्वेदेवब्राह्मणौ पृच्छेत् - **ॐ हस्तार्घपात्रमहं करिष्ये,** इति **ॐ कुरुष्व** । इत्यनुज्ञातः सन् पुटकद्वयमग्रे कृत्वा **ॐ पवित्रेस्त्थोवैष्णव्यौ०** इति मन्त्रेण पूर्वाग्रे पवित्रे पुटकद्वये धारयेत् । **ॐ शन्नोदेवीः०** इति मन्त्रेण जलं क्षिपेत् । **ॐ यवोसि०** इति यवान् । **ॐ श्रीश्चते०** इति पुष्पम् ।

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

इति तत्रैव गन्धं क्षिपेत् । ततः **ॐ हस्तार्घपात्रं सम्पन्नम्,** इति देवब्राह्मणं पृच्छेत्, **ॐ सुसम्पन्नम्** । इति तेनोक्ते, **ॐ हस्तार्घपात्रमुत्थापयामि, ॐ उत्थापयस्व** । इति वचनानन्तरं हस्तार्घपात्रं वामहस्ते कृत्वा **ॐ नमो नारायणाय** इति मन्त्रेण पुष्पसहितं पवित्रं पूर्वाग्रं विप्रकरे धृत्वा, अधोमुखेन दक्षिणकरेण वामकरस्थपुटकमुखं पिधाय **ॐ यादिव्याआपःपयसासम्बभूवुर्य्याऽअन्तरिक्षाऽउतपार्थिवीर्य्याः । हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशᳪँस्योनाःसुहवाभवन्तु ।।** इति मन्त्रेणार्घपात्रस्त्थजलमभिमन्त्र्य कुशयवजलान्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः - ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुका-

मुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामान एष हस्तार्घो वो नमः । इति विप्रकरेऽर्घं दद्यात् ।

अर्घे पुनः प्रत्यर्घमस्तु इत्युच्चारयन् ब्राह्मणकरस्थापितं सपवित्रं पुष्पमर्घपात्रे निधाय तदर्घपात्रं भूमौ धृत्वा अपरार्घपात्रं वामहस्ते कृत्वा सर्वं पूर्वदेव विधाय कुशयवजलान्यादाय पुनः सङ्कल्पं कुर्यात् ।

सङ्कल्पः - ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसंबन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामान एष हस्तार्घो वो नमः । इति देवब्राह्मणकरेऽर्घं दद्यात् ।

अर्घे पुनः प्रत्यर्घमस्तु, इत्युच्चार्य पूर्ववत् कृत्वाऽर्घपात्रद्वयस्थजलेन **ॐ तच्चक्षु**रिति मन्त्रेण चक्षुःस्पर्शः कर्तव्यः । तदनन्तरं पवित्रसहिते अर्घपात्रे स्वस्वविश्वेदेवदक्षिणपार्श्वे **ॐ विश्वेभ्यो देवेभ्यः स्थानमसि** इति वाक्येन उत्ताने एव स्थापयेत् ।

पितृब्राह्मणहस्तार्घः- ततोऽपसव्येन **ॐ हस्तार्घपात्राण्यहं करिष्ये,** इति पितृब्राह्मणं पृच्छेत् **ॐ कुरुष्व** । इत्यनुज्ञातः सन् पित्रादिमातामहाद्यर्घपात्रार्थं स्वाग्रमेकमेकं पुटकमासाद्य तयोः पुटकयोर्दक्षिणसंस्थं पुटकद्वयमासाद्य तेषु षट्सु पुटकेषु- **ॐ पवित्रेस्त्थोवैष्णव्यौ०** इति मन्त्रेण उत्तराग्राणि पवित्राणि धारयेत् । **ॐ शन्नोदेवीः०** इति जलम्, **ॐ तिलोसि०** इति तिलान्, **ॐ श्रीश्श्चते०** इति पुष्पम्, **ॐ गन्धद्वाराम्** इति गन्धञ्च क्षिपेत् ।

ततः **ॐ हस्तार्घपात्राणि सम्पन्नानि** इति पितृब्राह्मणं पृच्छेत् **ॐ सुसम्पन्नानि** इति तेनोक्ते, **ॐ हस्तार्घपात्राणि उत्थापयामि, ॐ उत्थापयस्व।** इति वचनानन्तरम् प्रथमं पित्रर्घपात्रं वामहस्ते कृत्वा ॐ

नमो नारायणाय इति मन्त्रेण पुष्पसहितं पवित्रमुत्तराग्रं विप्रकरे धृत्वा, वामकरस्थपुटकमुखमुत्तानेन दक्षिणहस्तेन पिधाय- **ॐ या दिव्या०** इति मन्त्रेण तज्जलमभिमन्त्र्य तिलजलमोटकान्यादाय सङ्कल्पं कुर्यात् - ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एष हस्तार्घस्तेऽस्तु, इति विप्रकरेऽर्घंदद्यात् । **ॐ अर्घे पुनः प्रत्यर्घमस्तु** इत्युच्चार्य पितृब्राह्मणन्करस्थं सपवित्रं पुष्पमर्घपात्रे स्थापयित्वा तदर्घपात्रं भूमौ धृत्वा एवं यथाक्रमं पितामहादिभ्यः पञ्चभ्योऽपि अर्घ्यं दद्यात् ।

ततः प्रपितामहार्घपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा तत्सर्वं पित्रर्घपात्रे कृत्वा पित्रर्घपात्रमुत्तानं कृत्वा पितामहार्घपात्रोपरि धृत्वा तदुभयपात्रमुत्तानं प्रपितामहार्घपात्रोपरि धृत्वा एवं मातामहार्घपात्राणि कृत्वा सव्यं कृत्वा तत्रत्यजलेन **ॐ तच्चक्षु**रिति मन्त्रेण चक्षुःस्पर्शः कर्तव्यः। ततोऽपसव्येन एकत्र कृतं पित्रर्घपात्रं गृहीत्वा पितृद्विजस्यासनवामभागे **ॐ पितृभ्यः स्थानमसि** इति न्युब्जं कृत्वा तदुपरि कुशत्रयं दद्यात् । एवं मातामहाद्यर्घपात्रमेकत्र कृतं धृत्वा मातामहद्विजस्यासनवामभागे **ॐ मातामहेभ्यः स्थानमसि** इति न्युब्जं कुर्यात् । तदुपरि कुशत्रयं दद्यात् ।

देवब्राह्मणार्चनम्- ततः सव्येन **ॐ अर्चयिष्ये,** इति देवब्राह्मणौ ब्रूयात्। **ॐ अर्चय** इत्युक्ते गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतद्रव्यवस्त्रादिभिः संपूज्य धूपदीपौ च कारयित्वा कुशादिकमादाय ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामान एतान्यर्च्चनान्यत्र गन्धपुष्पाक्षतधूपदीपताम्बूलयज्ञोपवीतद्रव्यवासांसि वः स्वाहा, इत्युत्सृजेत्। पुनः कुशादिकमादाय ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकर्तव्यमहालया-

परपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामान एतान्यर्चनान्यत्र गन्धपुष्पाक्षतधूपदीपताम्बूलयज्ञोपवीतद्रव्यवासांसि वः स्वाहा, इत्युत्सृजेत् ।

पितृब्राह्मणार्चनम्- ततोऽपसव्येन **ॐ अर्चयिष्ये,** इति पितृब्राह्मणौ पृच्छेत् **ॐ अर्चय** इत्युक्ते गन्धादिभिरभ्यर्च्य मोटकादिकमादाय ॐ अद्येहामुकसगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरप० श्राद्धे एतान्यर्चनान्यत्र गन्धपुष्पाक्षतधूपदीपताम्बूलयज्ञोपवीतद्रव्यवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा, इत्युत्सृजेत् । पुनर्मोटकादिकमादाय ॐ अद्येहामुकसगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्मणाः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यक० श्राद्धे एतान्यर्चनान्यत्र गन्धपुष्पाक्षतधूपदीपताम्बूलयज्ञोपवीतद्रव्यवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा । इति मोटकादिकमुत्सृजेत् ।

ततः सव्येन देवद्विजकरयोः **ॐ अर्चनविधेः** सर्वं परिपूर्णमस्तु, इति जलं दद्यात् **ॐ अस्तु** इति प्रतिवचनम् । अपसव्येन पितृद्विजकरयोः **ॐ अर्चनविधेः सर्वं परिपूर्ण**मस्तु इति जलं दद्यात्, **ॐ अस्तु** इति प्रतिवचनम् ।

मण्डलकरणम्- सव्येनाचम्य सव्येनैव देवद्विजयोर्भोजनस्थाने चतुर्दिक्ष्वासनसहितं चतुष्कोणमण्डलं कुर्यात् । अनेन मन्त्रेण -

ॐ यथाचक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।
एवं भूमण्डलं चैतत्सर्वभूतानि रक्षतु ।। इति ।

अपसव्येन तथैव पितृद्विजयोरपि मण्डलकरणम् ।

अग्नौकरणम्- अपसव्येनैव प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुः पुटकादौ सघृतमन्नं कृत्वा **ॐ अग्नौकरणमहं करिष्ये** इति पितृब्राह्मणं

पृच्छेत्, **ॐ कुरुष्व** । इत्यनुज्ञातः सन् पितृब्राह्मणकरे जलपात्रे वा जुहुयात् । **ॐ अग्नये कव्यवाहनाय स्वाहा, इदमग्नये कव्यवाहनाय । ॐ सोमाय पितृमते स्वाहा, इदं सोमाय पितृमते** । इत्याहुतिद्वयं हुत्वा हुतशेषान्नं पितृब्राह्मणपात्रे प्रक्षिपेत् ।

भूस्वामिनेऽन्नदानम् - ततोऽपसव्येनैव तिलजलमधुघृतयुतमन्नं मोटकादिसहितमादाय **ॐ इदमन्नं सजलं सघृतमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत्।

अन्नदानम्

देवब्राह्मणान्नदानम्- तत्र सव्येन विश्वान्देवान्ध्यायन् सोपस्करं यवजलयुतमन्नमुपनीय मधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य, **ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा ।। ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।। ॐ विष्णोहव्यमिदंरक्षमदीयम् ।।** इति पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नम्, इत्यन्ने, ॐ इमा आप, इति जले, ॐ इदमाज्यम्, इति घृते, ॐ इदं हविरिति, पुनरन्ने, ॐ एतान्युपकरणानि । इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य **ॐ यवोसि** इति मन्त्रेणान्नं परितो यवान्विकीर्य कुशयवजलान्यादाय वामहस्ताङ्गुल्यङ्गुष्ठैः क्रमेणान्नमपश्च स्पृष्ट्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्ध सम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवोमाद्रवो नामभ्योऽद्यकर्तव्य०श्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोर्वःस्वाहा । इति भूमौ कुशादिकमुत्सृजेत् ।

पुनः सर्वं पूर्ववद्विधाय कुशादिकमादाय- ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां

वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवोमाद्रवोनामभ्योऽद्यकर्तव्यश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोर्वः स्वाहा । इति भूमौ कुशादिकमुत्सृजेत् ।

पितृब्राह्मणान्नदानम्- ततोऽपसव्येन तिलजलयुतं सोपस्करमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य **ॐ पृथिवीतेपात्रमिति ॐ इदंविष्णुः०** इति **ॐ विष्णोकव्यमिदंरक्षमदीयम्** इति च पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविरिति पुनरन्ने, ॐ एतान्युपकरणानि । इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य **ॐ अपहताअसुरारक्षाꣳसिवेदिषदः**, इति परितस्तिलान्विकीर्य मोटकादिकमादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकसगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्योऽद्यकर्तव्य०श्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोस्त्रेधा विभज्य युष्मभ्यं स्वधा । इति ब्राह्मणसमीपे भूमावेव मोटकादिकमुत्सृजेत्।

पुनः सर्वं पूर्ववद्विधाय मोटकादिकमादाय- ॐ अद्येहामुकसगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्योऽद्यकर्तव्य०श्राद्धे इदमन्नं सजलं सोपस्करं परिवष्टं परिवेक्ष्यमाणं चाक्षय्यतृप्तिहेतोस्त्रेधा विभज्य युष्मभ्यं स्वधा । इति ब्राह्मणसमीपे भूमावेव मोटकादिकमुत्सृजेत् ।

अपोशानम्- ततःसव्येन देवब्राह्मणकरयोः ॐ भवन्तौ प्राशयेतामित्यपोशानं दद्यात् । अपसव्येन पितृब्राह्मणकरेषु ॐ भवन्तः प्राशयन्तु इत्यपोशानं दद्यात् ।

ततः श्राद्धकर्ता सव्येन कुशोपरि विशन् **ॐ मधुवाता** इति ऋक्त्रयं **ॐ मधु ३** इति पठेत् ।

प्रार्थना- **ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।**
तत्सर्वमच्छिद्रमस्तु श्रीभास्करप्रसादतः ।।
ॐ नमस्तुभ्यं विरूपाक्ष ! नमस्तेऽनेकचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ।।

इति च पठेत् । **ॐ यथासुखं जुषध्वम्** इति वचनानन्तरं ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन् संज्ञया च भक्ष्यं प्रार्थयेयुः । यत्र यत्रेच्छोपलभ्यते तत्तत्प्रयच्छन्मन्दं मन्दं भोजयेत् ।

ततः सव्याहृतिकां गायत्रीं जपित्वा **मधुवाता ३ तृचं** पितृसूक्तञ्चपठेत्।

पितृसूक्तपाठः- तच्च यथा **ॐ अग्नये कव्यवाहनाय०** इत्यादि षट् (६) मन्त्राः, **कृणुष्व-पाजः०** इत्यादि पञ्च (५) मन्त्राः, **तदेव०** इत्यादि षोडश (१६) मन्त्राः, **सुरावन्तम्०** इत्यादि **अपाम्फेनेन०** इत्यन्तम् एकोनचत्वारिंशत् (३९) मन्त्राः, **सहस्रशीर्षा०** इत्यादि षोडश (१६) मन्त्राः, **नमस्ते०** इत्यादि षट्षष्टिः (६६) मन्त्राः, **आशुः शिशानः०** इत्यादि द्वादश(१२) मन्त्राश्च पितृसूक्तमित्युच्यते । तत् कर्ता स्वयं पठेत्। ब्राह्मणद्वारा वा पाठयेत् ।

विकिरासनम्- ततः पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ अपसव्येन मोटकं तिलोदकं चादाय-

असँस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ।। इति ।

तिलोदकमोटकानि आस्तृतकुशोपरि उत्सृजेत् ।

विकिरान्नदानम्- सतिलघृतन्नमादाय जलेनाप्लाव्य मोटकादिकञ्चादाय-

अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ।।

इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत् ।

ततः कुशान्परित्यज्य हस्तौ पादौ प्रक्षाल्य सव्येन द्विराचम्य गायत्रीं जपित्वा **मधुवाता०** इत्यादि **अन्नहीनम्०** इत्यादि च पठेत् ।

ब्राह्मणेभ्यो जलगण्डूषदानम्- ततो ब्राह्मणाँस्तृप्ताञ्ज्ञात्वा **ॐ जलगण्डूषमिदं ते** इति उभाभ्यां विश्वेदेवब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशानं दद्यात्। सव्येनैवाञ्जलिं बध्वा देव-ब्राह्मणौ पृच्छेत्, **ॐ तृप्ताःस्थः**, इति **ॐ तृप्ताःस्मः** इति प्रतिवचनम् । **ॐ शेषमन्नं किं क्रियताम्, ॐ इष्टैः सह भुज्यताम्** इति प्रतिवचनम् । अपसव्येन ॐ जलगण्डूषमिदं ते इति पितृब्राह्मणेभ्यः प्रत्येकं प्रत्यपोशानं दद्यात् ।

अपसव्येनैव पितृब्राह्मणान्पृच्छेत् **ॐ तृप्ताःस्थ**, इति **ॐ तृप्ताःस्म** इति प्रतिवचनम् । **ॐ शेषमन्नं किं क्रियताम्**, इति **प्रश्नः ॐ इष्टैः सह भुज्यताम्** इति प्रतिवचनम् । **ॐ पिण्डदान महं करिष्ये**, इत्युभयत्र पृच्छेत् **ॐ कुरुष्व**, इत्यनुज्ञातः सन् पिण्डवेदीं कुर्यात् ।

पिण्डदानम्

वेदीसंस्कारः- ततः पिण्डदानार्थं हस्तैकपरिमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय तदुपरि **ॐ येरूपाणिप्प्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति । परापुरोनिपुरोयेभरन्त्यग्निष्ट्वाँल्लोकात्त्प्रणुदात्यस्म्मात् ।।** इत्यङ्गारं भ्रमयित्वा दक्षिणस्यां क्षिपेत् ।

ततः पिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना **ॐ अपहताःअसुरारक्षाᳫंसिवेदिषदः ।।** इति मन्त्रेण दक्षिणाग्रं रेखाद्वयं कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् ।

वेदीसेचनम्- ततो जलेन पिण्डिकासेचनम्, तदनुच्छिन्नमूलकुशान्पिण्डिकायां दद्यात् ।

देवपितृस्मरणम्- ततः सव्येन-

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

अवनेजनम्- अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे पिण्डस्थानेऽत्र अवनेनिक्ष्व ते स्वधा । इति छिन्नमूलकुशोपरि अवनेजनं दद्यात् । एवमेवनेजनं पितामहादिभ्यः पञ्चभ्योऽपि दद्यात् ।

पिण्डदानम्- ततः पिण्डान्निर्माय मोटकादीनि प्रथमपिण्डञ्चादाय वामहस्तेन पुटकादिस्थजलमादाय- ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूप अद्यक० श्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा । इत्यवनेजनोपरि पिण्डं दद्यात् । एवं पितामहादिभ्यः पञ्चभ्योऽपि दद्यात्। तत आस्तृतकुशमूलेन **ॐ लेपभागभुजस्तृप्यन्तु** इति करं प्रोक्ष्य सव्येन द्विराचम्य हरिं स्मरेत् ।

पितृध्यानं गन्धपुष्पार्पणञ्च- ततः सव्येनैव पुष्पादीन्यादाय पित्रादीनुद्दिश्य **ॐ अत्रपितरोमादयद्ध्वंय्यथाभागमावृषायद्ध्वम्** इति पठित्वा उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तीन् पित्रादीन् ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा **ॐ अमीमदन्तपितरोयथाभागमावृषायिषत** इति मन्त्रेण पुष्पादीनि पिण्डेषु क्षिपेत् ।

प्रत्यवनेजनम्- ततः प्रत्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय ॐ अद्येहामुकसगोत्रास्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूप अद्य० श्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा । इति पितृपिण्डे प्रत्यवनेजनं दद्यात् । एवं पितामहादीनां पञ्चस्वपि पिण्डेषु प्रत्यवनेजनदानम् । ततो नीवीं विस्रस्य सव्येनाचम्य हरिं स्मरेत् ।

सूत्रार्पणम् - अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय **ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्न्यवेनमोवःपितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः** ।। इति मन्त्रेण प्रत्येकं पिण्डोपरि सूत्रं दद्यात् ।

पिण्डपूजनम्- ततः क्रमेण प्रत्येकं पिण्डान् गन्धादिभिरभ्यर्च्य धूपदीपौ च कारयेत् । मोटकादिकमादाय ॐ अद्यामुकसगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्य०श्राद्धे एतानि पिण्डार्चनान्यत्र सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा इति पित्रादिभ्यो गन्धादिकमुत्सृजेत्।

पुनर्मोटकादिकमादाय- ॐ अद्येहामुकसगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्यकर्तव्य०श्राद्धे एतानि पिण्डार्चनान्यत्र सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यताम्बूलयज्ञोपवीतद्रव्यवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा, इति मातामहादिभ्यो गन्धादिक-मुत्सृजेत् ।

ब्राह्मणकरे जलपुष्पाक्षतदानम्- ततः सव्येन विश्वेदेवब्राह्मणकरयोः **ॐ शिवाआपःसन्तु** इति जलम्, **ॐ सौमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतञ्चारिष्टमस्तु** इति यवान्, प्रत्येकं दद्यात् । अपसव्येन पितृब्राह्मणकरेषु **ॐ शिवाआपःसन्तु** इति जलम्, **ॐ सौमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतञ्चारिष्टमस्तु** इति तण्डुलान् प्रत्येकं दद्यात् ।

ब्राह्मणप्रार्थना- ततः सव्येनाञ्जलिं बध्वा पूर्वाभिमुखो भूत्वा इति पठेत्-

ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ।।

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ।।
अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा ।
यद्यच्छान्तिकरं लोके तत्तदस्तु सदा मम ।।

अभिषेकः- ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्। **ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु, ॐ यत्पापं तत्प्रतिहतमस्तु ।** इति भूमौ **ॐ द्विपदेचतुष्पदेभ्यःसुशान्तिर्भवतु** इति शिरसि । ततोऽपसव्येन पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ।

अक्षय्योदकदानम्- वामहस्ते पुटकादिस्थजलं गृहीत्वा मोटकादिकमादाय ॐ अद्यामुकसगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्य अद्यकृतमहालयापरपक्षान्तर्गतपार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु इति पितृपिण्डोपरि अक्षय्योदकं दद्यात् । एवं पितामहादिपञ्चपिण्डेषु अक्षय्योदकं दद्यात् ।

जलधारादानम्- ततः सव्येन कृताञ्जलिः **ॐ अघोराःपितरःसन्तु,** इति प्रार्थयेत् **ॐ सन्तु** इति प्रत्युक्ते दक्षिणां दिशमवलोकयन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ।

आशीःप्रार्थना- सव्येनैव प्राङ्मुखोऽञ्जलिं बध्वाशिषः प्रार्थयेत्- **ॐ गोत्रंनोवर्धताम्, ॐ वर्धताम्** इति प्रतिवचनम् । **ॐ दातारोनोऽभिवर्धन्ताम्, ॐ वर्धन्ताम्** इति प्रतिवचनम् । **ॐ वेदावर्धन्ताम्, ॐ वर्धन्ताम्** इति प्रति० । **ॐ सन्ततिर्वर्द्धताम्, ॐ वर्धताम्** इति प्रति० । **ॐ श्रद्धाचनोमाव्यगमत्, ॐ मागात्** इति प्रति० । **ॐ बहुदेयञ्चनोस्तु, ॐ अस्तु** इति प्रति० । **ॐ अन्नं च नो बहु भवेत्, ॐ भवतु** इति प्रति० । **ॐ अतिथींश्च लभेमहि, ॐ लभध्वम्** इति प्रति० । **ॐ याचितारश्च नः सन्तु, ॐ सन्तु** इति प्रति० । **ॐ मा याचिष्म कञ्चन, ॐ मा**

याचेथाः इति प्रति० । **ॐ एता आशिषः सत्याः सन्तु, ॐ सन्तु** इति प्रतिवचनम् ।

तिलककरणम् - ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात् । **ॐ यंकामंकामयतेसोस्मैकामःसमृद्ध्यताम्** इति मन्त्रेण ततोऽपसव्येन सपवित्रान् कुशान्युब्जपात्रोपरि स्थितान्पिण्डोपरि निक्षिपेत् ।

स्वधावाचनम्- ॐ स्वधां वाचयिष्ये, ॐ वाच्यताम् इति प्रतिवचनानन्तरम् रिक्ताञ्जलिना ॐ अद्यामुकसगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यस्तथामुकसगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः अमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्योऽद्यकृतमहालयापरपक्षान्तर्गतपार्वणश्राद्धे **स्वधोच्यताम्, ॐ अस्तु स्वधा** इति प्रतिवचनम् ।

दुग्धधारादानम्- ततः पय आदिसहितं पुटकं वामहस्ते कृत्वा **ॐ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पयःकीलालम्परिस्रुतम् । स्वधास्स्थतर्पयतमेपितॄन् ।।** इति मन्त्रेण दक्षिणाग्रां पयोधारां सपवित्रकुशोपरि दद्यात् ।

पिण्डोत्थापनम्- ॐ पिण्डाःसम्पन्नाः, इति ब्राह्मणं पृच्छेत् । **ॐ सुसम्पन्नाः** इति प्रतिवचनम् । **ॐ पिण्डानुत्थापयामि, ॐ उत्थापयस्व** इत्यनुज्ञातः सन् सव्येन नम्रीभूय पिण्डानाघ्राय अपसव्येन उत्थापयेत् । पिण्डाधारकुशानुल्मूकं च वह्नौ क्षिपेत् ।

वेद्यां शङ्खचक्रपूजनम् - सव्येन पिण्डिकायां शङ्खचक्रे विलिख्य - **ॐ शङ्खाय नमः, ॐ चक्राय नमः**, इति यवैः शङ्खचक्रपूजां कुर्यात् ।

(अत्र कर्पूरदीपदानमप्याचरन्ति ।)

वेद्यां पुनः पिण्डस्थापनम् - अपसव्यं कृत्वा -

ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ।
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ।।

इति मन्त्रेण पिण्डान्पिण्डिकोपरि निधाय पूजयेत् ।

वसन्तादिपूजनम्- एभिर्मन्त्रैः सव्येन-

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ।
वर्षाभ्यश्च शरत्संज्ञऋतवे च नमो नमः ।।
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ।।

ततः सव्येनैव विश्वेदेवार्घपात्रे सञ्चाल्य अपसव्येन पित्रर्घपात्राण्युत्तानीकृत्य सव्येन दक्षिणां दद्यात् ।

दक्षिणा

विश्वेदेवब्राह्मणदक्षिणादानम्- कुशयवजलसहितं दक्षिणाद्रव्यमादाय ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रवो नाम्नाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थम् इमां दक्षिणां हिरण्यमग्निदेवताकं तन्मूल्योपकल्पितं द्रव्यं वा अमुकदेवताकममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणकरे उत्सृजेत्।।१।।

पुनर्दक्षिणामादाय ॐ अद्येहामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमाहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरुरवोमाद्रवोनाम्नाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिवैश्वदेविकश्राद्ध-प्रतिष्ठासिद्ध्यर्थम् इमां दक्षिणां हिरण्यमग्निदेवताकं तन्मूल्योपकल्पितं द्रव्यं वा अमुकदेवताकम् अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणकरे उत्सृजेत् ।।२।।

पितृब्राह्मणदक्षिणादानम् - कुशतिलजलसहितदक्षिणाद्रव्यमादाय - ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां

सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धप्रतिष्ठासिद्ध्यर्थम् इमां दक्षिणां रजतं चन्द्रदेवताकं तन्मूल्योपकल्पितं द्रव्यं वा अमुकदेवताकममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यं संप्रददे। इति ब्राह्मणकरे उत्सृजेत् ॥१॥

पुनर्दक्षिणामादाय ॐ अद्यामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धप्रतिष्ठासिद्ध्यर्थम् इमां दक्षिणां रजतं चन्द्रदेवताकं तन्मूल्योपकल्पितं द्रव्यं वा अमुकदेवताकममुकगोत्रायाममुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणकरे उत्सृजेत् ॥२॥

भूयसीदक्षिणादानम्- कुशादिसहितां भूयसीं दक्षिणामादाय ॐ अद्येहामुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथामुकसगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्यकृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धन्यूनातिरिक्तपरिपूरणार्थं यद्देयमन्नपानादिकं द्रव्यममुकदेवताकं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे इत्युत्सृजेत् ।

ब्राह्मणविसर्जनम्- ततः सव्येनैव **ॐ व्वाजेवाजेवतव्वाजिनोनोधनेषुव्विप्प्राऽअमृताऽऋतज्ञाः । अस्यमद्ध्वःपिबतमादयद्ध्वन्तृप्प्तायातपथिभिर्द्देवयानैः ।।** इति मन्त्रेण पित्रादीन् विसर्जयेत् । **ॐ पुरूरवोमाद्रवसनामानो विश्वेदेवाः प्रीयन्ताम्** इति विश्वेदेवविसर्जनम् ।

क्षमापनम्- पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशजातचिन्तां तु विस्मृत्य क्षन्तुमर्हथ ।।

इति क्षमापयेत् ।

ब्राह्मणप्रदक्षिणा- ॐ आमाव्वाजस्यप्रसवोजगम्म्यादेमेद्यावापृथिवीव्विश्श्वरूपे । आमागन्तांपितरामातराचामासोमोऽअमृतत्वेनगम्म्यात् ।। इति मन्त्रेण ब्राह्मणान् त्रिर्वारिधारया वेष्टयेत् ।

कुशबटुग्रन्थिमोचनम्- ॐ त्रीन्त्समुद्द्रान्त्समसृपत्स्वर्ग्गानपाम्पतिर्वृषभऽ-इष्टकानाम् । पुरीषंव्वसानाःसुकृतस्यलोकेतत्रगच्छयत्रपूर्व्वेपरेताः ।। ॐ मुञ्चन्तुमाशपथ्यादथोव्वरुण्यादुतअथोयमस्यपड्वीशात्सर्व्वस्म्माद्देवकिल्बिषात् ।। इति मन्त्राभ्यां पवित्रग्रन्थिमोचनम् ।

ततः **ॐ देवताभ्यः** इति त्रिः पठेत् । अपसव्येन त्रीन्समुद्रान् इति मन्त्रेण दीपमाच्छादयेत् ।

अच्छिद्रवाचनम्- ततः सव्येन हस्तौ पादौ प्रक्षाल्याचम्य वक्ष्यमाणमन्त्रान् पठेत् । **ॐ यत्कृतं तत्सुकृतमस्तु,** यन्नकृतं तच्छ्रीविष्णोः प्रसादाद् ब्राह्मणवचनात् **सर्वं परिपूर्णमस्तु, ॐ अस्तु परिपूर्णमिति** प्रतिवचनम्।

अच्युतप्रार्थना- ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।
आयुः प्रजां धनं विद्यां स्वर्गमोक्षमुखानि च ।
प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः ।।
ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

ॐ अच्युताय नमः ३ ।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।।

कर्मसमर्पणम्-

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायैव समर्पयामि ।।

इति कर्मेश्वरार्पणं कुर्यात् ।

– इत्यपरपक्षान्तर्गतपार्वणश्राद्धविधिः –

◆

तर्पणविधिः[1]

(श्राद्धपरिशिष्टात्मकः)

प्रयोगः - शुद्धासने उपविश्य आचम्य प्रणानायम्य **पवित्रेस्थ०** इति मन्त्रेण दक्षिणहस्तस्याऽनामिकायां कुशपवित्रं धृत्वा कर्मपात्रं सम्पाद्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - हरिः ॐ३ ॐ तत्सत् ३ ॐ तत्सत् विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गते अमुकनद्याः समीपे अमुकक्षेत्रे पुण्यभूमौ बौद्धावतारे षष्टिसंवत्सराणां मध्ये अमुकनाम्नि संवत्सरेऽमुकवैक्रमाब्दे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकवासरान्वितायाममुकपुण्यतिथौ अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रमसि अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नोऽमुकप्रवरो माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायी अमुकशर्माऽहं ममामुकगोत्रस्य अस्मत्पितुरमुकशर्मणः अमुकश्राद्धाङ्गत्वेन नित्यतर्पणाङ्गत्वेन वा श्रीमत्परमेश्वरप्रीतये देवर्षिमनुष्यदिव्यपितृस्वपितृतर्पणमहङ्करिष्ये इति।

---

[1] ग्रन्थकारेण तर्पणविधिर्नैव क्वापि विन्यस्तः । आचारपरम्परायामस्यावश्यकत्वमनुभूय पद्धत्त्यन्तरादाकृष्येह प्रकाश्यते ससम्पादनम् । यद्यप्ययं विधिरन्यपद्धतिषु प्रायः श्राद्धप्रकरणारम्भ एवोपन्यस्तो दृश्यते । परमिहान्यत उद्धृत्य सन्दृब्धत्वाद् विधिरयं परिशिष्टतया श्राद्धप्रकरणावसाने प्रत्तः। - सम्पादकाः

सङ्कल्पानन्तरकृत्यम्- ताम्रपात्रे रौप्यपात्रे वा प्रथमं गन्धाक्षतपुष्पतुलसीदलादीनि प्रक्षिप्य मन्त्रेण कर्मपात्रजलं तीर्थजलञ्च पूरयित्वा तत्पात्रोपरि हस्तप्रमाणान् प्रादेशमात्रप्रमाणान् वा सपवित्रान् त्रीन् कुशान् प्रागग्रान् स्थापयित्वा तज्जलेन दर्भपुष्पोपरिस्थापिततर्पणजलाधारताम्रपात्रमध्ये उपवीती प्राङ्मुखः कर्ता गन्धपुष्पादिना विश्वेदेवादीनावाह्य तर्पयेत् ।

विश्वेदेवानामावाहनं तपर्णञ्च

ॐ विश्वेदेवासऽआगतशृणुतामॐइमँ३हवम्। एदम्बर्हिन्निषीदत।। ॐ व्विश्वेदेवाःशृणुतेमइमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ।। इति मन्त्रद्वयेन गन्धयवाक्षतपुष्पैर्विश्वान् देवानावाह्य तर्पयेत् ।

ब्रह्माद्यावाहनं तर्पणञ्च

ब्रह्माद्यावाहनम् - ॐ भूर्भुवः स्वः ब्रह्मादयो इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेतान् जलाञ्जलीन् इत्यावाह्य कुशपवित्रपाणिः प्रतिमन्त्रमेकैकमञ्जलिं दद्यात् ।

ब्रह्मादितर्पणम्-

ॐ ब्रह्मा तृप्यताम्। ॐ विष्णुस्तृप्यताम् । ॐ रुद्रस्तृप्यताम् । ॐ प्रजापतिस्तृप्यताम् । ॐ देवास्तृप्यन्ताम् । ॐ छन्दांसि तृप्यन्ताम्। ॐ वेदास्तृप्यन्ताम् । ॐ ऋषयस्तृप्यन्ताम् । ॐ पुराणाचार्यास्तृप्यन्ताम्। ॐ गन्धर्वास्तृप्यन्ताम् । ॐ इतराचार्यास्तृप्यन्ताम् । ॐ सम्वत्सर सावयवस्तृप्यताम् । ॐ देव्यस्तृप्यन्ताम् । ॐ अप्सरसस्तृप्यन्ताम् । ॐ देवानुगास्तृप्यन्ताम् । ॐ नागास्तृप्यन्ताम्। ॐ सागरास्तृप्यन्ताम्। ॐ पर्वतास्तृप्यन्ताम् । ॐ सरितस्तृप्यन्ताम्। ॐ मनुष्यास्तृप्यन्ताम्। ॐ यक्षास्तृप्यन्ताम् । ॐ रक्षांसि तृप्यन्ताम्। ॐ पिशाचास्तृप्यन्ताम्।

ॐ सुपर्णास्तृप्यन्ताम् । ॐ भूतानि तृप्यन्ताम्। ॐ पशवस्तृप्यन्ताम् ॐ वनस्पतयस्तृप्यन्ताम् । ॐ ओषधयस्तृप्यन्ताम्। ॐ भूतग्रामश्चतुर्विधस्तृप्यताम् ।

मरीच्यादीनां तर्पणम्- यवोदकेन मरीच्यादीनां तर्पणं कुर्यात् -

ॐ मरीचिस्तृप्यताम्। ॐ अत्रिस्तृप्यताम्। ॐ अङ्गिरास्तृप्यताम्। ॐ पुलस्त्यस्तृप्यताम् । ॐ पुलहस्तृप्यताम् । ॐ क्रतुस्तृप्यताम् । ॐ प्रचेतास्तृप्यताम् । ॐ वसिष्ठस्तृप्यताम् । ॐ भृगुस्तृप्यताम् । ॐ नारदस्तृप्यताम् ।

सनकादीनामावाहनं तर्पणञ्च

सनकादीनामावाहनम् -

ततः कण्ठे सूत्रं कृत्वा निवीत्युदङ्मुखः कायतार्थवर्तिना सकुशोदकेन अञ्जलि तिरश्चः कुशान् कृत्वा मनुष्यानावाह्य तर्पयेत्। **ॐ भूर्भुवः स्वः सनकादयः सप्त मनुष्या इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वे**ताञ्जलाञ्जलीनित्यावाह्य द्वौ द्वौ अञ्जली दद्यात् ।

सनकादीनां तर्पणम् -

ॐ सनकस्तृप्यताम्, ॐ सनकस्तृप्यताम् । ॐ सनन्दनस्तृप्यताम्, ॐ सनन्दनस्तृप्यताम् । ॐ सनातनस्तृप्यताम्, ॐ सनातनस्तृप्यताम्। ॐ कपिलस्तृप्यताम्, ॐ कपिलस्तृप्यताम्। ॐ आसुरिस्तृप्यताम्, ॐ आसुरिस्तृप्यताम् । ॐ वोढुस्तृप्यताम्, ॐ वोढुस्तृप्यताम् । ॐ पञ्चशिखस्तृप्यताम्, ॐ पञ्चशिखस्तृप्यताम्।

दिव्यपितृणामावाहनं तर्पणञ्च

दिव्यपितृणामावाहनम् -

ततोऽपसव्यं कृत्वा प्राचीनावीती दक्षिणाऽभिमुखो भूत्वा पातितवाम-

जानुर्मोटितकुशतिलतोयाञ्जलित्रयेण पितृतीर्थेन खड्गपात्रेण च **उशन्तस्त्वा०** **आयन्तुनः०** इति मन्त्रद्वयेन दिव्यपितृनावाह्य तर्पयेत् ।

ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि । उशन्नुशतऽआवह-पितॄन्हविषेऽअत्तवे ।।१।। ॐ आयन्तुनःपितरस्सोम्यासोग्निष्वात्ताः-पथिभिर्द्देवयानैः। अस्मिन्यज्ञेस्वधयामदन्तोधिब्ब्रुवन्तुतेवन्त्वस्मान् ।। इति मन्त्रद्वयं पठित्वा, **ॐ भूर्भुवः स्वः कव्यवाडनलादयो दिव्यपितर इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीनित्यावाहयेत्** ।

दिव्यपितृणां तर्पणम् -

ततः कर्ता दिव्यपितृभ्यो मोटकतिलमिश्रितान् त्रीन् त्रीन् अञ्जलीन् दद्यात् ।

१. **ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ।**
२. **ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ।**
३. **ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ।**

अनेनैव क्रमेण सोमादीनामपि तर्पणं कुर्यात् ।

ॐ सोमस्तृप्यतामिदं तिलादकं तस्मै स्वधा नमः, इति त्रिः ३ ।
ॐ यमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति त्रिः ३ ।
ॐ अर्यमा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः, इति त्रिः ३ ।
ॐ अग्निष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः इति त्रिः ३।
ॐ सोमपास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः इति त्रिः ३ ।
ॐ बर्हिषदस्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः इति त्रिः ३ ।

ॐ यमाय नमः ३, ॐ धर्मराजाय नमः ३, ॐ मृत्यवे नमः ३, ॐ अन्तकाय नमः ३, ॐ वैवस्वताय नमः ३, ॐ कालाय नमः ३, ॐ सर्वभूतक्षयाय नमः ३, ॐ औदुम्बराय नमः ३, ॐ दध्नाय नमः ३,

ॐ नीलाय नमः ३, ॐ परमेष्ठिते नमः ३, ॐ वृकोदराय नमः ३, ॐ चित्राय नमः ३, ॐ चित्रगुप्ताय नमः ३ इत्येकैकशस्त्रिस्त्रिस्तर्पयेत्।

स्वपितृणामावाहनं तर्पणञ्च

स्वपितृणामावाहनम्-

तत **आगच्छन्तु मे पितर इमान् गृह्णन्तु जलाञ्जलीन्**इति पितृनावाह्य तर्पयेत् ।

पितुस्तर्पणम् -

ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्यासः। असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रथमाञ्जलिं पित्रे दद्यात् ।

ॐ अङ्गिरसोनःपितरोनवग्वाऽअथर्वाणोभृगवःसोम्यासः। तेषांवयक्ष्सुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति द्वितीयाञ्जलिं पित्रे दद्यात् ।

ॐ आयन्तुनःपितरसौम्यासोग्निष्वात्ताःपथिभिर्देवयानैः । अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति तृतीयाञ्जलिं पित्रे दद्यात् ।

पितामहतर्पणम्-

ॐ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पयकीलालम्परिश्रुतम्। स्वधास्थतर्पयतमेपितृन्।।

ॐ अद्येहामुकसगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रथमाञ्जलिं पितामहाय दद्यात् ।

ॐ पितृभ्यःस्वधायिब्भ्यःस्वधानमःपितामहेभ्यःस्वधायिब्भ्यःस्वधानमःप्रपितामहेब्भ्यःस्वधायिब्भ्यःस्वधानमः । अक्षन्नपितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धध्वम् ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति द्वितीयाञ्जलिं पितामहाय दद्यात् ।

ॐ येचेहपितरोयेचनेहयाँश्चविद्मयाँ२।।उचनप्रविद्म । त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञꣳसुकृतञ्जुषस्व ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति तृतीयाञ्जलिं पितामहाय दद्यात् ।

प्रपितामहतर्पणम् -

ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माध्वीर्न्नःसन्त्वोषधीः ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रथमाञ्जलिं प्रपितामहाय दद्यात्।

ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः। मधुद्यौरस्तुनःपिता ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति द्वितीयाञ्जलिं प्रपितामहाय दद्यात्।

ॐ मधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः । माध्वीर्गावोभवन्तुनः ।।

ॐ अद्येहामुकसगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति तृतीयाञ्जलिं प्रपितामहाय दद्यात्।

मात्रादितर्पणम्

मातुस्तर्पणम्-

ॐ आमाव्वाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे। आंमागन्ताम्पितरामातराचामांसोमोऽअमृतत्वेनगम्यात् ।।

ॐ अद्येहामुकसगोत्राऽस्मन्माताऽमुकनाम्नी देवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति प्रथमाञ्जलिं मात्रे दद्यात् । अनेनैव वाक्येन मात्रे द्वितीयतृतीयाञ्जली देयौ ।

पितामहीतर्पणम्-

ॐ आमाव्वाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे। आमागन्ताम्पितरामातराचामासोमोऽअमृतत्वेनगम्यात् ।।

ॐ अद्येहामुकसगोत्राऽस्मत्पितामही अमुकनाम्नी देवी रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति पितामह्यै प्रथमाञ्जलिं दत्त्वा, अनेनैव वाक्येन द्वितीयतृतीयाञ्जली दद्यात् ।

प्रपितामहीतर्पणम् -

ॐ आमाव्वाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे। आमागन्ताम्पितरामातराचामासोमोऽअमृतत्वेनगम्यात् ।।

ॐ अद्येहामुकसगोत्राऽस्मत्प्रपितामही अमुकनाम्नी देवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति प्रपितामह्यै प्रथमाञ्जलिं दद्यात् । अनेनैव वाक्येन प्रपितामह्यै द्वितीयतृतीयाञ्जली दद्यात् ।

मातामहपक्षतर्पणम्

मातामहतर्पणम्-

ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवा-

यनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवः-पितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः।।
इति मन्त्रमुच्चार्य-

ॐ अद्येहामुकसगोत्रोऽस्मन्मातामहोऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति मातामहाय प्रथमाञ्जलिं दद्यात्। एवं द्वितीयतृतीयाञ्जली अपि देयौ।

प्रमातामहतर्पणम्-

ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवः-पितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः।।
इति मन्त्रं पठित्वा -

ॐ अद्येहामुकसगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रमातामहाय प्रथमाञ्जलिं दत्त्वा, एतदेव वाक्यमुच्चार्य द्वितीयतृतीयाञ्जली अपि तस्मै देयौ।

वृद्धप्रमातामहतर्पणम् -

ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवः-पितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः।।
इति मन्त्रं पठित्वा -

ॐ अद्येहामुकसगोत्रोऽस्मद्वृद्धप्रमातामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति वृद्धप्रमातामहाय प्रथमाञ्जलिं दत्त्वा द्वितीयतृतीयाञ्जली अपि एतदेव वाक्यमुच्चार्य देयौ।

मातामहीतर्पणम्-

ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवः-पितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः।।
इति मन्त्रं पठित्वा -

ॐ अद्येहामुकसगोत्राऽस्मन्मातामही अमुकनाम्नी देवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति प्रथमाञ्जलिं मातामह्यै दत्त्वा अनेनैव वाक्येन द्वितीयतृतीयाञ्जली दद्यात् ।

प्रमातामहीतर्पणम् -

ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवः-पितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः।।
इति मन्त्रमुच्चार्य -

ॐ अद्येहामुकसगोत्राऽस्मत्प्रमातामही अमुकनाम्नी देवी रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति प्रमातामह्यै प्रथमाञ्जलिं दत्त्वा अनेनैव वाक्येन द्वितीयतृतीयाञ्जली दद्यात् ।

वृद्धप्रमातामहीतर्पणम्-

ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवः-पितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरोवासः।।
इति मन्त्रमुच्चार्य-

ॐ अद्येहामुकसगोत्राऽस्मद्वृद्धप्रमातामही अमुकनाम्नी देवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति प्रमातामह्यै प्रथमाञ्जलिं दत्त्वा अनेनैव मन्त्रेण द्वितीयतृतीयाञ्जली दद्यात् ।

समस्तपितॄणां तर्पणम्

प्रयोगः- ततो वक्ष्यमाणश्लोकानुसारेण सपत्नजननी-स्वभार्या-पुत्रादि-ज्येष्ठकनिष्ठपितृव्य-तत्पत्नी-मातुल-मातुलानी-स्वभ्रातृ-तत्पत्नी-पितृष्वसृ-तत्पतिपुत्र-मातृष्वसृ-तत्पतिपुत्र-स्वभगिनी-तत्पतिपुत्र-श्वशुर-दीक्षागायत्रीगुरु-शिष्य-स्वहितकर्तॄनेतान् समस्तपितॄँश्च तर्पयेत् ।

ताताम्बात्रितयं सपत्नजननी मातामहादित्रयं
सस्त्रि स्त्रीतनयादि तातजननीस्वभ्रातरः सस्त्रियः ।।
ताताम्बात्मभगिन्यपत्यधवयुग्जायापिता सद्गुरुः
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ।।

देवर्षिपितृमानवतर्पणम् -

ततो वक्ष्यमाणान् आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवादीन् तिलोदकाञ्जलिभिस्तर्पयेत् ।

ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।।१।।
पितृवंशे मृता ये च मातृवंशे तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ।।२।।
ते तृप्तिमखिला यान्तु ये चास्मत्तोयकाङ्क्षिणः ।
ये बान्धवाऽबान्धवा येऽन्यजन्मनि बान्धवाः ।।३।।
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाऽखिलाः ।
देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ।।४।।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खलाः ।
जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः ।।५।।
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाऽखिलाः ।
नरकेषु समस्तेषु यातनासु च ये स्थिताः ।।६।।

तेषामाप्यायनायैतद्दीयते सलिलं मया ।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।।७।।
आब्रह्मभुवनाँल्लोकानिदमस्तु तिलोदकम् ।
यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ।।८।।
इदमक्षय्यमेवास्तु मया दत्तं तिलोदकम् ।।

अपुत्रसगोत्रितर्पणम्- वस्त्रनिष्पीडनं विधाय -

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते पिवन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ।।

इति मन्त्रेण तज्जलं भूमौ क्षिपेत् ।

ब्रह्मादिदेवपूजनम्

अतः सव्यं कृत्वा पूर्वाभिमुखो भूत्वा द्विराचम्य जले गन्धाक्षतपुष्पैर्ब्रह्मादिदेवान् पूजयेत् ।

ब्रह्मपूजनम्-

ॐ ब्रह्मयज्ञानम्प्रथमंःपुरस्ताद्द्विसीमतःसुरुचोव्वेनऽआवः। सबुध्न्याऽउपमाऽअस्यव्विष्ठाःशतश्चयोनिमशतश्चव्विव ।। ॐ ब्रह्मणे नमः।

विष्णुपूजनम् -

ॐ इदंव्विष्णुर्व्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा।। ॐ विष्णवे नमः ।

रुद्रपूजनम् -

ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः । बाहुब्भ्यामुततेनमः ।। ॐ रुद्राय नमः ।

सवितृपूजनम् -

ॐ भूर्ब्भुवःस्वःतत्सवितुर्व्वरेण्यम्भर्ग्गोदेवस्यधीमहि। धियोयोनःप्प्रचोदयात् ।। ॐ सवित्रे नमः ।

मित्रपूजनम् -

ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि । द्युम्नञ्चित्रश्रवस्तमम्।। ॐ मित्राय नमः ।

वरुणपूजनम् -

ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्जनीस्थोव्वरुणस्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ।। ॐ वरुणाय नमः ।

सूर्यार्घ्यदानम् -

अथोत्थाय सूर्यायार्घ्यं दद्यात् । अर्घ्यपात्रे जलगन्धपुष्पादीनि निक्षिप्य-

ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ।।

ॐ जगत्साक्षिणे श्रीसूर्यनारायणाय नमः इति मन्त्रेणाऽर्घ्यं दद्यात्।

सूर्योपस्थानम् - ततः उत्थायैव सूर्योपस्थानं कुर्यात् । तत्र मन्त्रौ -

ॐ अदृश्रमस्यकेतवोव्विरश्मयोजनाँऽअनु। ब्भ्राजन्तोऽअग्नयोयथा। उपयामगृहीतोसिसूर्यायत्वाब्भ्राजायैषतेयोनिःसूर्यायत्वाब्भ्राजाय । सूर्यब्भ्राजिष्ठब्भ्राजिष्ठस्त्वन्देवेष्वसिब्भ्राजिष्ठोहम्मनुष्येषुभूयासम् ।। ॐ हꣳसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ।। इति मन्त्राभ्यां सूर्यमुपस्थाय प्रदक्षिणीकृत्य दिग्भ्यो दिग्देवेभ्यश्च प्रणमेत् ।

दिशां दिग्देवतानाञ्च नमस्कारः

ॐ प्राच्यै दिशे नमः, ॐ इन्द्राय नमः । ॐ आग्नेयै दिशे नमः, ॐ अग्नये नमः। ॐ दक्षिणस्यै दिशे नमः, ॐ यमाय नमः। ॐ नैर्ऋत्यै दिशे नमः, ॐ निर्ऋतये नमः। ॐ प्रतीच्यै दिशे नमः, वरुणाय नमः । ॐ वायव्यै दिशे नमः, ॐ वायव्यै नमः । ॐ उदीच्यै दिशे नमः, ॐ कुबेराय नमः । ॐ इशान्यै दिशे नमः, ॐ ईशानाय नमः । ॐ ऊर्ध्वायै दिशे नमः, ॐ ब्रह्मणे नमः । ॐ अधोदिशे नमः, ॐ अनन्ताय नमः ।

तत उपविश्य प्रणमेत् - **ॐ ब्रह्मणे नमः । ॐ अग्नये नमः। ॐ पृथिव्यै नमः । ॐ औषधिभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ विष्णवे नमः । ॐ महद्भ्यो नमः । ॐ अद्भ्यो नमः । ॐ अपाम्पतये नमः । ॐ वरुणाय नमः ।**

मुखाभिमर्शः -

ॐ संवर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशिवेन। त्वष्टासुदत्रोव्विदधातुरायोनुमार्ष्टुतन्न्वोयद्विलिष्टम् ।। इति मन्त्रेण सजलकरद्वयेन मुखं विमृशेत् ।

चक्षुस्स्पर्शः -

ॐ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतंप्रब्ब्रवामशरदःशतमदीनाःश्यामशरदःशतम्भूयश्चशरदःशतात् ।। इति मन्त्रेणानामिकाङ्गुष्ठाभ्यां जलं स्पृष्ट्वा चक्षुःस्पर्शं विदधीत ।

पितृविसर्जनम् -

ॐ देवागातुविदोगातुंवित्वागातुमित । मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ।। इति मन्त्रेण पितृन् विसृजेत् ।

कर्मसमर्पणम्-

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायैव समर्पयामि ।।

इति कर्मेश्वरार्पणं कुर्यात् ।

— इति तर्पणविधिः —

❂

३. अन्त्यकर्मपद्धतिः

प्रयोगः- आसन्नमरणं पित्रादिकं पुत्रादिस्तीर्थादौ नीत्वा व्रतोद्यापनसर्वप्रायश्चित्तदशदानादि कारयेत्। स्वयं वा तदन्वारब्धः कुर्यात्। तत्रादौ व्रतोद्यापनानुकल्पः- प्रथमं ब्राह्मणमाहूय स्नानेन मार्जनेन गङ्गाजलप्राशनादिना वा रोगिणः शुद्धिं विधाय पुत्रादिः स्वयमपिकृतवपनस्नानादिर्नित्यकर्म कृत्वा दीपं प्रज्वलय्याचम्य गणेशं नमस्कृत्य **शुक्लाम्बरधर**मिति विष्णुं प्रार्थ्य यवतिलकुशजलगन्धाक्षतपुष्पैः कर्मपात्रं संपाद्य सुवर्णादिद्रव्यं पुरतः संस्थाप्य **ॐ देयद्रव्याय नमः हिरण्यगर्भगर्भस्थ**मिति गन्धपुष्पाक्षतैः संपूज्य हस्ते कर्मपात्रतः कुशतिलजलान्यादाय स्ङ्कल्पं कुर्यात्।

सङ्कल्पः- ॐ तत्सत्३ ॐ विष्णुः३ नमः परमात्मने श्रीपुरुषोत्तमाय देशकालादिसङ्कीर्तनान्तेऽमुकगोत्रोऽमुकप्रवरः माध्यान्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायी अमुकराशिरमुकशर्माहं ममात्मनः(मम पित्रादेः) व्रतग्रहणदिवसादारभ्य अद्य यावत् फलाभिलाषादिगृहीतानां निष्कामतया गृहीतानां च अमुकामुकव्रतानामकृतोद्यापनदोषपरिहारार्थं श्रुतिस्मृतिपुराणोक्ततत्तद्व्रतजन्यसाङ्गफलप्राप्त्यर्थं विष्ण्वादीनां तत्तद्देवानां प्रीतये इदं सुवर्णमग्निदैवतं (तदभावे इदं रजतं चन्द्रदैवतं) अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दास्ये **ॐ तत्सन्न मम** इति।

ततो ब्राह्मणं **नमो ब्रह्मण्यदेवाये**ति सम्पूज्य **हिरण्यगर्भगर्भस्थ**मितिमन्त्रं पठन् इदं सुवर्णं (रजतं) तुभ्यमहं संप्रददे, इति दद्यात्। ब्राह्मणं प्रणम्य **यस्य स्मृत्ये**ति पठेत्। ब्राह्मणश्च **सर्वाणि व्रतानि परिपूर्णानि सन्तु उद्यापनफलावाप्तिरस्तु,** इति वदेत्। (अस्य दक्षिणादानरूपत्वान्नदान-

प्रतिष्ठासिद्ध्यर्थं दक्षिणान्तरदानमिति बोध्यम्)।

सर्वप्रायश्चित्तम्

प्रयोगः- धर्मशास्त्रज्ञं ब्राह्मणमाहूय संपूज्य सर्वप्रायश्चित्तानुज्ञां प्रार्थ्य षडब्दत्र्यब्दसार्द्धाब्दान्यतमकृच्छ्रप्रायश्चित्तं कुर्यात्। तदसम्भवे धर्मशास्त्रज्ञसंमत्या सर्वप्रायश्चित्तानुकल्पं गोदानं कुर्याद्। आतुरः तत्पुत्रादिर्वा कृतवपनस्नानादिः सति संभवे पञ्चगव्यं प्राश्य गां तन्निष्क्रयद्रव्यं पुरतः संस्थाप्य ब्राह्मणं गन्धादिभिः संपूज्य गां तन्निष्क्रयद्रव्यं वा संपूज्य हस्ते कुशतिलयवजलान्यादाय सङ्कल्पं कुर्यात्।

सङ्कल्पः- ॐ तत्सत्३ विष्णुः३ इत्यादि देशकालौ सङ्कीर्त्य मम (मत्पित्रादेर्वा) ज्ञाताज्ञातकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकानाम् अनुपातकोपपातकलघुपातकसङ्करीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकादिनानाविधपातकानां निरासेन देहावसानकाले देहशुद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं इमां सर्वप्रायश्चित्तप्रत्याम्नायभूतां यथाशक्त्यलङ्कृतां सवत्सां गां रुद्रदैवतां अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे **ॐ तत्सन्न मम** इति।

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ।।
प्रायश्चित्ते समुत्पन्ने निष्कृतिर्नकृता यदि ।
तस्य पापस्य शुद्ध्यर्थं धेनुमेतां ददामि ते ।।

इति पठित्वा गां दद्यात्। गोरभावे तन्निष्क्रयद्रव्यं दद्यात्-

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
अस्या मूल्यप्रदानेन प्रीयतां विश्वरूपधृक् ।।
प्रायश्चित्ते समुत्पन्ने निष्कृतिर्नकृता यदि ।
तस्य पापस्य शुद्ध्यर्थं धेनुमूल्यं ददामि ते ।।

इति पठित्वा तन्निष्क्रयद्रव्यं दद्यात् । ब्राह्मणः **देवस्यत्वे**ति प्रतिगृह्य कामस्तुतिं पठेत् ।

सर्वप्रायश्चित्तमपि सङ्क्षेपेण चिकीर्षुः श्रीपरमेश्वरप्रीत्यर्थमित्यन्तं पूर्ववाक्यमुल्लिख्य इमान्यशीत्यधिकशतसङ्ख्याकानि नवतिसङ्ख्याकानि पञ्चचत्वारिंशत्सङ्ख्याकानि वा सुवर्णखण्डानि वह्निदैवतानि रजतखण्डानि वा चन्द्रदैवतानि विभज्य नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाकालं दास्ये इति संकल्प्य मूल्यदानविधिना दद्यात् । कृतैतत्सर्वप्रायश्चित्तप्रत्याम्नायगोदानप्रतिष्ठासिद्ध्यर्थं तन्मूल्यदानप्रतिष्ठादानसिद्ध्यर्थं वा ब्राह्मणाय ब्राह्मणेभ्यो दास्ये इति सङ्कल्प्य दत्त्वा **यस्य स्मृत्ये**ति पठेत् ।

इत्थं सर्वप्रायश्चित्तं कृत्वा विष्णुप्रीतये चतुरो ब्राह्मणान्संपूज्य तेभ्यो भोजनमामान्नं तन्मूल्यद्रव्यं वा दद्यात् । ततो दशदानानि दद्यात् ।

दशदानानि

उत्क्रान्त्यादीनि दानानि दश दद्यान्मृतस्य तु ।
गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ।
एतानि दशदानानि नराणां मृत्युजन्मनोः ।।
कुर्यादभ्युदयार्थं तु प्रेतेऽपि हि परत्र च ।

इति हेमाद्रौ जातूकर्ण्योक्तानि ।

१. गोदानम्- तत्रादौ गोदानप्रकारः- आचम्य हस्ते जलादिकं गृहीत्वा- ॐ अद्येह मम (मत्पित्रादेर्वा) सकलपापक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थममुकदानमहं करिष्ये तङ्गतयाऽमुकदेयवस्तुनस्तत्प्रतिगृहीतुर्ब्राह्मणस्य च पूजनमहं करिष्ये, इति सङ्कल्प्य पूर्वं यथाशक्त्यलङ्कृतां गां पुरतः संस्थाप्य गन्धाक्षतपुष्पादिभिरनेन मन्त्रेण पूजयेत् -

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।

इति सम्पूज्य गोरभावे मूल्यं पुरतः **हिरण्यगर्भगर्भस्थ**मिति सम्पूज्य ब्राह्मणञ्च **नमोस्त्वनन्ताये**ति सम्पूज्य तिलकुशादियुतं जलं गृहीत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ तत्सत्३ ॐ विष्णुः३ इत्यादि देशकालौ संकीर्त्य अमुकगोत्रोऽमुकप्रवरो माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायी अमुकराशिरमुकशर्माहं मम (पित्रादेर्वा) आजन्मकृतसकलदुरितोपशमनद्वारा श्रीनारायणप्रीतये इमां यथाशक्त्यलङ्कृतां गां रुद्रदैवताम् (मूल्यदानपक्षे गोनिष्क्रयीभूतमिदं द्रव्यममुकदैवतम्) अमुकगोत्रायामुकशर्मणे ब्राह्मणाय सम्प्रददे **ॐ तत्सन्न मम** इति ।

ततो **यज्ञसाधनभूता या** ० इति पूर्वोक्तं वाक्यं पठित्वाऽधोलिखितं मन्त्रं पठेत्-

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्याः प्रदानेन प्रीयतां मे जनार्दनः ।।

इति पठन् गां दद्याद् ।

गोमूल्यदानपक्षे-

"**अस्या मूल्यप्रदानेन प्रीयतां मे जनार्दनः ।**" इत्युभयत्रोह्यम् ।। ब्राह्मणश्च **स्वस्ती**ति वदेत् । तथैवानेनप्रकारेण पूर्ववत् गोदानप्रतिष्ठां कुर्यात्- कृतैतद्गोदानप्रतिष्ठासिद्ध्यर्थमिदं द्रव्यमुकदैवतममुगोत्रायेत्यादि० ।

२. **भूमिदानम्** - मत्स्ये "**निवर्तनमिता भूमिर्देया, दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनम्**" इति स्मरणात् ।

दानान्यन्यानि सर्वाणि कनकादीनि यानि च ।
तानि भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ।।

प्रयोगः -

देयभूमिसम्बन्धि मृत्पिण्डं तदभावे अक्षतपुञ्जादिकं पुरतः संस्थाप्य मूल्यदानं चिकीर्षुः तन्मूल्यं पुरतो निधाय पूर्ववत् भूमिदानं करिष्ये तदङ्गत्वेन भूमिपूजनं ब्राह्मणपूजनं च करिष्ये इति प्रतिज्ञाय **भूम्यै नमः** इति गन्धाक्षतदिभिर्भूमिं सम्पूज्य ब्राह्मणं च पूर्ववत्सम्पूज्य हस्ते कुशादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येह मम (पित्रादेः) सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीतये षष्टिवर्षसहस्रं स्वर्गे शिवपुरवासकाम इमां भूमिममुकपरिमाणां वराहदैवताममुकगोत्रायेत्यादि । मूल्यदानपक्षे- **अमुकद्रव्यममुकदैवतम्** इत्यादि ।

भूमिप्रार्थना- सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छ मे ।।
यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ।
दानान्यन्यानि मे शान्तिर्भूमिदानाद् भवत्विह ।।

मूल्यदानपक्षे- यतो भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ।
दानान्यन्यानि मे शान्तिर्भूयाद् भूमूल्यदानतः ।।

इति पठन् भूमूल्यं दद्यात् । ब्राह्मणः **स्वस्ती**ति वदेत् । कृतैतद्भूमिदानप्रतिष्ठासिद्ध्यर्थमिदं द्रव्यममुकदैवतममुकगोत्रायेत्यादि पूर्ववत् ।

३. तिलदानम्- तिलास्तु द्रोणत्रयपरिमिता देयाः। पञ्चमणपरिमिता भवन्ति। तावत्परिमितान् यथाशक्ति वा तिलान् पुरतः संस्थाप्य तन्मूल्यं वा पूर्ववत् प्रतिज्ञासङ्कल्पं कृत्वा गन्धादिभिरधोलिखितमन्त्रेण सम्पूजयेत् -

विष्णोर्देहसमुद्भूताः कुशाः कृष्णतिलास्तथा ।
धर्मस्य रक्षणायालमेतत्प्राहुर्दिवौकसः ।।

तिलेभ्यो नमः, इति सम्पूज्य ब्राह्मणञ्च पूर्ववत्सम्पूज्य कुशादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येह मम (पित्रादेः) आजन्मकृतैनसो निबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानान्तर्गतानिमाँस्तिलान् प्रजापतिदैवतान् (तन्मूल्यद्रव्यममुकदैवतम्) अमुकगोत्राय सुपूजिताय ब्राह्मणाय० इत्यादि पूर्ववत् सङ्कल्पं कुर्यात् ।

महर्षेगात्रसंभूताः कश्यपस्य तिलाः स्मृताः ।
तस्मादेषां प्रदानेन मम पापं व्यपोहतु ।।

इति पठेत् । मूल्यदानपक्षे पूर्वार्धं पूर्ववत् पठित्वा-

एषां मूल्यप्रदानेन मम पापं व्यपोहतु ।। इत्युत्तरार्धं पठन् दद्याद्। ब्राह्मणः **स्वस्ती**ति वदेत् । कृतैतत्तिलदानप्रतिष्ठासिद्ध्यर्थमित्यादि पूर्ववत्।

४. सुवर्णदानम्- तच्च निष्कत्रयमितं कनिष्ठम् । द्वादशमाषको निष्कः। यथाशक्ति सुवर्णं तन्निष्क्रयं वा पुरो निधाय पूर्ववत् सङ्कल्पं कृत्वानेन मन्त्रेण सुवर्णं पूजयेत् -

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य कुशादिकमादाय देशकालौ सङ्कीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - मम (पित्रादेः) आजन्मकृतैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीतये इदं हिरण्यं वह्निदैवतं (तन्मूल्यममुकदैवतं) अमुकगोत्राय० इत्यादि सङ्कल्पं कृत्वा **हिरण्यगर्भगर्भस्थ**मित्यादि पठन् दद्यात् । ब्राह्मणः **स्वस्ति** इति वदेत् । कृतैतत्सुवर्णदानप्रतिष्ठा इत्यादि पूर्ववत् ।

५. आज्यदानम्- घृतं तु प्रस्थपरिमितं दद्यात् । सेटकचतुष्टयमितं सार्धसेटकद्वयपरिमितं पादोनसेटकमात्रं वा घृतं तन्मूल्यद्रव्यं वा पुरतो निधाय पूर्ववत्प्रतिज्ञां कृत्वा **आज्याय नमः** इति घृतं ब्राह्मणञ्च सम्पूज्य कुशादिकमादाय पूर्ववत् सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येह मम (पित्रादेः) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीतये दशदानान्तर्गतमिदमाज्यं मृत्युञ्जयदैवतं (तन्मूल्यद्रव्यममुकदैवतम्) अमुकगोत्राय० इत्यादि पूर्ववत् ।

कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहारस्ततः शान्तिं प्रयच्छ मे ।।

इति पठेत् । मूल्यदानपक्षे पूर्वार्धं पूर्ववत्पठित्वा-

देवानामाज्यमाहारो मूल्यदानात्सुखाय मे।। इत्युत्तरार्धं पठन् दद्यात्। ब्राह्मणः **स्वस्ति** इति वदेत् ।

६. वस्त्रदानम्- सूक्ष्मतन्तुनिर्मितं बहुमूल्यमष्टहस्तायतं हस्तद्वयादन्यूनविशालं प्रान्तयोरच्छिन्नं नूतनं वस्त्रद्वयं (तन्मूल्यद्रव्यं वा) पुरतो निधाय पूर्ववत्प्रतिज्ञां वस्त्रब्राह्मणपूजनादि च विधाय कुशादिकं गृहीत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येह मम (पित्रादेः) सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीतये इमे वाससी बृहस्पतिदैवते मूल्यदानपक्षेऽमुकदैवते अमुगोत्राय० इत्यादि सङ्कल्पं कुर्यात् ।

शीतवातातपत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।

इति पठेत् । मूल्यदानपक्षे तु पूर्वार्धं पूर्ववत्पठित्वा-

देहालङ्करणं वस्त्रं मूल्यदानात् सुखाय मे ।। इत्युत्तरार्धं पठन् दद्यात् । ब्राह्मणः **स्वस्ति** इति वदेत् । दानप्रतिष्ठादिकं पूर्ववत् ।

७. धान्यदानम्- सार्द्धखारीद्वयं ब्रीहयो देयाः । तच्च सार्द्धशतद्वयमण-परिमितं मणषट्कञ्चेति । अथवा षष्ट्युत्तरशत- १६० सेटकपरिमितम्, अष्टाविंशत्युत्तरशत- १२८ सेटकपरिमितम्, अशीति ८० सेटकमितम्, चतुःषष्टि ६४ सेटकमितं वा यथाशक्ति ब्रीह्यादिरूपं धान्यं तन्मूल्यं वा

पुरतो निधाय प्रतिज्ञापूजनादिकं पूर्ववत्कृत्वा कुशजलादिकं गृहीत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येह मम (पित्रादेः) समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीतये इदं धान्यं प्रजापतिदैवतं तन्मूल्यद्रव्यममुकदैवतममुकगोत्राय० इत्यादि पूर्ववत्।

सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ।
प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे ।।

इति पठेत् । मूल्यपक्षे पूर्वार्धं पूर्ववत्पठित्वा-

प्राणिनां जीवनं मूल्यदानाच्छान्तिं प्रयच्छतु ।। इत्युत्तरार्धं पठन् दद्यात् । ब्राह्मणः **स्वस्ती**ति वदेत् । ततो दानप्रतिष्ठां दद्यात् ।

८. गुडदानम्- गुडं पलषष्टिमितं यथाशक्ति वा तन्मूल्यं पुरतो निधाय प्रतिज्ञापूजनादिकं पूर्ववद्विधाय कुशादिकं गृहीत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येह मम (पित्रादेः) सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं गुडं सोमदैवतं तन्मूल्यममुकदैवतममुकगोत्राय० इत्यादि पूर्ववत् ।

यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ।।
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ।।
मम तस्मात् परां शान्तिं ददस्व गुड सर्वदा ।

इति पठेत् । मूल्यदानपक्षे सर्वं पूर्ववत्पठित्वा-

मूल्यदानादतः शान्तिं ददस्व गुड सर्वदा ।। इत्यन्तिमार्धं पठन् दधात् । ब्राह्मणः **स्वस्ती**ति वदेत् । ततो दानप्रतिष्ठां दद्यात् ।

९. रजतदानम्- पलत्रयमितं यथाशक्ति वा रजतं पुरतो निधाय प्रतिज्ञापूजादि पूर्ववद्विधाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येह मम (पित्रादेः) सकलपापक्षयपूर्वकश्रीपरमेश्वरप्रीतये इदं रजतं चन्द्रदैवतममुकगोत्राय॰ इत्यादि पूर्ववत् ।

प्रीतिर्यतः पितॄणाञ्च विष्णुशङ्करयोस्सदा ।
शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे ।।

इति पठन् दद्यात् । ब्राह्मणः **स्वस्ती**ति वदेत् । ततो दानप्रतिष्ठां दद्यात् ।

१०. लवणदानम्- अर्धखारीकं यथाशक्ति वा लवणं तन्मूल्यं वा पुरतः संस्थाप्य प्रतिज्ञापूजनादिकं पूर्ववत्कृत्वा कुशादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येह मम (पित्रादेर्वा) समस्तपापक्षयपूर्वकं शिवप्रीतये इदं लवणं सोमदैवतं तन्मूल्यममुकदैवतममुकगोत्राय॰ इत्यादि पूर्ववत् ।

यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ।
शम्भोः प्रीतिकरं यस्मादतः शान्तिं प्रयच्छ मे ।।

इति पठेत् । मूल्यदानपक्षे पूर्वार्धं पूर्ववत्पठित्वा-

शम्भोः प्रीतिकरं मूल्यदानाच्छान्तिं प्रयच्छतु ।। इति पठन् दद्यात्। ब्राह्मणः **स्वस्ती**ति वदेत् । ततो दानप्रतिष्ठां दद्यात् । इति दशदानानि ।

पञ्चधेनुदानानि

१. पापापनोदधेनुदानम्- तत्रादौ पापापनोदधेनुदानं ब्राह्मपुराणे वर्णितम्। श्वेतां गां निष्क्रयद्रव्यं वा पुरतो निधाय प्रतिज्ञापूजादिकं पूर्ववत् कृत्वा कुशादिकमादाय देशं सङ्कीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- मम (पित्रादेः) मनोवाक्कायकर्मभिराजन्मोपार्जितपापक्षयद्वारा श्रीपरमेश्वरप्रीतये इमां पापापनोदधेनुं यथाशक्तिसोपस्करां रुद्रदैवतां (निष्क्रय-

ममुकदैवतममुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे **ॐ तत्सन्न मम** इति ।

आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः ।
तत्सर्वं नाशमायातु गोप्रदानेन केशव ।।

मूल्यदानपक्षे- गोमूल्यदानात्तत्सर्वं नाशमायातु केशव ।। इत्युत्तरार्धं परिकल्प्य पठन् दद्यात् । ब्राह्मणः **स्वस्ती**ति वदेत् । ततो दानप्रतिष्ठार्थं सुवर्णदक्षिणां दद्यात् ।

२. ऋणापनोदधेनुदानम् - (ब्राह्मे वर्णितम्) कर्ता गां तन्निष्क्रयद्रव्यं वा पुरतो निधाय प्रतिज्ञापूजादिकं पूर्ववत् कृत्वा देशकालौ संकीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- मम (पित्रादेः) आजन्मोपार्जितैहिकामुष्मिकसमस्तर्णपापक्षयद्वारा श्रीपरमेश्वरप्रीतये इमामृणापनोदधेनुं यथाशक्तिसोपस्करां रुद्रदैवताम् इदमृणापनोदधेनुमूल्यममुकदैवतममुकगोत्राय० इत्यादि पूर्ववत् ।

ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं त्वृणम् ।
तत्सर्वं शुद्धिमायातु गामेतां ददतो मम ।।

इति पठेत् । मूल्यदानपक्षे **गोमूल्यं ददतो मम ।।** इत्यन्तपादं परिवर्त्य पठन् दद्यात् । ब्राह्मणः **स्वस्ती**ति वदेत् । दानप्रतिष्ठां सुवर्णदक्षिणाञ्च दद्यात् ।

३. मोक्षधेनुदानम्- गां निष्क्रयद्रव्यं वा पुरतो निधाय प्रतिज्ञादिकं पूर्ववत् कृत्वा-

मोक्षदो वासुदेवस्तु वेदशास्त्रेषु गीयते ।
तत्प्रीतये द्विजाग्र्याय मोक्षधेनुं ददाम्यहम् ।।

इत्युक्त्वा देशकालौ संकीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- मम (पित्रादेः) समस्तपापक्षयपूर्वकं संसारमोक्षावाप्तिकामः श्रीपापापहमहाविष्णुप्रीतिकामश्च इमां मोक्षधेनुं यथाशक्तिसोपस्करां रुद्रदैवतां तन्मूल्यद्रव्यममुकदैवतममुकगोत्राय० इत्यादि पूर्ववत् ।

मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन ।
मोक्षधेनुप्रदानेन मुकुन्दः प्रीयतां मम ।।

इति पठेत् । मूल्यदानपक्षे-

मोक्षधेनोर्मूल्यदानान्मुकुन्दः प्रीयतां मम ।। इत्युत्तरार्धं परिकल्प्य पठन् दद्यात् । ब्राह्मणः **स्वस्ती**ति ब्रूयात् । ततो दानप्रतिष्ठां दद्यात् ।

४. उत्क्रान्तिधेनुदानम्- गां तन्निष्क्रयद्रव्यं वा पुरतः संस्थाप्य प्रतिज्ञा-पूजादिकं पूर्ववत् कृत्वा कुशादिकमादाय देशकालौ संकीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- मम (पित्रादेः) सुखेन प्राणोत्क्रमणप्रतिबन्धकोक्तनिष्कृत्यनुक्तनिष्कृतिसकलपापक्षयद्वारा सुखेन प्राणोत्क्रमणसिद्ध्ये इमां गां रुद्रदैवतां मूल्यद्रव्यममुकदैवतममुकगोत्राय० इत्यादि पूर्ववत् ।

असूत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यमेनां संप्रददे धेनुमुत्क्रान्तिसंज्ञिकाम् ।।

इति पठेत् । मूल्यदानपक्षे पूर्वार्धं पूर्ववत् पठित्वा-

धेनोरुत्क्रान्तिसंज्ञाया मूल्यं तुभ्यं ददाम्यहम् ।। इत्युत्तरार्धं योजयन् दद्यात् । ब्राह्मणः **स्वस्ती**ति ब्रूयात् । ततो दानप्रतिष्ठां दद्यात् ।

तिलपात्रदानम्- (उत्क्रान्तिधेनुदानान्तर्गतम्) यथाशक्तिकांस्यनिर्मिते पात्रे यथाशक्तितिलान् हिरण्यञ्च निधाय पूर्ववत् प्रतिज्ञापूजनादि कृत्वा कुशादिकं गृहीत्वा देशकालकीर्तनान्ते सङ्कल्पं कुर्यात् ।

तिलदानसङ्कल्पः- मम (पित्रादेः) जन्मप्रभृतिमरणान्तकृतनानाविधपाप-

शमनपूर्वकं श्रीपरमेश्वरप्रीतये इदं तिलपात्रं सहिरण्यं विष्णुदैवतममुकगोत्राय० इत्यादि पूर्ववत् ।

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ।।

इति पठन् दद्यात्। ब्राह्मणः **स्वस्तीति** ब्रूयात् । दानप्रतिष्ठां दद्यात्।

५. वैतरणीदानम्- आचम्य ॐ अद्येत्यादि मम (पित्रादेः) यमद्वारस्थित-वैतरण्याख्यनद्युत्तरणार्थं गोदानमहं करिष्ये, इति प्रतिज्ञासङ्कल्पं कृत्वा कृष्णां गां तन्निष्क्रयं वा सम्पूज्य ब्राह्मणं गन्धमाल्यादिभिरभ्यर्च्य-

धेनुके मां प्रतीक्षस्व यमद्वारे महाभये ।
उत्तितीर्षुरहं(रयं) देवि वैतरण्यै नमोऽस्तु ते ।।

इति धेनुं प्रार्थ्य-

विष्णुरूप द्विजश्रेष्ठ भूदेव पङ्क्तिपावन ।
तर्तुं वैतरणीमेनां कृष्णां गां प्रददाम्यहम् ।।

(अस्येति शेषः ।) इति ब्राह्मणं प्रार्थ्य ततः कुशादिसहितं गोपुच्छं गृहीत्वा देशकालौ संकीर्त्य वैतरणीगोदानसङ्कल्पं कुर्यात् ।

सङ्कल्पः- मम (पित्रादेः) वैतरणीनदीसन्तरणार्थमिमां कृष्णां गां कृष्णवस्त्ररक्त-माल्याद्यलङ्कृतां रुद्रदैवतां तन्निष्क्रयद्रव्यममुकदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं संप्रददे इत्यादि पूर्ववत् ।

यमद्वारे महाघोरे घोरा वैतरणी नदी । (अस्य)
तां संतर्तुं प्रयच्छामि कृष्णां वैतरणीं तु गाम् ।।
या सा वैतरणी प्रोक्ता पूयशोणितवाहिनी । (अस्य)
हेलया तर्तुकामस्तां कृष्णां गां विधिवद्ददे ।।

इति पठेत् । मूल्यदानपक्षे-

यमद्वारे महाघोरे घोरा वैतरणी नदी ।
वैतरण्यास्तु गोर्मूल्यं (अस्य) **तर्तुकामो ददामि ताम् ।।**
भवसागरमग्नानां शोकतापोर्मिदुःखिनाम् ।
त्राता त्वं हि जगन्नाथ शरणागतवत्सल ।।

इत्युक्त्वा ब्राह्मणहस्ते जलं दत्त्वा ॐ अद्येत्यादि । ततो दानप्रतिष्ठार्थं सुवर्णादिदक्षिणां दद्यात् । इति पापापनोदधेन्वादिपञ्चधेनुदानानि ।

अन्त्यकालकृत्यम्

देहत्यागविधिः- ततः शालग्रामादिकं पुरतः संस्थाप्य यथाशक्ति गन्धादिना **ॐ नमो भगवते वासुदेवाय, ॐ नमः शिवाय** इति वा सम्पूज्य यथारुचि विष्णुमन्त्रं शिवमन्त्रं वा जपेत् । जपेऽसमर्थश्चेत्- **हृदये चतुर्भुजं शङ्खचक्रगदापद्मधरं पीताम्बरकिरीटकेयूरकौस्तुभवनमालाधरं रमणीयरूपं विष्णुं त्रिशूलडमरुधरं त्रिनेत्रं गङ्गाधरं शिवं वा** भावयन् सहस्रनामगीताभागवतभारतरामायणेशावास्याद्युपनिषदः पावमानादीनि सूक्तानि च यथासम्भवं शृणुयात् ।

सहस्रनामादिश्रवणसङ्कल्पः- अद्येह मम सकलैनसो निवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं यथासम्भवं चित्तैकाग्र्येण सहस्रनामादिश्रवणं करिष्ये इति । ततो ब्राह्मणं वृत्वा, तीर्थे प्रसिद्धदेवायतने अग्निहोत्रागारे गोष्ठे अश्वत्थमूले तुलसीवने शालग्रामशिलाग्रे वा गोमयोपलिप्तभूमौ दक्षिणाग्रदर्भास्तृते देशे गङ्गाजलैरभिषिक्तो गङ्गामृदा कृतोर्ध्वपुण्ड्रः भस्मना कृतत्रिपुण्ड्रो धृततुलसीरुद्राक्षान्तरमालो मुखे धृतसुवर्णतुलसीपत्रो निकटस्थापितगङ्गाजलः प्राक्शिरा उदक्शिरा वा पुत्रोत्सङ्गे धारितशिरा ब्राह्मणमुखात् पूर्वसङ्कल्पितं सहस्रनामादि शृण्वन् स्वयमेकाग्रतया हरिं ध्यायन् स्त्रीपुत्रधनशरीरादिषु ममतामुत्सृज्य रामनामादि गृह्णन् असून् जह्यात् ।

देहत्यागानन्तरकृत्यम्

(शवयात्रा)

मृतं शिबिकादिष्वारोप्य पुत्रादयो बान्धवादयश्चानावृतमुक्तकेशाः-

अहरहर्नयमानो गामश्वं पुरुषं पशुम् ।
वैवस्वतो न तृप्येत सुराप इति दुर्मतिः ।।

इति यमगाथाम्, **अपेतः०** (य.सं.३५) इत्यध्यायात्मकं यमसूक्तञ्च जपन्तोऽन्तर्यामिणं रामं कीर्तयन्तो वा नूतनवस्त्रावृतमूर्ध्वमुखं शवं श्मशानं नीत्वा जलसमीपे शुचिभूमौ स्थापयेयुः । अन्येऽपि वृद्धपुरःसराः प्रेतमनुगच्छेयुः। ततः कर्ता अन्ये च पुत्राः सङ्कल्पं कृत्वा कक्षोपस्थौ वर्जयित्वा लोमनखानि वापयेयुः । कर्त्रैरिक्तानां दशमेऽह्नि वपनं यथाचारम् । भर्तरि मृते पत्न्या आद्येऽह्नि दशमेऽह्नि वा सर्वान् केशान् समुद्धृत्य अङ्गुलिद्वयच्छेदनं वपनं वा यथाचारम् ।

चितायां शवस्थापनम् -

ततः कर्ता स्नानादिकं विधाय धृतोत्तरीयः शुचौ देशे कण्टकान्यपास्य यथामिलितदारुभिश्चितां कृत्वा चितोपरि कुशास्तरणं विधाय चितायां स्नापितं प्रमार्जितं घृतेन तिलतैलेन वाभ्यज्य धात्रीचूर्णलेपनपूर्वकं तीर्थजलेन आवाहितसर्वतीर्थेनान्यजलेन वा पुनः संस्नाप्य वस्त्रेण प्रोञ्छ्य परिधापितनूतनपट्टवस्त्रं गोपीचन्दनयज्ञोपवीततुलसीमालालङ्कृतं श्रीखण्डोशीरकर्पूरमृगमदपद्मकुङ्कुमादिसुगन्धिद्रव्यैर्यथालाभं लिप्तसर्वाङ्गं मुखचक्षुर्नासाकर्णरन्ध्रेषु सप्तसु निक्षिप्तसुवर्णशलाकं निक्षिप्ताज्यबिन्दुं वा शवमुत्तरशिरसमधोमुखं स्त्रियञ्चोत्तानदेहामुत्तानशिरसं स्थापयेत् ।

सगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः ।
अधोमुखो दक्षिणदिक्चरणस्तु पुमानिति ।

उत्तानदेहा नारी तु सपिण्डैरपि बन्धुभिः ।।

इति ब्रह्मपुराणवचनात् इति केचित् । अन्ये तु-

"तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे ।" इति छन्दोगपरिशिष्टवचनेन कात्यायनानुयायिनाम् उत्तानदेहत्वं दक्षिणाशिरस्त्वमेव च स्वीकर्तुमुचितमित्याहुः । पुराणवचनं तु कातीयाद्यतिरिक्तविषयम् । ततः क्रव्यादमग्निं सँस्कृत्य सव्येन क्रव्यादं सम्पूजयेत् ।

चिताग्निपूजनम् - **त्वं भूतकृत् जगद्योने त्वं लोकपरिपालकः ।**
उक्तःसांहारिकस्तस्मादेतं स्वर्गं मृतं नय ।।

एष गन्धः **क्रव्यादाग्नये नमः**, एतेऽक्षताःक्र०, इमानि पुष्पाणि क्र०, एष धूपःक्र०, एष दीपःक्र० । इत्थमग्निं संपूज्य आचम्य कृतापसव्यो दक्षिणाभिमुखो दक्षिणहस्तेऽग्निं वामहस्ते समित्सप्तकं गृहीत्वा तिष्ठन् इमं मन्त्रं पठेत् -

कृत्वा तु दुष्कृतं कर्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्तं नरं पञ्चत्वमागतम् ।।
धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ।
दहेयं सर्वगात्राणि दिव्याँल्लोकान् स गच्छतु ।।

इति ।

शवदाहः- ततश्चितां त्रिः सकृद्वा शीघ्रं प्रदक्षिणीकृत्य शिरोदेशे अग्निं दद्यात् । उपर्युक्तो मन्त्रोऽदृष्टार्थत्वात् स्त्रीदाहेप्यविकृत एव पठनीयः पुँस्त्वाविवक्षणात् । सव्येन घृतं स्रुवेण गृहीत्वा दक्षिणाभिमुखस्तूष्णीमेकामाहुतिञ्जुहुयात् । ततःसप्रदक्षिणमेकैकां समिधं तूष्णीं चितोपरि क्षिपेत् । नग्नो दग्धव्यः, दग्धशेषं किचित्त्यजेत्, अर्धे दग्धे घृताक्तां समिधं जुहुयात् अनेन मन्त्रेण -

अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः ।
असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावकः ।।

अवशिष्टशरीरभागं (कपोतप्रमाणं) **क्रव्यादाय नमः**, इति मन्त्रेण अम्भसि क्षिपेत् ।

चितापिण्डदानम्- ततः स्नानादिकं कृत्वा षट् पिण्डान्निर्माय अपसव्येन दक्षिणाभिमुखः वामजानु पातयित्वा कुशतिलजलान्यादाय ससङ्कल्पं अवनेजनादिकं दद्यात् ।

प्रयोगः- अद्यामुकगोत्रामुकप्रेत प्रथमपिण्डस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** । एवं पञ्चपिण्डानामासनानि दद्यात् । ततस्तिलकुशजलसहितं प्रधानपिण्डमादाय अद्यामुकप्रेतमृत्युस्थाने शव **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** । द्वारस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** । एवं पञ्चपिण्डानामासनानि दद्यात् ।

ततस्तिलकुशजलसहितप्रथमपिण्डमादाय अद्यामुकगोत्रामुकप्रेतमृत्युस्थाने **शव एषं पिण्डस्ते मया दीयते तवोपतिष्ठताम् १, द्वारस्थाने पान्थनाम्ना २, चत्वरस्थाने खेचरनाम्ना ३, विश्रामस्थाने भूतनाम्ना ४, काष्ठसञ्चयस्थाने प्रेतनाम्ना ५, चितास्थाने साधकनाम्ना ६**, दद्यात् । अद्यामुकगोत्रामुकप्रेत इदं **प्रथमपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** । एवमेव क्रमेण द्वितीयादिपञ्चपिण्डेषु दद्यात् ।

अस्थिसञ्चयनम्- ततोऽस्थिसञ्चयनं कार्यम् । एतच्च-

प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ।
अस्थिसञ्चयनं कार्यं दिने तद्गोत्रजैः सह ।।

इति संवर्तवचनान् । "**अपरेद्युस्तृतीये वा दाहानन्तरमेव वा ।**" इति पद्धतिवचनात् समाचाराच्च दाहानन्तरमेव क्रियते ।

ततश्चितां जलेन शान्तां कृत्वा अस्थीनि सञ्चेष्यन् तन्निमित्तकं श्राद्धं कुर्यात् । सन्निहितयोग्यभूमौ कर्मपात्रं संपाद्य आचम्य- अद्येहामुकगोत्रस्यामुकप्रेतस्यास्थिसञ्चयननिमित्तकं श्राद्धमहं करिष्ये इति सङ्कल्प्य अपसव्येन

अद्येहामुकगोत्रामुकप्रेत **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इत्यास्तृतकुशोपर्यवनेजनं दद्यात् ।

यवपिण्डमादाय अद्यामुकगोत्रामुकप्रेतास्थिसञ्चयनश्राद्धे **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** ।

अद्येहामुकगोत्रामुकप्रेतास्थिसञ्चयनश्राद्धपिण्डे **इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** ।

अद्यामुकगोत्रामुकप्रेतपिण्डार्चनविधाविमानि **गन्धाक्षतपुष्पादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्** ।

ततः सर्वैर्ज्ञातिभिः सह- **नमः क्रव्यादमुखेभ्यो देवेभ्य** इत्यर्घ्यादिकं दत्त्वा दीपं प्रज्वलय्य बलिं गृहीत्वा -

येऽस्मिन् श्मशाने देवाःस्युर्भगवन्तःसनातनाः ।
तेऽस्मत्सकाशाद् गृह्णीयुर्बलिमष्टाङ्गमक्षयम् ।
प्रेतस्यास्य शुभाँल्लोकान्प्रयच्छन्तु च शाश्वतान् ।।

इति श्मशानवासिभ्यो बलिं सदीपं दत्त्वा विसर्जयेत् ।

ततो गव्येन पयसा अस्थीनि सञ्चयेत् । वाग्यतः पलाशशाखाभ्यां बाहुप्रमाणाभ्याम् भस्मतो-स्थीऽन्युद्धृत्योद्धृत्याङ्गुष्ठकनिष्ठिकाभ्यामादायदक्षिणोत्तरायतां प्रादेशमात्रदीर्घां चतुरङ्गुलविस्तारां तावदेव निम्नां गर्तरूपां कर्षूं खात्वा तत्र कुम्भे एव वा कुशानास्तीर्य तदुपरि हरिद्रापीतं वस्त्रखण्डं प्रसार्य ततोऽस्थीनि गव्येन घृतेनाभ्यज्य गन्धवारिणाऽऽसिच्य सर्वौषधिमिश्रितानि कुर्यात् ।

तत्र **मन्त्रपाठः- आत्वामनसानार्तेनवाचाब्रह्मणात्रय्याविद्ययापृथिव्यामक्षिकायामपाꣳरसेननिवपाम्यसौ ।।** इति मन्त्रेण वाक् इत्यनेनैव वा तत्र निधाय पोटलिकां कृत्वा कुम्भे निधाय तं कुम्भमरण्यं वृक्षमूलं वा नीत्वा भूमौ निखनेत् ।

तीर्थसन्निधौ तु यथासंभवं पञ्चगव्येनाऽऽसिच्य मध्वाज्यतिलैःसंयोज्य मृत्पात्रे निधाय दक्षिणां दिशं पश्यन् **नमोऽस्तु धर्माय** इति वदन् जलं प्रविश्य **स मे प्रीतोऽस्तु** इत्यभिधाय तीर्थे तत्पात्रं प्रक्षिपेत् । जलादुत्तीर्य सूर्यमवेक्ष्य ब्राह्मणाय दक्षिणां दद्यात् ।

तीर्थे दूरस्थिते तत्रास्थिप्रक्षेपे छायांतानि सुरक्षितानि क्वचित् शुचिस्थाने धृत्वा दशाहाभ्यन्तरे अनन्तरं वा यथासम्भवं शौचपूर्वकं तानि तीर्थं नीत्वा मार्गे अशुचिस्पर्शादिदोषे तदनुरूपं प्रायश्चित्तं स्नानपूर्वकं कृत्वा निरुक्तप्रकारेण क्षिपेत् । ततोऽङ्गारास्थिभस्मादिकं तोये प्रक्षिपेत् । चितास्थलं यथासम्भवं संशोधयेत् इति ।

यमगाथागानपुरःसरमुदकदानम्- ततःप्रेतदाहानन्तरं सर्वे शवस्पृशः शवानुगमनकर्तारश्च चितामनवलोकयन्तः-

अहरहर्नयमानो गामश्वं पुरुषं पशुम् ।
वैवस्वतो न तृप्येत सुराप इव दुर्मतिः ।।

इति यमगाथां गायन्तो नदीं जलाशयान्तरं वा बालपुरःसराःपङ्क्तिक्रमेण गत्वा श्यालकमन्यं ब्राह्मणं वा **उदकं करिष्यामहे** इत्युदकं प्रार्थयेयुः । यदि शतवर्षादर्वाक् प्रेतस्तदा **कुरुध्वं मा चैवं पुनर्भूत्** इति प्रतिवचनम् इति शतवर्षे प्रेते तु **कुरुध्वम्** इत्येव प्रतिवचनं गृहीत्वा कृतापसव्या दक्षिणाभिमुखा एकवस्त्रधरा वामकरस्यानामिकया **अपोनः शोशुचदघम्** इति मन्त्रेण दक्षिणतो जलं नीत्वा (अप्रादक्षिण्येनावर्त्य) तूष्णीं निमज्जेयुः। अङ्गञ्च न निघर्षेयुः ।

दाहादनन्तरं कार्यं स्त्रीभिः स्नानं ततःसुतैः । इति गारुडवचनात्। पूर्वं स्त्रीभिःस्नानं कार्यं ततः पुत्रैस्ततो वृद्धपुरःसरैरन्यैरिति बोध्यम् । ततो द्विवासस आचम्य कुशोपरि स्थापितपाषाणोपरि कृतापसव्या दक्षिणाभिमुखाः कुशहस्ताः कुशतिलजलान्यादाय- अद्येहामुकगोत्रामुकप्रेतैषसतिलतोयाञ्जलिस्ते

मया दीयते तवोपतिष्ठताम् इत्युक्त्वा सकृदुदकं सर्वे प्रक्षिपेयुः ।

असपिण्डानां प्रेतस्पर्शानुगमात् सचैलस्नानं कामोदकदानञ्च । इयं जलदानक्रिया सपिण्डैर्विषमदिने पुत्रैस्तु प्रत्यहमञ्जलिवृद्ध्या दशादिनावधि कार्या । (दाहकर्ता जलादुत्तीर्य शुष्कवस्त्रं परिधायार्द्रवस्त्रं निष्पीड्य शोषणायोदग्दशं प्रसारयेत्)। ततः शाद्वलभूमौ उपविष्टान् इतिहासादिभिः संसारस्यानित्यतां दर्शयन्तः सुहृदः शोकमपनुदेयुः । इतिहासवाक्यं स्मरन्तः पश्चादनवलोकनन्तो बालपुरःसराः पुत्रादयो रात्रौ मरणे आदित्यदर्शनादूर्ध्वम्, दिवामरणे तु नक्षत्रदर्शनादूर्ध्वं ग्रामं प्रविशेयुः । ग्रामं प्रविश्य गृहद्वारमागत्य स्थित्वा निम्बपत्राणि विदश्याचम्योदकम्, गोमयम्, अग्निम्, गौरसर्षपान्, तैलञ्च क्रमेण संस्पृश्य अश्मानमाक्रम्य गृहं प्रविशेयुः ।

दशगात्रविधिः

दीपदानविधिः- पुत्रः पत्नी अन्यो वा दशाहिकक्रियारम्भदिनात् पूर्वदिने उपोषितः कृतफलाहारो वा सायङ्काले शयनस्थानसमीपे सप्तधान्योपरि जलपूर्णं घटं संस्थाप्य तदुपरि तिलतैलेन घृतेन वा दशाहपर्यन्तमहर्निशं दीपं प्रज्वलयेत् ।

अन्धकारो महाघोरो रविर्यत्र न भासते ।
तस्य सन्तरणार्थाय दीपं दद्याद्दशाहिकम् ।।

इति वचनात् । दक्षिणाभिमुखोऽपसव्यं कृत्वा कुशतिलज़लान्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रस्यामुकप्रेतस्य यमदुर्गमार्गमहाघोरान्धतमःसन्तरणार्थमद्यादिदशमदिनक्रियापर्यन्तमहर्निशं सप्तधान्योपरि स्थापितघटोपरि **एष दीपस्ते मया दीयते तवोपतिष्ठताम्** इत्युसृजेत् ।

पिण्डदानविधिः - ततः पिण्डदानाधिकारी प्रातर्मध्याह्नयोर्मध्येपिण्डदानार्थं गत्वा जलाशयसमीपे शुद्धां भूमिं दक्षिणाप्रवणां संपाद्य तदीशानभागे चुल्लीं विधाय ततो गौरमृत्तिकया दक्षिणाप्रवणां दृढामेकां वेदीं (ढिकुरो) निर्माय गोमयेनोपलिप्य सर्वां पिण्डदानसामग्रीं संपाद्य स्नानं कुर्यात् ।

स्नानसङ्कल्पः- अपसव्यं कृत्वा कुशादिकमादाय देशकालौ स्मृत्वा-अमुकगोत्रस्यामुकप्रेतस्य (अमुकगोत्राया अमुकप्रेतायाः) करिष्यमाणप्रथम-दिनकृत्यार्थं स्नानमहं करिष्ये इति ।

तिलतोयाञ्जलि- ततः स्नात्वाचम्य सतिलकुशतोयाञ्जलिं गृहीत्वा कृतापसव्यो दक्षिणाभिमुख एकस्मिन् पाषाणोपरि तिलतोयाञ्जलिं दद्यात् । तत्र सङ्कल्पः-अद्येहामुकगोत्रामुकप्रेत (अमुकगोत्रे अमुकप्रेते) प्रथमदिनसम्बन्धी **एष तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठता**मिति अञ्जलिं दत्वा दशदिन-पर्यन्तं पिप्पलादिवृक्षे जलपूर्णघटमधश्छिद्रं कृत्वा शिक्के धारयेत् ।

तत्र वाक्यम्- कुशतिलजलान्यादाय अद्येहामुकगोत्रस्यामुकप्रेतस्य (अमुकगोत्राया अमुकप्रेतायाः) तापशान्त्यध्वश्रमविनाशार्थमिदमाकाशाधि-करणकं जलमद्यादिदशदिनक्रियापर्यन्तं **ते मया दीयते तवोपतिष्ठताम्** इति उत्सृजेत् ।

पिण्डदानम्

प्रयोगः - ततः पिण्डदानस्थले समुपविश्य सव्येनाचम्य नवे मृन्मये पात्रे प्रसृतिमात्रतण्डुलान् द्विस्त्रिर्वा प्रक्षाल्य हविः श्रपयित्वा दीपं प्रज्वलयेत् ।

ततोऽपसव्येन तिलसर्पिर्मधुयुतं पिण्डं निर्माय स्थापयित्वा मृन्मयपात्रे पत्रपुटे वा कुशतिलजलगन्धपुष्पाक्षतान् क्षिप्त्वा तज्जलमादायैकं कुशं गृहीत्वा दक्षिणाभिमुखः पातितवामजानुर्वेदिकायां दक्षिणाग्रान् कुशानास्तीर्य सङ्कपं कुर्यात् ।

प्रतिज्ञासङ्कल्पः- अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तये उत्तमलोकप्राप्त्यर्थं **रौरवनामनरकोत्तारणाय मूर्धावयवसंभूत्यै प्रथमदिननिमित्तं पूरकपिण्डदानमहं करिष्ये,** इति प्रतिज्ञासङ्कल्पं कुर्यात् ।

अवनेजनदानम्- ततः कुशतिलजलान्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) प्रथमदिनसम्बन्धिपिण्डस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इत्यास्तृतकुशोपरि पितृतीर्थेनावनेजनं दद्यात् ।

पिण्डदानसङ्कल्पः- ततस्तिलघृतमधुयुतं पिण्डं कुशतिलजलसहितमादाय वासुदेवं स्मरन्- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **रौरवनामनरकोत्तारणाय मूर्धावयवसंभूत्यै प्रथमदिनसम्बन्धी एष पूरकपिण्डस्ते मया दीयते तवोपतिष्ठताम्,** इत्यवनेजनस्थाने पिण्डं दद्यात् ।

प्रत्यवनेजनदानम्- ततः कुशतिलजलान्यादाय- अद्यामुकगोत्रमुकप्रेत (गोत्रे प्रेते) **इदं पिण्डप्रत्येवनेजनं ते मया दीयते तवोपतिष्ठताम्** ।

पिण्डपूजनम् - ततः प्रेतमुद्दिश्य तूष्णीमेवोशीरचन्दनोर्णासूत्रभृङ्गिराजपत्रपूगीफलगन्धपुष्पाक्षतधूपदीपनैवेद्यैः पिण्डमभ्यर्च्य कुशतिलजलान्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) प्रथमदिनसम्बन्धिस्थान्येतान्युशीरचन्दनोर्णासूत्रभृङ्गिराजपत्रपूगीफलगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि **ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युत्सृजेत् ।

तिलतोयाञ्जलिदानम् - ततः कुशतिलजलान्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **एष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्,** इत्येकतिलतोयाञ्जलिं पिण्डोपरि दद्यात् ।

सतिलतोयपूर्णपुटपात्रदानम् - ततः सतिलतोयपूर्णपुटपात्रमादाय कुशतिलजलान्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) इदं **सतिलतोयपूर्णपुटपात्रं**

ते मया दीयते तवोपतिष्ठताम्, इति तिलतोयपूर्णपुटपात्रं पिण्डसमीपे उत्सृजेत् ।

त्रिकाष्ठिकास्थितनीरक्षीरयुतपुटपात्रदानम्- ततस्त्रिकाष्ठिकास्थितयोः पुटपात्रयोर्नीरं क्षीरञ्चादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) इमे **त्रिकाष्ठिकास्थितनीरक्षीरयुतपुटपात्रे ते मया दीयेते तवोपतिष्ठेताम्,** इत्युत्सृज्य-

श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः ।
इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिब ।। इति पठेत् ।

घटदानम् - ततः सतिलजलपूर्णघटमग्रे कृत्वा - अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) एष सतिलसुशीतलजलोपेतो **घटस्ते मया दीयते तवोपतिष्ठताम्** इत्युत्सृज्य-

सुशीतलजलोपेतः सर्वोपस्करसंयुतः ।
एष घटो मया दत्तः प्रेताय उपतिष्ठताम् ।। इति पठेत् ।

ततः सव्येन- **अनादिनिधनो देवः शङ्खचक्रगदाधरः ।**
अक्षयः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव ।। इति पठेत्।

दक्षिणादानम् - ततः कुशतिलजलसहितां लोहदक्षिणामादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कृतैतच्छिरःपूरकप्रथमपिण्डदानप्रतिष्ठासिद्ध्यर्थमिदं लोहं पलपरिमितं (तन्निष्क्रयद्रव्यं वामुकदैवतं) दक्षिणात्वेन दातुमहमुत्सृजे इति दक्षिणामुत्सृज्य, तत्सर्वं जले क्षिपेत् ।

ततःपिण्डदानानन्तरमाचारप्राप्तं स्नानं कुर्यात् । अनेनैव प्रकारेण दश पिण्डा देयाः । उक्तञ्च-

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकास्तु समागताः ।।
गलांसभुजवक्षांसि तृतीयेन यथाक्रमम् ।
चतुर्थेन तु पिण्डेन नाभिहल्लिङ्गपायु च ।।

जानू जङ्घे च पादोरू पञ्चमेन तु सर्वदा ।
सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ।।
नखलोमान्यष्टमेन वीर्यन्तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ।। इति ब्राह्मे ।

सायङ्कालकृत्यम् - ततः सायङ्काले गोमयोपलिप्ते प्राङ्गणे त्रिकाष्ठिकोपरि पुटकादौ दीपम्, पानीयम्, पुष्पञ्च संस्थाप्य दशमदिनसम्बन्धिपिण्डदानपर्यन्तं प्रत्यहं दद्यात् । तत्र अपसव्येन कुशतिलजलान्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) प्रथमदिनसम्बन्धिसायङ्काले **एष दीपस्ते मया दीयते तवोपतिष्ठताम् ।**

अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **इदं पानीयं ते मया दीयते तवोपतिष्ठताम् ।** अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **इदं पुष्पं ते मया दीयते तवोपतिष्ठताम्** । इत्युत्सृज्य **अनेन पश्य इदं पिब इदं परिधेहि** इति वदेत् ।

काकबलिदानम् - कर्ता भोजनसमये पुटकादौ सघृतमंन्नं कृत्वा अपसव्येन हस्ते जलं गृहीत्वा काकबलिं दद्यात् । अनेन मन्त्रेण -

काकोऽसि यमदूतोऽसि गृहाण बलिमुत्तमम् ।
यममार्गे महाघोरे त्वमाप्यायितुमर्हसि ।।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
दक्षिणां दिशमाश्रित्य प्रेतान्नं बलिमाहर ।। इति ।

ततः सव्यं कृत्वा लवणादिकं विनैव घृतशर्करासहितमन्नं स्वयं भुञ्जीत । इति **प्रथमदिनकृत्यम्** ।

एवमेव प्रथमदिनकृत्यस्थानमागत्य स्नानादि दक्षिणादानान्तं प्रथमदिनवत् द्वितीयदिनेष्वपि कुर्यात् । तत्र विशेषः -

द्वितीयदिने- अद्येहेत्यादिअमुकगोस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) जाति-

पुष्करनामकनरकोत्तरणाय कर्णाक्षिनासिकावयवसम्भूत्यै द्वितीयदिननिमित्तकं **पूरकपिण्डदान**महं करिष्ये । अवनेजनम्, पिण्डदाम्, पिण्डप्रत्यवनेजनम्, पिण्डार्चनञ्च विधाय **एतौ सतिलतोयाञ्जली ते मया दीयेते तवोपतिष्ठेताम्** इति द्वौ सतिलतोयाञ्जली पिण्डोपरि दद्याद् । **एते सतिलतोयपूर्णपुटपात्रे ते मया दीयेते तवोपतिष्ठेताम्** इति द्वे तिलतोयपूर्णपुटपात्रे पिण्डसमीपे दद्यात् ।

तृतीयदिने- तृतीयदिने **हाहाकारनामनरकोत्तारणाय गलांसभुजवक्षोऽवयवसम्भूत्यै तृतीयदिन**निमित्तकं पूरकपिण्डदानमहं करिष्ये, इति सङ्कल्प्य अवनेजनपिण्डप्रत्यवनेजनपिण्डार्चनानि विधाय एते **सतिलतोयञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम्** इति **त्रीन्** सतिलतोयाञ्जलीन् पिण्डोपरि दद्यात् । एतानि **सतिलतोयपूर्णपुटपात्राणि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इति **त्रीणि** तिलतोयपूर्णपुटपात्राणि पिण्डसमीपे दद्यात् इति ।

चतुर्थदिने- तामिस्त्रनामनरकोत्तारणाय हृदयनाभिवस्तिलिङ्गगुदावयवसम्भूत्यै चतुर्थदिननिमित्तकं पूरकपिण्डदानमहं करिष्ये । **चत्वारः सतिलतोयाञ्जलयः चत्वारि सतिलतोयपूर्णपुटपात्राणि** तिलतोयाञ्जलीनां तिलतोयपात्राणाञ्च तृतीयदिनवच्चतुर्थदिनादौ वाक्यं कुर्यात् ।

पञ्चमदिने- अन्धतामिस्त्रनामनरकोत्तारणाय स्फिगूरुजानुजङ्घापादावयवसम्भूत्यै पञ्चमः पिण्डः **पञ्चतिलतोयाञ्जलयः पञ्चतिलतोयपात्राणि०** ।

षष्ठदिने- जातिसंत्रव(सम्भ्रम)नामनरकोत्तारणाय सर्वमर्मसम्भूत्यै षष्ठदिननिमित्तकं पूरकपिण्डदानमहं करिष्ये । **षट्तिलतोयाञ्जलयः षट्तिलतोयपात्राणि०** ।

सप्तमदिने- अमेध्यकृमि (सम्पूर्ण) नामनरकोत्तारणाय सर्वनाडी (अस्थिमज्जाशिरायव) सम्भूत्यै सप्तमदिननिमित्तकं पूरकपिण्डः **सप्ततिलतोयाञ्जलयः सप्ततिलतोयपात्राणि०** ।

अष्टमदिने - पुरीषभक्षनामनरकोत्तारणाय दन्तलोमादि (नखरोमावयव) सम्भूत्यै अष्टमदिननिमित्तकपूरकपिण्ड: **अष्टौ तिलतोयाञ्जलयः अष्टौ तिलतोयपात्राणि०।**

नवमदिने- स्वमांसभक्षनामनरकोत्तारणाय वीर्यसम्भूत्यै नवमदिननिमित्तकपूरकपिण्ड: **नवतिलतोयाञ्जलयः नवतिलतोयपात्राणि नवमे वाससां त्यागः** इत्युक्त्वात् तस्मिन्दिने वास: प्रक्षालनञ्च कर्तुर्दशमदिने वा ।

दशमदिने- कुम्भीपाकनामनरकोत्तारणाय पूर्णातातृप्तताक्षुद्विपर्यय (क्षुत्पिपासा) सम्भूत्यै दशमदिननिमित्तकपूरकपिण्ड: **दशतिलतोयाञ्जलयः दशतिलतोयपात्राणि०** ।

एवं "**पञ्चपञ्चाशत्तिलतोयाञ्जलयः क्रमात् तावन्ति तिलतोयपात्राणि संयुक्तानि तैः सहे**ति ब्रह्मपुराणवचनात् ।

दशमेऽहनि पिण्डं समाप्यारण्यं गत्वा कृतश्मश्रुकर्माण: स्पृष्टान्युत्सृज्य तिलकल्कगौरसर्षपै शिर:स्नात्वा अहतवासस: शुक्लवाससो वा गोहिरण्यादीनालभ्य (गृहं) प्रविशेरन् । अस्मिन्दिने ब्राह्मणादीनां पञ्चगव्यप्राशनम् । इति दशमदिनकृत्यम् ।

पाथेयश्राद्धम्- शुद्ध्यां भूमौ उपविश्याचम्य कर्मपात्रं विधाय अपसव्येन हस्ते जलादिकं गृहीत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्राया: प्रेताया:) भूर्लोकाद्दिव्यलोकं गच्छतो (गच्छन्त्या:) मार्गे सञ्जातक्षुदादि–निवृत्यर्थं पाथेयश्राद्धं करिष्ये इति प्रतिज्ञाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्,** इति कुशोपरि अवनेजनं दद्यात् ।

पिण्डदानम् - तत: पिण्डकुशादिसहितमादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) पाथेयश्राद्धे **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।**

प्रत्यवनेजनदानम् - अद्येहामुकगोत्र० **इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** । एष गन्धः, एतेऽक्षताः, इदं भृङ्गराजपत्रमिदमूर्णासूत्रमिदं तिलतोयम्, अयं धूपः, एष दीपः, इदं नैवेद्यम् एतान्यर्चनानि **ते मया दीयन्ते तवोपतिष्ठन्ताम्** ।

अनादिनिधनो देवः० इति पठेत् । इति पाथेयश्राद्धम् ।

एकादशाहकृत्यम्-

एकादशकृत्यनिर्णयः - तत्र मत्स्यपुराणे-

आशौचान्तद्वितीयेह्नि शय्यां दद्याद्विचक्षणः ।
काञ्चनं पुरुषं तद्वत्फलवस्त्रसमन्वितम् ।।
पूजयेद् द्विजदाम्पत्यं नानावसनभूषणैः ।
वृषोत्सर्गं च कुर्वीत देया च कपिला शुभा ।। तथा-
द्वादशाहे यदा कुर्यात्पितुः पुत्रःसपिण्डनम् ।
एकादशे हि कुर्वीत प्रेतश्राद्धनि षोडश ।।

याज्ञवल्क्यश्चाह-

यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश ।
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ।। तानि च -
मासिकानि दशैकं च आद्ये द्वे ह्यर्धमासिकम् ।
ऊनाब्दमूनषाण्मासं प्रेतश्राद्धानि षोडश ।

आद्ये द्वे इति- आद्यमासिकोनमासके, अर्धम्- त्रैपक्षिकम् ।

जातुकर्ण्योऽपि आह-

द्वादश प्रतिमास्यानि आद्यषाण्मासिके तथा ।
त्रैपक्षिका द्विके चेति श्रद्धान्येतानि षोडश ।।

अत्र द्वादशप्रतिमास्यानीत्यभिधानादाद्यषाण्मासिकाब्दिकशब्दा ऊनमासिकोनषाण्मासिकोनाब्दिकपराः, एतेषां नियतःकालःशातातपेनोक्तः।

यथा- **मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् ।**
प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ।।

अत्र प्रतिमासं प्रतिवत्सरं चेत्यभिधानाद् आद्यमेकादशेऽहनीत्युक्तत्वाद् आद्यमासिकमाद्याब्दिकञ्च एकादशेऽहन्येव कुर्यात् । अनेनैवाभिप्रायेण गोभिलोऽप्याद्यस्य द्विरावृत्तिमाह -

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेद्विप्रान् द्विरावृत्तिर्भवेदिति ।।

क्षत्रियादिरपि आद्यं श्राद्धमेकादशेऽहन्येव कुर्यात् ।

तदाह वृद्धवसिष्ठः- एकादेशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् ।
चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक् ।।

लौगाक्षिरप्याह- आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ।।

पैष्ठीनसिराह- सपिण्डीकरणादर्वाक् कुर्याच्छ्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्यात् सर्वाणि तानि तु ।।
सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः ।
प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात् स तान्यपि ।

शाट्यायनिराह- स पिण्डीकरणादर्वागपकृष्य कृतान्यपि ।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ।।

वृद्धिश्राद्धानन्तरं तन्निषेधादित्यर्थः । तथा-

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश ।
एकेनैव तु कार्याणि संविभक्तधनेष्वपि ।।

शातातपोऽपि- सपिण्डीकरणं यावत्प्रेतश्राद्धानि षोडश ।
पृथङ्नैव सुताःकुर्युः पृथग्द्रव्या अपि क्वचित् ।।

तत्र च यथांशं सर्वैर्द्रव्यं देयम् । सद्यःशौचे तु -

शङ्खः- **सद्यः शौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि ।**
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु ।।

पिण्डोदकादिष्विति वा पाठः । एकाहाशौचे तु दशाहकृत्यं तस्मिन्नेवाहनि द्वितीयेऽहनि एकादशाहकृत्यमिति ढुण्ढुपद्धतौ । त्र्यहाशोचे तु चर्तुर्थेऽहनि एकादशाहकृत्यम् । नवश्राद्धमासिकयोर्विघ्ने -

कण्वः- **नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत् ।**
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते ।।

उत्तरसातन्त्र्यम् = उत्तरेण समानकालत्वं तस्मादित्यर्थः । नवश्राद्धमाश्वलायनशाखिनाम् । तथा च शिवस्वामी-

नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः ।
आपस्तम्बाः षडित्याहुर्विभाषा तैत्तिरीयकाः ।।

एकादशाहव्यतिरेकेण पञ्च, यतिषु शातातपः-

एकोद्दिष्टं जलं पिण्डमाशोचं प्रेतसत्क्रियाम् ।
न कुर्यात्पार्वणादन्यद्ब्रह्मीभूताय भिक्षवे ।।

उशनाः- **एकोद्दिष्टं न कुर्वीत यतीनाञ्चैव सर्वदा ।**
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ।।

तथा - **आशिषो द्विगुणा दर्भा जपाशीःस्वस्तिवाचनम् ।**
पितृशब्दः स्वसम्बन्धः शर्मशब्दस्तथैव च ।।
पात्रालम्भोऽवगाहश्च उल्मूकोल्लेखनादिकम् ।
तृप्तिप्रश्नश्चविकिरः शेषप्रश्नस्तथैव च ।।
प्रदक्षिणा विसर्गश्च सीमान्तगमनं तथा ।
अष्टादशपदार्थांश्च प्रेतश्राद्धे विवर्जयेत् ।।

प्रेतश्राद्धेन विकिर इति स्मृतिरत्नावल्याम् ।

तथा- **प्रेतश्राद्धे तु यत्पात्रमर्घ्यार्थं परिकल्पितम् ।**
तस्यैवोत्तानता प्रोक्ता शेषेषु न्युब्जता मता ।।

आश्वलायनः - **प्रेतश्राद्धेषु सर्वेषु न स्वधा नाभिरम्यताम् ।**
स्वस्त्यस्तु विसृजे देव सकृत् प्रणववर्जितम् ।।
एकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते ।
पितृशब्दं न कुर्वीत पितृहा चोपजायते ।।

अनुशब्दः सामगानाम् । पितृशब्देन **अत्र पितरः०, नमो वः०, ऊर्जंवहन्तीः०** इति मन्त्रपाठनिषेध इति सुगतिकृत् ।

वाराहपुराणे- **अस्तं गते तथादित्ये गत्वा विप्रनिवेशनम् ।**
दत्त्वा तु पाद्यं विधिवन्नमस्कृत्य द्विजोत्तमम् ।।
पादौ प्रक्षाल्य तैलेन प्रेतस्य हितकाम्यया ।
प्रभातायां तु शर्वर्यामुदिते च दिवाकरे ।।
कारयित्वा श्मश्रुकर्मनखच्छेदं ततः परम् ।
स्नपनाभ्यञ्जने दद्याद् विप्राय विधिपूर्वकम् ।।

इत्युक्तत्वात् पूर्वदिने श्राद्धार्थं द्विजनिमन्त्रणं कर्तव्यम् ।

तत्र कूर्मः- आशौचान्तदिने हविष्यमेकवारं भुक्त्वा रात्रौ विप्रनिवेशनं गत्वा त्रीनेकं वा ब्राह्मणमुदङ्मुखमुपनिवेश्य कृतापसव्यो दक्षिणाभिमुखः पातितवामजानुः-

गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात्पथः ।
मनसा वायुभूतेन विप्रे त्वाऽहं नियोजये ।।

पूजयिष्यामि भावेन.. इति प्रेतोद्देशेन पठित्वा पुष्पचन्दनपूगीफलानि विप्रहस्ते दत्त्वा ब्राह्मणदक्षिणजानु स्पृष्ट्वा सङ्कल्पं कुर्यात् ।

अद्यास्यां रात्रौ अमुकगोत्रस्यामुकप्रेतस्य आद्यमासिकश्राद्धकरणाय भवन्तं ब्राह्मणमामन्त्रये **आमन्त्रितोस्मीति** ब्राह्मणेनोक्ते ब्राह्मणं प्रार्थयेत् ।

ब्राह्मणप्रार्थना- अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ।
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नः श्वस्तने श्राद्धकर्मणि ।।

इति ब्राह्मणमुद्दिश्य पठेत् । यद्यविघ्नेनेयं रजनी याति तदा सर्वमेतत्करिष्यामीति तेनोक्ते । विप्रं नमस्कृत्य प्रेतहितमुद्दिश्य तिलतैलेन विप्रजानुपादप्रक्षालनं कुर्यात् । अत्र स्त्रिया अपि **गतोऽसि०** इति अविकृतमेव पठनीयम् आत्मत्वेनोद्दिश्यत्वात् ।

एकादशाहे क्रियाक्रमः- प्रातर्नदीं जलाशयान्तरं वा गत्वा पात्रब्राह्मणस्य श्मश्रुकर्मनखच्छेदनञ्च कारयित्वा ताम्रपात्रेण स्नानोपकरणं तैलोद्वर्त्तनं च दत्त्वा स्वयं च स्नात्वा श्वेतवस्त्रं परिधाय जलाशयसमीपे श्राद्धभूमिं कल्पयित्वा तां संशोध्य गौरमृत्तिकयाच्छाद्य गोमयेनोपलिप्य पञ्चगव्येनाभ्युक्ष्य तिलैः सर्षपैश्च विकिरेत् । विस्तृतपाकस्थाने तिलान्विकीर्य तत्र (सपिण्डद्वारा) नूतने मृन्मये भाण्डे ताम्रादिपात्रे वा पाकं कारियितुमारभ्योदङ्मुखाय ब्राह्मणाय शय्यां दद्यात् ।

शय्यादानम्- तत्र क्रमः कर्ता आचान्तः पूर्वाभिमुखः सव्येन **सोपस्करणशय्यायै नमः, ब्रह्मणाय नमः** इति देयब्राह्मणौ त्रिःसंपूज्य वारिणा शय्यामभिषिच्य कुशतिलजलान्यादाय देशकालौ सङ्कीर्त्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सकलनरकयातनाधर्मशीतादिबाधायाम्यपुरुषप्रहारनिवृत्तिपूर्वकस्वर्गप्राप्तिकाम इमां सोपस्करणशय्यां विष्णुदैवताम् अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे तत्सन्न मम ।

प्रार्थना- यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या प्रेतस्याशून्यास्तु(प्रेताया अशून्या) तथा जन्मनि जन्मनि।।
यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या प्रेतस्याशून्यास्तु(प्रेताया अशून्या) तस्माज्जन्मनि जन्मनि।।

इत्युक्त्वा दद्यात् । ब्राह्मणः **स्वस्ती**ति वदेत् ।

दानप्रतिष्ठा- कुशतिलजलसहितं दक्षिणाद्रव्यमादाय अद्यकृतैतत्सोपस्करणशय्यादानप्रतिष्ठासिद्धर्थमिदं हिरण्यमग्निदैवतं (तन्निष्क्रयममुकदैवतं) अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे। इति दक्षिणां दद्यात्। प्रतिग्रहीता **स्वस्ती**त्युक्त्वा शय्यां स्पृशेत् । कर्ता ब्राह्मणं मुहूर्तं विश्रमय्य प्रणिप्रत्य क्षमापयेत् । **यस्य स्मृत्या०** इति पठेत् ।

काञ्चनपुरुषदानम्- कर्ता काञ्चनमयीं प्रेतप्रतिकृतिं प्रक्षाल्य **मनोजूतिः०** इति मन्त्रेण प्रतिष्ठाप्य, **फलवस्त्रसमिन्वतकाञ्चनपुरुषाय नमः, ब्राह्मणाय नमः,** इति देयब्राह्मणौ त्रिःसम्पूज्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- कुशादीन्यादाय देशकालौ सङ्कीर्त्य अद्याशौचान्तद्वितीयेऽहि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सकलनरकदुःखनिवृत्तिपूर्वकस्वर्गप्राप्तिकाम इमं फलवस्त्रसमन्वितं काञ्चनपुरुषं विष्णुदैवतम् अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति ब्राह्मणाय दद्यात् । ब्राह्मणः **स्वस्ति०** इति वदेत् ।

दक्षिणादानम्- ततो दक्षिणाद्रव्यमादाय- अद्यकृतैतत्फलवस्त्रसमन्वितकाञ्चनपुरुषदानप्रतिष्ठासिद्ध्यर्थमिदं हिरण्यमग्निदैवतं (तन्निष्क्रयममुकदैवतं) अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् । प्रतिग्रहीता **स्वस्ती**त्युक्त्वा काञ्चनपुरुषं स्पृशेत् । अत्रैव उपभुक्तशय्यादानमपि कुर्वन्ति।

द्विजदम्पतिपूजनम्

प्रतिज्ञासङ्कल्पः- आचम्य कुशतिलजलान्यादाय देशकालौ सङ्कीर्त्य अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सकलनरकदुःखनिवृत्तिपूर्वकस्वर्गाद्युत्तमलोकप्राप्तिकामो द्विजदम्पती अहं पूजयिष्ये इति संकल्प्य द्विजदम्पती पूजयेत् ।

तत्र क्रमः- **इदमासनं द्विजदम्पतिभ्यां नमः, एषोऽर्घो द्विजदम्पतिभ्यां नमः, इदमनुलेपनं द्विजदम्पतिभ्यां नमः, इदं पुष्पं द्विजदम्पतिभ्यां नमः, एते अक्षताः द्विजदम्पतिभ्यां नमः, एवं धूपदीपनैवेद्यपूगीफलसिन्दूरभूषणवासांसि द्विजदम्पतिभ्यां नमः** इति दद्यात् । ततो नमस्कुर्यात् ।

प्रतिमापूजनपक्षे पूजयित्वा ब्राह्मणाय दद्यात् । एतच्च द्विजदम्पतिपूजनं प्रधानत्वाद् वृषोत्सर्गाकरणेऽपि कर्तव्यम् । शय्यादानवदिति शय्यादानादिकमन्वारोहणेऽपि कर्तव्यम् । तत्र **अमुकगोत्राया अमुकप्रेतायाः** इति वाक्यं कुर्यात् ।

वृषोत्सर्गविधिः

पतिपुत्रवती नारी भर्तुरग्रे मृता यदि ।
वृषोत्सर्गं न कुर्वीत गाञ्च दद्यात्पयस्विनीम् ।।

इति वचनात् । **वृषोत्सर्गं च कुर्वीत** इति वचनाच्च एकादशाहे मुख्यकाले मातृस्थापनपूजाभ्युदयिकश्राद्धरहितवृषोत्सर्गः कर्तव्यः ।

तथा च - **एकादशेऽह्नि प्रेतस्य यस्य नोत्सृज्यते वृषः ।**
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ।।

सहगमने न पृथक् वृषोत्सर्गः । किन्तु एकं सवत्सगोदानम् ।

तथाचोक्तम्- **नव श्राद्धानि सर्वाणि सपिण्डीकरणं पृथक् ।**
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ।।

अन्यस्त्रीणां तु वृषोत्सर्गः कर्तव्यः ।

वृषोत्सर्गप्रयोगः - आचान्तः पूर्वाभिमुख उपविश्य सव्येन कुशतिलजलान्यादाय देशकालौ संकीर्त्य सङ्कल्पं कुर्यात् ।

प्रतिज्ञासङ्कल्पः- अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकस्वर्गलोकगमनार्थं वत्सतरीसहितवृषोत्सर्गमहं करिष्ये इति संकल्पं कृत्वा उत्तराभिमुखं ब्रह्माणं (कुशबटुम्) उपवेशयेत्।

ब्रह्मवरणम्- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कर्तव्यवृषोत्सर्गाङ्गहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुम् अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलपूगीफलवासोभिर्ब्रह्मत्वेन **त्वामहं वृणे** इति ब्रह्माणं वृणुयात्, **वृतोऽस्मि** इति प्रतिवचनम्। **यथाविहितं कर्म कुरु**, **करवाणि** इति प्रतिवचनम् ।

होतृवरणम्- ततः अद्यामुकगोत्रस्यामुकप्रेतस्य(गोत्रायाः प्रेतायाः) कर्तव्यवृषोत्सर्गाङ्गभूतहोमकर्म कर्तुम् अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलपूगीफलवासोभिर्होतृत्वेन **त्वामहं वृणे** इति होतृब्राह्मणं वृणुयात्, **वृतोऽस्मि** इति प्रतिवचनम् । **यथाविहितं कर्म कुरु** इति यजमानेनोक्ते, **करवाणि** इति प्रतिवचनम् । होतृब्राह्मणाभावे स्वयमेव सर्वं कुर्यात् । क्षत्रियादिस्तु ब्राह्मणद्वारा कारयेत् ।

अग्निस्थापनम् - ततो होता आचान्तः प्राङ्मुख उपविष्टो गोमयेनोपलिप्ते प्रागुदकप्रवणे देशे कुशैर्हस्तमात्रां चतुरस्रभूमिं परिसमूह्य कुशानैशान्यां क्षिप्त्वा गोमयोदकेनोपलिप्य मध्ये प्रदेशमात्रमुत्तरोत्तरक्रमेण स्रुवमूलेनोल्लिख्योल्लेखनक्रमेण दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां पांसूनुद्धृत्य ऐशान्यां क्षिप्त्वा तं देशं जलेनाभ्युक्ष्य तत्र दक्षिणहस्तस्थकांस्यपात्रेण (स्वाभिमुखम्) अग्निं स्थापयेत् ।

अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य शुद्धमासनमुपकल्प्य तत्र प्रागग्रैः कुशैः स्तरणं विधाय ब्रह्माणमग्नेर्वायव्यात् प्रदक्षिणमानीय कल्पितासने

बर्हिर्हस्तमुपवेशयेत्। ततोऽग्नेरुत्तरतस्तरणभूमिमतिक्रम्य कुशैरासनद्वयं कल्पयित्वा मृद्विहितं प्रणीतापात्रं सव्यहस्ते कृत्वा तन्मध्ये पिष्टादिना सेतुं विधाय मूलप्रदेशे क्षीरमितरत्र जलं प्रणीय दर्भैराच्छाद्य ब्रह्मणो मुखमवलोक्य पश्चिमासने निधायालभ्य द्वितीयासने प्रणीतापात्रं निदध्यात् ।

तत उपमूलसकृल्लूनबर्हिषां मुष्टिचतुर्थभागेन आग्नेयादीशानान्तं प्राच्याम्, ब्रह्मणोऽग्निपर्यन्तं दक्षिणस्याम्, नैर्ऋत्याद्वायव्यान्तं पश्चिमस्याम् अग्नितः प्रणीतापर्यन्तमुत्तरस्यां परिस्तरणं कुर्यात् । (प्राक् प्रत्यक् च उदगग्राःकुशाः, दक्षिणत उत्तरतश्च प्रागग्रा इति विशेषः) ।

तत उत्तरतः प्रणीतापश्चिमे प्राक्संस्थमुदक्संस्थं वा उपयोक्ष्यमाणानां वस्तूनामासादनम् । तद्यथा- पवित्रच्छेदनार्थं कुशपत्रत्रयम्, पवित्रार्थमनन्तगर्भं साग्रं कुशपत्रद्वयम्, प्रोक्षण्यर्थे मृत्पात्रम्, आज्यार्थं ताम्रस्थाली, पायसचर्वर्थम्, मृत्तिकास्थाली, स्रुवसम्मार्जनार्थं कुशपत्रत्रयम्, उपग्रहार्थं वेणीरूपकुशत्रयम्, प्रादेशमितपालाशसमित्त्रयम्, स्रुवः, आज्यम्, तण्डुलाः, दुग्धम्, एवमासाद्य तदुत्तरतः सिद्धमेव पिष्टम् । ब्रह्मदक्षिणार्थं पूर्णपात्रम्, होतृदक्षिणार्थं वस्त्रयुग्मम्, सुवर्णकांस्यान्युपकल्पयेत् ।

तत आसादितकुशपत्रद्वयमादाय पवित्रच्छेदनकुशैः प्रादेशमात्रं पवित्रं समादायच्छित्वा तानपास्य पवित्रेण प्रणीतोदकं च प्रोक्षिण्यां निधाय उदगग्रपवित्रव्यस्तहस्तयोरङ्गुष्ठानामिकाभ्यामन्तरादाय तन्मध्येन प्रोक्षिण्युदकं त्रिःक्षिप्त्वा पवित्रे प्रोक्षण्यां निधाय तत्पात्रं दक्षिणहस्तेनादाय वामे निधाय दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां तज्जलं किञ्चिदूर्ध्वं प्रक्षिप्य प्रणीताजलेन प्रोक्षणीरभिषिच्य तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृत्प्रोक्ष्य पवित्रशेषजलसहितं प्रोक्षणीपात्रं प्रणीताग्न्योरन्तरे निधाय आज्यस्थाल्यामाज्यं निरूप्य चरुस्थाल्यां प्रोक्षण्युदकं प्रक्षिप्य, एकत्र देशे रुद्रहोमार्थं दुग्धं निक्षिप्य प्रणीतोदकेन त्रिः प्रक्षालिताँस्तण्डुलाँश्चरुस्थाल्यां निक्षिपेत् । स्वयं चरुं ब्रह्मणा चाज्यं गृहीत्वा प्रादक्षिण्येनाग्निपूर्वेण नीत्वा दक्षिणतआज्यम् उत्तरतः

पायसचरुं श्रपणार्थं युगपदग्नौ निधाय ज्वलत्तृणमादायाज्यचर्वोरुपरि प्रदक्षिणं भ्रामयित्वाग्नौ क्षिपेत् । स्रुवस्य प्रागग्रस्यावाङ्मुखस्याग्नौ प्रतपनम्, सम्मार्जनकुशैः संमार्जनम्, प्रणीताया जलेन प्रोक्षणम्, पुनः प्रतपनम्, आस्तृतबर्हिषि स्वपुरतः प्रागग्रस्थापनं विधाय पाके वृत्ते स्वयमाज्यमुद्वास्याग्निपश्चिमेन नीत्वा प्रणीतोत्तरतो निदध्यात् ।

प्रोक्षणीतः पवित्रे समानीयाज्यं प्रोक्षणीवदुत्पूय पवित्रे प्रोक्षण्यां निधायाज्यमवेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनःप्रोक्षण्युत्पवनं विधाय पायसचरोरुत्तरतः पूर्वसिद्धपिष्टचरुं निधाय होमसमाप्तिपर्यन्तमुपग्रहार्थं कुशैर्वामहस्ते उपग्रहं विधाय प्रजापतिं चिन्तयन्नुत्तिष्ठन् प्राक्स्थापितघृताक्तसमित्त्रयमग्नौ प्रक्षिप्योविश्य पवित्रे गृहीत्वा प्रोक्षणीजलेनाग्निं पर्युक्ष्य पवित्रे प्रणीतासु निधाय प्रोक्षणीपात्रं स्वस्थाने निदध्यात् । ततः साहसनामानमग्निं प्रतिष्ठाप्य संपूज्य द्रव्यदेवताभिध्यानं कुर्यात् ।

प्रतिज्ञासङ्कल्पः- अद्येहामुकगोत्रस्यामुकप्रेतस्याक्षयस्वर्गप्राप्तये वृषोत्सर्गहोमकर्मणा यक्ष्ये । तत्राग्निं प्रजापतिमिन्द्रमग्निं सोमं चाज्येन, अग्निं रुद्रं शर्वं पशुपतिमुग्रमशनिं भवं महादेवमिशानञ्च पायसचरुणा, पूषाणं पिष्टचरुणा, अग्निꣳस्विष्टकृतं पायसपिष्टचरुभ्याम्, अग्निं वायुं सूर्यमग्नीवरुणौ अग्निवरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणं प्रजापतिं चाज्येनाहं यक्ष्ये । इदमाज्यादिद्रव्यमग्नये आघाराज्यभागदेवताभ्यः अग्नये रुद्राय शर्वाय पशुपतये उग्राय अशनये भवाय महादेवाय ईशानाय पूष्णे अग्नये स्विष्टकृते महाव्याहृतिदेवताभ्यः प्रजापतये च मया परित्यक्तं यथादैवतमस्तु ।

षडाहुतिदानम् - दक्षिणं जान्वन्वाच्य जुहोति स्थाने उपतिष्ठन् प्राङ्मुखोन्वारब्धः स्रुवेण षडाहुतीः ।

न कुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् ।
अन्येषां चावकृष्टानां कार्यमाचमनादिनेति ।।

परिशिष्टमवचनादोङ्काररहिताःषडाज्याहुतीर्दद्यात् । तद्यथा- ब्रह्मणानन्वारब्धः स्रुवं गृहीत्वा दक्षिणजानु नमयित्वा संस्रवं विनैव आज्येन षडाहुतीर्जुहुयात् ।

षडाहुतिदानम्- इदमग्नये इति त्यागः, **इह रतिः स्वाहा, इदमग्नये।।१।। इह रमध्वꣳस्वाहा, इदमग्नये ।।२।। इह धृतिःस्वाहा, इदमग्नये।।३।। इह स्वधृतिः स्वाहा, इदमग्नये ।।४।। उपसृजन्धरुणं मात्रे धरुणो मातरन्धयन् स्वाहा, इदमग्नये ।।५।। रायस्पोषमस्मासुदीधरत्स्वाहा, इदमग्नये ।।६।।**

आघाराज्यहोमः- ततो ब्रह्मणान्वारब्धो जुहोति । अग्नेर्दक्षिणभागे मनसा (प्रजापतिं ध्यायन्), **ॐ प्रजापतये स्वाहा, इदं प्रजापतये,** अग्नेरुत्तरभागे **ॐ इन्द्राय स्वाहा इदमिन्द्राय,** उत्तरपूर्वार्द्धे **ॐ अग्नये स्वाहा इदमग्नये,** दक्षिणपूर्वार्द्धे **ॐ सोमाय स्वाहा, इदꣳसोमाय,** इत्याघारावाज्यभागौ संस्रवं हुत्वा समिद्धतमेऽग्नौ संस्रवं विनैव पायसेन नवाहुतयो दातव्याः ।

नवाहुतिदानम् - ॐ अग्नये स्वाहा, इदमग्नये ।।१।। ॐ रुद्राय स्वाहा, इदꣳरुद्राय।।२।। ॐ शर्वाय स्वाहा, इदꣳशर्वाय ।।३।। ॐ पशुपतये स्वाहा, इदं पशुपतये ।।४।। ॐ उग्राय स्वाहा, इदमुग्राय।।५।। ॐ अशनये स्वाहा, इदमशनये ।।६।। ॐ भवाय स्वाहा, इदं भवाय ।।७।। ॐ महादेवाय स्वाहा, इदं महादेवाय ।।८।। ॐ ईशानाय स्वाहा, इदमीशानाय ।।९।। इति हुत्वा पिष्टकेन जुहुयात् ।

पिष्टकहोमः- ॐ पूषागाअन्वेतुनःपूषारक्षत्ववर्तः । पूषावाजꣳसनोतुनः-स्वाहाइदंपूष्णो ।। इति मन्त्रेण पिष्टकेन जुहुयात् ।

स्विष्टकृद्धोमः - ततः पायसपिष्टकाभ्याम् **ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये, स्विष्टकृते** इति ।

महाव्याहृतिहोमः- तत आज्येन अग्नेर्मध्यभागे भूराद्या नवाहुतीर्जुहुयात्।

ॐ भूः स्वाहा, इदमग्नये, ॐ भुवःस्वाहा, इदं वायवे, ॐ स्वः स्वाहा, इदꣳसूर्याय ।

पञ्चवारुणीहोमः- ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः। यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुध्य्स्मत्स्वाहा।। स्वाहा इदमग्नीवरुणाभ्याम् ।

ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौअवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि ।।स्वाहा इदमग्नीवरुणाभ्याम् ।

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्त्वमयाऽअसि । अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा ।। इदमग्नये ।

ॐ येतेशतंवरुणंयेसहस्रंयज्ञियाःपाशावितितामहान्तः । तेभिर्न्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ।

ॐ उदुत्तमंवरुणपाशमस्मदवाधमंन्विमध्यमꣳश्रथाय । अथाव्वयमादित्यव्व्रतेतवानागसोऽअदितयेस्याम ।। स्वाहा इदं वरुणाय ।

प्राजापत्यहोमः - ॐ प्रजापतये स्वाहा इदं प्रजापतये, इति मनसा, इति जुहुयात् ।

एवं हुत्वा संस्रवप्राशनमाचमनञ्च कुर्यात् ।

प्रणीताविमोकः - ॐ सुमित्रियानऽआपऽओषधयः सन्तु०॥इति मन्त्रेण पवित्राभ्यां शिरः सम्मार्जनं कुर्यात् । ततः **ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ०॥**इति मन्त्रेणैशान्यां प्रणीताविमोकः कर्तव्यः ।

पूर्णाहुतिहोमः- ततः फलपुष्पान्वितेन घृतेन- **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्यांवैश्वानरमृतऽआजातमग्निम् । कविꣳसम्राजमतिथिञ्जनानामा-**

सन्नापात्रञ्जनयन्तदेवाः।। स्वाहा इदमग्नये इति यजमानसहितो होता पूर्णाहुतिं कुर्यात् ।

बर्हिर्होमः- ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य **ॐ देवागातुविदोगातुंवित्वागातुमित । मनसस्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः** ।। स्वाहा इदमग्नये इति बर्हिर्होमं कुर्यात् ।

पूर्णपात्रदानम्- कुशतिलजलान्यादाय- ॐ अद्यकर्तव्यवृषोत्सर्गाङ्गभूतकृतेतद्धोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणे दद्यात् । **स्वस्ती**ति प्रतिवचनम् ।

दक्षिणा- ततो वस्त्रयुग्मं सुवर्णकांस्यान्युपनीय कुशादीन्यादाय- ॐ अद्यकर्तव्यवृषोत्सर्गाङ्गभूतकृतैतद्धोमकर्मप्रतिष्ठार्थमेतानि वस्त्रयुग्मसुवर्णकांस्यानि वृहस्पतिवह्निचन्द्रदैवतानि अमुकगोत्रायामुकशर्मणे ब्राह्मणाय होतृदक्षिणां तुभ्यमहं सप्रददे इति होत्रे दक्षिणां दद्यात् । **स्वस्ती**ति प्रतिवचनम् ।

वत्सवत्सतरीसमानयनम् - ततो द्विहायनमेकहायनं वा जीववत्सायाः पयस्विन्याःपुत्रं नीलादिवर्णम्-

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतःखुरविषाणाभ्यां स नीलो वृष उच्यते ।।

इति लक्षणलक्षितं यथालाभं वा वृषमानीय ततश्चतस्रो द्वे एकां वा एकवर्षाधिकां वत्सतरीमानीय अग्निसमीपे सुरक्षितेन गोपालेन प्रागग्नीयं संवेशयेत् ।

त्रिशूलचक्राङ्कनम् - ततो रुद्राध्यायं पठन्वृषसमीपं गत्वा **मानस्तोके०** इति मन्त्रेणाग्रिमपूर्वपाददक्षिणपार्श्वे कुङ्कुमलाक्षारसचन्दनादिना त्रिशूलं विलिख्य- **वृषाह्यसिभानुनाद्युमन्तंत्वाहवामहे । पवमानःस्वर्दृशः।।** ऋ.सं. ७/२/१ इति मन्त्रेण पश्चिमपादवामपार्श्वे चक्रं लिखेद् वृषभस्य ।

तथा च छन्दोगपरिशिष्टे-

ततोऽरुणेन गन्धेन मानस्तोके० इतीरयन् ।
वृषस्य दक्षिणे पार्श्वे त्रिशूलाङ्कं समुल्लिखेत् ।।
वृषाह्यसीति सव्येऽस्य चक्राङ्कमपि दर्शयेत् ।
तप्तेन पश्चादयसा स्पष्टौ तावेव कारयेत् ।। इति ।

अयसा=लोहेनेत्यर्थः । ततो लोहकारमाहूय **वृषभमङ्कयेति** ब्रूयात्। अग्निसन्तप्तलोहेन त्रिशूलं चक्रञ्च स्पष्टे कारयित्वा तमुत्थापयित्वा वत्सतरीसहितं वृषभं वक्ष्यमाणमन्त्रैः स्नापयेत् ।

वत्सवत्सतरीस्नपनम् - हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विन्द्रः। अग्निंयागर्भंदधिरेविरूपास्तानआपःशꣳस्योनाभवन्तु ।।१।। यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यञ्जनानाम् । मधुश्चुतःशुचयोयाःपावकास्तानआपःशꣳस्योनाभवन्तु ।।२।। यासांदेवादिविकृण्वन्तिभक्ष्यंयाअन्तरिक्षेबहुधाभवन्ति । याःपृथिवींपयसोन्दन्तिशुक्रास्तानआपःशꣳस्योनाभवन्तु ।।३।। शिवेनमाचक्षुषापश्यतापःशिवयातन्वोपस्पृशतत्वचंमे । सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ।।४।। (तै.सं. ५/६/१ इति) **शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शँय्योरभिस्रवन्तुनः।।१।।** इति ।

वत्सतरीपूजनं तत्कर्णे मन्त्रजापश्च- ततो लोहघण्टिकानूपुरकनपट्टिकाश्वेतवस्त्रादिभिर्वत्सतरीसहितं वृषभमलङ्कृत्य-

कामधेनोः कुले जातास्त्रिहायण्यः सुधावहाः ।
नरकादुद्धरन्त्वेनं स्वर्गलोके मयार्चिताः ।।

इत्यनेन वत्सतरीं गन्धादिना सम्पूज्य **तीक्ष्णशृङ्गायै विद्महे वेदपादायै धीमहि तन्नो गौरी प्रचोदयात्** इति दक्षिणकर्णे जपेत् । सावित्रीमघमर्षणरुद्रपुरुषसूक्तानि **यद्देवा०** इत्यादि ऋक्त्रयरूपाः कूष्माण्डीश्च जपेत् ।

वृषभस्य दक्षिणकर्णे मन्त्रजपः- पितावत्सानांपतिरघ्न्यानामथोपितामहतांगर्गराणाम् । वत्सोजरायुःप्रतिधुक्पीयूषमामिक्षाघृतंतद्वस्यरेतः ।।

वृषो हि भगवान् धर्मश्चतुष्पादःप्रकीर्तितः ।
वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः ।।

(तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि तन्नो वृषः प्रचोदयात्)

इति जपेत् ।

वत्सतरीसहितवृषभपूजनम्- ततो वत्सतरीसहितस्य वृषभस्य पूजनं कुर्यात्- **एषोऽर्घो वत्सतरीसहितवृषभाय नमः, इदमनुलेपनं वत्सतरीसहितवृषभाय नमः । एतानि पुष्पाणि वत्सतरीसहितवृषभाय नमः । एतानि धूपदीपनैवेद्यानि वत्सतरीसहितवृषभाय नमः ।**

वत्सतरीवृषभवस्त्रसंश्लेषः- ततो गृहीतपुष्पाञ्जलिर्वृषं त्रिःपरिक्रम्य नमस्कुर्यात्। ततो वृषाय वत्सतरीदानपूर्वको वृषवत्सतरीणां वस्त्रेण संश्लेषः-

अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः ।
तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः ।।

इति मन्त्रेण ।

वृषभपुच्छेन तर्पणम्- ततो वृषवत्सतरीभिश्चतस्रोऽग्निप्रदक्षिणाः कारयित्वा वृषपुच्छेन पुरुषसूक्तेन प्रेतनाम्ना च तर्पणं कुर्यात् ।

वृषोत्सर्गः- ततः कुशतिलजलान्यादाय सव्येन देशकालौ सङ्कीर्त्य अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गप्राप्तिकामः **ॐ रुद्रदैवतमेनंयुवानंपतिंवोददानितेनक्रीडन्तीश्चरथप्रियेणमानःसाप्तजनुषाऽसुभगारायस्पोषेणसमिषामदेम ।।** इत्युत्सृजेत् ।

नीलवृषे नीलपदप्रक्षेपः । **एतयैवोत्सृजेरन्निति** पारस्करवचनात् । अनयैव ऋचोत्सर्गः । हे वत्सतर्यः, वो- युष्माकम्, एतं पतिम्- स्वामिनम्,

युवानं- तरुणम्, ददामि- त्यजामि, तेन- वृषेण, प्रियेण सह, क्रीडन्तीः- खेलन्त्यः, चरथ- भ्रमथ । यूयमपि हे वत्सतर्यः, मानः, नः- अस्माकम्, मा- नास्मत्स्वत्वविषयाः किन्तु मया त्यक्ताः, वयं वृषभस्य भवतीनाञ्च, त्यागेन रायस्पोषेण- धनसमृद्ध्या, साप्तजनुषा- सप्तजन्मव्यापकेन, इषा- अन्नेन, सम्मदेम- हृष्टा भवेम, सुभगा- लोकस्य प्रिया इति ।

वत्सतरीसहितवृषभाभिमन्त्रणम्- ततः ऐशानीं दिशं वत्सतरीसहितं वृषं चालयेत् । वत्सतरीसहितं वृषभमभिमन्त्रयेत् ।

तत्र मन्त्राः - **ॐ मयोभूरभिमावाहिस्वाहामारुतोसिमरुताङ्गणः । शम्भूर्मयोभूरभिमावाहिस्वाहाऽवस्यूरसिदुवस्वाञ्छम्भूर्मयोभूरभिमावाहिस्वाहा।। ॐ यास्तेऽअग्नेसूर्य्येरुचोदिवमातन्वन्तिरश्मिभिः । ताभिर्न्नोऽअद्यसर्वाभीरुचेजनायनस्कृधि ।। ॐ यावोदेवाःसूर्य्येरुचोगोष्वश्वेषुयारुचः । इन्द्राग्नीताभिःसर्व्वाभीरुचन्नोधत्तबृहस्पते।। ॐ रुचन्नोधेहिब्राह्मणेसुरुचꣳराजसुनस्कृधि । रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम् ।। ॐ तत्त्वायामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः । अहेडमानोव्वरुणेहंबोद्ध्युरुशꣳसमानऽआयुःप्रमोषीः ।। ॐ स्वर्णघर्मःस्वाहास्वर्णार्कःस्वाहास्वर्णशुक्रःस्वाहास्वर्णज्योतिःस्वाहास्वर्णसूर्य्यःस्वाहा ।।** इत्यनामिकया स्पृशन्नभिमन्त्रयेत् ।

वृषवत्सतरीपुच्छद्वारा तर्पणम् - वृषवत्सतरीपुच्छान् गृहीत्वा कृतापसव्यो दक्षिणाभिमुखो भूत्वा वामजानु पातयित्वा ताम्रपात्रस्थकुशतिलाक्षतयुतजलेन मन्त्रस्थफलमुद्दिश्याञ्जलित्रयेण तर्पयेदेभिर्मन्त्रैः-

स्वधा पितृभ्यो मातृभ्यः पशुभ्यश्चापि तृप्तये ।
मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षकाः ।।
गुरुश्वशुरबन्धूनां ये चान्ये कुलसंभवाः ।
ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः ।।
वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमाम् । इति ।

तर्पणानन्तरकृत्यम् - ततो वत्सतरीसहितं वृषभमैशान्यां प्रणोदयेत् । ततो लोहकारमाहूय अभिमतं वेतनं तस्मै दद्यात् । उत्सृष्टं ब्राह्मणान् श्रावयेत् यत्किञ्चित् । **द्विजा मयोत्सृष्टं तदन्येन न नेतव्यं न वाह्यं न तत्क्षीरं पातव्यं केनचित्क्वचिदिति** । ततो रुद्राग्रे बहुसर्पिष्कं पायसं ब्राह्मणान् भोजयेत् । आचार्याय गां दद्यात् । भूयसीञ्च ब्राह्मणेभ्यो दत्त्वा **यस्य स्मृत्या०** इति पठेत् इति ।

विष्णुः- होत्रे वस्त्रयुगं दद्यात्सुवर्णं कांस्यमेव च ।
अयस्काराय दातव्यं वेतनं मनसेप्सितम् ।।

ब्रह्मपुराणे- न च वाह्यो न तत्क्षीरं पातव्यं केनचित्क्वचित् ।
अङ्कितं वृषमुत्सृष्टं यो वाहयति दुर्मतिः ।।
कुलानि पातयेत्तस्य नरके नात्र संशयः ।

वृषोत्सर्गफलश्रुतिः-

तत्र विष्णुः- उत्सृष्टो वृषभो यस्मिन्पिबत्यथ जलाशये ।
शृङ्गेणोल्लिखते भूमिं यत्र क्वचन दर्पितः ।।
पितृणामन्नपानञ्च तत्प्रभृत्युपतिष्ठते ।
वृषोत्सर्गादृतेऽन्यत् पुण्यमस्ति महीतले ।।
तस्मात्कुरु वृषोत्सर्गं पितॄणामात्मनोऽपि च ।

छन्दोगपरिशिष्टे- यमलोके मया दृष्टा भवन्तो यमकिङ्करैः ।
पात्यमानास्त एवाद्य कथं स्वर्लोकमागताः ।।
प्रेतं विमुच्यतां तात उत्सृष्टो वृषभो भुवि ।
शुचिना तेन पुत्रेण तारिता महतो भयात् ।।
सर्वेषां चैव यज्ञानां वृषोत्सर्गः समोऽमतः ।
स्पर्द्धते योऽश्वमेधेन क्रतुकोटिसमो यतः ।।

आदित्यपुराणे- यावन्ति रोमकूपाणि वृषभस्य भवन्ति हि ।
गवां चैव तु रोमाणि यावन्ति मुनिपुङ्गव ।।
तावत्कोटिसहस्राणि रुद्रलोके महीयते ।
यत्किञ्चित्कुरुते पापं पुरुषो वृत्तिकर्शितः ।।
तत्सर्वं शान्तिमायाति वृषोत्सर्गेण तत्क्षणात् ।
वृषभस्य तु शब्देन पितरः सपितामहाः ।।
आवर्तमाना दृश्यन्ते स्वर्गलोके न संशयः ।
यदि प्रक्षिप्य लाङ्गूलं तोयमुद्धरते वृषः ।।
दशवर्षसहस्राणि पितरस्तेन तर्पिताः ।
गवां मध्ये यदा चैव वृषभः क्रीडते तु यत् ।
अप्सरौघसहस्रेण क्रीडन्ति पितरस्ततः ।।
कूलात्समुद्धृता यावच्छृङ्गे तिष्ठन्ति मृत्तिकाः ।
भक्ष्यभोज्यमयैः शैलैः पितरस्तेन तर्पिताः ।।
लाङ्गूलं यावदुद्यम्य तोये प्रक्रीडते तु सः ।
अप्सरोगणसङ्घैश्च क्रीडन्ति पितरः सदा ।।
सहस्ररत्नपात्रेण कनकेन यथाविधि ।
तृप्तिःस्याद्या पितृणां वै सा वृषेण समोच्यते ।।

इति एवं स्त्रिया अपि तत्र अमुकगोत्राया अमुकप्रेताया इति विशेषः

इति वृषोत्सर्गविधिः ।

कपिलादानम्

प्रतिज्ञासङ्कल्पः - कपिलां गां निष्क्रयद्रव्यं वा पुरतो वास्थाप्य देशकालौ सङ्कीर्त्य अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वनिवृत्तिपूर्वकोत्तम-स्वर्गलोकप्राप्तिकामो कपिलादानमहं करिष्ये तदङ्गत्वेन गवादिपूजनञ्च करिष्ये इति संकल्पं कुर्यात् ।

कपिलापूजनम्- ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।

इति मन्त्रेण कपिलां पुष्पचन्दनधूपदीपनैवेद्यादिभिः संपूजयेत् ।

सङ्कल्पः- कुशजलेन गामभ्युक्ष्य कुशादीन्यादाय देशकालौ संकीर्त्य अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिपूर्वकस्वर्गाद्युत्तमलोकप्राप्तिकाम इमां कपिलां गां सवत्सां हेमशृङ्गीं रौप्यखुरीं ताम्रपृष्ठीं वस्त्रयुगच्छन्नां मुक्तालाङ्गूलभूषितां कांस्योपदोहनां यथाशक्त्यलङ्कृतां रुद्रदैवतां (निष्क्रयद्रव्यं वाऽमुकदैवतं) अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय दातुमहमुत्सृजे **ॐ तत्सन्न मम** इति ।

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ।।
प्रायश्चित्ते समुत्पन्ने निष्कृतिर्न कृता यदि ।
तस्य पापस्य शुद्ध्यर्थं धेनुमेतां ददामि ते ।।

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थ-धेनुमयी यस्मादतः शान्तिं प्रयच्छ मे ।।

इत्युक्त्वा गां ब्राह्मणाय दद्यात् **स्वस्ती**ति प्रतिवचनम् । पूर्ववत् कर्ता गोदानप्रतिष्ठां कुर्यात् ।

दक्षिणा- ततो दाक्षणाद्रव्यमादाय अद्य कृतैत्सोपस्करणकपिलगवोदानप्रतिष्ठासिद्ध्यर्थमिदं हिरण्यमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् । ततः प्रतिग्रहीता- **ॐ कोदात्कस्माऽ-अदात्कामोदात्कामायादात्। कामोदाताकामःप्रतिग्रहीताकामैतत्ते।।** इति गोपुच्छग्रहणं कृत्वा कामस्तुतिं पठेत् । **यस्य स्मृत्या०** इति च पठेत् । यथोक्तकपिलाभावे केवलामपि दद्यात् ततः सचैलं स्नायात् ।

एकादशाहे आद्यमासिकश्राद्धप्रयोगः- कर्ता शुचिराचान्तः शुक्लद्विवासाः **भूम्यै नमः** इति पूजितायां पुष्पाक्षतैर्गोमयेनोपलिप्तायां भूमौ दर्भेषु तिष्ठन् यजमानस्य सवर्णेनाहुतमाचान्तं ब्राह्मणं **स्वागत**मिति पृच्छेत् **सुस्वागत**मिति तेनोक्ते उभावुपविशतः।

ततः श्राद्धकर्ताऽपसव्येन पुष्पचन्दनपूगीफलानि ब्राह्मणाय दत्त्वा ब्राह्मण-दक्षिणजानु स्पृष्ट्वा- अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्यमासिकश्राद्धकरणाय भवन्तं ब्राह्मणमामन्त्रये, आमन्त्रितोऽस्मि इति प्रतिवचनम्।

ब्राह्मणनियमश्रावणम्- अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि॥

इति नियमान् श्रावयेत्। **भवितव्य**मिति तेनोक्ते, पादार्घं वामहस्ते कृत्वा गन्धपुष्पादिनाभ्यर्च्य कुशं गृहीत्वा अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **आद्यमासिकश्राद्धे एषः पादार्घस्ते मया दीयते तवोपतिष्ठताम्,** इति पादार्घं दद्यात्। ततस्तिलतैलेन विप्रपादौ आजानु अभ्यञ्जयेत्। ततः सव्येनाचम्य पात्रब्राह्मणमग्रे कृत्वा श्राद्धदेशमागत्योपविश्यान्नाभिप्रायेण सिद्धमिति पृच्छेत्।

ततो दक्षिणाग्रकुशसहितनेपालकम्बलाद्यात्मकमासनमुपकल्प्यासनं स्पृशन्-

अत्रैव देवेन्द्रवचोनियुक्तो विश्रम्यतां विप्र दयाविशिष्टः
प्रसादये त्वां मम गृह्ण पूजां ज्ञानाग्निपूतेन करेण विप्र॥

इति मन्त्रं पठित्वा पात्रब्राह्मणं दक्षिणकरे धृत्वोदङ्मुखमुपवेशयेत्।

ततः पात्रब्राह्मणस्य पादस्थले दक्षिणाग्रकुशत्रयं दद्यात्। आसनसमीपे च तिलतैलेन घृतेन वा श्राद्धसमाप्तिपर्यन्तस्थापितदीपं प्रज्वलयेत्।

तद्रक्षा च पात्रब्राह्मणेन कार्या, रक्षोघ्नान् गौरसर्षपाँस्तिलाँश्च श्राद्धदेशे विकिरेत्। ततः पूर्वाभिमुखः सव्येन कुशोदकेन-

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

इति पठित्वा **पुण्डरीकाक्षः पुनातु** इत्युक्त्वा श्राद्धदेशं द्रव्याणि आत्मानञ्च सिञ्चेत् ।

सङ्कल्पः - कुशतिलजलान्यादाय देशकालौ सङ्कीर्त्य अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिपूर्वकोत्तमलोकप्राप्तिकामो यथाकालमाद्यमासिकश्राद्धादिषोडशश्राद्धाण्यहं करिष्ये ।

तस्मिन्वर्षे मरणदिनमारभ्य द्वादशसु मासेषु मध्ये अधिकमासे पतिते षोडशपदस्थाने सप्तदशपदं प्रयोज्यम्। पुनः कुशतिलजलन्यादाय अद्येहामुकगोत्रास्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिपूर्वकोत्तमलोकप्राप्तिहेतुकषोडशश्राद्धान्तर्गताद्यमासिकश्राद्धमहं करिष्ये इति संकल्पः। **कुरुष्व** इति ब्राह्मण प्रतिवचनम् ।

ततो **देवताभ्यः०** इति त्रिःपठेत् । (सप्तव्याधाः इत्यादि पठनम्, दिग्बन्धनम्, नीवीबन्धनञ्च कर्तव्यानीति मदीयो विचारः)।

आसनदानम्- ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादिकमादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्यमासिकश्राद्धे **इदमासनं ते मया दीयते तवोपतिष्ठताम्** इति कुशरूपमासनं दक्षिणाग्रमुत्सृजेत् ।

छत्रदानम्- सव्यं कृत्वा प्राङ्मुख उपविष्टः **छत्राय नमः, ब्राह्मणाय नमः** इति देयब्राह्मणौ त्रिःसंपूज्य, कुशोदकेन छत्रमभिषिच्य कुशादीन्यादाय-अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) यमपथाधिकरणकघोरातपवारणार्थमिदं छत्रमुत्तानाङ्गिरोदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

प्रार्थना- **सर्वेषामेव दानानां छत्रमातपवारणम् ।**
सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छतु ।।

इत्युक्त्वा विप्रहस्ते जलं दद्यात् । ब्राह्मणः **स्वस्ति०** इति वदेत् ।

दक्षिणा- ततः कुशादिसहितदक्षिणाद्रव्यमादाय अद्यकृतैतच्छत्रदानप्रतिष्ठासिद्ध्यर्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् । प्रतिग्रहीता **स्वस्ती**त्युक्त्वा छत्रदण्डं धारयेत् ।

उपानद्दानम्- उपानद्भ्यां नमः, ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिःसंपूज्य उपानहावासिच्य कुशादीन्यादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सन्तप्तवालुकासिपत्रकण्टकसङ्कीर्णदुर्गमयममार्गसन्तरणार्थमिमे उपानहौ उत्तानाङ्गिरोदैवते अमुकगोत्रायेत्यादि पूर्ववत् ।

प्रार्थना- **उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।**
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छताम् ।।

इत्युक्त्वा दद्यात् । **स्वस्ती**ति प्रतिवचनम् । अद्यकृतैतदुपानद्दानप्रतिष्ठासिद्ध्यर्थम् इमां दक्षिणामित्यादि पठित्वा, दक्षिणां दद्यात् । प्रतिग्रहीता स्वस्तीत्युक्त्वा उपानहावारोहयेत् ।

अश्वदानम्- देयब्राह्मणौ त्रिःसंपूज्य देयमभिषिच्य कुशादीन्यादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अतिविषमभूदुर्गसंतरणार्थमिममश्वं यमदैवतं सपर्याणममुकगोत्रायेत्यादि पूर्ववत् ।

प्रार्थना- विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ।
चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे ।। इत्युक्त्वा दद्यात्।।

अद्यकृतैतदश्वदानप्रतिष्ठार्थमिदं **हिरण्यम्०** इत्यादि दानप्रतिष्ठां दद्यात् । प्रतिग्रहीता **स्वस्ती**त्युक्त्वा अश्वस्य दक्षिणकर्णं सटां वा स्पृशेत्।

शिबिकादानम्- देयब्राह्मणौ संपूज्य देयं चाभ्युक्ष्य कुशादीन्यादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) उच्चावचविषमभूसंतरणार्थमिमां शिबिकामुत्तानाङ्गिरोदैवताममुकगोत्राय० ।

प्रार्थना- देवदेव जगन्नाथ विश्वात्मन् दत्तयानया ।
प्रभो शिबिकया देव प्रीतो भव जनार्दन ।। इत्युक्त्वा दद्यात्।

अद्यकृतैतच्छिबिकादानप्रतिष्ठार्थमिदं हिरण्यम्० इति दानप्रतिष्ठार्थं दक्षिणां दद्यात् । प्रतिग्रहीता **स्वस्ती**त्युक्त्वा शिबिकां स्पृशेत् ।

तथा च ब्रह्मपुराणे- **उपविश्यासने भद्रे छत्रे तत्र प्रकल्पयेत् ।**
आचार्याय च तच्छत्रं ब्राह्मणाय प्रकल्पयेत् ।
पश्चादुपानहौ दद्यात् सा चैव शिबिका तथा ।।

बृहस्पतिः- **वस्त्रालङ्कारशय्यादि यत्पित्र्यं वाहनादिकम् ।**
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे समर्पयेत् ।। इति ।

रक्षणम्- तत आचम्य- अपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः **अपहताऽअसुरारक्षाᳫंसिव्वेदिषदः ।** इति श्राद्धदेशे वामावर्तेन तिलान् विकिरेत् ।

हस्तार्घपात्रविधानम्- ततो हस्तार्घपात्रोपरि **पवित्रेस्थोव्वैष्णव्यौसवितुर्व्वःप्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः।।** इति उत्तराग्रं पवित्रं धृत्वा **शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः।।** इति जलं दद्यात् । **तिलोसिप्रेतदैवत्योगोसवोदेवनिर्मितः । प्रत्नमद्भिःपृक्तःस्वधयाप्रेताँल्लोकान्पृणाहिनः ।।** इति तिलान् क्षिपेत् । **श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।** इति पुष्पं दद्यात् । **गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम्। ईश्वरींसर्वभूतानां तामिहोपह्वेश्रियम् ।।** इति गन्धं दद्यात् ।

हस्तार्घपात्रं संपन्नमिति ब्राह्मणं पृष्ट्वा **सुसंपन्न**मिति तेनोक्ते हस्तार्घपात्रं वामहस्ते कृत्वा **नमो नारायणाय** इति मन्त्रेण पुष्पसहितं पवित्रं विप्रहस्ते उत्तराग्रं स्थापयेत् ।

हस्तार्घपात्राभिमन्त्रणम्- यादिव्याऽआपःपयसासंबभूवुर्य्याऽआन्तरिक्षाऽउतपार्थवीर्य्याः । हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशꣳस्योनाःसुहवाभवन्तु ।। इति मन्त्रेण हस्तार्घपात्रस्थजलमभिमन्त्रयेत् ।

हस्तार्घदानम्- कुशादीन्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्यमासिकश्राद्धे **एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्** इति विप्रकरे जलं दददुत्सृजेत् । **अर्घे प्रत्यर्घमस्तु** इति पुष्पसहितं पवित्रं ब्राह्मणसमीपादानीय तत्पुटके निधाय, पात्रब्राह्मणवामपार्श्वे **प्रेताय स्थानमसि** इति उत्तानमेव हस्तार्घपात्रं स्थापयेत् । तदुपरि कुशान्दद्यात् । तच्च दक्षिणापर्यन्तं न चालयेत् ।

पात्रब्राह्मणपूजनम् - ततः पात्रब्राह्मणं गन्धादिभिः संपूज्य कुशादीन्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्यमासिकश्राद्धे एतानि चन्दनपुष्पाक्षतधूपदीपयज्ञोपवीतवासांसि **ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युत्सृजेत्।

ततः सव्यं कृत्वा प्रेतस्योपभुक्तशय्यासनादीन् गन्धपुष्पैरभ्यर्च्य श्राद्धभोक्त्रे प्रतिपादयेत् । तत आचम्यापसव्यं कृत्वा अर्चनविधेः **सर्वं परिपूर्णमस्तु** इत्युक्ते, **अस्तु** इति ब्राह्मणप्रतिवचनम् ।

भूस्वामिनेऽन्नदानम्- ततो गौरमृत्तिकया नीवारचूर्णेन जलेन वा ब्राह्मणं वेष्टयित्वा चतुरस्रं मण्डलं कुर्यात् । परकीयभूमौ श्राद्धकरणे श्राद्धीयवस्तुभ्यः किञ्चित्किञ्चिदुद्धृत्य तिलघृतजलयुतमन्नमादाय **इदमन्नं सजलमेतद् भूस्वामिपितृभ्यो नमः** इति दद्यात् ।

अन्नदानम्- तत उष्णमन्नं ताम्रपात्रेण कराभ्यामादाय मनाक् स्थित्वा पुरुषतृप्तिक्षममन्नं परिविष्यात् । तत इदं मधुरम्, इदमम्लम् इत्यादिव्यञ्जन-

गुणान् कीर्तयन् सर्वाणि व्यञ्जनानि भूमिष्ठपात्रान्तरेषु परिविष्य, घृतं सतिलजलं चोपनीय अन्नं मधुनाभिघारयेत् ।

ततः पात्रालम्भनमङ्गुष्ठावगाहनं विनैव- **पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा।। इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपाꣳसुरे ।।** इति पठित्वा- **अपहताऽअसुरारक्षाꣳसिवेदिषदः।** इति मन्त्रेण श्राद्धदेशे तिलान्विकीर्य अमृतरूपतयान्नं विचिन्त्य कुशादीन्यादाय संकल्पं कुर्यात् ।

अन्नसङ्कल्पः - अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) आद्यमासिकश्राद्धे इदमन्नं सोपस्करणं **ते मया दीयते तवोपतिष्ठताम्** इत्युत्सृजेत् । ततो **भवान् प्राशयतु** इत्यपोशानं दत्त्वा **यथासुखं जुषस्व** इति ब्राह्मणं ब्रूयात्। ब्राह्मणश्च वामेन पाणिनान्नपात्रमत्यजन् भुञ्जीत । संज्ञया च भक्ष्यप्रार्थनां कुर्यात् ।

श्राद्धकर्तृकर्तव्या प्रार्थना- श्राद्धकर्ता सव्येन **ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः। माध्वीर्न्नःसन्त्वोषधीः।। मधुनक्तमुतोषसोमधुमत्पार्त्थिवꣳरजः। मधुद्यौरस्तुनःपिता।। मधुमान्नोव्वनस्पतिर्म्मधुमाँ२।।ऽअस्तुसूर्य्यः। माध्वीर्गावोभवन्तुनः ।। मधु३ ।**

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।
तत्सर्वमच्छिद्रमस्तु श्रीभास्करप्रसादतः ।।
नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ।।

इति पठेत् । वीणादिभिर्ब्राह्मणं हर्षयन् व्यञ्जनगुणान् कीर्तयँस्तस्य यत्र यत्रेच्छोपलभ्यते तत्तत्प्रयच्छन्मन्दं मन्दं भोजयेत् ।

विकिरनिषेधः- ततो ब्राह्मणं तृप्तं ज्ञात्वा तस्मै **जलगण्डूषमिदन्ते** इति प्रत्यपोशानं दद्यात् । अत्र **स्वदितमिति** प्रश्नाभावः ।

ततः **पिण्डदानमहं करिष्ये** इति पृच्छेत् **कुरुष्व** इति ब्राह्मणो ब्रूयात् ।

पिण्डवेदिकानिर्माणम्- तदुच्छिष्टसमीपे चतुरस्रमेकहस्तप्रमाणं दक्षिणप्लवं चतुरङ्गुलोच्छ्रितं पिण्डस्थानं निर्मिमीत । तत्र रेखाकरणमुल्मूकभ्रामणञ्च न भवति ।

अवनेजनम्- ततश्छिन्नमूलकुशान् दक्षिणाग्राँस्तत्रास्तीर्य पत्रपुटकादिकं तिलजलगन्धपुष्पयुतं वामहस्ते कृत्वा दक्षिणहस्तेन कुशादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्यमासिकश्राद्धे पिण्डस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति कुशोपरि अवनेजनं दद्यात् ।

पिण्डदानम् - ततः श्राद्धशेषमन्नं तिलघृतमधुयुतमेकीकृत्य तेन कपित्थप्रमाणं पिण्डं निर्माय दक्षिणहस्तेनादाय जलतिलकुशादिकं दत्त्वा- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्यमासिकश्राद्धे **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** इत्यवनेजनस्थाने पिण्डं दद्यात् । ततः करं प्रोक्ष्य सव्यं कृत्वाचम्य हरिं स्मरेत् ।

प्रत्यवनेजनम् - अपसव्यं कृत्वा मन्त्रपाठनिषेधात्तूष्णीं भास्वरमूर्तिं प्रेतं चिन्तयेत् । अवनेजनावशिष्टजलयुतं पात्रं वामहस्ते कृत्वा दक्षिणहस्तेन कुशादिकमादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्यमासिकश्राद्धे पिण्डे **इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति प्रत्यवनेजनं दद्यात्।

सूत्रसमर्पणं पिण्डपूजनञ्च- ततो नीवीं विस्रस्य सव्येनाचम्यापसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय- **प्रेतैतत्तेवासः०** इति पिण्डोपरि धृत्वा गन्धपुष्पादिभिः पिण्डं संपूजयेत् ।

ततः कुशादीन्यादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्यमासिकश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यादीनि **ते मया दीयन्ते तवोपतिष्ठन्ताम्,** इत्युत्सृजेत् । पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ।

जलपुष्पाक्षतसमर्पणम् - ततो ब्राह्मणस्य करे **शिवा आपःसन्तु** इति जलम्, **सौमनस्यमस्तु** इति पुष्पम्, **अक्षतञ्चारिष्टमस्तु** इति तण्डुलान् दद्यात् । **अस्तु** इति प्रतिवचनम् ।

धरणीप्रार्थना- ततः पुटकादिपात्रे शान्त्युदकं परिकल्प्य मेदिनीं शिरसाभिवन्द्य धरणीप्रार्थनां कुर्यात् ।

नमो नमो मेदिनि लोकधात्रि ।
ऊर्वि महि शैलधारिणि धरणि नमः ॥
धरणि काश्यपि जगत्प्रतिष्ठे वसुधे
नमोऽस्तु वैष्णवि लोकधात्रि ।
नमोऽस्तु ते सर्वरसप्रतिष्ठे
निवापनावीचि नमो नमोऽस्तु ते ॥

अक्षय्योदकदानम्- ततः कुशादीन्यादाय अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्यमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामिति अक्षय्योदकं विप्रहस्ते दत्त्वा, **उपतिष्ठताम्** इति प्रतिवचनं गृह्णीयात् ।

पिण्डोपरि जलधारादानम्- सव्येन दक्षिणां दिशं पश्यन् **अघोरः प्रेतोस्तु** इति पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् । अत्र गोत्रं नो वर्द्धतामित्याद्याशीः-प्रार्थनानिषेधः ।

नमोवाचनम् - ततोऽपसव्यं कृत्वा सपवित्रकुशत्रयं दक्षिणाग्रं पिण्डोपरि धृत्वा **नमो वाचयिष्ये** इति पृच्छेत् **वाच्यताम्** इत्यनुज्ञातः, **प्रेताय नमः** इत्युच्यताम् इति वदेत् ।

दुग्धधारादानम्- नमोवाचनान्तरं पुटकादिस्थजलादिना मन्त्रपाठं विना- **इदमूर्जं ते मया दीयते तवोपतिष्ठताम्** इति दक्षिणाग्रां पयोधारां पिण्डोपरि दद्यात् ।

ततो नम्रीभूय सव्येन पिण्डमाघ्राय अपसव्येन उत्थापयेत् छिन्नमूल-कुशान् वह्नौ क्षिपेत् ।

दक्षिणा- अर्घपात्रं सञ्चाल्य, सव्यं कृत्वा कुशादिसहितं दक्षिणाद्रव्यमादाय-अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्राया: प्रेताया:) आद्यमासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात्। **स्वस्ति** इति प्रतिवचनम्। अत्र प्रदक्षिणीकरणमनुव्रजनञ्च न भवति।

ब्राह्मणार्चनादिकम्- ततोऽपसव्येन स्वस्त्यस्तु इत्युक्त्वा ब्राह्मणमुत्थाप्य शय्यायामुपवेशयेत्। ब्राह्मणचरणौ संवाह्य तं नमस्कुर्यात्। ततोऽञ्जनं कङ्कतिकां च ब्राह्मणायार्पयेत्। स चाञ्जनं कङ्कतिकां चादाय शय्यायां मुहूर्तं विश्रामं कुर्यात्।

विष्णुस्मरणम्- ततः कर्ता सव्यं कृत्वा **देवताभ्यः** इति त्रिर्जपित्वाऽपसव्यं कृत्वा श्राद्धीयदीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य श्राद्धसम्पूर्णताकामः विष्णुस्मरणं कुर्यात्।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इति पठित्वा विष्णुस्मरणं कुर्यात्। इति षोडशश्राद्धान्तर्गताद्यमासिकश्राद्धस्यैकादशेऽह्न्येव विहितस्य पात्रप्रयोगः।

आद्याब्दिकश्राद्धम्- आद्यमासिकश्राद्धानन्तरं स्नानादिकं विधायाद्याब्दिकश्राद्धं कुर्यात्। आद्याब्दिकस्य एकादशेऽह्न्येव विधानात् तच्चसिद्धान्नेनैव विधेयम्।

तत्र क्रमः- कर्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितं प्रज्वलितदीपं स्थापितगौरसर्षपतिलादिरक्षोघ्नं श्राद्धदेशमागत्य पूर्वाभिमुख उपविश्य कुश-जलेन **अपवित्रः पवित्रो वा०** इत्यादि **पुण्डरीकाक्षः पुनातु** इत्यन्तं पठित्वा श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्। अत्र प्रथममपसव्येन ब्राह्मणनिमन्त्रणं पादार्घदानं कर्मपात्रनिर्माणञ्च कर्तव्यम्।

प्रतिज्ञासङ्कल्पः- ततः सव्येन कुशादिकमादाय देशकालौ संकीर्त्य अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धमहं करिष्ये इति ।

ततो **देवताभ्यः०, सप्तव्याधाः०** इत्यादि पठेत् ।

आसनम् - ततोऽपसव्येन दिग्बन्धननीवीबन्धने कृत्वा कुशादिकमादाय अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धे **इदमासनं ते मया दीयते तवोपतिष्ठताम्** इति कुशरूपमासनमुत्सृजेत् ।

रक्षणम्- ततः **अपहताऽअसुरारक्षाꣳसिवेदिषदः।।** इति मन्त्रेण श्राद्धदेशे वामावर्तेन तिलान् विकिरेत् ।

हस्तार्घविधानम् - ततः पुटकादौ **पवित्रेस्थोवैष्णव्यौ०** इति दक्षिणाग्रं पवित्रम्, **शन्नोदेवी**रिति जलम्, **तिलोसी**ति तिलान्, **गन्धद्वारा**मिति गन्धम्, **श्रीश्चते** इति पुष्पं क्षिपेत् । ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं **नमो नारायणाय,** इति मन्त्रेणान्नपात्रोपरि उत्तराग्रं धृत्वा **या दिव्या०** इति मन्त्रेण पात्रान्तःस्थजलमभिमन्त्र्य कुशादीन्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्यामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्याब्दिकश्राद्धे **एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्** इति पवित्रोपरि अर्घजलं दददुत्सृजेत् । अर्घे प्रत्यर्घमस्तु ।

प्रत्यर्घदानम् - ततः पवित्रादिसहितमर्घपात्रं ब्राह्मणासनवामपार्श्वे **प्रेताय स्थानमसि** इत्युत्तानमेव स्थापयेत् । तदुपरि कुशान् दद्यात् ।

ब्राह्मणपूजनम्- ततो ब्राह्मणं गन्धादिभिः संपूज्य कुशादीन्यादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्याब्दिकश्राद्धे **एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इति गन्धादिकमुत्सृजेत् ।

भूस्वामिनेऽन्नदानम्- तत आसनस्यान्नपात्रसहितस्य चतुर्दिक्षु चतुरस्रमण्डलं कृत्वा श्राद्धीयान्नाग्रभागं घृततिलजलयुतं पुटकादौ कृत्वा **इदमन्नमेत-**

भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ।

अन्नदानम्- ततः पुरुषतृप्तिक्षममन्नं सोपस्करणं सतिलजलञ्चोपनीय पात्रालम्भनाङ्गुष्ठावगाहने विनैव **पृथिवीतेपात्रम्** इत्यादि **स्वाहे**त्यन्तम्, **इदं विष्णुरि**त्यादि **सुरे** इत्यन्तञ्च पठित्वा **अपहताः०** इत्यादिमन्त्रेण श्राद्धदेशे तिलान् विकीर्य कुशादिकमादाय अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) आद्याब्दिकश्राद्धे **इदमन्नं सोपस्करणं ते मया दीयते तवोपतिष्ठताम्** इत्यन्नमुत्सृजेत् ।

मध्वादिपाठः- ततो **मधुवाता०** इत्यादि ऋक्त्रयम्, **मधु मधु मधु, अन्नहीन**मिति, नमस्तुभ्यं **विरूपाक्ष** इति च पठेत् । अत्र विकिरो रेखाकरणमुल्मूकभ्रामणञ्च न भवति ।

पिण्डस्थानेऽवनेजनदानम्- ततः सव्येनाचम्यापसव्यं कृत्वा पिण्डस्थानोपरि छिन्नमूलान् कुशान् दक्षिणाग्रानास्तीर्य तिलजलजगन्धयुतं पुटकं वामहस्ते कृत्वा कुशादिकमादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्याब्दिकश्राद्धे पिण्डस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति छिन्नमूलकुशोपरि अवनेजनं दद्यात् ।

पिण्डदानम्- ततस्तिलघृतमधुयुक्तेनान्नेन कपित्थप्रमाणं पिण्डं निर्माय कुशादिकमादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्याब्दिकश्राद्ध **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** इत्यवनेजनस्थाने पिण्डं दद्यात् ।

ततः करं प्रोक्ष्य, सव्येनाचम्य हरिं स्मृत्वाऽपसव्यं कृत्वा मन्त्रपाठं विना तूष्णीं भास्करमूर्तिं प्रेतं चिन्तयेत् ।

प्रत्यवनेजनदानम् - ततोऽवनेजनपात्रं वामहस्ते कृत्वा कुशादिकमादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्याब्दिकश्राद्धपिण्डे **इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

सूत्रदानम्- नीवीं विस्रस्य सव्येनाचम्यापसव्यं कृत्वा वामेन पाणिना धृतं

सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां **प्रेतैतत्तेवासः** इति पिण्डोपरि सूत्रं दद्यात् ।

पिण्डपूजनम्- गन्धादिपिण्डमभ्यर्च्य कुशादिकमादाय अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) आद्याब्दिकश्राद्धपिण्डे **एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्य-वासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युत्सृजेत् ।

ततः पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ।

जलपुष्पाक्षतदानम्- शिवा आपःसन्तु इति जलम्, **सौमनस्यमस्तु** इति पुष्पम्, **अक्षतञ्चारिष्टमस्तु** इति तण्डुलान्, अन्नपात्रोपरि क्षिपेत् ।

अक्षय्योदकदानम् - अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धे **दत्तैतदन्नपानादिकमुपतिष्ठताम्** इत्यक्षय्योदकं दद्यात् ।

पिण्डोपरि जलधारादानम् - सव्यं कृत्वा **अघोरः प्रेतोस्तु** इति दक्षिणां दिशं पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् । अत्राशीःप्रार्थनं न भवति ।

दुग्धधारादानम्- ततोऽपसव्येन अर्घपात्रस्थान् सपवित्रान् पिण्डोपरि धृत्वा पुटकादिस्थजलादिना मन्त्रपाठं विना **इदमूर्जं ते मया दीयते तवोपतिष्ठताम्** इति सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ।

ततः सव्येन पिण्डमाघ्राय अपसव्येनोत्थापयेत् । पिण्डाधारकुशान् वह्नौ क्षिपेत् ।

दक्षिणा- अर्घपात्रं संचाल्य सव्यं कृत्वा कुशादिसहितं दक्षिणाद्रव्यमादाय-अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) आद्याब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ।

विष्णुस्मरणम्- ततो देवताभ्यः इति त्रिःपठित्वाऽपसव्येन दीपमाच्छाद्य सव्येन हस्तौ पादौ प्रक्षाल्याचम्य- **प्रमादात्कुर्वतां कर्म०** इति पठन्

विष्णुं स्मरेत् । श्राद्धीयं वस्तु ब्राह्मणाय प्रतिपादयेत् । सिद्धान्नं जले क्षिपेत् । अत्र दिने विहितमपि पञ्चगव्यप्राशनं शिष्टा नाचरन्तीति न लिखितम् । इत्याद्याब्दिकश्राद्धप्रयोगः ।

उदककुम्भदाननिर्णयः

तत्र हारीतः- **मृते पितरि वै पुत्रः पिण्डमब्दं समाचरेत् ।**
अन्नं कुम्भञ्च विप्राय प्रेतमुद्दिश्य धर्मतः ।।

मत्स्यपुराणे- **यावदब्दं तु यो दद्यादुदकुम्भं विमत्सरः ।**
प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् ।।

याज्ञवल्क्यः- **अर्वाक्सपिण्डीकरणं यस्य संवत्सराद्भवेत् ।**
तस्याप्यन्नं सोदकुम्भं द्वयं दद्याद्विजन्मने ।।

अङ्गिराः- **यस्य संवत्सरादर्वाक्सपिण्डीकरणं कृतम् ।**
मासिकं चोदकुम्भश्च देयौ तस्यापि वत्सरम् ।

उदककुम्भदानम्- एकादशेऽह्नि कर्ता शुचिराचान्तः प्राङ्मुख उपविश्य सव्येन कुशतिलजलान्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहेत्यादिदेशकालौ संकीर्त्य प्रेतगताहरहरन्नोपस्थितिस्वगताश्वमेधयज्ञजन्यफलसमफलप्राप्तिकामोऽद्यादिमरणदिनावधिकाशौचावच्छिन्नदिनोनवत्सरं यावत्प्रत्यहममुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) सान्नोदककुम्भदानमहं करिष्ये इति ।

आसनम्- ततोऽपसव्यं कृत्वा कुशादीन्यादाय अद्येहामुकगोत्रास्यमुकप्रेतस्य (गोत्रायाः प्रेतायाः) इदमासनं ते मया दीयते तवोपतिष्ठताम् इत्यासनमुत्सृजेत्।

पूजनम् - गन्धादिना पूजां विधाय कुशादीन्यादाय- अद्येहामुकगोत्रमुकप्रेत (गोत्रे प्रेते) **एतानि गन्धपुष्पधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युत्सृजेत् ।

सान्नोदककुम्भदानम्- सोपस्करमन्नं नवकुम्भञ्चोपनीय कुशादीन्यादाय- अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) **अयं सान्नोदककुम्भस्ते मया दीयते तवोपतिष्ठताम्** इत्युत्सृजेत् ।

वर्षाभ्यन्तरे सपिण्डने कृत्ते अद्येहामुकगोत्रस्य पितुरमुकशर्मणः (गोत्राया मातुरमुकदेव्याः) इदमासनं तेऽस्तु । अमुकगोत्र पितरमुकशर्मन् (गोत्रे मातरमुकदेवि) एतानि गन्धपुष्पधूपदीपनैवेद्यवासांसि ते स्वधा अमुकगोत्राय पित्रेऽमुकशर्मणे (गोत्रायै मात्रेऽमुकदेव्यै) **अयं सान्नोदककुम्भस्ते स्वधा** इति वाक्यं कुर्यात् ।

दक्षिणा - ततः (सव्येन) कुशादीन्यादाय- अद्येहकृतैतत्सान्नोदककुम्भदानप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां दातुमहसुत्सृजे इति दक्षिणामुत्सृज्य दक्षिणां तदुभयञ्च ब्राह्मणाय दद्यात् ।

उदककुम्भदानस्य विध्यन्तरम् - एवं वर्षपर्यन्तं प्रत्यहं सान्नोदककुम्भं दत्वा दक्षिणां दद्यात् । अशक्तौ प्रतिमासम्, अत्यन्ताशक्तौ तद्दिने एव दद्यात् ।

तत्र तु अद्यप्रेतगताहरहरन्नकुम्भोपस्थितिस्वगताश्वमेधान्यफलसमफलप्राप्तिकामोऽद्य सान्नोदककुम्भदानमहं करिष्ये इति सव्येन प्रतिज्ञां कृत्वा अपसव्येन आसनादिवाक्यं पूर्ववद्विधाय आशौचान्तदिनोनवत्सरदिनसंख्याकान् (अधिमासपाते तु त्रिंशदधिकान्) सान्नोदककुम्भानुपनीय सङ्कल्पं कुर्यात् ।

सङ्कल्पः - अद्यामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) मरणादिनावधिकाशौचावच्छिन्नदिनोनवत्सरसंख्याकाः (अधिमासपाते त्रिंशदधिकाः) **एते सान्नोदककुम्भास्ते मया दीयन्ते तवोपतिष्ठताम्** इति वाक्यं कृत्वा, दक्षिणावाक्यमपि पूर्ववद्विधाय सर्वं ब्राह्मणाय दद्यात् । इत्युदकुम्भदानविधिः।

ऊनमासिकादिपञ्चदशश्राद्धानि- तानि च एकादशाहे द्वादशाहे वा सिद्धान्नेनामान्नेन वा कार्याणि । आमपक्षे यवपिष्टेन पिण्डाः कार्याः । तानि च शिष्टा अपात्रकाण्येव कुर्वन्तीति स एव प्रयोगो लिख्यते ।

प्रयोगः- तत्र क्रमः- कर्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितं प्रज्वलितदीपं स्थापितगौरसर्षपादिरक्षोघ्नं श्राद्धदेशमागत्य पूर्वाभिमुख उपविश्य कुशपवित्ररूपब्राह्मणनिमन्त्रणं कृत्वा तस्मै पादार्घदानं चापसव्येन कृत्वा कर्मपात्रनिर्माणं पूर्ववद्विधाय सव्यं कृत्वा तत्रत्य-कुशजलेन **अपवित्रः पवित्रो वा०** इति, **पुण्डरीकाक्षः पुनातु** इति च पठित्वा श्राद्धदेशं द्रव्याणि आत्मानञ्च सिञ्चेत् ।

प्रतिज्ञासङ्कल्पः- कुशादिकमादाय- अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुषोडशश्राद्धान्तर्गतोनमासिकश्राद्धमहं करिष्ये इति प्रतिज्ञासंकल्पं कुर्यात् ।

ततो **देवताभ्यः०** इति त्रिःपठेत् । **सप्तव्याधाः०** इत्यादि च पठेत् ।

आसनम्- अपसव्येन दिग्बन्धननीवीबन्धने कर्तव्ये कुशादीन्यादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनमासिकश्राद्धे **इदमासनं ते मया दीयते तवोपतिष्ठताम्** इति कुशरूपमासनमुत्सृजेत् ।

रक्षणम्- अपहताऽअसुराः० इत्यादिमन्त्रेण वामावर्तेन श्राद्धदेशे तिलान् विकिरेत् ।

अर्घनिर्माणम्- ततः पुटकादौ **पवित्रेस्थः०** इति दक्षिणाग्रं पवित्रं धृत्वा, **शन्नोदेवी**रिति जलम्, **तिलोसी**ति तिलान्, **गन्धद्वारा**मिति गन्धम्, **श्रीश्चते** इति पुष्पं च तत्रैव क्षिपेत् । ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं **नमो नारायणाय** इति मन्त्रेणान्नपात्रोपरि (कुशब्राह्मणकरे) उत्तराग्रं धृत्वा **या दिव्या०** इति मन्त्रेण अर्घपात्रस्थजलमभिमन्त्र्य कुशादीन्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) **एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्** इति पवित्रोपरि अर्घजलं दददुत्सृजेत् (अर्घे प्रत्यर्घमस्तु)।

पूजनम्- ततः पवित्रादिसहितमघपात्रमासनवामपार्श्वे **प्रेतायस्थानमसि** इत्युत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात् । ततो गन्धादिना संपूज्य कुशादीन्यादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धे **एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इति गन्धादिकमुत्सृजेत् ।

भूस्वामिनेऽन्नदानम्- तत आसनस्यान्नपात्रसहितस्य चतुर्दिक्षु चतुरस्रमण्डलं कृत्वा श्राद्धीयान्नाग्रभागं मधुतिलजलयुतं पुटकादौ कृत्वा **इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत् ।

अन्नदानम्- ततःपुरुषतृप्तिक्षममन्नं सोपस्करं सतिलमुपनीय मधुनाभिघार्य पात्रालम्भनाङ्गुष्ठावगाहने विना **पृथिवी ते पात्रमि**त्यादि स्वाहेत्यन्तम्, **इदं विष्णु**रित्यादि, **पाꣳसुरे** स्वाहेत्यन्तं च पठेत् ।

अपहता० इति मन्त्रेण श्राद्धदेशे तिलान् विकीर्य कुशादिकमादाय- अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) ऊनमासिकश्राद्धे **इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्** इत्यन्नमुत्सृजेत् ।

मध्वादिपाठः- ततः (सव्येन) **मधुवाता** इत्यादि ऋक्त्रयम्, **मधु मधु मधु,** इति, **अन्नहीन**मिति मन्त्रम्, **नमस्तुभ्यं विरूपाक्षे**ति श्लोकञ्च पठेत्। अत्र विकिरो रेखाकरणमुल्मूकभ्रामणं च न भवति ।

अवनेजनदानम्- (सव्येन) आचम्य अपसव्येन पिण्डस्थानोपरि छिन्नमूलकुशान्दक्षिणाग्रानास्तीर्य तिलजलगन्धयुतं पुटकं वामहस्ते कृत्वा कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धे पिण्डस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति छिन्नमूलकुशोपरि दद्यात्।

पिण्डदानम् - ततस्तिलघृतमधुयुतेनान्नेन पिण्डं निर्माय कुशादिसहितं पिण्डमादाय अद्येहामुकगोत्रामुकप्रेते (गोत्रे प्रेते) ऊनमासिकश्राद्धे एष पिण्डस्ते **मया दीयते तवोपतिष्ठताम्,** इत्यवनेजनस्थाने पिण्डं दद्यात् ।

प्रत्यवनेजनदानम्- ततः करं प्रोक्ष्य सव्येनाचम्यापसव्येन मन्त्रपाठ विना भास्करमूर्तिं प्रेतं तूष्णीं ध्यायेत् । ततोऽवनेजनपात्रं वामहस्ते कृत्वा कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धपिण्डे **इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

सूत्रदानम्- ततो नीवीं विस्रस्य सव्येनाचम्यापसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां कराभ्यां **प्रेतैतत्तेवासः** इति पिण्डोपरि सूत्रं धृत्वा पिण्डं गन्धादिभिरभ्यर्चयेत् ।

पिण्डार्चनम्- ततः कुशादिकमादाय- अद्येहामुकंगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धपिण्डे **एतानि सूत्रगन्धाक्षतपुष्पधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युत्सृजेत् ।

अक्षय्योदकदानम्- ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य **शिवा आपः सन्तु** इति जलम्, **सौमनस्यमस्तु** इति पुष्पम्, **अक्षतं चारिष्टमस्तु** इति तण्डुलान्, अन्नपात्रोपरि (कुशबटुकरे) क्षिपेत् । कुशादिकमादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम् इत्यक्षय्योदकं दत्वा सव्यं कृत्वा **अघोरः प्रेतोस्तु** इति दक्षिणां दिशं पश्यन् पूर्वाग्रां जलधारां दद्यात् । अत्राशीःप्रार्थनं न भवति ।

दुग्धदानम्- ततः पिण्डोपरि सपवित्रान्कुशान् धृत्वा पुटकस्थजलादिना मन्त्रपाठं विना **इदमूर्जं ते मया दीयते तवोपतिष्ठताम्** इति वाक्येन सपवित्रपिण्डोपरि दक्षिणाग्रां पयोधारां दद्यात् ।

ततः पिण्डमाघ्रायोत्थापयेत्, पिण्डाधारकुशान् वह्नौ क्षिपेत् ।

दक्षिणा- अर्घपात्रं सञ्चाल्य सव्येन कुशादिसहितं दक्षिणाद्रव्यमादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कृतैतदूनमासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् । ततो **देवताभ्यः** इति त्रिर्जपेत् ।

विष्णुस्मरणम्- ततोऽपसव्येन दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य **प्रमादात्कुर्वतां कर्म०** इति पठन् विष्णुं स्मरेत् । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ।

इत्यूनमासिकश्राद्धप्रयोगः ।

अन्यमासिकश्राद्धानि- एवमेव द्वितीयमासिकत्रैपक्षिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषण्मासिकोनषण्मासिकसप्तममासिकाष्टममासिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकोनाब्दिकश्राद्धे तत्तत्पदप्रक्षेपेण प्रयोग ऊह्यः ।

यदि मरणदिनादारभ्य द्वादशमासमध्येऽधिकमासस्तदातन्मासिकं द्विवारं कार्यम् ।

ऊनमासिकादिपञ्चदशश्राद्धानां तन्त्रेण (सामूहिकरूपेण) प्रयोगः

आद्यमासिकातिरिक्तानि ऊनमासिकादीनि कालैक्यात्कर्त्रैक्याद्दैवतैक्याच्च तन्त्रेणापि भवन्तीति सोऽपि प्रयोगो लिख्यते ।

प्रयोगः - तत्र क्रमः - श्राद्धदेशं श्राद्धीयवस्तून्युपकल्प्य दीपं प्रज्वलय्य (अपसव्येन कुशबटूनां निमन्त्रणं पादार्घदानं च विधाय कर्मपात्रं निर्माय) कर्ता पूर्वाभिमुख उपविश्य सकुशकर्मपात्रजलेन **अपवित्रः पवित्रो वा०** इति **पुण्डरीकाक्षः पुनातु** इति च उक्त्वा श्राद्धदेशं द्रव्याणि आत्मानं च सिञ्चेत् । ततः कुशादिकमादाय सङ्कल्पं कुर्यात् ।

प्रतिज्ञासङ्कल्पः- अद्यामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुषोडशश्राद्धान्तर्गतोनमासिकद्वितीयमासिकत्रैपक्षिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषण्मासिकोनषण्मासिकसप्तममासिकाष्टममासिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकोनाब्दिकश्राद्धानि

तन्त्रेणैकोद्दिष्टविधिना एकादशाहे द्वादशाहे वा अहं करिष्ये इति संकल्पं कुर्यात् । अधिकमासपाते षोडशपदं प्रयोज्यम् अधिकमासिकेतिपदं प्रक्षिप्य वाक्यं कर्तव्यम् ।

आसनम् - ततो **देवताभ्यः** इति त्रिर्जपित्वाऽपसव्येन दिग्बन्धननीवीबन्धने विधाय कुशतिलजलान्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनमासिकश्राद्धे **इदमासनं ते मया दीयते तवोपतिष्ठताम्** इति क्लृप्तासनेषु सर्वपश्चिमभागे कुशरूपमासनमुत्सृजेत् । एवमेव तत्पूर्वपूर्वभागेषु क्लृप्तासनेषु क्रमेण तत्तत्पदप्रक्षेपेण वाक्यं कृत्वा कुशरूपाण्यासनानि दद्यात् ।

रक्षणम् - ततः **अपहता०** इति मन्त्रेण श्राद्धदेशे वामावर्तेन तिलान् विकिरेत् ।

हस्तार्घः - ततः क्रमेण पुटकादीनि संस्थाप्य तत्र **पवित्रेस्थ०** इत्यादि मन्त्रेण प्रत्येकं क्रमेण पवित्राणि धृत्वा जलतिलगन्धपुष्पाणि स्वस्वमन्त्रेण प्रत्येकं क्रमेण क्षिपेत् ।

तत ऊनमासिकार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रम् **नमो नारायणाय** इति मन्त्रेणान्नोपरि (कुशबटुकरे) उत्तराग्रं धृत्वा **यादिव्या०** इति मन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य कुशादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धे **एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्** इति पवित्रोपरि अर्घजलं दददुत्सृज्य एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण हस्तार्घमुत्सृजेत् ।

ततः पवित्रसहितानि हस्तार्घपात्राणि क्रमेण प्रत्येकमासनत्रामपार्श्वेषूत्तानान्येव स्थापयेत् । तदुपरि कुशान् दद्यात् ।

ब्राह्मणपूजनम्- ततो गन्धपुष्पादिना प्रत्येकं क्रमेण संपूज्य कुशादिकमादाय-अद्येहामुकगोत्रामुकप्रेत(गोत्रे प्रेते) ऊनमासिकद्वितीयमासिकत्रैपक्षिकतृतीय-

मासिकचतुर्थमासिकपञ्चममासिकषण्मासिकोनषण्मासिकसप्तममासिकाष्टममासिकनवममासिकदशममासिकैकादशद्वादशमासिकोनाब्दिकश्राद्धेषु **एतानि गन्धपुष्पधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इति क्रमेण गन्धादिकमुत्सृजेत् ।

भूस्वामिनेऽन्नदानम् - ततः क्रमेण प्रत्येकमासनसहितानामन्नपात्राणां (कुशबटूनाम्) चतुर्दिक्षु चतुरस्राणि मण्डलानि कृत्वा श्राद्धीयान्नाग्रभागं तिलमधुघृतजलयुतं पुटकादौ कृत्वा एकत्रैव **इदमन्नमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत् ।

अन्नदानम् - ततः पुरुषतृप्तिक्षमं सोपस्करमन्नं तिलजलं च क्रमेण प्रत्येकमुपनीय अन्नं मधुना-भिघार्य पात्रालंभनाङ्गुष्ठावगाहनं विना **पृथिवी ते पात्र**मित्यादि **स्वाहे**त्यन्तम्, इदं **विष्णु**रित्यादि **पाꣳसुरे** इत्यन्तञ्च मन्त्रं पठित्वा **अपहता** इत्यादिना श्राद्धदेशे तिलान् विकीर्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः - अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) ऊनमासिकश्राद्धे **इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्** एवमन्नमुत्सृज्य एवं क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणान्नान्युत्सृजेत् ।

मध्वादिपाठः - ततः सव्येन **मधुवाता** इत्यादि ऋक्त्रयम्, **मधु मधु मधु** इति, **अन्नहीनम्०** इति मन्त्रम्, **नमस्तुभ्यं विरूपाक्ष०** इति मन्त्रञ्च पठेत्। अत्र विकिरदानं रेखाकरणमुल्मूकभ्रामणं च न भवति ।

अवनेजनदानम्- तत आचम्यापसव्येन पश्चिमतः क्रमेण प्रत्येकं पिण्डस्थानोपरि छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य तिलजलगन्धयुतं पुटकं वामहस्ते कृत्वा कुशादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धे **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति सर्वपश्चिमास्तृतकुशोपरि अवनेजनं दत्वा एवं क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणावनेजनानि दद्यात् ।

पिण्डदानम्- ततस्तिलघृतमधुयुक्तेनान्नेन नारिकेलप्रमाणान्पिण्डान्निर्माय कुशादिसहितं प्रथमपिण्डमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धे **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** इति सर्वपश्चिमावनेजनस्थाने पिण्डं दत्त्वा एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण द्वितीयादिपिण्डान् दद्यात् ।

प्रत्यवनेजनदानम्- करं प्रोक्ष्य सव्येनाचम्य हरिं स्मृत्वाऽपसव्येन कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकश्राद्धपिण्डे **इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति प्रथमपिण्डे प्रत्यवनेजनं दत्त्वा एवमेव क्रमेण प्रत्येकं द्वितीयादिपिण्डेषु तत्तत्पदप्रक्षेपेण प्रत्यवनेजनानि दद्यात् ।

सूत्रदानम् - ततो नीवीं विस्रस्य सव्येनाचम्यापसव्येन वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां प्रथमपिण्डोपरि **प्रेतैतत्तेवासः** इति सूत्रं दद्यात् । एवमेव क्रमेण द्वितीयादिषु पिण्डेषु सूत्रं दद्यात् ।

पिण्डार्चनम् - ततो गन्धादिना क्रमेण पिण्डानभ्यर्च्य कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) ऊनमासिकद्वितीयमासिकत्रैपक्षिकतृतीयमा०-चतुर्थमा०पञ्चममा०षण्मा०ऊनषण्मा०सप्तममा०अष्टममा०नवममा०-दशममा०एकादशमा०द्वादशमा० ऊनाब्दिकश्राद्धपिण्डेषु एतानि सूत्रगन्धपुष्प-धूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम् इत्युत्सृज्य पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ।

जलपुष्पाक्षतदानम्- ततः **शिवा आपःसन्तु** इति जलम्, **सौमनस्यमस्तु** इति पुष्पम्, अक्षतं **चारिष्टमस्तु** इति तण्डुलान्, क्रमेण अन्नपात्रोपरि (कुशबटूनां करेषु) क्षिपेत् ।

अक्षय्योदकदानम्- कुशादिकमादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) ऊनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम् इत्यक्षय्योदकं

दत्त्वा एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणाक्षय्योदकं दद्यात् ।

जलधारादानम्- सव्यं कृत्वा **अघोरः प्रेतोस्तु** इत्युक्त्वा दक्षिणां दिशं पश्यन्सर्वेषु पिण्डेषु पूर्वाग्रामेकां जलधारां दद्यात् । अत्राशीःप्रार्थननिषेधः।

दुग्धधारादानम् - ततः सर्वेषु पिण्डेषु क्रमेण सपवित्रान्कुशान्धृत्वा पुटकादिस्थजलादिना मन्त्रपाठं विना **इदमूर्ज ते मया दीयते तवोपतिष्ठताम्** इति वाक्येन सपवित्रप्रथमपिण्डोपरि दक्षिणाग्रां पयोधारां दद्यात् । एवमेवान्येष्वपि पिण्डेषु दक्षिणाग्रां पयोधारां दद्यात् ।

ततः पिण्डानाघ्रायोत्थापयेत्, पिण्डाधारकुशान्वह्नौ क्षिपेत् ।

दक्षिणा- ततोऽर्घपात्राणि सञ्चाल्य सव्येन कुशादिसहितं दक्षिणाद्रव्यमादाय-अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) कृतैतदूनमासिक द्वितीयमासिकत्रैपक्षिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषण्मासिकोनषण्मासिकसप्तममासिकाष्टममासिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकोनाब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रेभ्योमुकशर्मभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ।

विष्णुस्मरणम् - देवताभ्य इति त्रिःपठेत् । अपसव्येन दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य श्राद्धसंपूर्णताकामः **प्रमादादि**ति पठित्वा विष्णुं स्मरेत्। श्राद्धीयवस्तूनि ब्राह्मणेभ्यः प्रतिपादयेत् पिण्डानि च जले क्षिपेत् ।

इति षोडशश्राद्धान्तर्गतोनमासिकादीनां पञ्चदशानां
श्राद्धानां तन्त्रेणापात्रकप्रयोगः ।

सपिण्डीकरणविधिः

सपिण्डीकरणे इतिकर्तव्यता-

मातृविषये शङ्खः-

मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतैः ।
पितामह्यादिभिः सार्धं सपिण्डीकरणं स्मृतम् ।।

कारिकायाम् - **पितामह्यादिभिः सार्धं मातरं तु सपिण्डयेत् ।**

सहगमने यमः- **पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः ।**

हारीतोपि- **स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः ।**
एकत्वं सा गता यस्माच्चरुमन्त्राहुतिव्रतैः ।।

पत्नीविषये पैठीनसिः-

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डनम् ।
श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्।।

पुत्रिकापुत्रकर्तृके सपिण्डने मनुः-

मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः ।
द्वितीयं तु पितुस्तस्या तृतीयं तु पितुःपितुः ।।

पतिपुत्ररहितायाः सपिण्डनमेव निषिद्धम्, तथा च मार्कण्डेयः-

स्त्रीणामप्येवमेवैतदेकोद्दिष्टं विधीयते ।
सपिण्डीकरणं तासां पुत्राभावे न विद्यते ।।
पुत्रेणैव तु कर्तव्यं सपिण्डीकरणं स्त्रियाः ।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये ।।

अत्र पुत्राभाव इत्युपलक्षणम्, पतिपुत्राभावो द्रष्टव्यः । पतिकर्तृकस्य

सपिण्डनस्य विधानात् एवं सपत्नीपुत्रेऽपि विद्यमाने स्त्रियाः सपिण्डनं भवति ।

मनुरप्याह- **बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।**
सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीत् ।।

अपुत्रायाःसपत्नीपुत्रेण पुत्रिणीत्वमित्यतिदेशात् पितुः सपिण्डनं पितामहादिभिः सह कुर्यात् ।

व्युत्क्रममृते तु ब्रह्मपुराणे-

मृते पितरि यस्याथ विद्यते च पितामहः ।
तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः ।।
तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यश्च पूर्ववत् ।
मातर्यग्रे मृतायां तु विद्यते च पितामही ।।
प्रपितामहीपूर्वकस्तु कार्यस्तत्राप्ययं विधिः ।

एवञ्च जीवन्तमतिक्रम्य त्रिकपूरणं कर्तव्यम्-

व्युत्क्रमाच्च प्रमीतानां नैव कार्यं सपिण्डनम् । इति तु मातृपितृभर्त्रतिरिक्तविषयम् । अत एव स्कान्दे-

व्युत्क्रमेण मृतानां च सपिण्डीकृतिरिष्यते ।
यदि माता यदि पिता भर्ता नैष विधिः स्मृतः ।।

एष विधिः सपिण्डननिषेधरूपो यतिविषये । उशनाः-

सपिण्डीकरणं तेषां न कर्तव्यं सुतादिभिः ।
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ।।

शूद्रस्य विषये विष्णुराह-

मन्त्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्तितम् ।

अमावास्याश्राद्धकारिशूद्रविषयमेतदपरार्के कल्पतरौ च ।

यत्तु कात्यायनः-

सर्वेषामेववर्णानामाशौचान्ते सपिण्डनम् । इति व्यतिरिक्तविषयम्।

त्रैवर्णिकजातशूद्रस्य तु शङ्खेन लिख्यते-

नो यतेस्तु सपिण्डत्त्वं येषां शूद्रकुलोद्भवः ।
सर्वे शूद्रत्वमायान्ति यदि स्वर्गजितोऽपि ते ।।

सपिण्डीकरणे ज्येष्ठपुत्रस्यैवाधिकारः ।

यदि षोडशश्राद्धानि कनिष्ठभ्रात्रादिना कृतानि तदा ज्येष्ठः सपिण्डनमेव कुर्यादित्यपरार्कः । इदं सति ज्येष्ठे तदभावे कनिष्ठेन तदभावे भ्रात्राद्यधिकारिभिः पुरुषस्य सपिण्डनं कार्यम्-

भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा ।
सपिण्डीकरणं कुर्यात्पुत्रहीने मृते सति ।।

इति मनुवचनात् । तथा -

ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते ।
देशान्तरगतानाञ्च पुत्राणां च कथं भवेत् ।।
श्रुत्वा तु वपनं कार्यं दशाहान्तं तिलोदकम् ।
सपिण्डीकरणं कुर्यात्तद्वदेकादशेऽहनि ।।
द्वादशाहे न कर्तव्यमिति भ्रात्रा तथाऽब्रवीत् ।

स्मृत्यर्थसारे तु- ब्रह्मचारिणामनपत्यानां च सपिण्डनं नास्ति । तेषां सदैकोद्दिष्टमेव व्युत्क्रममृतानां व्यवहितं सपिण्डनं कार्यं न वा केचित्सर्वसपिण्डनमाहुः । यतीनां प्रेतत्वं नास्ति, अतस्तेषां नैकोद्दिष्टं न सपिण्डनं किं त्वेकादशेऽहनि पार्वणं कार्यम् इति, दण्डग्रहणात्पूर्वं मृते दाहादिसपिण्डनान्तसर्वकार्यं भवति । एकाहाशौचे द्वादशेऽहनि तृतीयेऽहनि वा त्र्यहाशौचे पञ्चमेऽहनि सपिण्डनं कार्यम् । तच्च सपिण्डनमनेककालत्वेऽपि कलौ द्वादशाहे कार्यम्-

आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अनित्यत्वाच्छरीरस्य द्वादशाहे प्रशस्यते ।। इति वचनात्।

गोभिलः- द्वादशाहादिकालेषु प्रमादाद्यदनुष्ठितम् ।
सपिण्डीकरणं कुर्यात् कालेषूत्तरभाविषु ।।

उत्तरभाविषु- त्रिपक्षादिषु, ते च काला भविष्यपुराणे उक्ताः -

सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ।
अनाहिताग्निः प्रेतस्य पूर्णेऽब्दे भरतर्षभ ।।
द्वादशेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासि वा ।
एकादशेऽपि वा मासि मङ्गल्यं स्यादुपस्थितम् ।।

षष्ठे मासीत्यन्वयः । यदा मङ्गलं वृद्ध्याद्युपस्थितं स्यात्ततः पूर्वमपि कालमिच्छन्ति ।

सपिण्डीकरणम्

प्रयोगः- सपिण्डीकरणं बहुधाऽपात्रकमेवाचरन्तीति अपात्रक एव प्रयोगो लिख्यते । तत्र कर्ता (प्रातःकृतनित्यक्रियः) मध्याह्ने स्नातः शुचिराचान्तः परिहितधौतवस्त्रः पूर्वोपकल्पितं स्थापितगौरसर्षपादिरक्षोघ्नं श्राद्धदेशं गत्वा (दक्षिणाभिमुखं) रक्षोघ्नदीपं प्रज्वलय्य प्राङ्मुख आसने उपविश्याचम्य (गणेशादीन् स्मृत्वा तैलाभ्यङ्गपूर्वकं कुशबटून् संस्नाप्य **मनोजूति**रितिमन्त्रेण प्राणप्रतिष्ठां कृत्वा यवान् गृहीत्वा वैश्वदेवब्राह्मणं निमन्त्रयेत् ।

वैश्वदेवब्राह्मणनिमन्त्रणम्- तद्यथा - अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः श्वश्रादीनाम्) पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां कालकामसंज्ञाकानां विश्वेषां देवानां सपिण्डीकरणश्राद्धे **भवान् मया निमन्त्रितः** । **निमन्त्रितोऽस्मी**ति प्रतिवचनम् ।

पादार्घदानम्- ततो गन्धपुष्पादिभिः पादार्घं संपाद्य हस्ते गृहीत्वा- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) अमुकगोत्रपितृपितामहप्रपितामहवसुरुद्रादित्य (प्रेताश्वश्वश्र्वादिवस्वादि) स्वरूपसम्बन्धिनः कालकामसंज्ञका विश्वेदेवा **एष पादार्घो वोऽस्तु** इति पादार्घं दद्यात् ।

प्रेतब्राह्मणनिमन्त्रणम्- ततः प्रेतश्राद्धस्थानमागत्य कृतापसव्यो वामजानु पातयित्वा तिलान् गृहीत्वा पठेत् -

गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात् पथः ।
मनसा वायुभूतेन विप्रे त्वाहं नियोजये ।।

पूजयिष्यामि भोगेन .... इति पठित्वा अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे **भवान् मया निमन्त्रितः । निमन्त्रितोऽस्मी**ति प्रतिवचनम् ।

प्रेताय पादार्घदानम्- ततः **अक्रोधनैः०** इत्यादि पठित्वा पादार्घं संपाद्य हस्ते गृहीत्वा- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणनिमित्तकश्राद्धे **एष पादार्घस्ते मया दीयते तवोपतिष्ठताम्** इति पादार्घं दद्यात् ।

पितृब्राह्मणनिमन्त्रणम्- ततः सव्येनाचम्य पञ्चगव्याभिषिक्तः पितृश्राद्धस्थानमागत्य वामजानु पातयित्वा कृतापसव्यो दक्षिणाभिमुखस्तिलादिकमादाय-अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे प्रेतपितृपितामहप्रपितामहानाममुकामुकस्वरूपाणां वसुरुद्रादित्यस्वरूपाणां (प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूणामुकामुकामुकदेवीनां वसुरुद्रादित्यस्वरूपाणां) कृत्ये **भवान् मया निमन्त्रितः । निमन्त्रितोऽस्मी**ति प्रतिवचनम् ।

पितृब्राह्मणेभ्यः पादार्घदानम्- अक्रोधनैः० इत्यादि पठित्वा पादार्घं संपाद्य हस्ते गृहीत्वा- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः प्रेतपितृपितामहप्रपितामहा अमुकामुकामुकशर्मणः (प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्र्वोऽमुकामुकामुकदेव्यः) वसुरुद्रादित्यस्वरूप।

एष पादार्घस्त्रेधा विभज्य वोऽस्तु इति पादार्घं दद्यात् । पृथग् ब्राह्मणस्थापनपक्षे एकवचनान्तं संबोधनवाक्यं कृत्वा प्रत्येकमर्घो देयः । एवमुत्तरत्रापि बोध्यम्।

आसनम् - ततः सव्येन **आगता यूयम्, सुस्वागता वयम्, इदमासनमास्यताम्,** इति विश्वेदेवब्राह्मणाय आसनं दद्यात्, **आस्यते** इति प्रतिवचनम्।

अपसव्येन प्रेतब्राह्मणसमीपं गत्वा पूर्ववत्सर्वं कुर्यात् । एवमेव पितृब्राह्मणसमीपं गत्वा कर्तव्यम् । प्रेतस्थानात्पितृस्थानगमनसमये पञ्चगव्याभिषेचनग्रहणं कर्तव्यं समाचारात् ।

सव्येन वैश्वदेविकब्राह्मणं प्राङ्मुखमुपवेशयेत् । अपसव्येन प्रेतब्राह्मणमुदङ्मुखमुपवेशयेत् । पितृब्राह्मणञ्चोदङ्मुखमेवोपवेशयेत् ।

कर्मपात्रविधानम्- ततः सव्येन **कर्मपात्रमहं करिष्ये** इति विश्वेदेवब्राह्मणं पृच्छेत्, **कुरुष्व** इत्यनुज्ञातः सन् **यद्देवा०** इत्यादिकण्डिकात्रयेण कर्मपात्रं चतुष्कोणान्तर्गतलिखितपूजितशङ्खचक्रोपरि घृतकुशासने स्थापयित्वा, तत्र **पवित्रेस्थोवैष्णव्यौ०** इति मन्त्रेण पवित्रे, **शन्नोदेवी**रिति जलम्, **यवोसी**ति यवान्, **श्रीश्चते** इति पुष्पम्, **गन्धद्वारा**मिति गन्धं क्षिपेत् ।

अपसव्येन प्रेतकर्मपात्रं कृत्वा **कर्मपात्रमहं करिष्ये** इति पितृब्राह्मणं पृच्छेत्, **कुरुष्व** इति तेनानुज्ञातः सन् पूर्ववत्कर्मपात्रं कुर्यात् ।

तत्र यवप्रक्षेपस्थाने- **तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः । प्रत्नमद्भिःपृक्तस्वधयापितॄँल्लोकान्पृणाहिनःस्वाहा ।।** इति मन्त्रेण तिलप्रक्षेपो विशेषः ।

ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय-

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

इति पठित्वा **ॐ पुण्डरीकाक्षः पुनातु** इत्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मानं सिञ्चेत् ।

प्रतिज्ञासङ्कल्पः- ततः कुशादिकमादाय- ॐ अद्येहेत्यादिदेशकालौ सङ्कीर्त्य अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तिपितृलोकप्राप्त्यर्थममुकगोत्रैः प्रेतपितृपितामहप्रपितामहैरमुकामुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः सह (अमुकगोत्राभिः प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूभिरमुकामुकामुकदेवीभिर्वसुरुद्रादित्यस्वरूपाभिः) सह कालकामसंज्ञकविश्वदेवपूर्वकं अर्घ्यपिण्डसहितं सपिण्डीकरणश्राद्धं मृताहाद् द्वादशेऽह्नि पार्वणैकोद्दिष्टविधिनाऽहं करिष्ये इति ।

मातुः सपिण्डने सहगमने च विशेषः- मातुः सपिण्डीकरणमपि कोष्ठकान्तर्लिखितवाक्यपर्यालोचनेन कर्तव्यम् । सहगमने तु - अमुकगोत्रेण स्वभर्त्रा सह सपिण्डीकरणश्राद्धं करिष्ये इति विशेषः। भ्रातुः पितृव्यस्यापि पूर्वोक्तप्रकारेणैव वाक्यानि कर्तव्यानि ।

ततः सव्येन त्रिःप्रणवव्याहृतिसहितां गायत्रीं जपित्वा **देवताभ्यः०** इति त्रिःपठेत् । **सप्तव्याधाः०** इत्यादि च पठनीयम् ।

दिग्बन्धनम्- अपसव्येन तिलसहितमोटकमादाय- **अग्निष्वात्ताःपितृगणाःप्राचींरक्षन्तुमेदिशम्। अपहताऽअसुरारक्षाꣳसिवेदिषदः।। तथाबर्हिषदःपान्तुयाम्यांयेपितरःस्थिताः। अप०।। प्रतीचीमाज्यपास्तद्वत्। अप०।। उदीचीमपिसोमपाः। अप०।। ऊर्ध्वतस्त्वर्यमारक्षेत्कव्यवाडनलोप्यधः। अप० ।।**

रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।।

नीवीबन्धनम्- पुष्पसहितं मोटकं वामकट्यां धारयेत्- **ॐ सोमस्यनीविरसिविष्णोःशर्मासिशर्मयजमानस्येन्द्रस्ययोनिरसिसुसस्याःकृषीस्कृधि ।।** अनेन मन्त्रेण, **निहन्मी**त्येतेन मन्त्रेण वा ।

विश्वेदेवब्राह्मणासनम् - ततो विश्वदेवस्थानमागत्य उदङ्मुख उपविश्य सव्येन ऋजुकुशानादाय- ॐ अद्येहेत्यादि अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः

प्रेतायाः) सपिण्डीकरणनिमित्तकामुकगोत्रप्रेतपितृपितामहप्रपितामहामुकामुकामुकशर्मवसुरुद्रादित्य (प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूअमुकामुकामुकदेवीवसुरुद्रादित्य) स्वरूपश्राद्धसम्बन्धिनां कालकामसंज्ञकानां विश्वेषां देवानामिदमासनं वोऽस्तु इति पूर्वाग्रकुशरूपमासनं यवजलप्रोक्षितमुत्सृजेत् ।

विश्वेदेवावाहनम्- ततो यवान् गृहीत्वा विश्वान् देवानावाहयेत्- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकगोत्रप्रेतपितृपितामहप्रपितामहामुकामुकामुकशर्मवसुरुद्रादित्य (अमुकगोत्रप्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रवमुकामुकामुकदेवीवसुरुद्रादित्य) स्वरूपश्राद्धसम्बन्धिनः कालकामसंज्ञकान् विश्वान् देवानावाहयिष्ये । इत्युक्त्वा आवाहय इत्यनुज्ञातः- **ॐ विश्वेदेवासऽआगतशृणुतामऽइमꣳहवम्। एदम्बर्हिर्न्निषीदत।** इत्यावाह्य **ॐ यवोसियवयास्मद्द्वेषोयवयारातीः ।।** इति मन्त्रेण श्राद्धदेशे यवान् विकीर्य अञ्जलिं बध्वा **ॐ विश्वेदेवाशृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादध्वम्।।** इति मन्त्रं पठित्वा-

ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये ह्यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ।। इति पठेत् ।

हस्तार्घस्थापनम्- एकं पुटकमग्रे कृत्वा तदुपरि **ॐ पवित्रेस्थोवैष्णव्यौ०** इति मन्त्रेण द्विशिखं पवित्रं पूर्वाग्रं धारयेत् । **ॐ शन्नोदेवी**रिति जलम्, **यवोसी**ति यवान्, **श्रीश्चते** इति पुष्पम्, **गन्धद्वारा**मिति गन्धं क्षिपेत् । **हस्तार्घपात्रं सम्पन्नम्,** इति पृच्छेत् **संपन्नमि**ति प्रतिवचनम् ।

हस्तार्घाभिमन्त्रणम् - ततो हस्तार्घपात्रं वामहस्ते कृत्वा **ॐ नमो नारायणाय** इति मन्त्रेण पुष्पसहितं पवित्रं विप्रकरे पूर्वाग्रं धृत्वा वामहस्तस्थमर्घपात्रं दक्षिणहस्तेन पिधाय- **ॐ यादिव्याऽआपःपयसासंबभूवुर्याऽअन्तरिक्षाऽउतपार्थवीर्याः । हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशꣳस्योनाःसुहवाभवन्तु ।।** इति जलमभिमन्त्रयेत् ।

हस्तार्घदानसङ्कल्पः - कुशादिसहितमर्घपात्रं दक्षिणहस्तेनादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकगोत्रप्रेतपितृपितामहप्रपितामहामुकामुकामुकशर्मवसुरुद्रादित्य (अमुकगोत्रप्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्वश्रमुकामुकामुकदेवीवसुरुद्रादित्य) स्वरूपश्राद्धसम्बन्धिनः कालकामसंज्ञका विश्वेदेवा एष हस्तार्घो वोऽस्तु, इति पवित्रोपरि अर्घजलं दददुत्सृजेत् ।

अर्घे पुनः प्रत्यर्घ्यमस्तु इति ब्राह्मणकरस्थं पुष्पसहितं पवित्रं तस्मिन्नेव हस्तार्घपात्रे संस्थाप्य तदर्घपात्रं ब्राह्मणदक्षिणपार्श्वे कालकामसंज्ञकेभ्यो **विश्वेभ्यो देवेभ्यः स्थानमसि** इति उत्तानमेव स्थापयेत् ।

विश्वेदेवब्राह्मणपूजनम्- ततो देवब्राह्मणं गन्धादिभिः संपूज्य कुशादिकमादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकगोत्रप्रेतपितृपितामहामुकामुकामुकशर्मवसुरुद्रादित्य- (अमुकगोत्रप्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्वश्रमुकामुकामुकदेवीवसुरुद्रादित्य)- स्वरूपश्राद्धसम्बन्धिनः कालकामसंज्ञका विश्वेदेवा एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि वः स्वाहा इति गन्धादिकमुत्सृजेत् । अर्चनाविधेः **सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्** इति प्रतिवचनम् । स्वयमाचम्य ब्राह्मणं चाचामयेत् ।

भूस्वामिनेऽन्नदानम्- ततोऽपसव्येन तिलघृतजलयुतमन्नं मोटकादिसहितमादाय- **ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत् ।

चतुष्कोणमण्डलनिर्माणम्- ततः सव्येनासनसहितस्यान्नपात्रस्य चतुर्दिक्षु-

यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।
एवं भूमण्डलं चैतत्सर्वभूतानि रक्षतु ।।

इति मन्त्रेण भस्मादिना चतुष्कोणं मण्डलं विदध्यात् ।

अन्नदानम्- विश्वान् देवान् ध्यायन् सोपस्करं यवजलयुतमन्नमुपनीयमधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य जपति- **ॐ पृथिवीतेपात्रंद्यौररपिधानं-**

ब्राह्मणस्यमुखेऽमृतेऽमृतंजुहोमिस्वाहा ।। ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरे।। ॐ विष्णोहव्यꣳरक्ष(मदीम्)।। इति पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा- **ॐ इदमन्नम्** इत्यन्ने, **ॐ इमा आपः** इति जले, **ॐ इदमाज्यम्** इति घृते, **ॐ इदं ह**विरिति पुनरन्ने निवेश्य- **ॐ यवोसियवयास्मद्द्वेषोयवयारातीः (ॐ अपहताऽअसुरारक्षाꣳसिवेदिषदः)** इति मन्त्रेण श्राद्धदेशे यवान् विकिरेत् ।

अन्नदानसङ्कल्पः - वामहस्ताङ्गुल्यङ्गुष्ठैः क्रमेणान्नमपश्च स्पृष्ट्वा दक्षिणहस्ते कुशयवजलान्यादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकामुकगोत्रप्रेतपितृपितामहवृद्धप्रपितामहामुकामुकामुकशर्मवसुरुद्रादित्य-(अमुकगोत्रप्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रमुकामुकामुकदेवीवसुरुद्रादित्य)-स्वरूपश्राद्धसम्बन्धिभ्यः कालकामसंज्ञेकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं च यथाभागं वः स्वाहा इत्युक्त्वा भूमौ वामभागे जलमुत्सृजेत् । **ॐ अन्नसङ्कल्पसिद्धिरस्तु, ॐ भवन्तः प्राशयन्तु** इति विप्रकरे जलं दद्यात् ।

प्रेतासनम्- एवं देवश्राद्धं निर्वर्त्य हस्तौ पादौ प्रक्षाल्याचम्य प्रेतश्राद्धदेशमागत्योपविश्य कृतासव्यो दक्षिणाभिमुखः कुशादीन्यादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) इदमासनं ते **मया दीयते तवोपतिष्ठताम्** इति कुशरूपमासनमुत्सृजेत् ।

पितृब्राह्मणासनम्- ततः पञ्चगव्येन सिक्तः पितृश्राद्धदेशमागत्य तिलमोटकजलान्यादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राणां प्रेतपितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (अमुकगोत्राणां प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूणाममुकामुकामुकदेवीनां) वसुरुद्रादित्यस्वरूपाणामिदं मोटकरूपमासनं त्रेधा विभज्य वोऽस्तु, इति दद्यात् । ब्राह्मणत्रयस्थापनपक्षेषष्ठ्येकवचनान्तं वाक्यं कृत्वा प्रत्येकमासनं दद्यात्।

पितृब्राह्मणावाहनम्- ततः प्रेतवर्जं प्रेतपित्रादीनुद्दिश्य तिलान् गृहीत्वा- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रान् प्रेतपितृपितामहप्रपितामहान् अमुकामुकामुकशर्मणो वसुरुद्रादित्यस्वरूपान् (अमुकगोत्राः प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूः अमुकामुकामुकदेवीः वसुरुद्रादित्यस्वरूपाः) पितृनावाहयिष्ये, आवाहय इत्यनुज्ञातः- **ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि । उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे ।।** इत्यावाह्य **ॐ अपहताऽअसुरारक्षाᳬंसिवेदिषदः।।** इति तिलान् विकीर्य- **ॐ आयन्तुनःपितरःसोम्यासोऽअग्निष्वात्ताःपथिभिर्देवयानैः। अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्।।** इति मन्त्रं जपेत्।

हस्तार्घदानम्- ततो हस्तार्घार्थं पूर्वभागे (प्रेतस्थाने) एकं पुटकं संस्थाप्य तत्पश्चिमभागे (पितृस्थाने) दक्षिणसंस्थं पुटपात्रत्रयमासाद्य तेषु चतुर्षु पात्रेषु **पवित्रेस्थोवैष्णव्यौ** इति मन्त्रेण प्रत्येकमुत्तराग्राणि पवित्राणि धृत्वा जलतिलगन्धपुष्पाक्षतानि स्वस्वमन्त्रैस्तेषु क्षिपेत् ।

प्रेतहस्तार्घाभिमन्त्रणम्- ततः प्रेतार्घपात्रं वामहस्ते कृत्वा **ॐ नमो नारायणाय** इति मन्त्रेण उत्तराग्रं पवित्रं विप्रपाणौ धृत्वा **यादिव्या** इति मन्त्रेणार्घपात्रं दक्षिणहस्तेनाच्छाद्याभिमन्त्र्य कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणश्राद्धे **एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्** । इति विप्रकरस्थपवित्रोपरि चतुर्थभागं जलं दददुत्सृजेत्।

प्रेतार्घपात्रस्थजलस्य पित्राद्यर्घपात्रे संयोजनम्

प्रयोगः- ततः पूर्वोक्तरीत्या पितृश्राद्धदेशमागत्य दक्षिणाभिमुखः पातितवामजानुर्मोटितकुशतिलजलान्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) प्रेतत्वविमुक्तये पितृपदप्राप्त्यर्थं प्रेतार्घपात्रोदकममुकगोत्राणां प्रेतपितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां (प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूणाममुका-

मुक्तामुक्तदेवीनां) **अर्घपात्रोदकैः सह संयोजयिष्ये,** इति पृष्ट्वा **संयोजय** इत्यनुज्ञातः । प्रेतार्घपात्रजलस्य भागत्रयं कृत्वा प्रेतपित्राद्यर्घपात्रत्रये वक्ष्यमाणमन्त्रैः संयोजयेत्।

संयोजनविधिः- तत्र विशेषः - प्रेतार्घपात्रजलविभागेऽपि **येसमाना** इति मन्त्रद्वयपाठः कर्तव्यः-

निरूप्य चतुरः पिण्डाञ्छ्राद्धदः प्रतिनामतः ।
ये समाना इति द्वाभ्यामाद्यं तु विभजेत् त्रिधा ।
एष एव विधिः प्रोक्त अर्घपात्रचतुष्टये ।। इति वचनात्।

मिताक्षरायां स्मृत्यर्थसारे च- प्रेतार्घपात्रजलमादौ पितामहार्घपात्रे संयोज्यावशिष्टजलेन प्रेतार्घं दद्यादित्युक्तम् ।

तत्र क्रमः- सव्यं कृत्वाचम्यापसव्यं कृत्वाऽन्यत्पुटकत्रयमग्रे कृत्वा प्रेतार्घपात्रं गृहीत्वा- **येसमानासमनसःपितरोयमराज्ये । तेषाँल्लोकःस्वधानमोयज्ञोदेवेषुकल्पताम् ।। येसमानासमनसोजीवाजीवेषुमामकाः । तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः ।।** इति मन्त्रद्वयं पठेत् ।

ततः प्रेतार्घपात्रस्थजलतृतीयभागं पुटकान्तरे धृत्वा पुनरपि मन्त्रद्वयं पठित्वा अपरतृतीयभागं पुटकान्तरे धृत्वा पुनरपि मन्त्रद्वयं पठित्वा अवशिष्टजलतृतीयभागं पुटकान्तरे धृत्वा प्रथमपुटकस्थविभक्तजलतृतीयभागं प्रेतार्घपात्रे कृत्वा पवित्रपुष्पसहितं प्रेतार्घमादाय मन्त्रपाठं कुर्यात् ।

मन्त्रपाठः- ॐ येसमानाःसमनसःपितरोयमराज्ये । तेषाँल्लोकःस्वधानमोयज्ञोदेवेषुकल्पताम् ।। ॐ येसमानाःसमनसोजीवाजीवेषुमामकाः। तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः ।। (संसृजन्तुत्वापृथिवीवायुरग्निःप्रजापतिःसंसृजध्वंपूर्वेभिःपितृभिःसह । समानीवआकूतिःसमानाहृदयानिवः ।। समानमस्तुवोमनोयथानःसुसहासति । सङ्गच्छध्वंसंवदध्वंसम्वोमनांसिजानताम् ।। देवाभागंयथापूर्वेसञ्जानानाउपासते।)

मधुवाता:० इति ऋक्त्रयमपि पठेदिति केचित् ।

प्रेतार्घपात्रस्थजलस्य पित्रर्घपात्रजलेन संयोजनम् - पूर्वोक्तमन्त्रान् पठित्वा प्रेतार्घपात्रस्थजलतृतीयभागम्- अमुकगोत्रामुकप्रेत अमुकगोत्रेणामुकशर्मणा स्वपित्रा (गोत्रे प्रेते अमुकगोत्रया अमुकदेव्या स्वश्वश्र्वा) सह सायुज्यं गच्छ इत्युक्त्वा प्रेतपित्रर्घपात्रजले मेलयेत् ॥१॥

प्रेतार्घपात्रस्थजलस्य पितामहार्घपात्रजलेन संयोजनम् - पुनः पूर्वोक्तमन्त्रान् पठित्वा- अमुकगोत्रामुकप्रेतऽमुकगोत्रेणऽमुकशर्मणा स्वपितामहेन (गोत्रे प्रेते गोत्रया देव्या स्ववृद्धश्वश्र्वा) सह सायुज्यं गच्छ इत्युक्त्वा प्रेतार्घपात्रस्थजलतृतीयभागं प्रेतपितामहार्घपात्रजले मेलयेत् ॥२॥

प्रेतार्घपात्रस्थजलस्य प्रपितामहार्घपात्रजलेन संयोजनम् - पुनः पूर्वोक्तमन्त्रान् पठित्वा- अमुकगोत्रामुकप्रेतामुकगोत्रेणामुकशर्मणा स्वप्रपितामहेन (गोत्रे प्रेते गोत्रया देव्या स्ववृद्धतरश्वश्र्वा) सह सायुज्यं गच्छ इत्युक्त्वा प्रेतार्घपात्रस्थजलतृतीयभागं प्रेतप्रपितामहार्घपात्रजले मेलयेत् ॥३॥

पित्रादिहस्तार्घदानम्

पित्रे हस्तार्घदानम्- ततः अमुकगोत्रामुकप्रेतामुकगोत्रैरमुकामुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः स्वपितृपितामहप्रपितामहैः (गोत्रे प्रेते गोत्राभिः देवीभिः वसुरुद्रादित्यस्वरूपाभिः स्वश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूभिः) सह सायुज्यं गच्छ इत्युक्त्वा प्रेतपित्रर्घपात्रं वामहस्ते कृत्वा **ॐ नमो नारायणाय** इति मन्त्रेण विप्रकरे उत्तराग्रं पवित्रं धृत्वा **ॐ यादिव्याः** इति मन्त्रेण अर्घपात्रस्थजलमभिमन्त्र्य मोटकादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रप्रेतपितरमुकशर्मन् वसुस्वरूप (अमुकगोत्रे प्रेताश्वश्रु अमुकदेवि वसुस्वरूपे) एषो हस्तार्घस्तेऽस्तु इति सपवित्रविप्रकरे अर्घजलं दददुत्सृजेत् । अर्घे प्रत्यर्घमस्तु पवित्रपुष्पसहितमर्घपात्रमग्रे धारयेत् ॥१॥

पितामहाय हस्तार्घदानम्- ततोऽपरार्घपात्रं वामहस्ते धृत्वा - **ॐ नमो नारायणाय** इति मन्त्रेण उत्तराग्रं पवित्रं विप्रकरे धृत्वा **ॐ यादिव्या** इत्यादिना अर्घपात्रस्थजलमभिमन्त्र्य मोटकादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रप्रेतपितामहामुकशर्मन् रुद्रस्वरूप (अमुकगोत्रे प्रेतावृद्धश्वश्रु अमुकदेवि रुद्रस्वरूपे) एषो हस्तार्घस्तेऽस्तु । अर्घे प्रत्यर्घ्यमस् पवित्रपुष्पसहितमर्घपात्रमग्रे स्थापयेत् ॥२॥

प्रपितामहाय हस्तार्घदानम् - तृतीयार्घपात्रं वामहस्ते कृत्वा - **ॐ नमो नारायणाय** इति मन्त्रेण पुष्पसहितं पवित्रमुत्तराग्रंविप्रकरे धृत्वा **ॐ यादिव्या** इत्यादिना अर्घपात्रस्थजलमभिमन्त्र्य मोटकादिकमादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रप्रेतप्रपितामहामुकशर्मन् आदित्यस्वरूप (अमुकगोत्रे प्रेतावृद्धतरश्वश्रु अमुकदेवि आदित्यस्वरूपे) एष हस्तार्घस्तेऽस्तु । अर्घे प्रत्यर्घमस्तु । पवित्रपुष्पसहितमर्घपात्रमग्रे स्थापयेत् ॥३॥

ततः प्रेतार्घपात्रं प्रेतासनवामपार्श्वे **प्रेताय स्थानमसि** इत्युत्तानमेवस्थापयेत् । तदुपरि कुशान् दद्यात् । प्रेतप्रपितामहार्घपात्रस्थजलादिकं प्रेतपितामहार्घपात्रे कृत्वा तत्सर्वं तत्पितृपात्रे कृत्वा प्रेतपित्रर्घपात्रम् उत्ताने पितामहार्घपात्रे धृत्वा तद्वयमुत्ताने एव प्रपितामहार्घपात्रे धृत्वा पात्रत्रयमेकदैव प्रेतपितृविप्रवामपार्श्वे पितृभ्यः **स्थानमसि** इति न्युब्जं कृत्वा तदुपरि कुशत्रयं दद्यात्। एवं स्थापितमर्घपात्रचतुष्टयं दक्षिणापर्यन्तं न चालयेत् ।

प्रेतपूजनम्- क्रमेण प्रेतमारभ्य गन्धादिभिः सर्वान् संपूज्य कुशादिकमादाय-अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणश्राद्धे **एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि ते मया दीयन्ते तवोपतिष्ठन्ताम्,** इति प्रेताय गन्धादिकमुत्सृजेत् ।

प्रेतपितृपूजनम्- पुनर्मोटकादिकमादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः प्रेतपितामहप्रपितामहा अमुकामुकामुकशर्माणः (प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्र्वोऽमुकामुकामुकदेव्यः) वसुरुद्रादित्यस्वरूपा एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि युष्मभ्यं स्वधा इति गन्धादिकमुत्सृजेत् । अर्चनाविधेः **सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्** इति प्रतिवचनम् ।

चतुष्कोणमण्डलनिर्माणम् - ततः सव्येनाचम्य अपसव्येन प्रेतासनस्य चतुर्दिक्षु जलादिना त्रिकोणं वर्तुलं मण्डलं वामावर्तेन विधाय - **यथा चक्रायुधो विष्णुः०** इति अनेन पित्रादित्रयस्यासनचतुर्दिक्षु वामावर्तेन चतुष्कोणं मण्डलं (लत्रयं) कुर्यात् ।

अग्नौकरणम्- ततः सघृतमन्नं पुटकादौ कृत्वाऽपरपुटकादौ जलञ्च कृत्वा **ॐ अग्नौकरण**महं करिष्ये, इति ब्राह्मणान् पृच्छेत् । **ॐ कुरुष्व** इत्यनुज्ञातः सन् अपसव्येन पातितवामजानुः **ॐ अग्नये** कव्यवाहनाय स्वाहा, **इदमग्नये** कव्यवाहनाय । **ॐ सोमाय** पितृमते स्वाहा, इदꣳसोमाय पितृमते इत्याहुतिद्वयं जले हुत्वाऽवशिष्टमन्नं किञ्चित्पित्रादिपात्रे क्षिप्त्वा किञ्चित् पिण्डार्थं स्थापयेत् ।

ततः क्रमेण प्रत्येकं सोपस्करमन्नमुपनीय पृथक् पृथक् पुटकस्थितसतिलजलं चोपनीय प्रेतपात्रादिस्थितान्नेषु मधु दद्यात् ।

प्रेतायान्नदानम्- ततः पात्रालम्भनाङ्गुष्ठावगाहनं विना **पृथिवीतेपात्रंद्यौरित्यादि० जुहोमिस्वाहा,** इत्यन्तम्, **इदं विष्णुः०** इत्यादि **पाꣳसुरे** इत्यन्तञ्च पठित्वा, **अपहताः०** इत्यादिना प्रचुराँस्तिलान् श्राद्धदेशे विकीर्य कुशादीन्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः - अद्येहामुकगोत्रायामुकप्रेताय (गोत्रायै प्रेतायै) सपिण्डीकरणश्राद्धे **इदमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठताम्,** इति प्रेतायान्नमुत्सृजेत्।

पितृब्राह्मणान्नप्रदानम्

प्रयोगः- ततः पितृश्राद्धदेशमागत्य व्यस्ताभ्यां न्युब्जाभ्यां हस्ताभ्यामन्नपात्रमालभ्य जपति । **ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽमृतेऽमृतंजुहोमिस्वाहा ।। ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरे । ॐ विष्णोकव्यमिदक्षरक्षमदीयम् ।।** इति पठित्वा- **ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविः** इति क्रमेणान्नजलघृतादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य- **अपहताअसुरारक्षाꣳसिवेदिषदः।।** इति तिलान् प्रक्षिपेत् ।

प्रेतपित्रेऽन्नदानम् - वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा मोटकादीन्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय प्रेतपित्रेऽमुकशर्मणे वसुस्वरूपाय (अमुकगोत्रायै प्रेताश्वश्र्वै अमुकदेव्यै वसुस्वरूपायै) एतदन्नं सोपस्करणं सजलं यत्परिविष्टं यत्परिवेक्ष्यमाणञ्च ते स्वधा इति भूमौ मोटकादिकमुत्सृजेत् ।

प्रेतपितामहायान्नदानम्- पुनः पूर्ववत्पात्रालम्भनादि सर्वं कृत्वा मोटकादीन्यादाय- ॐ अद्येहा-मुकगोत्रस्यामुकप्रेतस्य(गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुक-गोत्राय प्रेतपितामहायामुकशर्मणे रुद्रस्वरूपाय (अमुकगोत्रायै प्रेतावृद्धश्वश्र्वै अमुकदेव्यै रुद्रस्वरूपायै) इदमन्नं सोपस्करणं सजलं यत्परिविष्टं यत्परिवेक्ष्य-माणञ्च ते स्वधा इति पूर्ववदुत्सृजेत्।

प्रेतप्रपितामहायान्नदानम्- पुनपूर्ववत्पात्रालम्भनादि सर्वं विधाय मोटकादिकं गृहीत्वा सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय प्रेतप्रपितामहायामुकशर्मणे आदित्यस्वरूपाय (अमुकगोत्रायै प्रेतावृद्धतरश्वश्र्वै अमुकदेव्यै आदित्यस्वरूपायै) इदमन्नं

सोपस्करं सजलं यत्परिविष्टं यत्परिवेक्ष्यमाणञ्च ते स्वधा इति पूर्ववदुत्सृजेत्।

अन्नसंकल्पसिद्धिरस्तु, ॐ भवन्तः प्राशयन्तुः इत्यपोशानं दद्यात्।

मधुवातादिपाठः- सव्येन प्रणवव्याहृतिपूर्विकां गायत्रीं जपित्वा- **ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः। माध्वीर्न्नःसन्त्वोषधीः।। मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः। मधुद्यौरस्तुनःपिता । मधुमान्नोवनस्पतिर्मधुमाँ२।।ऽअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः ।। ॐ मधु मधु मधु ।।** इति जपित्वा **अन्नहीनं०** जपित्वा **नमस्तुभ्यम्०** इति श्लोकं पठेत् **यथासुखं जुषध्वम्,** इति वचनानन्तरं पितृसूक्तञ्च पठेत् ।

विकिरासनम्- ततोऽपसव्येन पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिरासनं दद्यात् । मोटकमादाय-

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ।।

इत्यासनं दद्यात् ।

विकिरान्नदानम्- सतिलघृतमन्नमादाय जलेनाप्लाव्य-

अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ।।

इत्यास्तृतकुशोपरि तदन्नं विकिरेत् ।

मधुमतीमन्त्रजपः- ततो हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य विश्वेदेवब्राह्मणेभ्योऽपसव्येन पितृब्राह्मणेभ्यश्च उत्तरापोशानदानं कृत्वा सव्येन गायत्रीं मधुमतींश्च पूर्ववज्जपेत् ।

प्रश्नप्रतिवचने- ततोऽपसव्येन प्रेतब्राह्मणं **स्वदितमिति** पृच्छेत्, **स्वदितमिति** प्रतिवचनम् । ततः सव्येन विश्वान्देवान् पृच्छेत्, **तृप्ताः स्थेत्यादि** पृच्छेत्, ब्राह्मणाश्च **तृप्ताः स्मः** इत्यादि प्रतिवचनं दद्युः ।

अपसव्येन पितृब्राह्मणान्पृच्छेत् **तृप्ताः स्थे**त्यादि, ब्राह्मणाश्च **तृप्ताः स्मः** इत्यादि प्रतिवचनं दद्युः ।

पिण्डिकानिर्माणम्- अपसव्येनैव प्रेतपिण्डदानार्थमेकां प्रेतपित्रादिपिण्डदानार्थमपरां हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकीं दक्षिणप्लवां पिण्डिकां निर्माय प्रेतपिण्डिकायां रेखाकरणोल्मूकभ्रामणं विनैव छिन्नमूलकुशानास्तृणुयात् ।

पिण्डिकासंस्कारः- अपरपिण्डिकामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूलेन सव्योपगृहीतदक्षिणपाणिना- **ॐ अपहताऽअसुरारक्षाꣳसिवेदिषदः ।।** इति मन्त्रेण दक्षिणाग्रां प्रादेशमितां रेखां सकृदुल्लिख्य दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् ।

ततः **ॐ येरूपाणिप्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति । परापुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ।।** इति मन्त्रेणाङ्गारं भ्रमयित्वा दक्षिणतः क्षिपेत् ।

अवनेजनम्

प्रेतायावनेजनदानम्- ततो वेद्यां छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य सव्येनाचम्य अपसव्यं कृत्वा प्रेतश्राद्धदेशमागत्य कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत- (गोत्रे प्रेते) सपिण्डीकरणश्राद्धपिण्डस्थाने **इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्** इति पूर्वपिण्डिकायां छिन्नमूलकुशोपरि अवनेजनं दद्यात्।

प्रेतपित्रेऽवनेजनदानम्- ततोऽपरपुटकं वामहस्ते कृत्वा मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डस्थाने अमुकगोत्रप्रेतपितरमुकशर्मन्वसुस्वरूप (अमुकगोत्रे प्रेताश्वश्रु अमुकदेवि वसुस्वरूपे) अत्रावनेनिक्ष्व ते स्वधा इति द्वितीयपिण्डिकायामास्तृतकुशोपरि मूलसन्निधानेऽवनेजनं दद्यात् ।

प्रेतपितामहायावनेजनदानम्- पुनर्मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डिकरणनिमित्तश्राद्धपिण्डस्थाने अमुकगोत्रप्रेतपितामह अमुकशर्मन् रुद्रस्वरूप (अमुकगोत्रे प्रेतावृद्धश्वश्रु अमुकदेवि रुद्रस्वरूपे) अत्रावनेनिक्ष्व ते स्वधा इत्यास्तृतकुशमध्येऽवनेजनं दद्यात् ।

प्रेतप्रपितामहायावनेजनदानम्- पुनर्मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धपिण्डस्थानेऽमुकगोत्र प्रेतप्रपितामह अमुकशर्मन् आदित्यस्वरूप (अमुकगोत्रे प्रेतांवृद्धतरश्वश्रु अमुकदेवि आदित्यस्वरूपे) अत्रावनेनिक्ष्व ते स्वधा इत्यास्तृतकुशाग्रेऽवनेजनं दद्यात् ।

प्रेतपिण्डदानम् - ततः कपित्थप्रमाणान् चतुरः पिण्डान्निर्माय प्रथमपिण्डं कुशतिलसहितमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणश्राद्धे **एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** इति पूर्वपिण्डिकायां कुशोपरि प्रेतपिण्डं दद्यात् ।

प्रेतपितृपिण्डदानम् - ततो मोटकादीनि पिण्डं चादाय - ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रप्रेतपितरमुकशर्मन् वसुस्वरूप (प्रेताश्वश्रु अमुकगोत्रे अमुकदेवि वसुस्वरूपे) एषोऽन्नपिण्डोऽमृतस्वरूपस्ते स्वधा इति पश्चिमपिण्डिकायां प्रथमावनेजनस्थाने पिण्डं दद्यात् ।

प्रेतपितामहपिण्डदानम्- पुनर्मोटकादिसहितं पिण्डमादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रेतपितामह अमुकशर्मन् रुद्रस्वरूप (अमुकगोत्रे प्रेतावृद्धश्वश्रु अमुकदेवि रुद्रस्वरूपे) एषोऽन्नपिण्डोऽमृतस्वरूपस्ते स्वधा इति द्वितीयावनेजनस्थाने दद्यात् ।

प्रेतप्रपितामहपिण्डदानम्- पुनर्मोटकादीनि पिण्डञ्चादाय - ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रेतप्रपितामह अमुकशर्मन् आदित्यस्वरूप (अमुकगोत्रे प्रेतावृद्धतरश्वश्रु अमुकदेवि आदित्यस्वरूपे) एषोऽन्नपिण्डोऽमृतस्वरूपस्ते स्वधा इति तृतीयावनेजनस्थाने पिण्डं दद्यात्।

हरिस्मरणं भास्करमूर्तिचिन्तनञ्च - तत आस्तृतकुशमूलेन **लेपभागभुजस्तृप्यन्तु** इति करं प्रोक्ष्य सव्येना-चम्य हरिं स्मरेत् । ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो मन्त्रपाठं विना प्रेतं भास्करमूर्तिं चिन्तयेत् ।

श्वासनियमनपूर्वकं पिण्डेषु पुष्पादिप्रक्षेपः - ततः सव्येन पुष्पादीन्यादायप्रेतपित्रादीनुद्दिश्य **ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वम्** इति पठित्वा उत्तराभिमुखो भूत्वा श्वासं नियम्य- **ॐ अमीमदन्तपितरोयथाभागमावृषायिषत ।।** इति मन्त्रं पठित्वा पुष्पादिकानि पिण्डेषु क्षिपेत् ।

प्रत्यवनेजनम्

प्रेतप्रत्यवनेजनदानम्- ततः प्रेतावनेजनपात्रं वामहस्ते कृत्वा कुशादीन्यादाय-अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणनिमित्तकश्राद्धे इदं पिण्डं प्रत्यवनेजनं ते **मया दीयते तवोपतिष्ठताम्** इति प्रेताय प्रत्यवनेजनं दद्यात् ।

प्रेतपितृप्रत्यवनेजनदानम्- पितामहाद्यवनेजनपात्रं वामहस्ते कृत्वापसव्येन दक्षिणाभिमुखो भूत्वा- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रेतपितः अमुकशर्मन् वसुस्वरूप (अमुकगोत्रे प्रेताश्वश्रु अमुकदेवि वसुस्वरूपे) इदं पिण्डप्रत्यवनेजनं ते स्वधा इति प्रत्यवनेजनं दद्यात् ।

प्रेतपितामहप्रत्यवनेजनदानम्- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः

प्रेतायः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रेतपितामह (अमुकगोत्रे प्रेतावृद्धश्वश्रु अमुकदेवि रुद्रस्वरूपे) अमुकशर्मन् रुद्रस्वरूप इदं पिण्डप्रत्यवनेजनं ते स्वधा इति प्रत्यवनेजनं दद्यात् ।

प्रेतप्रपितामहप्रत्यवनेजनदानम्- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रेतप्रपितामह अमुकशर्मन् आदित्यस्वरूप (अमुकगोत्रे प्रेतावृद्धतरश्वश्रु अमुकदेवि आदित्यस्वरूपे) इदं पिण्डप्रत्यवनेजनं ते स्वधा इति प्रत्यवनेजनं दद्यात् ।

प्रेताय सूत्रदानम्- ततो नीवीं विस्रस्य सव्येनाचम्यापसव्येन प्रेतश्राद्धदेशमागत्य वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय मन्त्रपाठं विना **प्रेतैतत्तेवासः** इत्युभाभ्यां हस्ताभ्यां पिण्डोपरि धारयेत् ।

प्रेतपितृपितामहप्रपितामहेभ्यः सूत्रदानम्- ततः पितृश्राद्धदेशमागत्य पूर्ववत्सूत्रमादाय - **ॐ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवःपितरःपितरोनमोवोगृहान्नःपितरोदन्तसतोवपितरोदेष्मैतद्वःपितरोवासः ।।** इति मन्त्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं धारयेत् ।

पिण्डपूजनम्

ततः प्रत्येकं पिण्डान् गन्धादिभिः संपूजयेत् ।

प्रेतपिण्डपूजनसङ्कल्पः - कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणनिमित्तकश्राद्धपिण्डे **एतानि सूत्रगन्धपुष्पाक्षतधूदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इति प्रेताय गन्धादिकमुत्सृजेत् ।

प्रेतपितृपितामहप्रपितामहपिण्डपूजनसङ्कल्पः- मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः प्रेतपितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणो

वसुरुद्रादित्यस्वरूपाः (प्रेताश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्र्वः अमुकामुकामुकदेव्यो वसुरुद्रादित्यस्वरूपाः) एतानि पिण्डार्चनानि अत्र सूत्रगन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि युष्मभ्यं स्वधा इति गन्धादिकमुत्सृजेत् ।

ततस्तत्तत्पिण्डसमीपे तत्तत्पिण्डशेषान्नं विकिरेत् ।

जलपुष्पाक्षतार्पणम्- ततः सव्येन **ॐ शिवा आपःसन्तु** इति जलम्, **ॐ सौमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतञ्चारिष्टमस्तु** इति यवान्, वैश्वदेवब्राह्मणपात्रोपरि क्षिपेत् । ततोऽपसव्येन **शिवा आपःसन्तु** इति जलम्, **सौमनस्यमस्तु** इति पुष्पम्, **अक्षतञ्चारिष्टमस्तु** इति तण्डुलान् प्रेतपात्रे क्षिपेत् ।

जलधारादानम्- कुशादिकमादाय- अद्येहामुकगोत्रामुकप्रेत (गोत्रे प्रेते) सपिण्डीकरणश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम् इत्यक्षय्योदकं दत्वा सव्येन **अघोरः प्रेतोस्तु** इति दक्षिणां दिशं पश्यन् पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् ।

दुग्धधारादानम्- ततः सपवित्रान् कुशान् पिण्डोपरि धृत्वा मन्त्रपाठं विना पुटकादिस्थपयआदिना **इदमूर्जं ते मया दीयते तवोपष्ठिताम्** इति दक्षिणाग्रां पयोधारां दद्यात् । दक्षिणादानं विसर्जनञ्चान्ते सहैव भवति ।

प्रेतपिण्डपितृपिण्डसंयोजनम्

प्रतिज्ञासङ्कल्पः- ततः प्रेतपिण्डे स्थितं सूत्रादिकमपनीय अपसव्येन पिण्डं गङ्गाजलेन संस्नाप्य कुशादिकमादाय- अद्येहामुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) पिण्डं तत्पित्रादिपिण्डैः (तच्छ्वश्र्वादिपिण्डैः) सह संयोजयिष्ये इत्युक्त्वा **संयोजय** इत्यनुज्ञां गृह्णीयात् ।

प्रेतपिण्डविभाजनम्- सुवर्णरजतकुशशलाकानामन्यतमां हस्तद्वयेनादाय- **ॐ येसमाना०** इति मन्त्रद्वयं पठित्वा प्रेतपिण्डं त्रिधा विभजेत् । प्रतिभागं मन्त्रद्वयं पठेत् ।

प्रेतपिण्डप्रथमभागस्य प्रेतपितृपिण्डेन सह संयोजनम् - ततो नारायणं स्मरन् प्रेतपिण्डप्रथमभागं दक्षिणहस्तेनादाय- अन्वारब्धेन वामहस्तेन प्रेतपितृपिण्डञ्चादाय वामजानु पातयित्वा दक्षिणाभिमुखो गङ्गागयाकुरुक्षेत्रादीन्संस्मृत्य गणेशविष्णुशिवदुर्गासूर्यगार्हपत्यादीन्नमस्कृत्याधोलिखितान् मन्त्रान् पठेत्।

मन्त्राः- ॐ येसमानाःसमनसःपितरोयमराज्ये । तेषाँल्लोकःस्वधानमोदेवेषुकल्पताम् ।।१।। येसमानाःसमनसोजीवाजीवेषुमामकाः । तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः ।।२।। संसृजन्तुत्वापृथिवीवायुरग्निःप्रजापतिः । संसृजध्वंपूर्वेभिःपितृभिःसह ।।३।। समानीआकूतिःसमानाहृदयानिवः । समानमस्तुवोमनोयथानःसुसहासति ।।४।। सङ्गच्छध्वंसंवदध्वंसँवोमनांसिजानताम् । देवाभागंयथापूर्वेसञ्जानानाउपासते ।।५।। ॐ मधुवाताः० ३ । इति मन्त्रान् पठित्वा अमुकगोत्र अमुकप्रेत(गोत्रे प्रेते) अमुकगोत्रेण स्वपित्राऽमुकशर्मणा वसुस्वरूपेण (अमुकगोत्रया स्वश्वश्नाऽमुकदेव्या वसुस्वरूपया) सह संसृजस्व इति वदन् पितामहपिण्डेन संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कृत्वा पूर्वस्थाने स्थापयेत् ।

प्रेतपिण्डद्वितीयभागस्य प्रेतपितामहपिण्डेन सह संयोजनम् - पुनर्नारायणं स्मरन् प्रेतपिण्डद्वितीयभागं दक्षिणहस्तेनादाय- अन्वारब्धेन वामहस्तेन प्रेतपितामहपिण्डञ्चादाय वामजानु पातयित्वा दक्षिणाभिमुखो गङ्गागयाकुरुक्षेत्रादीन्संस्मृत्य गणेशविष्णुशिवदुर्गासूर्यगार्हपत्यादीन्नमस्कृत्याधोलिखितान् मन्त्रान् पठेत् ।

मन्त्राः- ॐ येसमानाःसमनसःपितरोयमराज्ये । तेषाँल्लोकःस्वधानमोदेवेषुकल्पताम् ।।१।। येसमानाःसमनसोजीवाजीवेषुमामकाः । तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः ।।२।। संसृजन्तुत्वापृथिवीवायुरग्निःप्रजापतिः । संसृजध्वंपूर्वेभिःपितृभिःसह ।।३।। समानीआकूतिः-

समानाहृदयानिवः । समानमस्तुवोमनोयथानःसुसहासति ।।४।। सङ्गच्छध्वंसंवदध्वंसँवोमनांसिजानताम् । देवाभागंयथापूर्वेसञ्जानानाउपासते ।।५।। ॐ मधुवाताः० ३ । इति मन्त्रान् पठित्वा अमुकगोत्र अमुकप्रेत (गोत्रे प्रेते) अमुकगोत्रेण स्वपितामहेनामुकशर्मणा रुद्रस्वरूपेण (अमुकगोत्रया स्ववृद्धश्वश्र्वाऽमुकदेव्या रुद्रस्वरूपया) सह संसृजस्व इति वदन् प्रपितामहपिण्डेन संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कृत्वा पूर्वस्थाने स्थापयेत्।

प्रेतपिण्डतृतीयभागस्य प्रेतप्रपितामहपिण्डेन सह संयोजनम् - पुनर्नारायणं स्मरन् प्रेतपिण्डतृतीयभागं दक्षिणहस्तेनादाय- अन्वारब्धेन वामहस्तेन प्रेतप्रपितामहपिण्डञ्चादाय वामजानु पातयित्वा दक्षिणाभिमुखो गङ्गागयाकुरुक्षेत्रादीन्संस्मृत्य गणेशविष्णुशिवदुर्गासूर्यगार्हपत्यादीन्नमस्कृत्याधोलिखितान् मन्त्रान्-घठेत् ।

मन्त्राः- ॐ येसमानाःसमनसःपितरोयमराज्ये । तेषाँल्लोकःस्वधानमोदेवेषुकल्पताम् ।।१।। येसमानाःसमनसोजीवाजीवेषुमामकाः । तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः ।।२।। संसृजन्तुत्वापृथिवीवायुरग्निःप्रजापतिः । संसृजध्वंपूर्वेभिःपितृभिःसह ।।३।। समानीआकूतिःसमानाहृदयानिवः । समानमस्तुवोमनोयथानःसुसहासति ।।४।। सङ्गच्छध्वंसंवदध्वंसँवोमनांसिजानताम् । देवाभागंयथापूर्वेसञ्जानानाउपासते ।।५।। ॐ मधुवाताः० ३ । इति मन्त्रान् पठित्वा अमुकगोत्र अमुकप्रेत (गोत्रे प्रेते) अमुकगोत्रेण स्वप्रपितामहेनामुकशर्मणादित्यस्वरूपेण (अमुकगोत्रया स्ववृद्धतरश्वश्र्वाऽमुकदेव्या आदित्यस्वरूपया) सह संसृजस्व इति वदन् वृद्धप्रपितामहपिण्डेन संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कृत्वा पूर्वस्थाने स्थापयेत् ।

ततः पिण्डमेलनानन्तरं पितृप्रार्थनां कुर्यात् ।

पितृप्रार्थना-

एष वोऽनुगतः प्रेतः पितरस्तं ददामि वः (पितृभागमवाप्तवान्)।
शुभं भवतु शेषाणां जायन्तां चिरजीविनः ।।

समानीवआकूतिःसमानाहृदयानिवः । समानमस्तुवोमनोयथानः-सुसहासति ।।१।। सङ्गच्छध्वंसवदध्वंसवोमनांसिजानताम् । देवाभागं-यथापूर्वेसंजानानाउपासते ।।२।। इति मन्त्रान् पठन् पिण्डानभिमृशेत्।

पिण्डत्रयार्चनम्- ततः पितृपूर्वकं पितामहादीनुद्दिश्य गन्धपुष्पधूपदीपनैवेद्यादिभिः पिण्डत्रयमर्चयेत् ।

सङ्कल्पः- मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः (मातुरमुकदेव्या) सपिण्डकिरणश्राद्धपिण्डेषु अमुकगोत्राः पितुः पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणो वसुरुद्रादित्यस्वरूपाः (मातुः श्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्र्वोऽमुकामुकामुकदेव्यो वसुरुद्रादित्यस्वरूपाः) एतानि गन्धपुष्पधूपदीपनैवेद्यादीनि युष्मभ्यं स्वधा इति गन्धादिकमुत्सृजेत् ।

(केचित्तु प्रेतपिण्डावयवत्रयेण योजिताँस्त्रीन् पिण्डानिदानींतनमृतपुरुषमारभ्य पुरुषत्रयाय पार्वणे पुनरपि नामगोत्राद्युच्चार्य दद्यादित्याहुः ।)।

जलपुष्पाक्षतार्पणम्- ततः पितामहादिपात्रेषु क्रमेणप्रत्येकम् **ॐ शिवा आपःसन्तु** इति जलम्, **ॐ सोमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतञ्चारिष्टमस्तु** इति तण्डुलान् दद्यात् ।

शिरस्यभिषेकः- ततः सव्यं कृत्वा कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्- **ॐ अस्मत्कुलेदीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यद्यच्छ्रेयस्तदस्तु, ॐ यत्पापं तत्प्रतिहतमस्तु,** इति भूमौ, **ॐ द्विपदेचतुष्पदेभ्यः शान्तिरस्तु** इति शिरसि ।

अक्षय्योदकदानम्

पितामहायाक्षय्योदकदानम्- ततोऽपसव्यं कृत्वा मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य पितुः पितुरमुकशर्मणो वसुस्वरूपस्य (अमुकगोत्राया मातुःश्वश्रा अमुकदेव्या वसुस्वरूपायाः) दत्तैतदन्नपानादिकमक्षय्यमस्तु इति पितामहायाक्षय्योदकं दद्यात् ॥१॥

प्रपितामहायाक्षय्योदकदानम्- पुनर्मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य पितुः पितामहस्यामुकशर्मणो रुद्रस्वरूपस्य (अमुकगोत्राया मातुर्वृद्धश्वश्रा रुद्रस्वरूपायाः) दत्तैतदन्नपानादिकमक्षय्यमस्तु इति प्रपितामहायाक्षय्योदकं दद्यात् ॥२॥

वृद्धप्रपितामहायाक्षय्योदकदानम्- पुनर्मोटकादिकमादाय- ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य पितुः प्रपितामहस्यामुकशर्मण आदित्यस्वरूपस्य (अमुकगोत्राया मातुर्वृद्धतरश्वश्रा अमुकदेव्या आदित्यस्वरूपायाः) दत्तैतदन्नपानादिकमक्षय्यमस्तु इति वृद्धप्रपितामहायाक्षय्योदकं दद्यात् ॥३॥

पिण्डोपरि जलधारादानम्- ततः सव्येन कृताञ्जलिर्दक्षिणां दिशमवलोकयन् **ॐ अघोराः पितरः सन्तु,** इत्युक्त्वा **सन्तु** इति प्रतिवचनम् । ततः पिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात् ।

आशीःप्रार्थना-सव्येनैव प्राङ्मुख आशिषः प्रार्थयेत् - **ॐ गोत्रं नो वर्द्धताम्, ॐ वर्द्धताम्** इति प्रतिवचनम् । **ॐ दातारो नोऽभिवर्द्धन्ताम्, ॐ वर्द्धन्ताम्** इति प्रतिवचनम् । **ॐ वेदा वर्द्धन्ताम्, ॐ वर्द्धन्ताम्** इति प्रतिवचनम् । **ॐ सन्ततिर्वर्द्धताम्, ॐ वर्द्धताम्** इति प्रतिवचनम्। **ॐ श्रद्धा च नो मा व्यगमत्, ॐ मागात्** इति प्रतिवचनम्। **ॐ बहुदेयं**

च नोऽस्तु, ॐ अस्तु इति प्रतिवचनम् । **ॐ अन्नं च नो बहुर्भवेत्, ॐ भवतु** इति प्रतिवचनम् । **ॐ अतिथींश्च लभेमहि, ॐ लभध्वम्** इति प्रतिवचनम् । **ॐ याचितारश्च नः सन्तु, ॐ सन्तु** इति प्रतिवचनम् । **ॐ मा याचिष्म कञ्चन, ॐ मा याचेथाः** (मा याचध्वम्) इति प्रतिवचनम्। **ॐ एता आशिषः सत्याः सन्तु, ॐ सन्तु** इति प्रतिवचनम् ।

तिलककरणम्- ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्- **ॐ यंकामंकामयतेसोस्मैकामःसमृद्ध्यताम् ।।** इति मन्त्रेण ।

स्वधावाचनम्

अपसव्येन पिण्डोपरि सपवित्रान् कुशानास्तीर्य **ॐ स्वधां वाचयिष्ये** इति ब्राह्मणान्प्रार्थ्य, **ॐ वाच्यताम्** इत्यनुज्ञातः सन् स्वधावाचनं कुर्यात्।

ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणःसपिण्डीकरणनिमित्तकश्राद्धे (गोत्राया मातुर्देव्याः) अमुकगोत्रेभ्यः पितुः पितृभ्योऽमुकशर्मभ्यो वसुस्वरूपेभ्यः (अमुकगोत्राभ्यो मातुःश्वश्रूभ्योऽमुकदेवीभ्यो वसुस्वरूपाभ्यः) स्वधोच्यताम् अस्तु स्वधा। एवमेव पितुः पितामहेभ्यः (मातृवृद्धश्वश्रूभ्यः) इत्यादि वाक्यं कृत्वा प्रपितामहाय दत्त्वा तथैव पितुः प्रपितामहेभ्यः (मातुर्वृद्धतरश्वश्रूभ्यः) इत्यादिवाक्येन वृद्धप्रपितामहाय स्वधावाचनं कुर्यात्, **अस्तु स्वधा** इति सर्वत्र प्रतिवचनम् ।

दुग्धधारादानम्- ततो वामहस्ते दुग्धसहितं पुटकं गृहीत्वा- **ॐ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पयःकीलालम्परिस्रुतम् । स्वधास्थतर्पयतमेपितॄन् ।।** इति मन्त्रेण सपवित्रकुशपिण्डोपरि दक्षिणाग्रां पयोधारां दद्यात् ।

पिण्डोत्थापनम्- ततः सव्येन नम्रीभूय पिण्डानाघ्राय अपसव्येनोत्थापयेत्। पिण्डाधारकुशानुल्मूकञ्च वह्नौ क्षिपेत् ।

पिण्डिकायां शङ्खचक्रपूजनम्- ततः सव्येन पिण्डिकायां शङ्खं चक्रञ्च

विलिख्य- **ॐ शङ्खाय नमः, ॐ चक्राय नमः** (कर्पूरदीपदानम्) इति यवैः शङ्खचक्रपूजां कुर्यात् । (अत्र कर्पूरदानमप्याचरन्ति ।)

वसन्तादिपूजनम् - अपसव्येन तूष्णीमेव पिण्डान् पिण्डिकोपरि निधाय पूजयेदेभिर्मन्त्रैः सव्येन-

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ।
वर्षाभ्यश्च शरत्संज्ञऋतवे च नमो नमः ।।
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ।। इति ।

वैश्वदेविकश्राद्धदक्षिणा - ततः सव्येन विश्वदेवार्घपात्रं सञ्चाल्य अपसव्येन पित्र(मात्र)र्घपात्रं संचाल्य पितामहा(पितामह्या)द्यर्घपात्राण्युत्तानीकृत्य सव्येन दक्षिणां दद्यात् । ततः कुशयवजलसहितदक्षिणाद्रव्यमादाय- ॐ अद्येहामुकगोत्रस्यपितुरमुकशर्मणः(गोत्राया मातुर्देव्याः) सपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्राणां पितुः पितामहप्रपितामहवृद्धप्रपितामहानाममुकामुकामुकशर्मणां (मातुः श्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूणाममुकामुकामुकदेवीनां) वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां कालकामसंज्ञकानां विश्वेषां देवानां कृतैतच्छ्राद्धप्रतिष्ठासिद्ध्यर्थं हिरण्यमग्निदैवतं (तन्मूल्योपकल्पितं द्रव्यममुकदैवतं) यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति वैश्वदेविकश्राद्धदक्षिणां दद्यात् ।

पितृश्राद्धदक्षिणा- ततः सव्येनैव कुशादिसहितदक्षिणाद्रव्यमादाय- ॐ अद्येहामुकगोत्रस्य पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठासिद्ध्यर्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति पितृश्राद्धदक्षिणां दद्यात् ।

भूयसीदक्षिणा- पुनः कुशादिसहितं दक्षिणाद्रव्यमादाय- ॐ अद्येहामुकगोत्रस्य पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) सपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्राणां पितुः पितामहप्रपितामहवृद्धप्रपितामहानाममुकामुका-

मुकशर्मणाम् अमुकगोत्राणां (मातुःश्वश्रूवृद्धश्वश्रूवृद्धतरश्वश्रूणाममुकामुकामुकदेवीनां) वसुरुद्रादित्यस्वरूपाणां कृतैतच्छ्राद्धप्रतिष्ठासिद्ध्यर्थमिदं रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दक्षिणां दातुमहमुत्सृजे इति पितामहादिश्राद्धदक्षिणां दद्यात् । **ॐ स्वस्ति** इति प्रतिवचनं सर्वत्र।

ब्राह्मणविसर्जनम्

प्रेतब्राह्मणविसर्जनम्- ततः सव्येनैव **अभिरम्यताम्** इति प्रेतब्राह्मणं विसर्जयेत्।

पितामहादिब्राह्मणविसर्जनम्- सव्येनैव- (**ॐ उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहेपप्रयन्तुमरुतःसुदानवइन्द्रप्राशूर्भवासचा** ।। इति पितामहादिब्राह्मणमुत्थापयेत् ।

विश्वेदेवब्राह्मणविसर्जनम् - ततस्तेनैव मन्त्रेण विश्वेदेवब्राह्मणमुत्थाप्य- **ॐ आमावाजस्यप्रसवोजगम्यादेवेद्यावापृथिवीविश्वरूपे। आमागन्तांपितरामातराचामासोमोऽअमृतत्वेनगम्यात्।**। इति त्रिर्वारिधारया वेष्टयेत् ।

पितामहादिविसर्जनम्- ॐ वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाःअस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः।। इति पितामहादीन् विसृजेत् ।

विश्वेदेवविसर्जनम्- ॐ कालकामसंज्ञका विश्वेदेवाः प्रीयन्ताम् इति विश्वेदेवविसर्जनं कुर्यात् ।

ब्राह्मणप्रार्थना- पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशजातं चित्तात्तु विस्मृत्य क्षन्तुमर्हथ ।।

इति ब्राह्मणान् प्रार्थयेत् ।

पवित्रग्रन्थिमोचनम्- ततः **ॐ मुञ्चन्तुमाशपथ्यादथोवरुण्यादुत । अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात्** ।। इति पवित्रग्रन्थीन् विमुञ्चेत्।

ॐ देवताभ्यः इति त्रि:पठेत् ।

दीपाच्छादनम्- ततः **ॐ त्रीन्त्समुद्रान्त्समसृपत्स्वर्गानपाम्पतिर्वृषभइष्टकानाम् । पुरीषंवसानःसुकृतस्यलोकेतत्रगच्छयत्रपूर्वेपरेताः ।।** इति मन्त्रेण अपसव्येन दीपाच्छादानं विधाय सव्येन हस्तौ पादौ प्रक्षाल्याचम्य विष्णुस्मरणं कुर्यात् ।

सविष्णुस्मरणमच्छिद्रवाचनम्-

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ।।

ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतं तत् श्रीविष्णोः प्रसादाद् ब्राह्मणवचनाच्च **सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्** इति प्रतिवचनम् । **ॐ यस्य स्मृत्या० चतुर्भिश्च चतुर्भिश्च० कायेन वाचा०** इति पठित्वा अनेन सपिण्डीकरणश्राद्धकर्मणा श्रीभगवान्यज्ञपुरुषः प्रीयताम्, **ॐ तत्सन्न मम** इति वदेत् । श्राद्धीयवस्तूनि ब्राह्मणाय दद्यात् । पिण्डान् जले प्रतिपादयेत् ।

इति सपिण्डीकरणश्राद्धप्रयोगः ।

सहगमने विशेषः

तत्र क्रमः- सहगमनेतु पित्रेकोदिष्टवन्मात्रेकोद्दिष्टं सहैव विधाय पित्रर्घपात्रपितामहार्घपात्रे मेलयित्वा- ॐ अद्येहामुकगोत्राया मातुरमुकप्रेताया अर्घपात्रोदकममुकगोत्रस्वभर्तुरर्घपात्रोदकेन संयोजयिष्ये इत्युक्त्वा मात्रर्घपात्रं गृहीत्वा पूर्वोक्तमन्त्रान् पठित्वा- पित्रर्घपात्रस्थतृतीयभागजलं गन्धयुतपितामहार्घपात्रस्थजले मेलयित्वा पिण्डसंयोजनसङ्कल्पं कुर्यात् ।

पितृपिण्डसंयोजनसङ्कल्पः - अमुकगोत्रे मातरमुकप्रेते अमुकगोत्रेण

स्वभर्त्राऽमुकशर्मणा सह सायुज्यं गच्छ इति वदेत् ।

मातृपिण्डसंयोजनसङ्कल्पः- एवं पितृपिण्डसंयोजनानन्तरं मातृपिण्डसंयोजनं कुर्यात् - ॐ अद्येहामुकगोत्राया मातुरमुकप्रेतायाः पिण्डं स्वभर्तृपिण्डेन संयोजयिष्ये, इत्युक्त्वा मातृपिण्डमादाय- ॐ अद्येहामुकगोत्रे मातरमुकप्रेते अमुकगोत्रेण स्वभर्त्राऽमुकशर्माणा सह संसृजस्व इति वदन्, पितृपिण्ड-प्रथमभागयुक्ते पितामहपिण्डे मेलयित्वा दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ।

मातृश्राद्धे दक्षिणावाक्यं पृथक् कुर्यात् ।

दक्षिणा- सव्येन कुशादिसहितं दक्षिणाद्रव्यमादाय- **ॐ अद्येहामुकगोत्राया-मातुरमुकदेव्याः कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठासिद्ध्यर्थमिदंरजतमि-त्यादि** इति विशेषः ।

सहगमनाभावे तु पितामह्यादिपिण्डत्रये मातृपिण्डभागत्रयं संयोजयेत्। मृतमातृको मात्रादिपिण्डत्रये पत्न्याः पिण्डभागत्रयं सयोजयेत् । अमृतमातृकस्तु पितामह्यादिपिण्डत्रये पत्न्याः पिण्डं संयोजयेदिति ।

ततो दीपकलशौ संस्थाप्य- **गणानान्त्वे**ति मन्त्रेण गणेशं पूजयित्वा **वक्रतुण्डे**ति प्रार्थयेत् ।

इति सपिण्डीकरणश्राद्धविधिः ।

सपिण्डनोत्तरपाथेयश्राद्धम्

प्रयोगः- तच्च सपिण्डीकरणानन्तरं द्वादशेऽह्नि त्रयोदशे वा पुनः पाथेयश्राद्धं कार्यम् । तच्च एकोद्दिष्टविधिना यथाचारं सिद्धान्नेनामान्ने वा कुर्यात् ।

तत्र **क्रमः-** कर्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितं प्रज्वलितदीपं स्थापितगौरसर्षपतिलादिरक्षोघ्नं श्राद्धदेशमागत्य कुशबटुं तैलाभ्यङ्गपूर्वकं संस्नाप्य **मनोजूति**रितिमन्त्रेण प्रतिष्ठाप्य च अपसव्येन निमन्त्रयेत् । **निमन्त्रितोस्मी**ति प्रत्युक्ते **अक्रोधनै**रित्यादिनियमान् श्रावयेत् ।

पादार्घदानं स्वागतप्रश्नपूर्वकमासनदानञ्च कुर्यात् ।

कर्मपात्रनिर्माणम्- ततो यद्देवाः इत्यादिमन्त्रत्रयेण कर्मपात्रं संस्थाप्य । तत्र **पवित्रेस्थः** इति पवित्रम्, **शन्नोदेवीरि** जलम्, **तिलोसी**ति तिलान्, **गन्धद्वारा**मिति गन्धम्, **श्रीश्चते** इति पुष्पम्, **अक्षन्नमीमदन्ते**त्यक्षतान्, कर्मपात्रे क्षिपेत् ।

सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय- **ॐ अपवित्रः पवित्रोवा०, ॐ पुण्डरीकाक्षः पुनातु** इत्युक्त्वा श्राद्धदेशद्रव्याण्यात्मानञ्च सिञ्चेत् ।

प्रतिज्ञासङ्कल्पः- कुशादिकमादाय- ॐ अद्येहेत्यादि० अमुकगोत्रस्यास्मत्पितुरमुकशर्मणः(गोत्राया देव्याः)प्रेतलोकात्पितृलोकगमने सुखसिद्ध्यर्थं पाथेयश्राद्ध-मेकोद्दिष्टविधिनाहं करिष्ये इति ।

देवताभ्यः इति त्रिः पठित्वा **सप्तव्याधा०** इत्यादि पठेत् । ततोऽपसव्येन दिग्बन्धननीवीबन्धने कुर्यात् ।

आसनम्- ततो दक्षिणाभिमुखः पातितवामजानुस्तिलजलसहितं मोटकमादाय- ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) पाथेयश्राद्धे

इदं मोटकरूपमासनं तेऽस्तु ।

हस्तार्घः- ततः पुटके प्रादेशमात्रं पवित्रमुत्तराग्रम् **ॐ पवित्रेस्थोवैष्णव्यो०** इति मन्त्रेण क्षिप्त्वा, **शन्नोदेवी**रिति जलम्, **तिलोसी**ति तिलान्, **गन्धद्वारा**मिति गन्धम्, **श्रीश्चते** इति पुष्पम्, **अक्षन्नमीमदन्त**ेत्यक्षतान् क्षिपेत् । ततस्तदर्घपात्रं वामहस्ते कृत्वा- **ॐ नमो नारायणाय** इति मन्त्रेण पुष्पसहितं पवित्रमुत्तराग्रं विप्रकरे धृत्वा दक्षिणहस्तेन तन्मुखमाच्छाद्य- **ॐ यादिव्याः** इत्यादिनाऽर्घपात्रस्थजलमभिमन्त्र्य मोटकादीन्यादाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रास्मत्पितः अमुकशर्मन् (गोत्रे मातर्देवि) पाथेयश्राद्धे एष हस्तार्घस्तेऽस्तु इति ।

ततः पवित्रसहितमर्घपात्रं **ॐ पित्रे स्थानमसि** इति विप्रवामपार्श्वे न्युब्जं कुर्यात्, तदुपरि कुशत्रयं दद्यात् ।

गन्धपुष्पाक्षतादिभिः पूजनम्- ततो गन्धादिना संपूज्य मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (गोत्रे मातर्देवि) पाथेयश्राद्धे **एतानि गन्धपुष्पाक्षतधूपदीपपूगीफलद्रव्यवासांसि ते स्वधा** ।

चतुष्कोणमण्डलनिर्माणम्- ततः सव्येनाचम्यापसव्येन आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु वामावर्तेन यथा- **चक्रायुधो विष्णुः०** इत्यादिना चतुरस्रं मण्डलं जलेन कुर्यात् ।

भूस्वामिनेऽन्नदानम्- तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय- **ॐ इदमामान्नं सजलमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत् ।

अन्नदानम्- ततो व्यञ्जनसहितं तिलघृतमधुजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य **ॐ पृथिवी ते पात्रम्- जुहोमि** इत्यन्तम् **इदंविष्णुःपांᳬसुरे** इत्यन्तं पठित्वा **ॐ अपहता** इत्यादिना श्राद्धदेशे प्रचुराँस्तिलान्विकीर्य **ॐ इदमन्नम् ॐ इमा आपः ॐ इदमाज्यम् ॐ इदं हविः** पुनरन्ने **ॐ एतान्युपकरणानी**ति क्रमेणान्नजलघृतादिषु

विप्रदक्षिणाङ्गुष्ठं निवेश्य मोटकादीन्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा अन्नसङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ अद्येहामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे (गोत्रायै मात्रे देव्यै) **इदमन्नं सोपकरणं ते स्वधा** इति । ततो भूमावेव मोटकादिकमुत्सृजेत् ।

मधुवातादिपाठः- ततः सव्यं कृत्वा **मधुवाता** इत्यादि त्र्यृचं **ॐ मधु मधु मधु, अन्नहीन**मित्यादि च पठेत् ।

विकिरासनम्- ततोऽपसव्येनान्नपात्रसमीपे दक्षिणस्यां भूमौ कुशानास्तीर्य **असँस्कृतप्रमीताना**मित्यादिना तिलजलयुतमोटकरूपमासनं दद्यात् ।

विकिरान्नदानम्- तिलघृतमधुयुतमन्नमादाय जलेनाप्लाव्य मोटकादीन्यादाय-**अग्निदग्धाश्च** इति मन्त्रेणोत्सृजेत् ।

गायत्र्यादिजपः- ततः कुशान् परित्यज्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य विष्णुं स्मृत्वा त्रिर्गायत्रीं जपित्वा **मधुवाता** इत्यादि पठेत् ।

पिण्डिकानिर्माणं सँस्कारश्च- ततोऽपसव्येन अन्नपात्रसमीपे पिण्डदानार्थं सिकतादिना पिण्डिकां विधाय दर्भपिञ्जुलीं गृहीत्वा **अपहता॰** इति मन्त्रेण तदुपरि दक्षिणाग्रां रेखां कृत्वा दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् । **ये रूपाणी**त्यङ्गारं भ्रमयित्वा दक्षिणस्यां क्षिपेत् ।

ततो वेदिकायां छिन्नमूलकुशानास्तीर्य सव्येन **देवताभ्यः** इति त्रिः पठेत् ।

अवनेजनदानम्- अपसव्यं कृत्वा मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (गोत्रे मातर्देवि) पाथेयश्राद्धे पिण्डस्थानेऽत्रावनेनिक्ष्य इत्यास्तृतकुशोपर्यवनेजनं दद्यात् ।

पिण्डदानम्- ततस्तिलघृतमधुयुक्तेनान्नेन पिण्डं निर्माय तिलजलमोटकादिसहितं पिण्डमादाय- ॐ अद्येहामुकगोत्रास्मत्पितरशर्मन् (गोत्रे मातर्देवि)

पाथेयश्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा इत्यवनेजनोपरि पिण्डं दद्यात् ।

पितृध्यानम् - करं प्रोक्ष्य सव्येनाचम्य गन्धपुष्पादीन्यादाय पितरमुद्दिश्य- **ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वम् ।।** इत्युत्तराभिमुखो भूत्वा श्वासं नियम्य भास्करमूर्तिं पितरं ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा- **ॐ अमीमदन्तपितरोयथाभागमावृषायिषत ।।** इति मन्त्रेन पुष्पादीनि पिण्डे क्षिपेत् ।

प्रत्यवनेजनम्- ततो मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (गोत्रे मातर्देवि) पाथेयश्राद्धे पिण्डे इदं प्रत्यवनेजनं ते स्वधा इति प्रत्यवनेजनं पिण्डोपरि दद्यात् ।

सूत्रदानम् - ततो नीवीं विस्रस्य सव्येनाचम्यापसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय- **ॐ नमोवः पितर** इति मन्त्रेण पिण्डोपरि दद्यात्।

पिण्डपूजनम्- गन्धादिभिः पिण्डं संपूज्य धूपदीपौ च कारयेत् । मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् (गोत्रे मातर्देवि) पाथेयश्राद्धे पिण्डे **एतानि सूत्रगन्धापुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि ते स्वधा** इति गन्धादीन्युत्सृजेत् ।

जलपुष्पाक्षतार्पणम्- ततो विप्रकरे- **ॐ शिवा आपःसन्तु** इति जलम्, **ॐ सौमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतं चारिष्टमस्तु** इति तण्डुलान् दद्यात् ।

अभिषेकः- सव्यं कृत्वा कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत् । **ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, यच्छ्रेयस्तदस्तु, ॐ यत्पापं तत्प्रतिहतमस्तु** इति भूमौ **ॐ द्विपदेचतुष्पदेभ्यः सुशान्तिर्भवतु** इति शिरसि ।

अक्षय्योदकदानम्- अपसव्येन मोटकादीन्यादाय- ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) पाथेयश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु इत्यक्षय्योदकं दद्यात् ।

जलधारादानम्- सव्येन दक्षिणां दिशं पश्यन्- **ॐ अघो(रामा)रः पितास्तु** प्रार्थयित्वा अस्तु, इति प्रत्युक्ते पूर्वाग्रां जलधारां दद्यात् ।

आशीःप्रार्थना- सव्येनैव **ॐ गोत्रं नो वर्द्धताम्** इत्याद्यादिशिषः प्रार्थयेत्। **ॐ वर्द्धताम्** इत्यादि प्रतिवचनम् ।

तिलककरणम्- ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्- **ॐ यं कामम्** इत्यादिना ।

दुग्धधारादानम्- ततोऽपसव्यं कृत्वा सपवित्रान्कुशान्न्युब्जपात्रोपरि स्थितान् पिण्डोपरि आस्तीर्य दुग्धादिसहितं पुटकं वामहस्ते कृत्वा- **ॐ ऊर्ज्जंवहन्तीः०** इति मन्त्रेण दक्षिणाग्रां पयोधारां पिण्डोपरि दद्यात् ।

पिण्डोत्थापनं शङ्खचक्रपूजनञ्च- ततो नम्रीभूय सव्येन पिण्डमाघ्रायापसव्येनोत्थापयेत् । सव्येन पिण्डिकायां शङ्खं चक्रं विलिख्य **ॐ शङ्खाय नमः, ॐ चक्राय नमः,** इति यवैः शङ्खचक्रपूजां कुर्यात् (कर्पूरदीपदानम्) ।

वसन्तादिपूजनम्- अपसव्येन तूष्णीमेव पिण्डं पिण्डिकोपरि निधाय सव्येन **वसन्ताय नमस्तुभ्यम्** इत्यादिभिर्मन्त्रैः पूजयेत् ।

दक्षिणा- अपसव्येनार्घपात्रमुत्तानीकृत्य सव्येन कुशादिसहितं दक्षिणाद्रव्यमादाय- ॐ अद्येहामुकगोत्रस्यात्मत्पितुरमुकशर्मणः (गोत्राया मातुर्देव्याः) कृतैतत्पाथेयश्राद्धप्रतिष्ठार्थमिदं रजतं तन्निष्क्रयद्रव्यममुकदैवतं वा यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ।

पितृविसर्जनम् - ततः सव्येनैव **वाजेवाजे॰** इति पितृविसर्जनं कुर्यात्। ततो **मुञ्चन्तु मा॰** इति मन्त्रेण कुशबटुग्रंथिमोचनं कुर्यात् ।

पितृदेवस्मरणम्- ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

इति त्रिः पठेत् ।

अपसव्येन **त्रीन्समुद्रान्** इति मन्त्रेण दीपमाच्छादयेत् ।

अच्छिद्रवाचनम्- सव्येन हस्तौ पादौ प्रक्षाल्याचम्य इति पठेत् -

ॐ यत्कृतं तत्सुकृतमस्तु यन्न कृतं तच्छ्रीविष्णोः प्रसादाद् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु । ॐ अस्तु परिपूर्णम् । इति प्रतिवचनम्।

अच्युतप्रार्थना- ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।
आयुः प्रजां धनं विद्यां स्वर्गमोक्षमुखानि च ।
प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः ।।
ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

ॐ अच्युताय नमः ३ ।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।।

कर्मसमर्पणम्-

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायैव समर्पयामि ।।

इति कर्मेश्वरार्पणं कुर्यात् ।

अनेन पाथेयश्राद्धकर्मणा श्रीभगवान् यज्ञपुरुषः प्रीयताम् ॐ तत्सन्न मम इति वदेत् । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् । पिण्डञ्च जले क्षिपेत् । इति पाथेयश्राद्धम् ।

— इत्यन्त्यकर्मपद्धतिः —

❖

इति श्रीविद्वन्मण्डलमार्तण्डपरःसहस्रशिष्यमण्डलीलालितचरणयुगलदधिराममरासिनिलिखिते कर्मकाण्डभास्करे श्राद्धखण्डः सम्पूर्णः ।

❖

ॐ

यशोदातनयीभूतां गोकुले माधवेच्छया ।
श्रीविन्ध्यवासिनीं दुर्गां नुमोऽतीन्द्रियविग्रहाम् ।।
कर्मकाण्डविधौ नित्यमुदितस्य यतात्मनः ।
वासनामस्य लोकस्य देवि स्य श्रद्धयाऽर्चतः ।।

- सम्पादकाः

- परिशिष्ट -

पं दधिराममरासिनिद्वारा लेखिएका कर्मकाण्डपद्धतिहरूका केही पत्रहरूलाई नमूनाको रूपमा तल प्रस्तुत गरिएको छ। यसबाट लेखकको लेखनशैली बारे पाठकहरूलाई जानकारी हुने र अनुसन्धाताहरूलाई तत्कालिक कर्मकाण्डप्रयोग र वैदिकस्वर-प्रयोग सम्बन्धी महत्त्वपूर्ण जानकारी हुने छ भन्ने कुरामा हामी विश्वस्त छौं। - सम्पादकसमूह

— ० —



प

श्रीगणेशायनमः अथान्त्यकर्मपद्धतिः प्रारभ्यते सत्यधरतनूजेनरामोपाध्यायसूरिणा नत्वाविघ्नेश्वरंदेवंक्रि
यतेचान्त्यपद्धतिः आसन्नमरणंपित्रादिकंपुत्रादिस्तीर्थादौनीत्वाव्रतोद्यापनसर्वप्रायश्चित्तदशदानादिका
रयेत् स्वयंवातदन्वारब्धःकुर्यात् तत्रादौव्रतोद्यापनानुकल्पः अथमंत्रब्राह्मणानाहूय स्नानेनमार्जनेनगं
गाजलप्राशनादिनावारोगिणः शुद्धिंविधाय पुत्रादिः स्वयमपिकृतवपनस्नानादिर्नित्यकर्मकृत्वादीपंप्रज्व
ल्याचम्यगणेशंनमस्कृत्यशुक्लाम्बरधरमितिविष्णुंप्रार्थ्ययवतिलकुशजलगंधाक्षतपुष्पैः कर्मपात्रंसं
पाद्यसुवर्णादिद्रव्यंपुरतःसंस्थाप्य ॐ देयद्रव्यायनमः हिरण्यगर्भगर्भस्थमितिगंधपुष्पाक्षतैःसंपूज्यहस्तेक
र्मपात्रतःकुशतिलजलान्यादाय ॐ तत्सत् ३ ॐ विष्णुः ३ नमःपरमात्मनेश्रीपुरुषोत्तमाय देशकालादिसंकीर्त
नान्तेऽमुकगोत्रोऽमुकप्रवरः माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायी अमुकराशिरमुकशर्माहंममा
त्मनः (ममपित्रादेः) व्रतग्रहणदिवसादारभ्य अद्ययावत्फलाभिलाषादिगृहीतानांनिष्कामतयागृहीतानांच

राम



भाव:प्र:

त

स्येहाभवत्पुनः। ततो बिष्वुङ्ङ्व्यक्रामत्साशनानशने ऽअभि.४ ततौ बिराडजायत बिराजो ऽअधिपूरुषः॥
सजातो ऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः.५ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम्। पशूँस्तांश्चक्रे
वायव्यानारण्याग्राम्याश्च ये.६ तस्माद्यज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे त
स्माद्यजुस्तस्मादजायत.७ तस्मादश्वा ऽअजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जा
ता ऽअजावयः.८ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः। तेन देवा ऽअयजन्त साध्या ऽऋषयश्च
ये.९ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत्किं बाहू किमूरू पादा ऽउच्येते.१० ब्रा
ह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो ऽअजायत.११ चन्द्र
मा मनसो जातश्चक्षोः सूर्यो ऽअजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत. १२ नाभ्या ऽआसी
दन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ ऽअकल्पयन्. १३ यत्पुरुषेण

रा.म:

॥११॥



स्याभिचक्षेसूर्य्यो रूपंकृणुते द्योरुपस्थे॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति· १२ बण्म
हाँ२॥ऽअसिसूर्य्य बडादित्यमहाँ२॥ऽअसि॥ महस्तेसतोमहिमापनस्यतेऽद्धादेवमहाँ२॥ऽअसि· १३ बट्सूर्य्य
श्रवसामहाँ२॥ऽअसिसत्रादेवमहाँ२॥ऽअसि॥ मह्नादेवानामसुर्य्यः ÷ पुरोहितोविभुज्ज्योतिरदाभ्यम्· १४ आ
यन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत॥ वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम· १५ अद्या
देवाऽउदितासूर्य्यस्यनिरंहसःपिपृतानिरवद्यात्॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउ
तद्यौः· १६ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ययेनसवितारथेनादेवोयातिभु
वनानिपश्यन्· ७ ॐ सहस्रशीर्षापुरुषः सहस्राक्षःसहस्रपात्॥ सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गु
लम्· १ पुरुषएवेदꣳसर्वंयद्भूतंयच्चभाव्यम्॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति· २ एतावानस्य
महिमातोज्यायाँश्चपूरुषः॥ पादोऽस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि· ३ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादो

श्रा॰प्र॰

२६

नेताहरे· हेरामहेरामराममं[illegible]हेहरे· हेकृष्णहेकृष्णकृष्णकृष्णहेहरे· यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु·न्यू
नंसंपूर्णतांयातिसद्योवन्देतमच्युतम्· ॐ अच्युतायनमः ३ ॐ कायेनवाचामनसेन्द्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभा
वात्· करोमियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयामि· ॐ तत्सद्ब्रह्मार्पणमस्तु· एवमुत्सर्गंविधायत्रिरात्रंगुरुगृहे सर्वेशि
ष्याणिवसेयुः· उत्स॰ ॥ त्रिरात्रमध्ययनंनकुर्युः· ततोनखलोम्नांवपनम्· एकेप्रागुत्सर्गात्· इतिश्रावणीप्रयोगः समाप्तः
सं॰ १९९५ मार्गशीर्ष शुक्लषष्ठ्यांसोमवासरेलिखितमिदंपुस्तकंधनञ्जयगोत्रोत्पन्नेनदधिरामशर्मणाद्वि

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi